कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 2043 विषय महाभारत
नाव. आपत्धर्म, मोक्षधर्म (शान्तिपर्वणि) MSS
लेखक/लिपीकार शंकर पंडित
पृष्ठ 247. काळ — पूर्ण/~~अपूर्ण~~

Checked 2012

॥: शांतौ आपद्धर्मारंभः ॥ १३

॥ शंकरपंडितस्येदं पुस्तकं ॥

स्वायत्तमुक्तान्यग्रामनगरा
दानस्य

अलसस्य २ पापीयदि ४ क्र २

धान्यकोशादिसंग्रहरहितस्य २ बंधुत्वयभुया तद्दुर्गात् बहिर्निर्गमस्य युद्धं कर्तुं समर्थस्य २

अगुप्तमंत्रस्य २

श्रीगणेशाय नमः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ ॥युधि
ष्ठिर उवाच ॥ ॥ क्षीणे दीर्घसूत्रस्य सानुक्रोशस्य बंधुषु ॥ परिशंकितवृत्तस्य श्रुतमंत्रस्य भारत ॥ विभक्तपुरराष्ट्र
स्य निर्द्रव्यनिचयस्य च ॥ असंभावितमित्रस्य भिन्नामात्यस्य सर्वशः ॥ परचक्राभियातस्य दुर्बलस्य बलीयसा ॥
आपन्नचेतसो ब्रूहि किं कार्यमवशिष्यते ॥ ॥भीष्म उ ॥ ॥ बाह्यश्चेद्धि जिगीषुः स्याद्धर्मार्थकुशलः शुचिः ॥ जवेन
न संधिं कुर्वीत पूर्वान्पूर्वान्विमोचयन् ॥ अधर्मे विजिगीषुश्चेद्बलवान्पापनिश्चयः ॥ आत्मनः संनिरोधेन संधिं ते
नापि रोचयेत् ॥ अपास्य राजधानीं वा तरेद्द्रव्येन चापदं ॥ तद्भावयुक्तो द्रव्याणि जीवन्पुनरुपार्जयेत् ॥ यास्तु कोश
बलत्यागाच्छक्यास्तरितुमापदः ॥ कस्तत्राधिकमात्मानं संत्यजेदर्थधर्मवित् ॥ अवरोधाज्जुगुप्सेत का सपत्न
धने दया ॥ न त्वेवात्मा प्रदातव्यः शक्ये सति कथंचन ॥ ॥युधिष्ठिर उ ॥ ॥ अभ्यंतरे प्रकुपिते बाह्ये चोपनिपीडि
ते ॥ क्षीणे कोशे श्रुते मंत्रे किं कार्यमवशिष्यते ॥ ॥भीष्म उ ॥ ॥ क्षिप्रं वा संधिकामः स्यात्क्षिप्रं वा तीक्ष्णविक्रमः ॥ त
दापनयनं क्षिप्रमेतावत्सांपरायिकं ॥ अनुरक्तेन चेष्टेन हृष्टेन जगतीपतिः ॥ अल्पेनापि हि सैन्येन महीं जयति
पार्थिवः ॥ हतो वा दिवमारोहेद्विजयी क्षितिमावसेत् ॥ युद्धे हि संत्यजन्प्राणाञ्छक्रस्यैति सलोकतां ॥ सर्वलो

ह रो ४ लि १ क्रु १

का ४ अथवाप्यमे
युद्धेन मरणे वैरलोकहितं २

आप०

अभिभूत
स्य ३
व्याकुलीकृ
४ अधर्मे
सर्वेदुष्टतरः ६
राजत्वगुणयु
क्तः ६ दुष्टतमे
तु राज्यधनं स
क्त्वा आत्मानं रक्ष
येत् ६ शत्रोर्दूरी
पापीप्रमे ८
भवति २

स्वरुचिभिर्वि
भक्तग्रामगृही
तानि २ राष्ट्र
पा ३

कतिपयग्राम
दानेन ६

अमात्यादौ ४
दुर्गराष्ट्रादौ ४
आक्रांते ४

रूप धाद्युपायं १ सर्वोपायेन बालं ।। जेतुं २ श्वापाचा १ ननु युद्धमेव हठेन श्रयेत् १ यद्यात्पंतरप्रकोपात् युद्धं कर्तुं अशक्य
पारदृश्यात् ३ क्षुः बाह्यप्रकोपात् सामरी चाशक्यं तदा दुर्गाति

कांगामीं कृत्वा न्दङुतं रांतु मेव च।। विश्वासाद्धि नयं कुर्याद्धिंसितौं प्युपायं तंः।। अंपवि कं मिष्टुंः क्षिप्रं माभ्नागा परिसांत्वय

देशांतर २२ ऽ।।विलंघयितामंत्रेण ततः स्वयमुपाक्रमेत्।। ।।इति शांतौ आपद्धर्मेषु।। ।।युधिष्ठिरः।। ।।हीने परमके धर्मे

सर्वलोकाभिसंहिते।। सर्वस्मिन्दस्युसाद्भूते पृथिव्यामुपजीवने।। केन स्विद्ब्राह्मणो जीवेज्जघन्ये काल आगते।।

असंत्यजन्पुत्रपौत्राननुक्रोशात्पितामह।। ।।भीष्मः।। ।।विज्ञानबलमास्थाय जीवितव्यं तथागते।। सर्वं साध्वर्थमि

वेदमसाध्वर्थं न किंचन।। असाधुभ्योऽर्थमादाय साधुभ्यो यः प्रयच्छति।। आत्मानं संक्रमं कृत्वा कृच्छ्रधर्मविदे

व सः।। आकांक्षन्नात्मनो राज्यं राज्यस्थितिमकोपयन्।। अदत्तमेवाददीत दातौतु वित्तं ममेति च।। विज्ञानबलपू

स्थिति।।रा ५ तो यो वर्तते निंदितेष्वपि।। वृत्तिविज्ञानवान्धीरः कस्तं वा वक्तुमर्हति।। येषां बलकृता वृत्तिस्तेषामन्या न रोचते।।

पालन धर्मान् ६ तेजसाभिप्रवर्तंते बलवंतो युधिष्ठिर।। यदेवं प्राकृतं शास्त्रमविशेषेण वर्त्तते।। तदेव समभ्यसेदेवं मेधावी वा यथो

त्तरं।। ऋत्विक्पुरोहिताचार्यान्सत्कृतैरपि सत्कृताइ।। न ब्राह्मणान्घातयीत दौषा दुयुः परस्परं।। न तेषां वचनाद्रा

जा सत्कुर्यात् घातयीत च।। न बाध्यः परिवादोऽयं न श्रोतव्यः कथंचन।। कर्णौ वथ पिधातव्यौ प्रस्थेयं चान्यतो भवे

त्।। असतां शीलमेतद्वै परिवादोऽथ पैशुनं।। गुणानामेव वक्तारः संतः सत्सु नराधिप।। यथ समधुरौ दम्यौ संद्रा

प्राकृतं पद्धर्मेषि योगि ४ दोषान्प्राप्नोति घातयन्।। ८।। एतत्प्र

प्रमाणं लोकस्य चक्षुरेतत्सनातनं। तत्प्रमाणोवगाहेत तेन तत्साध्वसाधु वा।। बहुकृत्वा यां मधास्तव्यां रो २
ग्रामवासिनः १

अपक्रांतुमि
च्छुः स्यात् १
राज्ञः २
ब्राह्मणं कथं
रक्षेत् ३
आगमने
मार्गं
निर्दितुं ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुरे मूष्य वलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथं प्रति ॥ आतुरस्य हि हस्तछेदः कृतः ताद्दृग्बोधमर्मवगाः २ धर्मेणा ततु ब्रूयाद्देवेत्य परे इच्छति २
पन्नस्य कार्यं भवति शासनं ताद्दृक् विकर्मस्थं ने २ श्रौतो धर्मः ४ मन्वादिभिः ४

।पद्द० तो साधुवाहिनो ॥ धुरमुद्यम्य वहते तथा वर्तेत वैन्नृपः ॥ यथा यथा स्य च हवः साहाय्यास्तु स्तथा परे ॥ आगारमेवम
न्यंते गरीयो धर्मलक्षणं ॥ अपरे एवं वसिष्ठं ते ये शांखलिखित प्रियाः ॥ मा लस्यांदर्थवालो मा च मन्युर्वाक्य मी
२ ६ दृशं ॥ ओमप्यत्र पश्यंति विकर्मस्थस्य पातनं ॥ न ताद्दृक् सद्दृशं किंचित्प्रमाणं दृश्यते क्वचित् ॥ देवाश्वतं विकर्मस्थं स्मार्त्तधर्मः
पातयंति नराधमं ॥ व्याजेन विंदं वित्तं हि धर्मात्स परिहीयते ॥ सर्वतः सत्कृतः सद्भिः भूतिप्रवरकारणैः ॥ हृदये भूतिप्रवरा
धर्मिष्ठैः सत्कृतः ॥ नाभ्यनुज्ञातो यो धर्मस्तं व्यवस्यति ॥ यश्च तु गुणसंपन्नं धर्मं ब्रूयात्स धर्मवित् ॥ अहेरिवेहि धर्मस्य पदं दुःखं गवे दृश्यगाः कार
आचारिकी त्रयी वार्त्ता हि दंडनीति श्चेति ६ षितुं ॥ यथा मृगस्य विद्धस्य पदमेव पदं नयेत् ॥ लक्षेदुधिरलेपेन तथा धर्मपदं नयेत् ॥ तथा सद्भिर्विनीतेन यथा णानि ४
गंतव्यमित्युत ॥ राजर्षीणां वृत्तमेतदेवं गच्छ युधिष्ठिर ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ भीष्मः ॥ ॥ स्वराष्ट्रात्परराष्ट्रा स्थानं ७
ष्ट्राच्च कोशं संजनयेन्नृपः ॥ कोशाद्धि धर्मः कौंतेय राज्यमूलं च वर्तते ॥ तस्मात्संजयेत्कोशं सत्कृत्य परिपाल
द२ येत् ॥ परिपाल्यानुगृह्णीयादेष धर्मः सनातनः ॥ न कोशः शुद्धशौचेन न नृशंसेन जातुचित् ॥ मध्यं पदमास्था
य कोशसंग्रहणं चरेत् ॥ अबलस्य कुतः कोशो ह्यकोशस्य कुतो बलं ॥ अबलस्य कुतो राज्यमराज्ञः श्रीर्भवि
महतः १ कुतः ॥ उच्चैर्वृत्तेः श्रियो हानिर्यथैव मरणं तथा ॥ तस्मात्कोशं बलं मित्रमथ राजा विवर्द्धयेत् ॥ हीनकोशं हि राजा २
अन्यान्प्रापयेत्तु ६ ने २

कार्यमपि कर्तुं नोत्सहंति॰ तर कृतविरोधाः २ कृ॰

न सर्वज्ञानंति मानवाः ।। न चास्याल्पेन तुष्यंति कार्यमप्यल्पमहंति च ।। श्रियो हि कारणाद्दासक्षियां लभते
परां ।। स्वास्यग्रहति पापानि गसोऽग्न्यमिव स्थियाः ।। ऋद्धिमस्यानुप्यंते पुनाविप्रकृतानराः ।। शीलाद्द्व काइ
वाज्ञस्वंभिद्यांस्तु नैव विंदति ।। ईदृशस्यकुतो राज्ञः सुखं भवति भारत ।। उद्यद्धैदेवनन मेदुर्घमोद्यि वपौरुषं ।। अथ
पर्वणिमिश्च्यते नैमेतेहस्यैकस्य चित ।। अप्यरण्यं समाश्रित्य चनेम्रगगणेः सह ।। नहेवाबोज्झितमर्यादैर्दस्युभिः
सहितश्चरेत् ।। दस्यूनां सुलभा सेनाद्दकर्म सुभारत ।। एकांततोह्यमर्यादास्तस्वैंपुद्विजते जनः ।। दस्यवोप्यभि
शंकंते निरनुक्रोशकारिणः ।। स्थापयेदेवमर्यादां जनचित्तप्रसादिनी ।। अल्पाप्यथैवमर्यादा लोके भवति पूजि
ता ।। नायं लोकोस्ति न परइति व्यवसितो जनः ।। नालंगंतुंहि विश्वासं नास्तिके भयशंकिते ।। यथा सद्भिः परादा
नमहिंसा दस्युभिः कृता ।। अनुरज्यंति भूतानि समर्यादेषु दस्युषु ।। अयुध्यमानस्य वधो दारामर्षः कृतघ्नता ।।
ब्रह्मवित्तस्य चादानं निःशेषकरणं तथा ।। स्त्रीयोषमेवोपलभ्यकुर्वतीति विनिश्चयः ।। तस्मात्सशेषं कर्तव्यं स्वा
धीनमपि दस्युभिः ।। न बलस्थौहमस्मीति नृशंसानि समाचरेत् ।। सशेषकारिणस्तत्र शेषं पश्यंति सर्वशः ।।
निःशेषकारिणो नित्यं निःशेषकरणाद्भयं ।। ।। शांतौ आपद्धर्मे ।। ।। भीष्मः ।। ।। सौत्रं धर्मानुवचनं कीर्तयं
अ॰ १
स्त्रियामोषः पतिस्थानं दस्युष्वेतत्विगर्हितं ।। संश्लेषं च परस्त्रीभिर्दस्युरेतानि वर्जयेत् ।। अभिसंदध्यते ये च विश्वासायास्य मानवाः ।। ३
ध्य ४
कन्यायाः २ चौर्यं १ ग्रामादीन्नाक्रम्यते स्पतित्वेनावस्थानं १

न
मे

दस्युत्रा
यैरमात्यैः ४

सर्वहर
णं २ स्त्री॰

आ० वृ॰

३

तिपुराविदुः ॥ प्रत्यक्षावेव धर्मार्थौ क्षत्रियस्य विजानतः । तत्र नर्ध्यातव्यं परोक्षा धर्मयापना ॥ अधर्मो धर्म इत्येतद्य
थावृकपदं तथा ॥ धर्माधर्मफले जातु ददर्शेह न कश्चन ॥ बुभूषेद्बलमेवैतत्सर्वं बलवतो वशे ॥ श्रियो बलममात्यांश्च
बलवानिह विंदति ॥ योह्यनाढ्यः स पतितस्तदुच्छिष्टं यदल्पकं ॥ बहु पथ्यं बलवति न किंचित्क्रियते भयात् ॥ उभौ स
त्यांधिकारस्यौ त्रायते महतो भयात् ॥ अति धर्माद्बलं मन्ये बलाद्धर्मः प्रवर्तते ॥ बलेशतिष्ठितो धर्मो धरण्यामि
व जंगमं ॥ धूमो वायोरिव वशे बलं धर्मोनुवर्तते ॥ अनीश्वरो बले धर्मो द्रुमं वल्लीव संश्रिता ॥ वशो बलवतां धर्मः
वः सुखं भोगवतामिव ॥ नास्त्यसाध्यं बलवतां सर्वं बलवतां शुचि ॥ दुराचारः क्षीणबलः परित्राणं न गच्छति ॥ अथ
तस्मादुद्विजते सर्वो लोको वृकादिव ॥ अपध्वस्तो ह्यवमतो दुःखं जीवंति जीवितं ॥ जीवितं यदपक्रुष्टं यथैव मरण
तथा ॥ यदेवमाहुः पापेन चारित्रेण विवर्जितः ॥ सुभृशं तप्यते नेव बाहुल्येन परिक्षतः ॥ अत्रैतदाहुराचार्याः पापस्य
परिमोक्षणे ॥ त्रयीं विद्यामवेक्षेत तथोपासीत वै द्विजान् ॥ प्रसादयेच्च चक्षुषा वाचा चाप्यथ कर्मणा ॥ महामनाश्चैव भ
वेद्विवाहेच महाकुले ॥ इत्यस्मीति वदेद्वै वं परेषां कीर्तयन्गुणान् ॥ जपेदुदकशीलः स्यात्पेशलो नातिजल्प
कः ॥ ब्रह्मक्षत्रं संप्रविशेद्बहु कृत्वा सुदुष्करं ॥ उच्यमानो हि लोकेन बहु तत्तदचिंतयन् ॥ अपापो ह्येवमाचा ३

तेन वाक्छल्येन ४

फलेनैकेन

न निरयं प्राप्नोति २

नःक्षिप्रं बहुमतो भवेत्॥ सुखं च वित्तं भुंजीत वित्तं नैकोनुगोपयेत्॥ लोके च लभते पूजां परत्रेह महत्फलं॥ ॥
शांतो आपद्धर्मेषु॥ ॥भीष्मः॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं॥ यथा दस्युः समर्यादः प्रेत्यभावे न नश्यति
॥प्रहृत्या मतिमान् शूरः श्रुतवाननृशंसवान्॥ रक्षन्नक्षयिणं धर्मं ब्रह्मण्यो गुरुपूजकः॥ निषाद्यां क्षत्रिया
ज्जातः क्षत्रधर्मानुपालकः॥ कापव्यो नाम नैषादिर्दस्युत्वात्सिद्धिमाप्तवान्॥ अरण्ये सायंपूर्वाह्णे मृगयूथप्रको
लप्र५ पिता॥ विधिज्ञो मृगजातीनां नैषादानां च कोविदः॥ सर्वकाननदेशज्ञः पारियात्रचरः सदा॥ धर्मज्ञः सर्वभूतानाम् पर्वतविज्ञो षः५
मातापित ६ मोघेषुर्दृढायुधः॥ अप्यनीकशतान्सेनां एक एव जिगाय सः॥ स च वृद्धौ पवधिरौ महारण्येभ्यपूजयत्॥ मधुमां
सैर्मूलफलैरन्नैरुच्चावचैरपि॥ सत्कृत्य भोजयामास मान्यान्परिचचार च॥ आरण्यकान्प्रव्रजितान्ब्राह्मणा
न्परिपूजयत्॥ अपि तेभ्यो मृगान्हत्वा निवेदयति चै वने॥ येस्मान्न प्रतिगृह्णंति दस्युभोजनशंकया॥ तेषामा
प्रातः६ सज्यगेहेषु कल्यएव स गच्छति॥ बहूनि च सहस्राणि ग्रामणीत्वे नवव्रिरे॥ निर्मर्यादानि दस्यूनां निरनुक्रोश
वर्तिनां॥ ॥दस्यवः॥ ॥मुहूर्तदेशकालज्ञः प्राज्ञः शूरो दृढव्रतः॥ ग्रामणीर्भव नो मुख्यः सर्वेषामेव संमतः॥ य
ऊचुः३ थायथा वक्ष्यसि नः करिष्यामस्तथातथा॥ पालयास्मान्यथान्यायं यथा माता तथा पिता॥ ॥कापव्य उवाच॥ का२
मावधीस्त्वं स्त्रियं भीरुं मा शिशुं मा तपस्विनं॥ नायुध्यमानो हंतव्यो न च ग्राह्या बलात्स्त्रियः॥ सर्वथा स्त्री न हंत

एकवचनेन गणाभिप्रायेण१

उ२

विवाहादिकार्यंतित्रविघ्नं १

व्याः सर्वं सर्वेषु केनचित् ।। नित्यं तु ब्राह्मणे स्वस्ति योद्धव्यं च तदर्थतः ।। सस्यं च नापि हर्तव्यं सीरविघ्नं च मा कृथाः ।। पूज्यन्ते य
त्र देवाश्च पितरो तिथयस्तथा ।। सर्वभूतेष्वपि च वै ब्राह्मणो मोक्षमर्हति ।। कार्या चोपचितिस्तेषां सर्वस्वेनापि या भ
वेत् ।। यस्य ह्येते संप्रदुष्यन्ति मंत्रयंति पराभवं ।। न तस्य त्रिषु लोकेषु त्राता भवति कश्चन ।। यो ब्राह्मणान्परिवदेद्विना
शं चापि रोचयेत् ।। सूर्योदय इव ध्वांत एवं तस्य पराभवः ।। इहैव फलमासीनः प्रत्याकांक्षत सर्वशः ।। ये ये नो न प्रदा
स्यंति तांस्तान्स्तेनाभियास्यति ।। शिष्टार्थं विहितो दंडो न वृध्यर्थं विनिश्चयः ।। ये च शिष्टान्प्रबाधंते दंडस्तेषां व
धः स्मृतः ।। ये च राष्ट्रोपरोधेन वृत्तिं कुर्वंति केचन ।। तदेव ते नु म्रीयंते कुणपे कृमयो यथा ।। ये पुनर्धर्मशास्त्रेण
वर्तेरन्निह दस्यवः ।। अपि ते दस्यवो भूत्वा क्षिप्रं सिद्धिमवाप्नुयुः ।। ।। भीष्मः ।। ।। त सर्वमेवानुचक्रुः कायव्यस्या
नुशासनं ।। वृत्तिं च लेभिरे सर्वे पापेभ्यश्चाप्युपारमन् ।। कायव्यः कर्मणा तेन महतीं सिद्धिमाप्तवान् ।। साधूनामा
चरन्क्षेमं दस्यून्पापान्निवर्तयन् ।। इदं कायव्यचरितं यो नित्यमनुचिंतयेत् ।। नारण्येभ्यो हि भूतेभ्यो भयं प्राप्नोति
केचन ।। न भयं तस्य भूतेभ्यः सर्वेभ्यश्चैव भारत ।। नासतो न सतो राजन्स ह्यरण्येषु गोपतिः ।। ।। शांतौ आपद्धर्मे ।। ।।
भीष्मः ।। ।। अत्र गाथाः ब्रह्मगीताः कीर्तयंति पुराविदः ।। येन मार्गेण राजा वै कोशं संजनयंत्युत ।। न धनं यज्ञशीला
नां हार्यं देवस्वमेव च ।। दस्यूनां निष्क्रियाणां च क्षत्रियो हर्तुमर्हति ।। इमाः प्रजाः क्षत्रियाणां राज्यभोग्याश्च भा
गा१

रत॥ धनं हि क्षत्रियस्यैव द्वितीयस्य न विद्यते ॥ तदस्यस्याद्बलार्थं वा धनं यज्ञार्थमेव वा ॥ अभोज्याश्चौषधीश्छि
त्वा भोज्या एव पचं त्युत ॥ योनैव देवान्न पितॄन्न मर्त्यान्हविषार्च्चति ॥ अनर्थकं धनं तत्र प्राहुर्वेदविदो जनाः ॥
हरेतद्द्रविणं राजा॥ न्यामिकः पृथिवीपतिः॥ ततः प्रीणायते लोकं न कोशं तद्विधं नृपः॥ असाधुभ्योर्थमादाय
साधुभ्यो यः प्रयच्छति ॥ आत्मानं संक्रमं कृत्वा कृत्स्नधर्मविदेव सः ॥ तथा तथा जयेल्लोकान्शक्त्या चैव यथा
तथा॥ उद्भिज्जा जंतवो यद्वत्क्षुद्रजीवा यथा तथा ॥ अनिमित्तात्संभवंति तथा यज्ञः प्रजायते ॥ यथैव दंशमश
कं यथा चीडपिपीलिकं ॥ सैव वृत्तिरयज्ञेषु यथा धर्मो विधीयते ॥ यथा ह्यकस्माद्भवति भूमौ पांशुर्विलोलि
तः॥ तथैवेह भवेद्धर्मः सूक्ष्मः सूक्ष्मतरस्तथा॥ ॥ शांतौ आपद्धर्मे॥ ॥भीष्मः॥ ॥अनागतविधाता च प्रत्युत्प
न्नमतिश्च यः॥ द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति॥ अत्रैव चेदमाव्यग्रः शृणुष्वाख्यानमुत्तमं॥ दीर्घसूत्र
मुपाश्रित्य कार्याकार्यविनिश्चये॥ नातिगाधे जलाधारे सुहृदः कुशला स्त्रयः॥ प्रभूतमत्स्ये कौंतेय बभूवुः सह
चारिणः॥ तत्रैको दीर्घकालज्ञ उत्पन्नप्रतिभो परः॥ दीर्घसूत्रश्च तत्रैकस्त्रयाणां सहचारिणां॥ कदाचित्ते जल
स्थायं मत्स्यबंधाः समंततः॥ निश्रावयामासु रथो निम्नेषु विविधैर्मुखैः॥ प्रक्षीयमाणं तं दृष्ट्वा जलस्थायं भयागा
मे॥ अब्रवीद्दीर्घदर्शी तु तावुभौ सुहृदौ तदा॥ इयमापत्समुत्पन्ना सर्वेषां सलिलौकसां॥ शीघ्रमन्यत्र गच्छाम

क्षुद्रजला
शयं २

श्च २

ल् १

भौ १

॥प्रदेशेषु २

वा जलनिर्गमनमार्गैः २

तपोर्वचने २ आकुलीकरणादिभिः ४

आ॰ पंथायावन्नदुष्यति॥ अनागतमनर्थं हि सुनयैर्यः प्रबाधयेत्॥ स न संशयमाप्नोति रोचतां भो व्रजामहे॥ दीर्घसू
५ त्रस्तु यस्तत्र सोऽब्रवील्सम्यगुच्यते॥ न तु कार्या त्वरा तावदिति मे निश्चिता मतिः॥ अथ संप्रतिपत्तिस्तः प्राब्रवीद्दीर्घद
र्शिनं॥ प्राप्ते काले न मे किंचित्न्यायतः परिहास्यते॥ एवं श्रुत्तौ निगाका मद्दीर्घदर्शी महामतिः॥ जगाम स्रोतसा
स्वेनमार्गेण ४ न्येन गंभीरं सलिलाशयं॥ ततः प्रस्तुमततोयं तं प्रसमीक्ष्य जलाशयं॥ बबंध विविधैर्यंत्रैर्मत्स्यान्मत्स्योपजीविनः॥
विलोड्यमाने तस्मिंस्तु ततोये जलाशये॥ अगच्छद्बंधनं तत्र दीर्घसूत्रः सहापरैः॥ उद्धाने क्रियमाणे तु मत्स्या ग्रथने ५
नां तत्र रज्जुभिः॥ प्रविश्यां तत्र मेतेषां स्थितः संप्रतिपत्तिमान्॥ गृहीत्यमेव तद्धानं गृहीत्वा ततथैव सः॥ सर्वाने
व वर्तास्तत्र ते विद्गुर्ग्रथितानिति॥ ततः प्रक्षाल्यमानेषु मत्स्येषु विपुले जले॥ त्यक्त्वा रज्जुं विमुक्तोऽसौ शीघ्रं संप्रति
पत्तिमान्॥ दीर्घसूत्रस्तु मंदात्मा हीनबुद्धिरचेतनः॥ मरणं प्राप्तवान्नष्टो यथैवोपहतेंद्रियः॥ एवं प्राप्तमंते
कालं यो मोहान्नावबुध्यते॥ स विनश्यति वै क्षिप्रं दीर्घसूत्रो यथा झषः॥ अभ्यौनं कुरुते श्रेयः कुशलोऽस्मीति यः
ति३ पुमान्॥ स संशयमवाप्नोति यथा संप्रतिपत्तिमान्॥ अनागतविधाता च योऽनयः कुरुते क्षणात्॥ श्रेयः प्राप्नोति सव्य
क्तं दीर्घदर्शी यथा ह्यसौ॥ अनागतविधाता च प्रत्युत्पन्नमतिश्च यः॥ द्वावेव सुखमेधाते दीर्घसूत्री विनश्यति॥ का
ष्ठाकला मुहूर्त्ताश्च दिवा रात्रिस्तथा लवाः॥ मासाः पक्षाः षडृतवस्तथा संवत्सरास्तथा॥ पृथिवी दिश इ ५

स्त१

दिक्स्थैः१ ग्रसितुं१

स्युक्तः कालः स च न दृश्यते॥ अभिप्रेतार्थसिद्ध्यर्थं ध्यायते यच्च तन्न वा॥ एतौ धर्मार्थशास्त्रेषु मोक्षशास्त्रेषु च
र्षिभिः॥ प्रधानाविति निर्दिष्टौ कामे चाभिमतौ नृणां॥ परीक्ष्यकारी युक्तस्तु स सम्यक् समुपादयेत्॥ देशकालावभि
प्रेतौ ताभ्यां फलमवाप्नुयात्॥ ॥शांतौ आपद्धर्मे॥ ॥युधिष्ठिरः॥ ॥सर्वत्र बुद्धिः कथिता श्रेष्ठा ते भरतर्षभ॥ अना
गता तथोत्पन्ना दीर्घसूत्रा विनाशिनी॥ तदिच्छामि तदा बुद्धिं श्रोतुं ते भरतर्षभ॥ यथा राजा न मुह्येत शत्रुभिः परि
वारितः॥ धर्मार्थकुशलो राजा धर्मशास्त्रविशारदः॥ पृच्छामि त्वां कुरुश्रेष्ठ तन्मे व्याख्यातुमर्हसि॥ शत्रुभिर्बहुभि
र्ग्रस्तो यथा वर्त्तेत पार्थिवः॥ एतदिच्छाम्यहं श्रोतुं सर्वमेव यथाविधिं॥ विषमस्थं हि राजानं शत्रवः परिपंथिनः॥
उन्मूलितुं१ बहवोप्येकमुद्धर्त्तुं यतंते पूर्वतापिताः॥ सर्वत्र प्रार्थ्यमानेन दुर्बलेन महाबलैः॥ एकेनैवासहायेन शक्यं स्थातुं भ
वेत्कथं॥ कथं मित्रमरिं चापि विंदते भरतर्षभ॥ चेष्टितव्यं कथं चात्र शत्रोर्मित्रस्य चांतरे॥ प्रज्ञातलक्षणे मित्रे त
थैवामित्रतां गते॥ कथं नु पुरुषः कुर्यात्किं वा कृत्वा सुखी भवेत्॥ विग्रहं केन वा कुर्यात्संधिं वा केन योजयेत्॥ कथं वा
शत्रुमध्यस्थो वर्त्तेतो बलवानपि॥ एतद्वै सर्वकृत्यानां परं कृत्यं परंतप॥ नैतस्य कश्चिद्वक्तास्ति श्रोता वापि सुदुर्ल
तद२ भः॥ ऋते शांतनवाद्भीष्मात्सत्यसंधाज्जितेंद्रियः॥ तदन्विष्य महाभाग सर्वमेतद्ब्रवीहि मे॥ ॥भीष्मः॥ ॥त निश्चित्य२
य१ द्युक्तोमनुप्राप्तो युधिष्ठिर सुखोदयः॥ शृणु मे पुत्र कार्त्स्न्येन गुह्यमापत्सु भारत॥ अमित्रो मित्रतां याति मित्रं चा

प्राकृतकृत्रिममित्रयोर्मध्ये केन संधिः कर्त्तव्यः केन वा वैरं॥६
प्रश्नो२

भि

आ० पिप्रदुष्यति ॥ सामर्थ्ययोगात्कार्याणामनित्या वै सदा गतिः ॥ तस्माद्विश्वासितव्यं च विग्रहं च समाचरेत् ॥ देशं कालं
च विज्ञाय कार्याकार्यविनिश्चये ॥ संधातव्यं बुधैर्नित्यं व्यवस्यं च हितार्थिभिः ॥ अमित्रैरपि संधेयं प्राणा रक्ष्या
६ हि भारत ॥ यो ह्यमित्रैर्नरो नित्यं न संदध्यादपंडितः ॥ न सोऽर्थं प्राप्नुयात्किंचित्फलान्यपि च भारत ॥ यस्य मि
त्रेण संदध्यान्मित्रेण च विरुध्यते ॥ अर्थयुक्तिं समालोक्य स महद्विंदते फलं ॥ अत्राप्युदाहरंतीममितिहासं
वि४ पुरातनं ॥ मार्जारस्य हि संवादं न्यग्रोधे मूषकस्य च ॥ वने महति कस्मिंश्चिन्न्यग्रोधः सुमहानभूत् ॥ लताजालखं
परिछिन्नो नानाद्विजगणान्वितः ॥ स्कंधवान्मेघसंकाशः शीतछायो मनोरमः ॥ अरण्यमभितो जातस्तरुव्या
लमृगाकुलः ॥ तस्य मूलं समाश्रित्य कृत्वा शतमुखं बिलं ॥ वसति स्म महाप्राज्ञः कपिलो नाम मूषिकः ॥ शाखां
तस्य समाश्रित्य वसति स्म सुखं पुरा ॥ लोमशो नाम मार्जारः पक्षिसंघातखादकः ॥ तत्र चागस्य चांडालो ह्यरण्ये
कूटयंत्रंप शुमृगपर्दि बंधनं४ कृतकेतनः ॥ प्रयोजयति चोन्माथं नित्यमस्तंगते रवौ ॥ तत्र स्नायुमयान्याशु यथावत्संविधाय सः ॥ गृहं कृत्वा
सुखं शेते प्रभातामेव शर्वरीं ॥ तत्रास्म नित्यं बध्यंते नक्तं बहुविधा मृगाः ॥ कदाचिदत्र मार्जारस्त्वसंमत्तो ह्यबध्यत ॥ प्र३
तस्मिन्बद्धे महाप्राज्ञः शत्रौ नित्याततायिनी ॥ तं कालं फलितं ज्ञात्वा प्रचचार सुनिर्भयः ॥ तेनानुचरता तस्मिन्
वने विश्वस्तचारिणा ॥ भक्ष्यं मृगयमाणेन चिराद्दृष्टं तदामिषं ॥ स तमुन्माथमारुह्य तदामिषमभक्षयत् ॥ ६

पलितो २
मूषकः २

उन्माथे धृतमामिषं १ ॥ व्यं ३

सपत्नंबद्धंअनादृत्य१॥ शरस्तृणविशेषस्तत्प्रसूनंपुष्पं२

तस्योपरिसपत्नस्यौबद्धस्यमनसाहर्षिते॥ आमिषेतुप्रसक्तः सः कदाचिदवलोकयन्॥ अपश्यद्रूपंघोरमा
त्मनः शत्रुमागतं॥ शरप्रस्त्रनंसंकाशंमहाविवरशायिनं॥ नकुलंहारिणंनामचपलंताम्रलोचनं॥ तेनमूषक
गंधेनत्वरमाणमुपागतं॥ भक्षार्थंसंलिहानंतैतंभूमावूर्द्धमुखंस्थितं॥ शाखागतमरिंचान्यमपश्यत्कोटरा
लयं॥ उलूकंचंद्रकंनामतीक्ष्णतुंडंक्षपाचरं॥ गतस्यविषयंतत्रनकुलोलूकयोस्तथा॥ अथास्यासीदियंचिंता
तत्प्राप्यसुमहद्भयं॥ आपद्यस्यांसुकष्टायांमरणेप्रत्युपस्थिते॥ समंताद्भयमुत्पन्नेकथंकार्यंहितैषिणा॥ स
तथासर्वतोरुद्धः सर्वत्रभयदर्शनः॥ अभवद्भयसंतप्तश्चक्रेचपरमांमतिं॥ आपद्विनाशभूयिष्ठंगतैःकार्यं
हिजीवितं॥ समंतात्संशयात्सैषातस्मादापदुपस्थिता॥ गतंमांसहसाभूमिंनकुलोभक्षयिष्यति॥ उलूकश्चे
हतिष्ठंतंमार्जारःपाशसंक्षयात्॥ नत्वेवास्मद्विधःप्राज्ञःसंमोहंगंतुमर्हति॥ करिष्येजीवनेयत्नंयावद्युक्त्या
मतिग्रहात्॥ नहिबुद्ध्यान्वितंप्राज्ञंनीतिशास्त्रविशारदं॥ निमज्जंत्यापदंप्राप्यमहतींदारुणामपि॥ नत्व
न्यामिहमार्जारात्गतिंपश्यामिसांप्रतं॥ विषमस्थोह्ययंशत्रुःकृत्यंचास्यमहन्मया॥ जीवितार्थीकथंत्वशत्रुभिः
प्रार्थितःत्रिभिः॥ तस्मादेनमहंशत्रुंमार्जारंसंश्रयामिवै॥ नीतिशास्त्रंसमाश्रित्यहितमस्योपवर्णये॥ येनेमं
शत्रुसंघातंमतिपूर्णेनवंचये॥ अयमत्यंतशत्रुर्मेविषमस्थःपरंगतः॥ मूढोग्राहयितुंस्वार्थंसंगत्यायदिश

आपद्गतैः६
आपद्विना
शेन॥ प्रश
स्तं६

घ३

स

स्यते ॥ कदाचिद्व्यसनंप्राप्य संधिंकुर्यान्मयाँह ॥ वलिना संनिकृष्टस्य शत्रोरपिपरिग्रहः ॥ कार्य इत्याहुराचार्या
विषमेजीवितार्थिना ॥ श्रेष्ठोहिपंडितः शत्रुर्नचमित्रमपंडितः ॥ ममत्वमित्रे माजारे जीवितंसंप्रतिस्थितं ॥ छि२
हंतास्मैसंप्रवक्ष्यामिहेतुनात्माभिरक्षणं ॥ अपीदानीमयंशत्रुःसंश्रयेपंडितोभवेत् ॥ एवंविचिंतयामास
मूषिकः शत्रुचेष्टितं ॥ ततोर्थगतितत्वज्ञः संधिविग्रहकालवित् ॥ सांत्वपूर्वमिदंवाक्यं मार्जारंमूषकोब्रवीत्
देनाभिभा ॥ सौहृदाँदभिषात्वां कच्चिन्मार्जारजीवसि ॥ जीवितंहितवेच्छामि श्रेयःसाधारणंहिनौ ॥ तेंसौम्यभयंकार्यं नत्वं५
षे५ जीविष्यसियथासुखं ॥ अहंत्वामुद्धरिष्यामियदिमांनजिघांससि ॥ अस्तिकश्चिदुपायोत्रदुष्करःप्रतिभाति
मे ॥ येनशक्यःस्त्वयामोक्षः प्राप्तुंश्रेयस्तथामया ॥ मयाप्युपायोदृष्टोयं विचार्यमतिमात्मनः ॥ आत्मार्थंच
त्वदर्थंचश्रेयःसाधारणंहिनौ ॥ इदंहिनकुलोलूकंपापबुद्ध्याभिसंस्थितं ॥ नधर्षयतिमार्जारते नमेस्वस्ति
सांप्रतं ॥ कूजंश्चपलनेत्रोयंकौशिकोमांनिरीक्षते ॥ नगशाखाग्रगःपापस्तस्याहंभृशमुद्विजे ॥ सतांसप्त
स२ पदंमैत्रंसंवासमिति पंडितः ॥ सांबास्यकंकरिष्यामिनास्तितेभयमद्यवै ॥ नहिशक्तोसिमार्जारःपाशंछे ७
त्तुंमयाविना ॥ अहंचेत्स्यामिपाशांस्तेयदिमांत्वंनहिंससि ॥ त्वमाश्रितोद्रुमस्याग्रंमूलंत्वहमुपाश्रितः ॥

छे१ सि२ ग:२ स्प१ हं२

चिरोषितावुभावावां वृक्षेस्मिं विदितं चते।। यस्मिंनाश्वासते कश्चिद्यश्च नाश्वसति कचित्।। न तौ धीराः प्रशंसंति नित्यमुद्विग्नमानसौ।। तस्माद्विवर्द्धतां प्रीतिर्न्नित्यं संगतमस्तु नौ।। कालातीतमिहार्थं तु न प्रशंसंति पंडिताः।। अर्थयुक्तिमिमां तत्र यथाभूतां निशामय।। तव जीवितमिच्छामि त्वं मे चेच्छसि जीवितं।। कश्चित्तरति काष्ठेन सुगंभीरां महानदीं।। स तां नयति तत्काष्ठं स च काष्ठेन नीयते।। ईदृशो नौ समायोगो भविष्यति सुविस्तरः।। अहं त्वां तारयिष्यामि त्वं च मां तारयिष्यसि।। एवमुक्त्वा तु पलितस्तमर्थमुभयोर्हितं।। हेतुमद्ग्रहणीयश्च कालापेक्षी न्यवेक्ष्य च।। अथ सुव्याहृतं श्रुत्वा तस्य शत्रोर्विचक्षणः।। हेतुमद्ग्रहणीयार्थं मार्जारो वाक्यमब्रवीत्।। बुद्धिमान्वाक्यसंपन्नस्तद्वाक्यमनुवर्णयन्।। स्वामवस्थां समीक्ष्याथ साम्नैव प्रत्यपूजयत्।। ततस्तीक्ष्णाग्रदशनो मणिवैदूर्यलोचनः।। मुषीकं मंदमुद्वीक्ष्य मार्जारो लोमशोऽब्रवीत्।। नंदामि सौम्य भद्रं ते यो मां जीवितुमिच्छसि।। श्रेयश्च यदि जानीषे क्रियतां मा विचारय।। विधास्ये प्राप्तकालं यत्कार्यं सिद्धिकं विभो।। मयि कृच्छ्राद्विनिर्मुक्ते न विनंक्ष्यति ते कृतं।। न्यस्तमानोस्मि भक्तोस्मि शिष्यस्त्वद्धितकृत्तथा।। निदेशवशवर्त्ती च भवंतं शरणं गतः।। इत्येवमुक्तः पलितो मार्जारं वशमागतं।। वाक्यं हितमुवाचेदमहं हि परमापन्नोस्त्वमापन्नतरो मम।। द्वयोरापन्नयोः संधिः क्रियतां मा चिरायच।। २

म२ फू२

आ० त्स्यं भविष्यति॥ ततो भवस्य पक्रांते त्रस्ते भीते च लोमशा॥ अलं बिलं प्रवेक्ष्यामि सर्वो पार्श्वां सजिष्यति॥ एवमु
१ क्तस्तु मार्जारो मूषिकेनात्मनो हितं॥ वचनं वाक्यतत्वज्ञो जीवितार्थी महाद्युतिः॥ अथात्महैत्यं त्वरितः स
म्यक्प्रस्तुतमाचरद॥ उवाच लोमशो वाक्यं मूषिकं चिरकारिणं॥ नह्येवं मित्रकार्याणि प्रीत्या कुर्वंति सा
धवः॥ यथात्वं मोक्षितं कृच्छ्रात्त्वरमाणेन वै मया॥ तथा हि त्वरमाणेन त्वया कार्यं हितं मम॥ यत्नं कुरु महा
प्राज्ञ यथात्रक्षावयो भवेत्॥ अथवा पूर्ववैरं त्वं स्मरन्कालं जिहीर्षसि॥ पश्य दुष्कृतकर्मत्वं व्यक्तमायुः क्ष
त्व६ यं तव॥ यदि किंचिन्मयाज्ञानात्पुरस्तात् दुष्कृतं कृतं॥ न तन्मासि कर्त्तव्यं क्षामये त्वां प्रसीद मे॥ तमेवं वा
दिनं प्राज्ञं शास्त्रबुद्धिसमन्वितं॥ उवाचेदं वचः श्रेष्ठं मार्जारं मूषिकस्तथा॥ श्रुतं मे तव मार्जार स्वै मर्थं प स्त्व५
रिग्रहतः॥ यन्मित्रं भीतवत्साध्यं यन्मित्रं भयसंहितं॥ सुरक्षितव्यं तत्कार्यं पाणिःसर्पमुखादिव॥ कृत्वा
बलवता संधिमात्मानं यो न रक्षति॥ अपथ्यमिव तद्भुक्तं तस्य नार्थाय कल्पते॥ न कश्चित्कस्यचिन्मित्रं न
कश्चित्कस्यचित्सुहृत्॥ अर्थैवैस्तु निबध्यंते मित्राणि रिपवस्तथा॥ अर्थैरर्थानिबध्यंते गजैर्नगजा इ
व॥ न च कश्चित्कृते कार्ये कर्त्तारं समवेक्षते॥ तस्मात्सर्वाणि कार्याणि सावशेषाणि कारयेत्॥ तस्मिन्का १

त२ गजैर्वन२

न
लेपि च भवार दिवा कीर्त्तिर्भैयार्दितः ।। मम नग्रहणे शक्तः पालयन्न पनायर्पणः ।। छिन्नं तु तंतुबाहुल्यं तंतु
रेकोवशेषितः ।। छेत्स्यकाम्यतस्तमयाशु निर्हतो भवलोमशः ।। तयोः संवदतोरेवं तथैवापन्नयोर्द्वयोः ।।
क्षयं जगाम सा रात्रिर्लोमशं चाविशद्भयं ।। ततः प्रभातसमये विकृतः कृष्णपिंगलः ।। स्थूलस्फिग्विकृतो
रूक्षः श्वयूथपरिवारितः ।। शंकुकर्णो महावक्त्रो मलिनो घोरदर्शनः ।। परिघो नाम चांडालः शस्त्रपाणिर
दृश्यत ।। तं दृष्ट्वा यमदूताभं मार्जारस्त्रस्तचेतनः ।। उवाच वचनं भीतः किमिदानीं करिष्यसि ।। अथ तावपि

न ६

संत्रस्तौ तं दृष्ट्वा घोरसंकुलं ।। क्षणेनकुलोलूकौ नैराश्यमुपजग्मतुः ।। बलिनौ मतिमंतौ च संघाते चाप्युपा
गतौ ।। अशक्तौ सुनयात्तस्मात्संप्रधर्षयितुं बलात् ।। कार्यार्थं कृतसंधानौ दृष्ट्वा मार्जारमूषिकौ ।। उलूक
नकुलौ तत्र जग्मतुः स्वं स्वमालयं ।। ततः श्चिच्छेद तं पाशं मार्जारस्य च मूषिकः ।। विप्रमुक्तोथ मार्जारस्त
मेवाभ्यपतद्द्रुमं ।। स तस्मात्संभ्रमावर्तान्मुक्तो घोरेण शत्रुणा ।। बिलं विवेश पलितः शाखां लेभे च लोम
शः ।। उन्माथमप्यथादाय चांडालो वीक्ष्य सर्वशः ।। विहताशः क्षणेनास्तितस्माद्देशादपक्रमात् ।। जगा
म स स्वभवनं चांडालो भरतर्षभ ।। ततस्तस्माद्भयान्मुक्तो दुर्लभं प्राप्य जीवितं ।। बिलस्थं पादपाग्र

अकृत्वा संविदं कांचित्सहसा समवप्लुतः ॥ कृतज्ञं कृतकर्माणं कश्चिन्मां नाभिशंकसे ॥ गत्वा च मम विश्वासं दत्वा च मम जीवितं ॥१॥

आ० स्तः पलितं लोमशोब्रवीत् ॥ मित्रोपभोगसमये किं मां त्वं नोपसर्पसि ॥ कृत्वा हि पूर्वं मित्राणि यः पश्चान्ननु

१० तिष्ठति ॥ न स मित्राणि लभते कृच्छ्रास्वापत्सु दुर्मतिः ॥ सत्कृतोहं त्वया मित्र सामर्थ्यादात्मनः सखे ॥ स मां

मित्रत्वमापन्नमुपभोक्तुं त्वमर्हसि ॥ यानि मे संति मित्राणि ये च संबंधिबांधवाः ॥ सर्वे त्वां पूजयिष्यं

शिष्या ४ तिसंदां गुरुमिव प्रियं ॥ अहं च पूजयिष्ये त्वां समित्रगणबांधवं ॥ जीवितस्य प्रदातारं कृतज्ञः को न पू

जयेत् ॥ ईश्वरो मे भवानस्तु सशरीरस्य गृहस्य च ॥ अर्थानां चैव सर्वेषां मनुशास्ता च मे भव ॥ अमात्यो मे भ

व प्राज्ञ पितेव हि प्रशाधि मां ॥ न तेस्ति भयमस्मत्तो जीवितेनात्मनः शपे ॥ बुध्या त्वमुशना साक्षाद्बले नाधिकृता

वयं ॥ त्वं मंत्रबलयुक्तो हि दत्वा जीवितमद्य मे ॥ एवमुक्तः परां शांतिं मार्जारेण स मूषिकः ॥ उवाच परम

दृया ४ त्वज्ञः श्लैमात्महितं वचः ॥ यद्भवानाह तत्सर्वं मया ते लोमश श्रुतं ॥ ममापि तावद्ब्रुवतः शृणु यत्प्रतिभा

ति मे ॥ वेदितव्यानि मित्राणि विज्ञेयाश्चापि शत्रवः ॥ एतत्सुसूक्ष्मं लोकेस्मिन्दृश्यते प्राज्ञसंमतं ॥ शत्रु

रूपाश्च सुहृदो मित्ररूपाश्च शत्रवः ॥ संधितास्ते न बुध्यंते कामक्रोधवशं गताः ॥ नास्ति जातु रिपुर्नाम

मित्रं नाम न विद्यते ॥ सामर्थ्ययोगाज्जायंते मित्राणि रिवस्तथा ॥ यो यस्मिन्जीवति स्वार्थं पश्येत्पीडां १०

हि २ दृश्य ३

न जीवति॥ स तस्य मित्रं नावत्स्यात् यावन्न स्याद्विपर्ययः॥ नास्ति मैत्री स्थिरा नाम न च ध्रुवम सौहृदं॥ अर्थयु
क्त्यानुजायंते मित्राणि रिपवस्तथा॥ मित्रं च शत्रुतामेति कस्मिंश्चित्कालपर्यये॥ शत्रुश्च मित्रतामेति स्वा
र्थो हि बलवत्तरः॥ यो विश्वसिति मित्रेषु न विश्वसिति शत्रुषु॥ अर्थयुक्तिमविज्ञाय यः प्रीतो कुरुते मनः॥
मित्रे वा यदि वा शत्रौ तस्यापि चलिता मतिः॥ न विश्वसेदविश्वस्ते विश्वस्ते नाति विश्वसेत्॥ विश्वासाद्भ
यमुत्पन्नमपि मूलानि कृंतति॥ अर्थयुक्त्या हि जायंते सुतस्तथा॥ मातुलाभागिनियाश्च तथा संबंधिबां पिता माता
धवाः॥ पुत्रं हि मातापितरौ त्यजंतः पतितं प्रियं॥ लोको रक्षति चात्मानं पश्य स्वार्थस्य सारतां॥ सामान्या निः
१८ कृतिः प्राज्ञ यो मोक्षात्सत्यनंतरं॥ कृतं बैरायसे शत्रुं सुस्तौ पायं न संशयं॥ अस्मिन्निलय एव तं ग्रोधात न्य
वतारितः॥ पूर्वं निविष्टमुन्माथं चपलत्वान्न बुद्धवान्॥ आत्मानश्च फलो नास्ति कुतोन्येषां भविष्यति॥ तस्मा
त्सर्वाणि कार्याणि चपलो हंत्यसंशयं॥ ब्रवीषि मधुरं यत्त्वं प्रियो मेद्य भवानिति॥ तन्मित्रकरणं सर्वं वि
मे २ स्तरेणापि शृणु॥ कामपोसि यतामेति द्वेष्यो भवति कारणात्॥ अर्थार्थी जीवलोकोनं न कश्चित्कस्यचि
त्प्रियः॥ सख्यं सोदर्ययोर्भ्रात्रोर्दंपत्योर्वापरस्परं॥ कस्यचिन्नाभिजानामि प्रीतिं निःकारणामिह॥ यद्यपि

खो५ म५ यं२

आ०७०

११

भ्रातरः सुहृद्वा भार्या वा कारणांत्तने ॥ स्वभावतस्ते प्रीयंते नेतरः प्रीयते जनः ॥ प्रियो भवति दानेन प्रियवादेन चापरः ॥ मं
त्र होम जपैरन्यः कार्यार्थे प्रीयते जनः ॥ उत्पन्ना कारणे प्रीतिरासीन्नौ कारणांतरे ॥ प्रध्वस्ते कारणस्थाने सा
प्रीति वि निवर्त्तते ॥ किंतु तत्कारणं मन्ये येनाहं भवतः प्रियः ॥ अन्यत्राभ्यवहारार्थं तत्रापि च बुधा वयं ॥ कालो
हेतुं विकुरुते स्वार्थस्तमनुवर्त्तते ॥ स्वार्थं प्राज्ञोभिजानाति प्राज्ञं लोकोनुवर्त्तते ॥ न त्वीदृशं त्वया वाच्यं विदुषि स्वार्थ
पंडिते ॥ अकालेहि समर्थस्य स्नेहहेतुरयं तव ॥ तस्मादहं चले स्वार्थात्सुस्थिरः संधिविग्रहे ॥ अभ्राणामिह रूपा
णि विकुर्वंति क्षणे क्षणे ॥ अद्यैव हि रिपुर्भूत्वा पुनरद्यैव मे सुहृत् ॥ पुनश्च रिपुरद्यैव युक्तीनां पश्य चापलं ॥ आ
सीन्मैत्री तु तावन्नौ यावद्धेतुरभूत्पुरा ॥ सा गता सह तेनैव कालयुक्तेन हेतुना ॥ त्वं हि मे जीवितः शत्रुः सामर्थ्या जाति ५
न्मित्रतां गतः ॥ तत्कृत्यमिति निर्वृत्यर्थे प्रतिः शत्रुतां गता ॥ सोहमेवं प्रणीतानि ज्ञात्वा शास्त्राणि तत्वतः ॥ प्रविशेयं
कृ४ कथं पाशं त्वत्कृते तद्वदस्व मे ॥ त्वद्वीर्येण प्रमुक्तोहं मद्वीर्येण तथा भवान् ॥ अन्योन्यानुग्रहे वृत्ते नास्ति भूयः समागमः ॥
त्वं हि सोम्य कृतार्थोद्य निर्वृत्तार्थास्तथा वयं ॥ न ते स्त्यद्य मया कृत्यं किंचिदन्यत्र भक्षणात् ॥ अहमन्नं भवान्भो
क्ता दुर्बलोहं भवान्बली ॥ नावयोर्विद्यते संधिर्वियुक्ते विषमे बलौ ॥ समन्येहं तव प्रज्ञां यन्मोक्षात्स्व्यनंतरं ॥ ११

५१ ले१

यद्धबद्धस्वं १

भक्ष्यं प्रज्ञां स सेहनं सुखोपायेन कर्म्मणा ॥ भक्षार्थं तं स्वयं बंधुस्तं समभुक्तः पीडितः क्षुधा ॥ शास्त्रज्ञं मतिमाज्ञा
यन्नूनं म क्षयिताद्य मां ॥ ज्ञानाभिस्तुचितं तुलों माहार्येः स्ते मय युच्यते ॥ स त्वं मामभिसंधाय कासे स्मगायसे पुनः ॥
त्वं चापि पुत्रदारस्थो यत्संधिं स्तजसे मयि ॥ शिक्षायाय नस्ते कर्तुं सख्ये मम मन तत् क्षमं ॥ तया मांसहितं दृष्ट्वा
बिया भार्या भिसुताश्चते ॥ कस्मात्ते मां न खादेयुर्हसाप्रणयिनस्त्वयि ॥ नाहं त्वया सहैष्यामि वृत्तो हेतुः समागमे ॥ शिवं
ध्यायस्व मे स्वस्थः सुकृतं स्मरसे यदि ॥ शठोऽयमनार्यस्तु तस्य क्लिष्टस्य क्षुधितस्य च ॥ भक्षं मृगायमाणस्य कः प्रा
बोद्ध ज्ञो विषयं व्रजेत् ॥ स्वस्ति तेऽस्तु गमिष्यामि दूरादपि तथौ द्विजे ॥ नाहं त्वया समेष्यामि निवृत्तो भवलोभगा ॥ य
दि त्वं सुकृतं वेत्सि तत्सख्यमनुसारयेः ॥ विश्वस्तं वा प्रमत्तं वा एतदेव कृतं भवेत् ॥ बलवत्संनिकर्षो हि न कदाचिद्विश
मेपापात् ज्ञास्यते ॥ प्रज्ञां तादपि यत्तेषां भेत्तव्यं बलिनः सदा ॥ यदि स्वार्थं न ते कार्यं ब्रूहि किं करवाणि ते ॥ कामं सर्वं प्रदास्य
मि न त्वात्मानं कदाचन ॥ आत्मार्थे संततिस्त्याज्या राज्यं रत्नं धनानि च ॥ अपि सर्वस्वमुत्सृज्य रक्षेदात्मानमात्मना ॥
रश्वर्यं धनरत्नानां प्राप्यमिते निवर्त्यतां ॥ दृष्ट्या हि पुनराहृतिर्जीवितामिति नः श्रुतं ॥ न त्वात्मनः संप्रदानं धनैर्व रत्न
दिष्यते ॥ आत्मा हि सर्वदा रक्ष्यो दारैरपि धनैरपि ॥ आत्मरक्षणतत्राणां सुपरीक्षितकारिणां ॥ आपदो नोपप
द्यंते पुरुषाणां स्वदोषजाः ॥ शत्रुं समभ्युदरं विज्ञाने तु दुर्बलाय बलीयसे ॥ न तेषां चाल्यते बुद्धिः शास्त्रार्थकृतनिश्चया ॥

कू ष्या ३

आ०
१२

इत्यभिव्यक्तमेवं स पलितेनाभिभर्त्सितः॥ मार्जारो व्रीडितो भूत्वा मूषिकं वाक्यमब्रवीत्॥ ॥लोमश उवाच॥ ॥
सत्यं पश्ये त्वयाहं वै मित्रद्रोहो विगर्हितः॥ तन्मन्येहं तव प्रस्तौ यस्त्वं मम हितेरतः॥ उक्तवानर्थतत्वेन मया संभि
न्नदर्शिनेः॥ न तु मामन्यथा साधो त्वं गृहीतुमिहार्हसि॥ प्राणप्रदानं जातं ते मयि सौहृदमागतं॥ धर्म
ज्ञोस्मि गुणज्ञोस्मि कृतज्ञोस्मि विशेषतः॥ मित्रेषु वत्सलश्चास्मि त्वद्भक्तश्च विशेषतः॥ तस्मादेवं पुनस्साधो
मय्याचयितुमर्हसि॥ त्वया हि वाच्यमानोहं जह्यां प्राणान्सबांधवः॥ विश्रंभो हि गुडैपीर्हसोम हृद्विधेषु मन
स्विषु॥ यदेतद्धर्मतत्वज्ञ न त्वं शंकितुमर्हसि॥ इति संस्तूयमानोपि मार्जारेण स मूषिकः॥ मनसा भावगं
भीरो मार्जारं वाक्यमब्रवीत्॥ साधुर्भवान्श्रुतार्थोस्मि प्रिये च न सं विश्वसे॥ संस्तवैर्वा धनौघैर्वा नाहं श
क्यः पुनस्त्वया॥ न ह्यमित्रवशं यांति प्राज्ञा निष्कारणं सखे॥ अस्मिन्नर्थे च गाथे द्वे निबोधोशनसा कृते॥
शत्रुसाधारणे कृत्ये कृत्वा संधिं बलीयसा॥ संयतो हि चरेद्युक्त्या कृतार्थश्च न विश्वसेत्॥ न वि
श्वसेदविश्वस्ते विश्वस्ते नापि विश्वसेत्॥ नित्यं विश्वासयेदन्यान्परेषां न तु विश्वसेत्॥ तस्मात्सर्वास्व
वस्थासु रक्षेज्जीवतमात्मनः॥ द्रव्याणि संततिश्चैव सर्वं भवति जीवतः॥ संक्षेपो नातिनीतिशास्त्राणाम

समा३

ज्ञो४
दि५

बुधै५

१२

मतः॥ स्याः१

विश्वासैं॰परो॥ न पुत तस्मादविश्वासः पुष्कलं हितमात्मनः॥ बध्यंते नैव विश्वस्ताः शत्रुभिर्दुर्बला अपि॥ विश्वस्तास्ते प्रबध्यंते ब-
वि लवंतोपि दुर्बलैः॥ तत्सुंघेध्यो मयाह्यात्मा रक्ष्यो मार्जार सर्वदा॥ रक्षस्त्वमपि चात्मानं चंडालाज्जातिकिल्बिषात्॥ स तस्य
ब्रुवतस्त्वेवं संत्रासाज्जातसाध्वसः॥ शाखां हित्वा जवेनाशु मार्जारः प्रययौ ततः॥ ततः शास्त्रार्थतत्वज्ञो बुद्धिसामर्थ्यमात्मनः
विश्राव्य पलितः प्राज्ञो बिलमन्यं जगाम ह॥ एवं प्रज्ञावता बुध्या दुर्बलेन महाबलाः॥ एकेन बहवो मित्राः पलितेनाभिसं-
धिताः॥ अरिणापि समर्थेन संधिं कुर्वीत पंडितः॥ मूषिकश्च बिडालश्च मुक्तावन्योन्यसंश्रयात्॥ इत्येष क्षत्रधर्मश्च मया
मार्गेषु दर्शितः॥ विस्तरेणापि महाराज संक्षेपमपि मे शृणु॥ अन्योन्यं कृतवैरौ तु चक्रतुः प्रीतिमुत्तमां॥ अन्योन्यमभिसं-
सं॰६ धातुं सा च ध्रुव तयोर्मतिः॥ तत्र प्राज्ञोभिसंधत्ते सम्यक्बुद्धिसमाश्रयात्॥ अभिसंधीयते प्राज्ञः प्रमादादपि वाबुधैः॥ तस्मा-
सन्धि६ दभीतवद्भीतो विश्वस्तवदविश्वसेत्॥ न ह्यप्रमत्तश्चलति चलितो वा विनश्यति॥ कालेन रिपुणा संधिः काले मित्रेणापि वि-
ग्रहः॥ कार्य इत्येव संधिज्ञाः प्राहुर्नित्यं नराधिप॥ एतज्ज्ञात्वा महाराज शास्त्रार्थमभिगम्य च॥ अभियुक्तः प्रसन्नश्च प्रागभ-
याद्भीतवच्चरेत्॥ भीतवत्संनिधिः कार्यः प्रतिसंधिस्तथैव च॥ भयादुत्पद्यते बुद्धिरप्रमत्ताभियोगतः॥ न भयं विद्यते राज-
न्भीतस्यानागते भये॥ अभीतस्य च विश्रंभात्सुमहज्जायते भयं॥ अभीश्चरति यो नित्यं मंत्रो देयः कथंचन॥ अविज्ञाना-
द्धि विज्ञातो गच्छेदास्यददर्शिषु॥ तस्मादभीतवद्भीतो विश्वस्तं बहु विश्वसन्॥ कार्याणां गुरुतां प्राप्य नानृतं किंचिदा-

आ०
१३

५२

चरेत्॥ एवमेतन्मया प्रोक्तमितिहासं युधिष्ठिर॥ श्रुत्वा त्वं सुहृदां मध्ये यथावत्समुपाचर॥ उपलभ्य मतिं चाग्र्यामरि-
मित्रांतरं तथा॥ संधिविग्रहकालंच मोक्षोपायस्तथैव च॥ शत्रुसाधारणे कृत्ये कृत्वा संधिं बलीयसा॥ समागमे
चरेद्युक्त्या कृतार्थो न च विश्वसेत्॥ अविरुद्धां त्रिवर्गेण नीतिमेतां महीपते॥ अभ्युत्तिष्ठ श्रुतादस्माद्भूयः संर-
ञ्जयन्प्रजाः॥ ब्राह्मणैश्चापि ते सार्द्धं यात्रा भवतु पांडव॥ ब्राह्मणा वै परं श्रेयो दिवि चेह च भारत॥ एते धर्मस्य
वेत्तारः कृतज्ञाः सततं प्रभो॥ पूजिताः शुभकर्तारः पूजयेत्तान्नराधिप॥ राज्यं श्रेयः परं राजन्यशः कीर्तिश्च लप्स्य-
ते॥ कुलस्य संततिं चैव यथान्यायं यथाक्रमं॥ द्वयोरिमं भारत संधिविग्रहं सुभाषितं बुद्धिविशेषकारितं॥ यथा
त्ववेक्ष्य क्षितिपेन सर्वदा निषेवितव्यं नृप शत्रुमंडले॥ ॥शांतौ आपद्धर्मे॥ ॥युधिष्ठिरः॥ ॥युक्तो मंत्रो महाबा- उ०
हो विश्वासो नास्ति शत्रुषु॥ कथं हि राजा वर्तेत यदि सर्वत्र नाश्वसेत्॥ विश्वासाद्धि परं राजन्राज्ञामुत्पद्यते भयं॥
कथं हि नाश्वसन्राजा शत्रूञ्जयति पार्थिव॥ एतन्मे संशयं छिंधि मतिर्मे संप्रमुह्यति॥ अविश्वासकथामेतामु-
पश्रुत्य पितामह॥ ॥भीष्मः॥ ॥शृणु कौंतेय यद्वृत्तं ब्रह्मदत्तनिवेशने॥ पूजन्या सह संवादं ब्रह्मदत्तस्य भूपतेः॥ कांपि- श०कुनिकः२
ल्ये ब्रह्मदत्तस्य त्वंतःपुरनिवासिनी॥ पूजनी नाम शकुनिर्दीर्घकालं सहोषिता॥ रुतज्ञा सर्वभूतानां यथा वै जीवजी-
वकः॥ सर्वज्ञा सर्वतत्वज्ञा तिर्यग्योनिगतापि सा॥ अभिप्रजाता सा तत्र पुत्रमेकं सुवर्चसं॥ समकालं च राज्ञोपि देव्यां १३

प्रसूतवती१ चरकेया२

पुत्रोप्यजायत॥तयोरर्थेकृतज्ञासाखेचरीपूजनीसदा॥समुद्रतीरंसागत्वाआजहारफलद्वयं॥पुष्ट्यर्थंचस्वपुत्र
स्यराजपुत्रस्यचैवह॥फलमेकंसुतायादाद्राजपुत्रायचापरं॥अमृतास्वादसदृशंबलंतेजोभिवर्द्धनं॥आदा
वा३ यादायसैवाशुतयोःप्रादात्पुनःपुनः॥ततोगछत्परांवृद्धिंराजपुत्रःफलाशनात्॥ततःसधात्र्याकक्षेणउह्यमानो
नृपात्मजः॥ददर्शतंपक्षिसुतंबाल्यादागत्यबालकः॥ततोबाल्याच्चयत्नेनतेनाक्रीडतपक्षिणा॥शून्येचतमुपा
समानव दायपक्षिणंसमजातकं॥हत्वाततःसराजेंद्रधात्र्याहस्तमुपागतः॥अथसापूजनीराजन्नागमत्फलहारिणी॥
यसं० अपश्यन्निहतंपुत्रंतेनबालेनभूतले॥बाष्पपूर्णमुखीदीनादृष्ट्वातंरुदतीसुतं॥पूजनीदुःखसंतप्तारुदतीवा
क्यमब्रवीत्॥क्षत्रियेसंगतंनास्तिनप्रीतिर्नचसौहृदं॥कारणात्सांत्वयंत्येतेकृतार्थाःसंत्यजंतिच॥क्षत्रियेषुन
विश्वासःकार्यःसर्वापकारिषु॥अपकृत्यापिसततंसांत्वयंतिनिरर्थकं॥अहमस्यकरोम्यद्यसदृशींवैरयातनां
॥कृतघ्नस्यनृशंसस्यभृशंविश्वासघातिनः॥सहसंजातवृद्धस्यतथैवसहभोजिनः॥शरणागतस्यचवध
स्त्रिविधंह्येवपातकं॥इत्युक्त्वाचरणाभ्यांतुनेत्रेनृपसुतस्यसा॥भित्वास्वस्थाततइदंपूजनीवाक्यमब्रवीत्॥
इच्छयेहकृतंपापंसद्यस्तंचोपसर्पति॥कृतंप्रतिकृतंयेषांननश्यतिशुभाशुभं॥पापंकर्मकृतंकिंचिद्यदितस्मि
न्नदृश्यते॥नृपतेतस्यपुत्रेषुपौत्रेष्वपिचनप्तृषु॥ब्रह्मदत्तःसुतंदृष्ट्वापूजन्याहृतलोचनं॥कृतेप्रतिकृतंमत्वा

सचहेतुरतिक्रांतो यदर्थमहमावसं ॥ पूजितस्यार्थमानाभ्यां जंतोः पूर्वापकारिणः ॥ मनो भवत्यविश्वस्तं कर्म त्रासयते
आ० बलात् ॥ पूर्वं संमानना यत्र पश्चाच्चैव विमानना ॥ जह्यात्तत्सत्त्ववान् स्थानं मैत्रीं संमानितोपि सन् ॥ उषितास्मि तवागारे दीर्घकालं सपूजिता ७
पूजनीमिदमब्रवीत् ॥ ॥ब्रह्मदत्तः॥ ॥अस्ति वै कृतमस्माभिरस्ति प्रतिकृतं त्वया ॥ उभयं तत्समीकृतं वस पूजनि
१४ मागमः ॥ ॥पूजन्युवाच॥ ॥स कृत्कृतापराधस्य तत्रैव परिलंबतः ॥ न तद्बुधाः प्रशंसंति श्रेयस्तत्रापसर्पणं ॥ सां
त्वे प्रयुक्ते सततं कृतवैरे न विश्वसेत् ॥ क्षिप्रं संबध्यते मूढो न हि वैरं प्रशाम्यति ॥ अन्योन्यकृतवैराणां पुत्रपौत्रं निय
च्छति ॥ पुत्रपौत्रविनाशे च परलोकं नियच्छति ॥ सर्वेषां कृतवैराणामविश्वासः सुखोदयः ॥ एकांततो न विश्वासः
कार्यो विश्वासघातकैः ॥ न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ॥ विश्वासाद्भयमुत्पन्नमपि मूलं निकृंत
ति ॥ कामं विश्वासयेदन्यान् परेषां च न विश्वसेत् ॥ माता पिता बांधवानां वरिष्ठौ भार्या जरा बीजमात्रं तु पुत्रः ॥ भ्राता
त्माद त्रां शत्रुः क्लिन्नपाणिर्वयस्य आह्येकः सुखदुःखस्य भोक्ता ॥ अन्योन्यकृतवैराणां न संधिरुपपद्यते ॥ तदिदं वैर
मुत्पन्नं सुखमानुव्रजाम्यहं ॥ ॥ब्रह्मदत्त उवाच॥ ॥ यत्कृते प्रतिकुर्याद्धि न स तत्रापराध्नुयात् ॥ अनृणस्तेन भ
वति वस पूजनि मागमः ॥ ॥पूजन्युवाच॥ ॥न कृतस्य तु कर्तुश्च सख्यं संधीयते पुनः ॥ हृदयं तत्र जानाति क
र्तुश्चैव कृतस्य च ॥ ॥ब्रह्मदत्तः॥ ॥कृतस्य चैव कर्तुश्च कार्यं संधीयते पुनः ॥ वैरस्योपशमो दृष्टः पापं नोपा
श्नुते पुनः ॥ ॥पूजन्युवाच॥ ॥नास्ति वैरमतिक्रांतं सांत्वितोस्मीति नाश्वसेत् ॥ विश्वासाद्बध्यते लोके तस्माच्छ्रेयो
प्यदर्शनं ॥ तरसा ये न शाम्यंते शस्त्रैः सुनिशितैरपि ॥ साम्ना तेपि निगृह्यंते गजा इव करेणुभिः ॥ ॥ब्रह्मदत्तः॥ ॥ १४

ग्जं ३

संवासाज्जायते स्नेहो जीवितांतकरेष्वपि॥ अन्योन्यस्य च विश्वासः श्वपचेन शुनो यथा॥ अन्योन्यकृतवैराणां सं
वासान्मृदुतां गतं॥ नैव तिष्ठति तद्वैरं पुष्करस्थमिवोदकं॥ ॥पूजन्युवाच॥ ॥वैरं पंचसमुत्थानं बुध्यंति तच्च पंडि
ताः॥ स्त्रीकृतं वास्तुजं वाग्जं ससपत्नापराधजं॥ तत्र दाता न हंतव्यः क्षत्रियेण विशेषतः॥ प्रकाशं वाप्रकाशं च बु
ध्वा दोषबलाबलं॥ कृतवैरे न विश्वासः कार्यस्त्विह सुहृद्यपि॥ छन्नं संतिष्ठते वैरं गूढोग्निरिव दारुषु॥ न वित्ते
न न पारुष्यैर्न च सांत्वेन वा श्रुतैः॥ कोपाग्निः शाम्यते राजंस्तोयाग्निरिव सागरे॥ न हि वैराग्निरुद्भूतः कर्म चाप्यप
राधजं॥ शाम्यत्यदग्ध्वा नृपते विना ह्येकतरक्षयात्॥ सत्कृतस्यार्थमानाभ्यामनुपूर्वापकारिणः॥ नादेयो मित्र
विश्वासः कर्म त्रासयते बलात्॥ नैवापकार्यं कस्मिंश्चिदहं त्वयि तथा भवान्॥ उषितास्मि गृहेऽहं ते नेदानीं विश्व
स्याम्यहं॥ ॥ब्रह्मदत्तः॥ ॥कालेन क्रियते कार्यं तथैव विविधाः क्रियाः॥ कालेनैते प्रवर्त्तंते कः कस्येहापराध्यति॥
तुल्यं चोभे प्रवर्त्तेते मरणं जन्म चैव ह॥ कार्यते चैव कालेन तन्निमित्तं न जीवति॥ बध्यंते युगपत्केचिदेकैके कस्य
न चापरे॥ कालो दहति भूतानि संप्राप्याग्निरिवेंधनं॥ नाहं प्रमाणं नैव त्वमन्योन्यं कारणं शुभे॥ कालो नित्य
मुपादत्ते सुखं दुःखं च देहिनां॥ एवं वसेह सस्नेहा यथाकाममहिंसिता॥ यत्कृतं तत्तु मे क्षांतं त्वं च वै क्षम पूजनि॥
पूजन्युवाच॥ ॥यदि कालः प्रमाणं ते न वैरं कस्यचिद्भवेत्॥ कस्मात्त्वपचितिं यांति बांधवा बांधवैर्हतैः॥ कस्मा

स३ त्वयाचा२

आ० १५ देवासुराः पूर्वमन्योन्य मभिनच्छिने।। यदि कालेन निर्याणं सुखंदुःखं भवाभवौ।। भिषजो भेषजं कर्तुं कस्माछिंदं
तिनोगिणः।। यदि कालेन पच्यंते भेषजैः किं प्रयोजनं।। प्रलापः सुमहाँ कस्मात्क्रियते शोकमूर्छितैः।। यदि कालः
प्रमाणं ते कस्माद्धर्मोस्ति कर्तृषु।। तव पुत्रोममापत्यं हतवान्हतो मया।। अनंतरं हं चैहं तव्योहि नराधिप।। अहं
हि पुत्रशोकेन कृतपापा तवात्मजे।। यथा त्वया प्रहर्त्तव्यं तथा तत्वं च मे स्मृणु।। भक्ष्यार्थं क्रीडनार्थं च नरा वांछंति
पक्षिणः।। तृतीयो नास्ति संयोगो वधबंधादृते क्षमः।। वधबंधपरा ये ते मोक्षतंत्रमुपाश्रिताः।। जन्मपोत्मातजेदुः
खं प्राहुर्वेदविदो जनाः।। सर्वस्य दयिताः प्राणाः सर्वस्य दयिताः सुताः।। दुःखादुद्विजते सर्वः सर्वस्य सुखमीप्सितं।।
स्व५ दुःखं जनाब्रह्मदत्त दुःमर्थविपर्ययः।। दुःखं चानिष्टसंवासो दुःखमिष्टवियोजनं।। वधबंधकृतं दुःखं स्त्रीकृतं स
ज्ञान४ हजं यथा।। दुःखं सुते न सततं जनान्विपरिवर्त्तते।। न दुःखं परदुःखेवै केचिदाहुरबुद्धयः।। यो दुःखं नाभिजानाति स
जल्पति महाजने।। यस्तु शोचति दुःखार्त्तो स कथं वक्तुमुत्सहेत।। रसस्तः सर्वदुःखस्य यथात्मनि तथापरे।। यत्कृ
तं ते मया राजन् त्वया च मम यत्कृतं।। न तद्वर्षशतैः शक्यं व्यपोहितुमरिंदम।। आवयोः कृतमन्योन्यं पुनः संधिर्न
यः९ विद्यते।। निर्बंधस्तोर्थशास्त्रेषु विस्रासस्याशुखोदयः।। उशना चैव गाथे द्वे प्रह्लादायाब्रवीत्पुरा।। ये वैरिणः श्रद्द १५
स्मत्वास्मत्वाहिते पुत्रे नवं वैरं भविष्यति।। वैरमंतिकमासाद्य प्रीयःप्रीतिं कर्तुमिच्छति।। मन्मथस्येव
भग्नस्य यथा संधिर्न विद्यते।।१

स्तो ल्

घते सत्ये सत्येन तरे पिता ।। बध्यंते स्वद्धानास्तु मधुभुक्त पौर्वथा ।। नहि वैराणि शाम्यंति कुले दुःखगतानि च ।।
तुवैरा आख्यातारश्च विद्यंते कुले वै म्रियते पुमान् ।। उपगृह्य पिसांत्वयंति न नाधिपे ।। अथैनं शंति पिशांति गृधी घट पं२
मिवाश्मनि ।। सदा न विश्वसेद्राज्ञां पापं कृत्वेह कस्यचित् ।। अपकृत्य परेषां च विश्वासाद्दुःखमश्नुते ।। ।।ब्रह्मदत्तः।। ।।
नौ विश्वासाद्धि दृते र्थनीहंते चापि किंचन ।। भेयाद्विकृतराग्निसं मृतकल्पा भवंति च ।। ।।पूजन्युवाच।। ।।यस्य
ह ब्रणिनौ पादौ पद्भ्यांच परिसर्पति ।। खन्येते तस्य तौ पादौ सुगुप्तस्येह धावतः ।। नेत्राभ्यां सरुजाभ्यां यः प्रतिवातमुदी
उ।६ क्षते ।। तस्य वा युरुजेत्यर्थं नेत्रयो भवति ध्रुवं ।। दुष्टं पंथानमासाद्य यो मोहादुपपद्यते ।। आत्मनो बलमज्ञाय तदं
तं तस्य जीवितं ।। यस्तु वर्षमविज्ञाय क्षेत्रं कर्षति मानवः ।। हीनः पुरुषकारेण सस्यं नैवाप्नुते ततः ।। यस्तु तिक्तं
कषायं वा स्वादु वा मधुरं हितं ।। आहारं कुरुते नित्यं सोमृतत्वाय कल्पते ।। पथ्यं भुक्ता तु यो मोहाद्दुष्टमश्नाति भो
जनं ।। परिणाममविज्ञाय तदंतं तस्य जीवितं ।। दैवं पुरुषकारश्च स्थितावन्योन्यसंश्रयात् ।। उदाराणां तु सत्क
र्म दैवं क्लीबा उपासते ।। कर्म चात्महितं कार्यं तीक्ष्णं वा यदि वा मृदु ।। यस्य ते कर्मशीलस्तु सदाँनार्थैरकिंचनं ।।
तस्मात्सर्वं व्यपोह्यार्थं कार्य एव पराक्रमः ।। सर्वस्वमपि संत्यज्य कार्यमात्महितं नरैः ।। विद्या शौर्यं च दाक्ष्यं च

ग्र२ नर्थै२

वर्त्त° द्ये ३

बलं धैर्यं च पंचमं॥ मित्राणि सहजान्याहुर्वर्जयंतीह तैर्बुधाः॥ निवेशानं च कुप्यं च क्षेत्रं भार्या सुहृज्जनः॥ एतान्यु
पहितान्याहुः सर्वत्र लभते पुमान्॥ सर्वत्र रमते प्राप्तः सर्वत्र च विराजते॥ न विभीषयते कश्चिद्भीषितो न विभेति
च॥ नित्यं बुद्धिमतोप्यर्थः स्वल्पकोपि विवर्द्धते॥ दाक्ष्यैणा कुर्वतः कर्म संयमा प्रतितिष्ठति॥ गृहस्नेहावब
द्धानां नराणामल्पमेधसां॥ कुस्त्री खादति मासानि माघमांसे गवाइव॥ गृहं क्षेत्राणि मित्राणि स्वदेश
मिति चापरे॥ इत्येवमवसीदंति नरा बुद्धिविपर्यये॥ उत्सन्नेत्सनु जाहि ग्रामाध्या पितुर्भिक्ष पीडितात्॥ अन्य
त्र वक्तुं गच्छेद्वा वसेद्वा नित्यमानितः॥ तस्मादन्यत्र यास्यामि वस्तुं नाहमिहोत्सहे॥ कृतमेतदनार्यं मे
तवपुत्रे च पार्थिव॥ कुभार्यां च कुपुत्रं च कुराजानं कुसौहृदं॥ कुसंबंधं कुदेशं च दूरतः परिवर्जयेत्॥ कुपुत्रे
णाति विश्वासः कुभार्यायां कुतो रतिः॥ कुराज्ये निर्वृतिर्नास्ति कुदेशे नास्ति जीविका॥ कुमित्रे संगतिर्नास्ति नित्य
मस्थिरसौहृदे॥ अवमानः कुसंबंधे भवंत्यर्थविपर्यये॥ सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः॥ तन्मित्रं
यत्र विश्वासः स देशो यत्र जीव्यते॥ यत्र नास्ति बलात्कारः स राजा तीव्रशासनः॥ भीरेव नास्ति संबंधो दरि
द्रं योनुबुध्यते॥ भार्या देशोथ मित्राणि पुत्रसंबंधिबांधवाः॥ एते सर्वे गुणवति धर्मनेत्रे महीपतौ॥ अ

धर्मज्ञस्य विलयं प्रजापालस्य निग्रहात्॥ राजा मूलं त्रिवर्गस्य स्वप्रमत्तोनुपालयेत्॥ बलि षड्भागमुद्धृत्य बलिं स
मुपयोजयेत्॥ न रक्षति प्रजाः सम्यग्यः स पार्थिवतस्करः॥ दंत्वाभयं यः स्वयमेव राजा न तत्प्रमाणं कुरुतेर्थलोभा
त्॥ स सर्वलोकादुपलभ्य पापं सोधर्मबुद्धिर्निरयं प्रयाति॥ दत्वाभयं स्वयं राजा प्रमाणं कुरुते यदि॥ स सर्वसुखकृ
ज्ज्ञेयः प्रजा धर्मेण पालयन्॥ माता पिता गुरुर्गोप्ता वह्निर्वैश्रवणो यमः॥ सप्त राज्ञो गुणानेतान्मनुराह प्रजापतिः
॥ पिता हि राजा राष्ट्रस्य प्रजानां योनुकंपनः॥ तस्मिन्मिथ्याविनीतो हि तिर्यग्गच्छति मानवः॥ संभावयति मातेव दी
प६ नमप्युपपद्यते॥ दहत्यग्निरिवानिष्टान्यमयन्नसतो यमः॥ इष्टेषु विसृजन्नर्थान्कुबेर इव कामदः॥ गुरुर्ध
र्मोपदेशेन गोप्ता च परिपालकवत्॥ यस्तु रंजयते राजा पौरजानपदान्गुणैः॥ न तस्य भ्रमते राज्यं स्वयं धर्मानु
पालनात्॥ स्वयं समुपयातं हि पौरजानपदार्चनं॥ न सुखं प्रेक्षते राजा इह लोके परत्र च॥ नित्योद्विग्नाः प्रजा
यस्य करभारप्रपीडिताः॥ अनर्थैर्विप्रलुप्यंते स गच्छति पराभवं॥ प्रजा यस्य विवर्द्धते सरसीव महोत्पलं॥ स
सर्वफलभाग्राजा स्वर्गलोके महीयते॥ बलिना विग्रहो राजन्न कदाचित्प्रशस्यते बलिना विग्रहो यस्य कुतो
राज्यं कुतः सुखं॥ ॥भीष्मः॥ ॥सैवमुक्त्वा शकुनिका ब्रह्मदत्तं नराधिपं॥ राजानं समनुज्ञाप्य जगामाभीप्सि

स४

तांदिशं॥ एततेब्रह्मदत्तस्यपूजन्याःसहभाषितं॥ मयोक्तंनृपतिश्रेष्ठकिमन्यच्छ्रोतुमिछसि॥ ॥शांतौआपद्धर्मे॥ ॥
युधिष्ठिरः॥ ॥युगक्षयात्परिक्षीणेधर्मेलोकेचभारत॥ दस्युभिःपीड्यमानेचकथंस्थेयंपितामह॥ ॥भीष्म
उवाच॥ ॥हंततेवर्तइष्यामिनीतिमापत्सुभारत॥ उत्सृज्यापिघृणांकालेयथावर्तेतभूमिपः॥ अत्राप्युदाहरंतीम
मितिहासंपुरातनं॥ भारद्वाजस्यसंवादंराज्ञःशत्रुंजयस्यच॥ राजाशत्रुंजयोनामसौवीरेषुमहारथः॥ भा
रद्वाजमुपागम्यपप्रच्छार्थविनिश्चयं॥ अलब्धस्यकथंलिप्सालब्धंकेनाविवर्द्धते॥ वर्द्धितंपाल्यतेकेनपालि
तंप्रणयेत्कथं॥ तस्मैविनिश्चितार्थायपरिपृष्टोर्थनिश्चयं॥ उवाचब्राह्मणोवाक्यंमिदंहेतुमदुत्तमं॥ नित्य नु४
मुद्यतदंडस्यान्नित्यंविवृतपोरुषः॥ अछिद्रछिद्रदर्शीचपरेषांविवरानुगः॥ नित्यमुद्यतदंडस्यभृशमुद्वि
जतेजनः॥ तस्मात्सर्वाणिभूतानिदंडेनैवप्रसाधयेत्॥ एवंदंडप्रशंसंतिपंडितास्तत्वदर्शिनः॥ तस्माच्चतुष्टयेतस्मि
न्प्रधानोदंडउच्यते॥ छिन्नमूलेत्वधिष्ठानेसर्वेषांजीवनंहतं॥ कथंहिशाखास्तिष्ठेयुःछिन्नमूलेवनस्पतौ॥
मूलमेवादितछिंद्यात्परपक्षस्यपंडितः॥ ततःसहायान्पक्षंचमूलमेवानुसाधयेत्॥ सुमंत्रितंसुविक्रांतं
सुयुद्धंसुपलायितं॥ आपदस्पदकालेतुकुर्वीतनविचारयेत्॥ वाङ्मात्रेणविनीतःस्याद्धृदयेनयथाक्षुरः॥

ग३

श्लक्ष्णः पूर्वाभिभाषी च कामक्रोधौ च वर्जयेत्॥ सपत्नसंहिते कार्ये कृत्वा संधिं न विश्वसेत्॥ अपक्रामेत्ततः शी
घ्रं कृतकार्यो विचक्षणः॥ शत्रुं च मित्ररूपेण सांत्वेनैवाभिसांत्वयेत्॥ नित्यशङ्क्यो हि जीतस्माद् हृहात्सर्पयुता
दिव॥ यथाबुद्धिं परिक्षवेत मतीतेन सांत्वयेत्॥ अनीतिन दुःप्रवृत्तं भृत्युसन्नेन पंडितं॥ अंजलिं शपथं सांत्वं प्र
णम्य शिरसा वदेत्॥ अश्रुप्रमार्जनं चैव कर्तव्यं भूतिमिच्छता॥ वहेदमित्रं स्कंधेन यावत्कालस्य पर्ययः॥ प्राप्त
कालं तु विज्ञाय भिंद्याद्घटमिवाश्मनि॥ मुहूर्तमिव राजेंद्र तिंदुकालातवज्ज्वलेत्॥ न तु षानिरिवानर्चिर्धूमा
येत चिरं नरः॥ नानार्थिकोऽर्थसंबंधं कृतघ्नेन समाचरेत्॥ अर्थीति शक्यते भोक्तुं कृतकार्योऽवमन्यते॥ तस्मा
त्सर्वाणि कार्याणि सावशेषाणि कारयेत्॥ कोकिलस्य वराहस्य मेरोः शून्यस्य वेश्मनः॥ नटस्य भक्तिमित्र
स्य यच्छ्रेयस्तत्समाचरेत्॥ उत्थायोत्थाय गच्छेत नित्ययुक्तो रिपोर्नृपात्॥ कुशलं चास्य पृच्छेत यद्यप्यकुश ४गृहात्
लं भवेत्॥ नालसाः प्राप्नुवंत्यर्थान्न क्लीबा नाभिमानिनः॥ न च लोकरवाद्भीता न वै शश्वत्प्रतीक्षिणः॥ नात्म
च्छिद्रं रिपुर्विद्याद्विद्याच्छिद्रं परस्य तु॥ गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्मनः॥ बकवच्चिंतयेदर्थान् सिंहवच्च
पराक्रमेत्॥ वृकवच्चावलुंपेत शशवच्च विनिष्पतेत्॥ पानमक्षास्तथा नार्यो मृगया गीतवादितं॥ एतानि

स्वयोष्याणां परैः शोषणं॥ मूलोत्खननं॥ अचलत्वं॥ ईषत्स्तमिच्छेत्॥ नानारूपत्वं॥ ५
रारा १ संपदागमः ९

आ० पुत्या सेवेत प्रसंगो ह्यत्र दोषवान्॥ कुर्यात्तृणमयं चापं शायीत मृगशायिकां॥ अंधःस्यादंधवेलायां बाधिर्यमपि
१८ संश्रयेत्॥ देशकालौ समासाद्य विक्रमेत विचक्षणः॥ देशकालव्यतीतो हि विक्रमो निःफलो भवेत्॥ कालाका
लौ सप्रधार्य बलाबलमथात्मनः॥ परस्परं बलं ज्ञात्वा तत्रात्मानं नियोजयेत्॥ दंडेनोपनतं शत्रुं यो राजा न
नियच्छति॥ स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा॥ सुपुष्पितः स्यादफलः फलवान् स्याद्दुरारुहः॥ आमः स्या
त्पक्वसंकाशो न च शीर्येत कस्यचित्॥ आशां कालवतीं कुर्यात्तां च विघ्नेन योजयेत्॥ विघ्नं निमित्ततो ब्रूयान्नि
मित्तं चापि हेतुतः॥ भीतवत्संनिधातव्यं यावद्भयमनागतं॥ आगतं तु भयं दृष्ट्वा प्रहर्त्तव्यमभीतवत्॥ न संशयम
मारुह्य नरो भद्राणि पश्यति॥ संशयं पुनरारुह्य यदि जीवति पश्यति॥ अनागतं विजानीयाद्यच्छेद्भयमुप त्
४ त्र स्थितं॥ पुनर्वृद्धिभयात्किंचिदनिवृत्तिं निशामयेत्॥ प्रत्युपस्थितिकालस्य सुखस्य परिवर्जनं॥ अनागतसुखाशा
च नैव बुद्धिमतां नयः॥ योऽरिणा सह संधाय सुखं स्वपिति निःश्वसन्॥ स वृक्षाग्रे प्रसुप्तो वा पतितः प्रतिबुध्यते॥ क
र्मणा येन तेनैव मृदुना दारुणेन च॥ उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत्॥ ये सपत्नाः सपत्नानां सर्वांस्तानु
पसेवयेत्॥ आत्मनश्चापि बोद्धव्याश्चारा विनिहिताः परैः॥ चारस्त्वविदितः कार्यं आत्मनोथ परस्य च॥ पाषंडांस्ता १८

छेति २ स ३

पसादीश्च परनाडे प्रवेशयेत् ॥ उद्यानेषु विहारेषु प्रापर्वस्त्वावसथेषु च ॥ पानागारे प्रवेशेषु तीर्थेषु च सभासु
च ॥ धर्मास्त्रिचारिणः पापाश्चौरा लोकस्य कंटकाः ॥ समायावेंतताँन्बुध्वा नियच्छेत्समयीतवा ॥ न विश्वसेदविश्व
स्ते विश्वस्ते नापि विश्वसेत् ॥ विश्वासाद्भयमभ्येति नापरीक्ष्य च विश्वसेत् ॥ विश्वासयित्वा तु परं तत्वभूतेन हेतुना
॥ अथास्य प्रहरेत्काले किंचिद्विचलिते पदे ॥ अशंक्यमपि शंक्येत नित्यं शंकेत शंकितात् ॥ भयं ह्यशंकिताज्जा
तं समूलमपि कृंतति ॥ अवधानेन मौनेन काषायेन जटाजिनैः ॥ विश्वासयित्वा द्वेष्टारमवलुंपेद्यथा वृकः ॥ पु
त्रो वा यदि वा भ्राता पिता वा यदि वा सुहृत् ॥ अर्थस्य विघ्नं कुर्वाणा हंतव्या भूतिमिच्छता ॥ गुरोरप्यवलिप्तस्य
कार्याकार्यमजानतः ॥ उत्पथप्रतिपन्नस्य दंडो भवति शासनं ॥ अभ्युत्थानाभिवादाभ्यां संप्रदानेन केनचित् ॥ प्रति
तुं ४ पुष्पफलावघाती तीक्ष्णदंड इव द्विजः ॥ नाच्छित्वा परमर्माणि नाकृत्वा कर्म दारुणं ॥ नाहत्वा मत्स्यघातीव प्राप्नो पञ्ची ४
ति महतीं श्रियं ॥ नास्ति जात्या रिपुर्नाम मित्रं वापि न विद्यते ॥ सामर्थ्ययोगाज्जायंते मित्राणि रिपवस्तथा ॥
अमित्रं नैव मुंचेत वदंतं करुणान्यपि ॥ दुःखं तत्र न कर्त्तव्यं हन्यात्पूर्वापकारिणं ॥ संग्रहानुग्रहे यत्नः सदा का
र्योनुसूयता ॥ निग्रहश्चापि यत्नेन कर्त्तव्यो भूतिमिच्छता ॥ प्रहरिष्यन्प्रियं ब्रूयात्प्रहृत्यैव प्रियोत्तरं ॥ असि

लाभप्रश्नपं२

आ॰ नापिशिराधिं त्वाशोचेत चरुदेत च॥ निमंत्रपीतसांत्वेन संमानेन तितिक्षया॥ लोकाराधनमित्येतत् कर्त्तव्यं भूति
१९ मिछता॥ न शुष्कं वैरं कुर्वीत बाहुभ्यां न नदीं तरेत्॥ अनर्थकमनायुष्यं गोविषाणस्य भक्षणं॥ दंताश्च परिमृद्यंते र
सश्चापि न लभ्यते॥ त्रिवर्गस्त्रिविधा पीडा ह्यनुबंधास्तथैव च॥ अनुबंधं तथा ज्ञात्वा पीडां च परिवर्जयेत्॥ ऋणशेषम
ग्निशेषं शत्रुशेषं तथैव च॥ पुनः पुनः प्रवर्द्धंते तस्माच्छेषं न धारयेत्॥ वर्द्धमानमृणं तिष्ठेत्परिभूताश्च शत्रवः॥ पाशे
ति॰भ॰५ जनयंतीवं व्याधयश्चाप्युपेक्षितां॥ नासम्यक्कृतकारी स्यादप्रमत्तः सदा भवेत्॥ कंटकोपि हि दुश्छिन्नो विकारं कु
रुते चिरं॥ वधेन च मनुष्याणां मार्गाणां दूषणेन च॥ आगाराणां विनाशैश्च परराष्ट्रं विनाशयेत्॥ गृध्रदृष्टिर्बका
निश्चलः५ लीनः श्वचेष्टः सिंहविक्रमः॥ अनुद्विग्नः काकशंकी भुजंगचरितं चरेत्॥ शूरमंजलिपातेन भीरुं भेदेन भेदये दूरदृष्टी
जा॰४ त्॥ लुब्धमर्थप्रदानेन समं तुल्येन विग्रहः॥ श्रेणीमुख्योपतापे च वल्लभानुनयेषु च॥ अमात्यान्परिरक्षेत भे
दसंघाततयोरपि॥ मृदुरित्यवजानंति तीक्ष्ण इत्युद्विजंति च॥ तीक्ष्णकाले भवेत्तीक्ष्णो मृदुकाले मृदुर्भवेत्॥ मृदु
नैव मृदुं छिंधि मृदुना हंति दारुणं॥ नासाध्यं मृदुना किंचित्तस्मात्तीक्ष्णतरो मृदुः॥ काले मृदुर्यो भवति का
ले भवति दारुणः॥ प्रसाधयति कृत्यानि शत्रुं चाप्यधितिष्ठति॥ पंडितेन विरुद्धः सन्दूरस्थोस्मीति नाश्व
बा॰१ परेंगितज्ञः।५ अकस्मात्परस्ते दुर्गादौ प्रवेशनं॥५ १९

ना३

सेत्॥ ह्रीर्धीर्बुद्धिमतो बाहूयाभ्यां हिंसति हिंसितः॥ न तत्तेघस्य न पापमुत्तनेन तद्वेद्यस्तु नराहरे सकः॥ न ५०

रखव२ तश्चैनेघस्य न मूलमुद्धरेत् तं हन्याद्घस्यशिनो न पातयेत्॥ इतीदमुक्तं द्विजिनाश्रिसंज्ञितं न चैतदेवं पुरुषः समा

चरेत्॥ पनप्रयुक्तेन कथं विमावयेद्रतो मयोक्तं भवतो हितार्थिनं॥ यथावदुक्तं वचनं हितार्थिना निशाम्य विप्रेण

सुवीरराष्ट्रपः॥ तथाकरोद्वाक्यमदीनचेतनः श्रियं च दीप्तांबुभुजे स बांधवः॥ ॥शांतौ अ पद्धमे॥ ॥युधि

ष्ठिरः॥ ॥हीने परमके धर्मे सर्वलोके क्षिलंधिते॥ अधर्मे धर्मतां नीते धर्मे चाधर्मतां गते॥ मर्यादासु विनष्टासु

क्षुभिते धर्मनिश्चये॥ राजभिः पीडिते लोके परैर्वापि विशांपते॥ सर्वाश्रमेषु मूढेषु कर्मसूपहतेषु च॥ का स्त्र६

माल्लोभाच्च मोहाच्च भयं पश्यत्सु भारत॥ अविश्वस्तेषु सर्वेषु नित्यं भीतेषु पार्थिव॥ निकृत्या हन्यमानेषु वं

चयत्सु परस्परं॥ संदीप्तेषु च देशेषु ब्राह्मण्ये चातिपीडिते॥ अवर्षति च पर्जन्ये मिथोभेदे समुत्थिते॥ सर्वस्मि

न्दस्युसाद्भूते पृथिव्यामुपजीवने॥ केनविद्ब्राह्मणो जीवेज्जघन्ये काल आगते॥ अतितिक्षुः पुत्रपौत्राननुक्रो ना३

शान्नराधिप॥ कथमापत्सु वर्तेत लोके कलुषतां गते॥ कथमर्थाच्च धर्माच्च न हीयेत परंतप॥ ॥भीष्मः॥ ॥

राजमूला महाबाहो योगक्षेमसुवृष्टयः॥ प्रजासु व्याधयश्चैव मरणं च भयानि च॥ कृतं त्रेता द्वापरं च १

भ१

चांडालागारे २ देवविहितः ३

कलिश्च भरतर्षभ॥ राजन्मत्स्याइति गतिर्मे मतास्यत्र संशयः॥ तस्मिन्नभ्यागते काले प्रजानां दोषकारके॥ वि
ज्ञानबलमास्थाय जीवितव्यं भवेत्तदा॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ विश्वामित्रस्य संवादं चांडा
लस्य च पक्कणे॥ त्रेताद्वापरयोः संधौ तदा दैवविधिक्रमात्॥ अनावृष्टिरभूत् घोरा लोके द्वादशवार्षिकी॥ प्र
जानामतिवृद्धानां युगांते समुपस्थिते॥ त्रेताविमोक्षसमये द्वापरप्रतिपादने॥ न ववर्ष सहस्राक्षः प्रतिलो ३ वक्री
मोऽभवद्गुरुः॥ जगाम दक्षिणं मार्गं सोमो व्यावृत्तलक्षणः॥ नावश्यायो पतत्यग्र कुत एवाभ्रजातयः॥ नद्यः सं अन्यथाभूतं चिह्नं यस्य ६
क्षिप्ततोयौघाः किंचिदंतर्गतास्ततः॥ सरांसि सरितश्चैव कूपाः प्रस्रवणानि च॥ हतत्विषो न लक्ष्यंते निसर्गाद्दैव
कात्तदा॥ उपशुष्कजलस्थायां विनिवृत्तसभाप्रपा॥ निवृत्तयज्ञस्वाध्याया निर्वषट्कारमंगला॥ उच्छिन्नकृषि स्था ६
गोरक्षा निवृत्तविपणापणा॥ निवृत्तपूगसंभारा विप्रनष्टमहोत्सवा॥ अस्थिसंचयसंकीर्णा महाभूतरवा
कुला॥ शून्यभूयिष्ठनगरा दग्धग्रामनिवेशना॥ क्वचिच्चौरैः क्वचिच्छस्त्रैः क्वचिद्राजभिरातुरैः॥ परस्परभया
च्चैव शून्यभूयिष्ठनिर्जना॥ गतदैवतसंस्थाना वृद्धलोकनिराकृता॥ गोऽजाविमहिषीहीना परस्परपराह
सु ता॥ हतविप्रा हतत्राणा प्रनष्टौषधिसंचया॥ सर्वभूततनुच्छाया बभूव वसुधा तदा॥ तस्मिन्प्रतिभये काले क्षते धर्मे यु

देवद्विजलाञ्छाया ५ रथ चौ ३

धिष्ठिर ॥ बभूवुः क्षुधिता मर्त्याः खादमानाः परस्परं ॥ निःषयोनिघ्रमांसस्य त्या परित्याज्याग्निदेवताः ॥ आश्र
मां संपरित्यज्य पर्यधावन्नितस्ततः ॥ विश्वामित्रोथ भगवान्महर्षिरनिकेतनः ॥ क्षुधा परिगतो धीमान्स
मंतात्पर्यधावत ॥ स त्यक्त्वा दारांश्च पुत्रांश्च कस्मिंश्चिज्जनसंसदि ॥ भक्ष्याभक्ष्यसमो भूत्वा निरग्निरनिकेत
नः ॥ स कदाचित्परिपतं श्वपचानां निवेशने ॥ हिंस्राणां प्राणिघातानामाससाद वने क्वचित् ॥ विभिन्नक
लशाकीर्णं श्वचर्मच्छेदनायुतं ॥ वराहखरभग्नास्थिकपालघटसंकुलं ॥ मृतचैलपरिस्तीर्णं निर्माल्यकृ
मेधि तभूषणं ॥ सर्पनिर्मोकमालाभिः कृतचिह्नकुटीमठं ॥ कुक्कुटारावबहुलं गर्दभध्वनिनादितं ॥ तद्घो
षिद्भिः खरैर्वाक्यैः कलहद्भिः परस्परं ॥ उलूकपक्षिध्वनिभिर्देवतायतनैर्वृतं ॥ लोहघंटापरिष्कारं श्वयू
थपरिवारितं ॥ तत्प्रविश्य क्षुधाविष्टो विश्वामित्रो महानृषिः ॥ आहारान्वेषणे युक्तः परं यत्नं समास्थितः ॥
मूलं ३ न च क्वचिदविंदत्स भिक्षमाणोपि कौशिकः ॥ मांसमन्नं फलं मन्यद्वा तत्र किंचन ॥ अहो कृच्छ्रं मया प्रा
प्तमिति निश्चित्य कौशिकः ॥ पपात भूमौ दौर्बल्यात्तस्मिंश्चंडालपक्कणे ॥ स चिंतयामास मुनिः किंनु मे सु
कृतं भवेत् ॥ कथं वृथा न मृत्युः स्यादिति पार्थिवसत्तम ॥ स ददर्श श्वमांसस्य कुतंत्रीं विततां मुनिः ॥ चांडा

लस्य गृहे राजन्सद्यः शस्त्रहतस्य वै ॥ स चिंतयामास तदा स्तैन्यं कार्यमितो मया ॥ न हिदानीमुपायो मे विद्यते
प्राणधारणे ॥ आपत्सु विहितं स्तैन्यं विशिष्टं च महीयसः ॥ विप्रेण प्राणरक्षार्थं कर्तव्यमिति निश्चयः ॥ हीनादादे
यमादौ स्यात्समानात्तदनंतरं ॥ असंभवे त्वाददीत विशिष्टादपि धार्मिकात् ॥ सोहमंत्यावसायानां हराम्येनां प्रति
ग्रहात् ॥ न स्तैन्यदोषं पश्यामि हरिष्यामि श्वजाघनीं ॥ एतां बुद्धिं समास्थाय विश्वामित्रो महामुनिः ॥ तस्मिन्
श्रु ५ देशे स सुष्वाप श्वपचा यत्र भारत ॥ स विगाढां निशां दृष्ट्वा सुप्ते चांडालपक्कणे ॥ शनैरुत्थाय भगवान्प्रविवेश
कुटीमतः ॥ स सुप्त इव चांडालः श्लेष्मापिहितलोचनः ॥ परिभिन्नस्वरो रूक्षः प्रोवाचाप्रियदर्शनः ॥ ॥ श्वपच उवा
दंडिकां ६ च ॥ कः कुतंत्रीं घट्टयति सुप्ते चांडालपक्कणे ॥ जागर्मि नावसुप्तोस्मि हतोसीति च दारुणः ॥ विश्वामित्रस्ततो भीतः र्मि ६
सहसा तमुवाच ह ॥ तत्र व्रीडाकुलमुखः सोद्विग्नस्तेन कर्मणा ॥ विश्वामित्रोहमायुष्मन्नागतोहं बुभुक्षितः ॥ मा वधी
मां ४ र्मम सद्बुद्धे यदि सम्यक्प्रपश्यसि ॥ चांडालस्तद्वचः श्रुत्वा महर्षेर्भावितात्मनः ॥ शयनादुपसंभ्रांत उद्ययौ प्रति
त ३ तं सैतः ॥ स विसृज्याश्रुनेत्राभ्यां बहुमानात्कृतांजलिः ॥ उवाच कौशिकं रात्रौ ब्रह्मन्किं ते चिकीर्षितं ॥ विश्वामित्रस्त
मातंगमुवाच परिसांत्वयन् ॥ क्षुधितोहं गतप्राणो हरिष्यामि श्वजाघनीं ॥ तृषितः कलुषं याति नास्ति ह्रीरशनार्थि
नः ॥ क्षुच्च मां बाधते स्म च हरिष्यामि श्वजाघनीं ॥ अवसीदंति मे प्राणाः श्रुतिर्मे नश्यति क्षुधा ॥ दुर्बलो नष्टसं
क्षुधि २

देवानां२ मेध्यमेव सहते नामेध्यं॥ वा
नस्यो विय यथा सर्वभुक् तथाहं ब्रह्मा ब्राह्मणोपि तत्तुल्यात्सर्वभुक् भक्षामी॥ पधः२

तश्च भक्षाभक्ष विवर्जितः॥ सो धर्मं बुध्यमानो पि हरिष्यामि श्वजाघनीं॥ अदत्त्वैस्य न विंद्रामि तदा युष्माकमालये॥
तदा बुद्धिः कृता पापे हरिष्यामि श्वजाघनीं॥ अग्निर्मुखं पुरोधाश्च देवानां शुचिपँद्विसुं॥ यथावत्सर्वभुक् ब्रह्मा तथा
मां विद्धि धर्मतः॥ तमुवाच स चांडालो महर्षे शृणु मे वचः॥ कृत्वा तत्वं तथा तिष्ठ यथा धर्मो न हीयते॥ धर्मतश्चापि वि स्पस्च ४
प्रर्षे शृणु यत्ते ब्रवीम्यहं॥ शृगालादधमं श्वानं प्रवदंति मनीषिणः॥ तस्याप्यधममुद्देशः शरीरस्योंतं जाघनीं॥
नेदं सम्यग्व्यवहितं महर्षे धर्मगर्हितं॥ चांडालस्वस्य हरणमभक्ष्यस्य विशेषतः॥ साध्वन्यमनुपश्य त्वमुपायं
प्राणधारणे॥ न मांसलोभात्तपसो नाशस्ते स्यान्महामुने॥ जानता विहितं धर्मं न कार्यो धर्मसंकरः॥ मा
स्म धर्मं परित्याक्षीस्त्वं हि धर्मभृतां वरः॥ विश्वामित्रस्ततो राजन्नित्युक्तो भरतर्षभ॥ क्षुधार्तः प्रत्युवाचेदं पुन
नेव महामुनिः॥ निराहारस्य सुमहान्मम कालोऽभिधावतः॥ न विद्यतेप्युपायश्च कश्चिन्मे प्राणधारणे॥ ये
न येन विशेषेण कर्मणा येन केनचित्॥ अभ्युज्जीँसीदमानः स धर्मेधिर्मसैमाचरेत्॥ ऐंद्रो धर्मः क्षत्रि पालनात्म कः२
सर्वभुक्तक् प॰॥२ याणां ब्राह्मणानामथाग्निकः॥ ब्रह्मैव हि मम बलं भक्षामि शमयन् क्षुधां॥ यथा यथैव जीवेद्धि तत्कर्तव्य वेदः२
महेलया॥ जीवितं मरणाच्छ्रेयो जीवन्धर्ममवाप्नुयात्॥ सोहं जीवितमाकांक्षन्नभक्षस्यापि भक्षणं॥

वे३

ञाशाकरंत्यकादयः ६

आ० प० व्यवस्येबुद्धिपूर्वंवैतद्भवाननुमन्यतां॥जीवन्धर्मंचरिष्यामिप्राणोत्स्याम्यशुभानितु॥तपोभिर्विद्ययाचैवज्यो द्रु● मि०
२२ तींषीवमहत्तमः॥ ॥श्वपचउवाच॥ ॥नैतत्खादन्प्राप्नुतेदीर्घमायुर्नैवप्राणान्नामृतस्येवतृप्तिः॥भिक्षामन्यां
भिक्षुमातेमनोस्तुश्वभक्षणेश्वाह्यभक्ष्योद्विजानां॥ ॥विश्वामित्रः॥ ॥नदुर्भिक्षेसुलभंमांसमन्यंश्वपाकम
न्येनचमेस्तिवित्तं॥क्षुधार्त्तःश्चाहमगतिर्निराशःश्वमांसेचास्मिन्षड्रसान्साधुमन्ये॥ ॥श्वपचः॥ ॥
पंचपंचनखाभक्ष्याब्रह्मक्षत्रस्यवैविशः॥यथाशास्त्रंप्रमाणंतेमाभक्ष्येमानसंकृथाः॥ ॥विश्वामित्रः॥ ॥
अगस्त्येनासुरोजग्धोवातापिःक्षुधितेनवै॥अहमापद्गतःक्षुब्धोभक्षयिष्येश्वजाघनीं॥ ॥श्वपचउवा॥ ॥
भिक्षामन्यामाहरेतिनचकर्त्तुमिहार्हसि॥ननूनंकार्यमेतद्वैहरकामंश्वजाघनीं॥ ॥विश्वामित्रः॥ ॥
अगस्त्याद शिष्टावैकारणंधर्मेतद्वृत्तमनुवर्त्तये॥परांमेध्याशनादेतांभक्ष्यांमन्येश्वजाघनीं॥ ॥श्वपचउ॥ ॥अस
यः ४ तांयत्समाचीर्णंनसधर्मःसनातनः॥नाकार्यमिहकार्यंवैमाछलेनाशुभंकृथाः॥ ॥विश्वामित्रः॥ ॥नपा ॥राम॥
तकंनावमतमृषिःसन्कर्त्तुमर्हसि॥समौचश्वमृगौमन्येतस्माद्भक्ष्येश्वजाघनीं॥ ॥श्वपचः॥ ॥यद्ब्राह्म
णार्थेकृतमर्थितेनतेनर्षिणातदवस्थाधिकारे॥सवैधर्मोयत्रनपापमस्तिसर्वैस्तुपायैस्तुनवोहिनक्ष्याः॥ २२

धर्मस्य मूलं शारीरं४ ध्यं रत्नन्नं४ ७२ दं४

विश्वामित्रः॥ ॥मित्रं च मे ब्राह्मणस्यायमात्मा प्रियश्च मे पूज्यतमश्च लोके॥ तं भर्तुकामोह मिमांड्गि हीर्षेर्न्दशां
सतामीदृशातां न विद्ये॥ ॥श्वपचः॥ ॥कामं न चाजीवितं संत्यजंति न चाभ्यर्थ्ये क्वचित्कुर्वंति बुद्धिं॥ सर्वानि
कामान्शानुवर्तीह विहृत्य प्रियस्त्वकामं सहितः सुखेव॥ ॥विश्वामित्रः॥ ॥स्थाने भवेत्संशयः प्रेत्य भावेनिः
संशयः कर्मणां वै विनाशः॥ अहं पुनर्वर्जैत निसंशमात्मान्लं भक्षयिष्याम्यभक्ष्यं॥ बुध्यात्मके व्यक्त
मस्तीति पुण्यं मोहात्मके यत्र यथा स्वभक्ष्ये॥ यद्यप्येतत्संशयात्मा चमामिनाहं भविष्यामि यथात्वमेव॥
गो ५६ ॥ ॥श्वपचः॥ ॥याँतं नीयमिदं दुःखमिति मे निश्चिता मतिः॥ दुष्कृतो ब्राह्मणः सतं यस्त्वा महमुपालभे॥
गा ९ ॥ ॥विश्वामित्रः॥ ॥पिबंत्येवोदकं गावो मांडूकेषु रुवंत्स्वपि॥ न तेधिकारो धर्मेस्ति मा भूरात्मप्रशंसकः॥
॥श्वपचः॥ ॥सुहृद्भूत्वानुशासे त्वां कृपा हि त्वयि मे द्विज॥ यदिदं श्रेय आधत्स्व मा लोभात्पापकं कृथाः॥ वि
श्वामित्रः॥ ॥सुहृन्मे त्वं सुखेप्सुश्चेदं पापानां समुद्धरे॥ जानेहं धर्मतोत्मानं शौनीमुत्सृज जल्पनी॥ ॥श्व
पचः॥ ॥नैवोत्सहे भवतो दातुमन्नं नोपेक्षितुं ह्रियमाणं स्वमन्नं॥ उभौ स्यावः पापलोकावलिप्तो दाता चाहं ब्रा
ह्मणस्त्वं प्रतीक्ष॥ ॥विश्वा मित्रः॥ ॥अद्याहमेतद्वृजिनं कर्म कृत्वा जीवंश्चरिष्यामि महापवित्रं॥ सम

दापहोउ वं५

तात्मा धर्ममिमे वाक्षिपहृये यदेतयोर्गुरु तद्ब्रवीहि॥ ॥श्वपचः॥ ॥आत्मैव साक्षी कुलधर्मकृत्ये त्वमेव जानासि य
दत्र दुष्कृतं॥ यो ह्या ह्रियाद्भक्ष्यमिति श्वमांसं मन्येन तस्यास्ति विवर्जनीयं॥ ॥विश्वामित्रः॥ ॥उपादाने खादने
त्य ३ चास्ति दोषः कार्येन्याये निमत्रापवादः॥ यस्मिन्नहिंसा नानृतो वाच्यलेशो भक्ष्यक्रिया यत्र न तद्गरीयः॥ ॥श्वपचः॥
यद्येष हेतुस्तव खादनेस्य न ते वेदः कारणं नार्यधर्मः॥ तस्माद्भक्ष्यभक्षणे वा द्विजेंद्र दोषं न पश्यामि यथेदमत्र॥
६ ॥विश्वामित्रः॥ ॥नैवातिपापं भक्ष्यमाणस्य दृष्टं सुरां तु पीत्वा पततीति शब्दः॥ अन्योन्यकार्याणि यथा तथैव न
पापमात्रेण कृतं हिनस्ति॥ ॥श्वपच उवाच॥ ॥अस्थानतो हीनतः कुत्सिताद्वा तद्विद्वांसं बाधते साधुवृत्तं॥
दे ५ स्थानं पुनर्यो लभते निषंगात्तेनापि दंडः सहितव्य एव॥ भीष्म उवाच॥ ॥एवमुक्त्वा निववृते मातंगः कौशिकं त
था॥ विश्वामित्रो जहारैव कृतबुद्धिः श्वजाघनीं॥ ततोजग्राह पंचांगीवितार्थी महामुनिः॥ सदारस्तामुपाहृ जी ४
त्य वने भोक्तुमियेष सः॥ तथास्य बुद्धिरभवद्विधिनाहं श्वजाघनीं॥ भक्षयामि यथाकामं पूर्वं संतर्प्य देव पृ
ताः॥ ततोग्निमुपसंहृत्य ब्राह्मेणविधिना मुनिः॥ ऐंद्राग्नेयेन विधिना चरुं श्रपयत स्वयं॥ ततः समारभत्कर्म
दैवं पित्र्यं च भारत॥ आहूय देवानिंद्रादीन् भागं भागं विधिक्रमात्॥ एतस्मिन्नेव काले तु प्रववर्ष स वासवः॥

वो मा

संजीवयन्प्रजाः सर्वाः ज्ञनयामास सैषधीः॥ विश्वामित्रोपि भगवांस्तपसाद्ग्धकिल्बिषः॥ कालेन महता सि-
द्धिमवाप परमाद्भुतां॥ स संहृत्य च तत्कर्मज्ञना स्वाद्य च तद्धविः॥ तर्पयामास देवांश्च पितॄंश्च द्विजसत्त-
मः॥ एवं विद्वान् दीनात्मा व्यसनस्थो नजीविषुः॥ सर्वोपायैरुपायज्ञो दीनमात्मानमुद्धरेत्॥ एतां बुद्धिं स-
मास्थाय जीवितव्यं सदा भवेत्॥ जीवन्पुण्यमवाप्नोति पुरुषो भद्रमश्नुते॥ तस्मात्कौंतेय विदुषा धर्माधर्म-
विनिश्चये॥ बुद्धिमास्थाय लोकेस्मिन्वर्तितव्यं कृतात्मना॥ ॥ शांतौ आपद्धर्मे॥ ॥युधिष्ठिरः॥ ॥यदि
न्तं घोरं समुद्दिष्टमश्रद्धेयमिवामृतं॥ अस्ति स्विद्दस्युमर्यादा यामहं परिवर्जयेतं॥ संमुह्यामि विषीदा-
मि धर्मो मे शिथिलीकृतः॥ उद्यमं नाधिगच्छामि कदाचित्परिसांत्वयन्॥ ॥भीष्मः॥ ॥नैतच्छुत्वागमा-
ला देव तव धर्मानुशासनं॥ प्रज्ञासमवंतोयं कविभिः संभृतं मधु॥ बह्व्यः प्रतिविधातव्या प्रज्ञा राज्ञा ततस्ततः
॥ नैकशाखेन धर्मेण यात्रैषा संप्रवर्तते॥ बुद्धिसंजननो धर्म आचारश्च सतां सदा॥ ज्ञेयो भवति कौ-
रव्य सदा तद्धि द्धि मे वचः॥ बुद्धिश्रेष्ठा हि राजानश्चरंति विजयैषिणः॥ धर्मः प्रतिविधातव्यो बुध्या राज्ञा
ततस्ततः॥ नैकशाखेन धर्मेण राज्ञो धर्मो विधीयते॥ दुर्बलस्य कुतः प्रज्ञा पुरस्तादनुपाहृता॥ अद्वैध

४२

आ० ज्ञौंपथि हि ये संज्ञायं प्राप्तुमर्हति॥ बुद्धिर्हि वै यं वेदितव्यं पुरस्तादेव भारत॥ पार्श्वतः करणं प्राज्ञो विष्टंभित्वा प्रका
२४ नयेत्॥ जनस्तच्चरितं धर्मे विज्ञानात्येन्यथान्यथा॥ अमिथ्याज्ञानिनः केचिन्मिथ्याविज्ञानिनः परे॥ तद्वै
यथायथं बुध्वा ज्ञानमादतेसतां॥ परिमुष्णंति शास्त्राणि धर्मस्य परिपंथिनः॥ वैशम्यमर्थविद्यानां नि
नर्थाख्यापयंतिते॥ आजीजीविषवो विद्यां यशःकामैःसमंततः॥ ते सर्वे नृपपापिष्ठा धर्मस्य परिपंथिनः॥ अ
पक्कमतयो मंदा न जानंति यथातथं॥ यथाह्यशास्त्रौकुशलाः सर्ववाग्युक्तिनिष्ठिताः॥ परिमुष्णंति शा
स्त्राणि शास्त्रदोषानुदर्शिनः॥ विज्ञातृमर्थविद्यानां न सम्यगिति वर्त्तते॥ निंदया परविद्यानां स्वविद्यांख्या त्रा मु ५
पयंति च॥ वागस्त्रा वाग्छुरीमत्ता दुग्धविद्याफला इव॥ तान्विद्यावणिजो विद्धि राक्षसानिव भारत॥ व्याजेन
सद्भिर्विहितो धर्मस्ते परिहास्यति॥ न धर्मवचनं वाचा नैव बुध्येति नः श्रुतं॥ इति बार्हस्पतं ज्ञानं प्रोवाच मघ
वान्स्वयं॥ न त्वेव वचनं किंचिदनिमित्तादिहोच्यते॥ सुविनीतेन शास्त्रेण न व्यवस्यंत्यथापरे॥ लोक
यात्रामिहैके तु धर्ममाहुर्मनीषिणः॥ समुद्दिष्टं सतां धर्मं स्वयमूहेत पंडितः॥ अमर्षाच्छास्त्रसंमोहा
दविज्ञानाच्च भारत॥ शास्त्रं प्राज्ञस्य वदतः संमोहे यात्यदर्शनं॥ आगतागमया बुद्ध्या वचनेन प्रशस्यते॥ २४

सभायां १

तू त्रां२

अज्ञानाज्ज्ञानहेतुत्वाद्वचनं साधु मन्यते ॥ अनयाह तमेवेदं नेदं शास्त्रमपार्थकं ॥ दितेयानुशनाप्राह संश
यच्छेदनं पुरा ॥ ज्ञानमव्यपदेश्यं हि यथा नास्ति तथैव तत् ॥ तं तथा छिन्नमूलेन सन्नोदयितुमिच्छसि ॥
अनव्यवहितं यो वा नेदं वाक्यमुपाश्नुते ॥ उग्रायेव हि सृष्टोसि कर्मणे न त्वमीक्षसे ॥ अंगे मामभ्यवेक्षस्व न३
राजन्यायबुभूषते ॥ यथा प्रमुच्यते त्वन्यो यदर्थं न प्रमोदते ॥ अजोश्वः क्षत्रमित्येतत्सदृशं ब्रह्मणा कृतं ॥ त
स्मादभीक्ष्णं भूतानां यात्रा काचित्प्रसिध्यति ॥ यस्त्ववध्यवधे दोषः स वध्यस्यावधे स्मृतः ॥ सा चैव खलु मर्या
दायामयं परिवर्जयेत् ॥ तस्मात्तीक्ष्णः प्रजा राजा स्वधर्मे स्थापयेत्ततः ॥ अन्योन्यं भक्षयंतो हि प्रचरेयु
र्वृका इव ॥ यस्य दस्युगणा राष्ट्रे ध्वांक्षा मत्स्यान्जलादिव ॥ विहरंति परस्वानि स वै क्षत्रियपांसनः ॥ कुली
नान्सचिवान्कृत्वा वेदविद्यासमन्वितान् ॥ प्रशाधि पृथिवीं राजन्प्रजा धर्मेण पालयन् ॥ विहीनकर्मणा
शेष न्यायं यः प्रगृह्णाति भूमिपः ॥ उपायोस्याविज्ञं तद्वै क्षत्रं नपुंसकं ॥ नैवोग्रं नैव चानुग्रं धर्मेणेह प्रशस्यते ॥
उभयं न व्यतिक्रामेदुग्रो भूत्वा मृदुर्भव ॥ कष्टः क्षत्रियधर्मोयं सौहृदं त्वयि मे स्थितं ॥ उग्रकर्मणि सृष्टो
सि तस्माद्राज्यं प्रशाधि वै ॥ अशिष्टनिग्रहो नित्यं शिष्टस्य परिपालनं ॥ एवं शुक्रोब्रवीद्धीमानापत्सु

अनु०
२५

भरतर्षभ॥ ॥युधिष्ठिरः॥ ॥अस्ति वेदिह मर्यादा यामन्यो नाभिलंघयेत्॥ पृछामि त्वां सतां श्रेष्ठ तन्मे ब्रू-
हि पितामह॥ ॥भीष्मः॥ ॥ब्राह्मणानेव सेवेत विद्यावृद्धांस्तपस्विनः॥ श्रुतचारित्रवृत्ताढ्यान्पवित्रं ह्येतदुत्त-
म॥ यावेदितासुवृत्तिस्ते सास्तु विप्रेषु सर्वदा॥ रुद्रैर्हि विप्रैः कर्माणि कृतानि बहुधा नृप॥ प्रीत्या यशो भवे-
न्मुख्यमप्रीत्या परमं भयं॥ प्रीत्या ह्यमृतवद्विप्राः क्रुद्धाश्चैव विषं यथा॥ ॥शांतोज्ञापद्धर्मे॥ ॥युधिष्ठिरः
॥ ॥पितामह महाप्राज्ञः सर्वशास्त्रविशारद॥ शरणं पाल्यमानस्य यो धर्मस्तं ब्रवीहि मे॥ ॥भीष्मः॥
महान्धर्मो महाराजौ शरणागतपालने॥ अर्हः प्रष्टुं भवांश्चैव प्रश्नं भरतसत्तम॥ शिविप्रभृतयो राज-
न्राजानः शरणागतान्॥ परिपाल्य महात्मानः संसिद्धिं परमां गताः॥ श्रूयते च कपोतेन शत्रुः शरणमाग-
तः॥ पूजितश्च यथान्यायं स्वैश्च मांसैर्निमंत्रितः॥ ॥युधिष्ठिरः॥ ॥कथं कपोतेन पुरा शत्रुः शरणमागतः
॥ स्वमांसं भोजितः कां च गतिं लेभे च भारत॥ ॥भीष्मः॥ ॥शृणु राजन्कथां दिव्यां सर्वपापप्रणाशिनीं॥ नृ-
पतेर्मुचुकुंदस्य कथितं भार्गवेण वै॥ इममर्थं पुरा पार्थ मुचुकुंदो नराधिपः॥ भार्गवं परिपप्रच्छ प्रणतः पुरुष-
र्षभ॥ तस्मै शुश्रूषमाणाय भार्गवो कथयत्कथां॥ इमां कया कपोतेन सिद्धिः प्राप्ता नराधिप॥ ॥मुनिः॥

३

स२
२५

प१

शो
काकविर्वैः १२

धर्मनिश्चयसंयुक्तांकामार्थसहितांकथां ।। श्रणुष्वावहितोराजन्गदतोमे महाभुज ।। कश्चित्क्षुद्रसमाचा
नः पृथिव्यांकालसंमितः ।। विचचार महारण्येघोरः शकुनिलुब्धकः ।। काकोलइवकृष्णांगोरक्ताक्षःसंमितः काल
दीर्घजंघोहस्वपादोमहावक्त्रोमहाहनुः ।। नैवतस्यसुहृत्कश्चिन्नसंबंधीनबांधवाः ।। सहितैःसंपरित्यक्तो स्ते ३
नरौद्रेणकर्मणा ।। नरःपापसमाचारस्त्यक्तव्योदूरतोबुधैः ।। आत्मानंयोभिसंधत्तेसोन्यस्यस्यात्कथंहि
तं ।। येनृशंसादुरात्मानःप्राणिप्राणहरानराः ।। उद्वेजनीयाभूतानांव्यालाइवभवंतिते ।। सवैक्षानकमादाय
नां ६ द्विजान्हत्वावनेसदा ।। चकारविक्रियंतेषांपतंगानांजनाधिप ।। एवंतुवर्तमानस्यतस्यवृत्तिंदुरात्मनः ।। अ
गमत्सुमहान्कालोनचाधर्ममबुध्यत ।। तस्यभार्यासहायस्यरममाणस्यशाश्वतं ।। दैवयोगविमूढस्यना
न्या ४ नौवृत्तिररोचत ।। सकदाचित्तुतस्याथवनस्थस्यसमंततः ।। पातयन्निववृक्षांस्तान्सुमहान्वातसंभ्रमः ।। मेघ
संकुलमाकाशंविद्युन्मंडलमंडितं ।। संछन्नस्तुमुहूर्तेननौसार्थैरिवसागरः ।। वारिधारासमूहेनसंप्रविष्टः
शतक्रतुः ।। क्षणेनपूरयामाससलिलेनवसुंधरां ।। ततोधाराकुलेकालेसंभ्रमंनष्टचेतनः ।। शीतार्तस्तद्वनं २६
सर्वमाकुलेनोंत्तरात्मना ।। नैवनिम्नंस्थलंचापिसोविंदतविहंगहा ।। पूरितोहिजलौघेनतस्यमार्गोवि

ले४ तौ२

उआ०

२६

नस्य तु ॥ पक्षिणो वर्षवेगेन हता लीनास्तदाभवन् ॥ मृगासिंहवराहाश्च स्थलमाश्रित्य शेरते ॥ महता
वातवर्षेण त्रासितास्ते वनौकसः ॥ भयार्त्ताश्च क्षुधार्त्ताश्च बभ्रमुः सहिता वने ॥ स तु शीतहतैर्गात्रैर्न्नैव जगा
म न तस्थिवान् ॥ ददर्श पतितां भूमौ कपोतीं शीतविह्वलां ॥ दृष्ट्वापि हि पापात्मा स तां पंजरके क्षिपत् ॥ स्वयं दुः
खाभिभूतोपि दुःखमेवाकरोत्परे ॥ पापात्मा पापकारित्वात्पापमेव चकार सः ॥ सोपश्यद्वनखंडेषु मेघ
नीलं वनस्पतिं ॥ सेव्यमानं विहंगौघैश्छायावासफलार्थिभिः ॥ धात्रा परोपकाराय स साधुरिव निर्मितं ॥
श्चैपाभवत्क्षणेनैव वियद्विमलतारकं ॥ महत्सर इवोत्फुल्लं कुमुदच्छुरितोदकं ॥ तमाढ्यं कुमुदाकारमा
काशं निर्मलं बहु ॥ घनैर्मुक्तं नभो दृष्ट्वा लुब्धकः शीतविह्वलः ॥ दिशोवलोकयामास विगतां प्रेक्ष्य श
र्वरी ॥ दूरतो मे निवेशश्च अस्माद्देशादिति प्रभो ॥ कृतबुद्धिर्द्रुमे तस्मिन् वस्तुं तां रजनीं ततः ॥ सोञ्जलिं
प्रणतिं कृत्वा वाक्यमाह वनस्पतिं ॥ शरणं यामि यान्यस्मिन्देवतानि वनस्पतौ ॥ स शिलायां शिरः क
त्वा पर्णान्यास्तीर्य भूतले ॥ दुःखेन महताविष्टस्ततः सुष्वाप पक्षिहा ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ भीष्मः ॥ ॥
अथ वृक्षस्य शाखायां विहंगः ससुहृज्जनः ॥ दीर्घकालोशितो राजंस्तत्र चित्रतनूरुहः ॥ तस्य कल्प

कल०१

शि०३

२६

नि२ कर्माणि२

हंवै मया कृतं ॥ अहो मम नृशंसस्य गर्हितस्य स्वकर्मणा ॥ अधर्मःसुमहान् घोरो भविष्यति न संशयः ॥ एवं ब २
हुविधं तत्र विललाप सुदुःखितः ॥ ॥ लुब्धकः ॥ ॥ गर्हयन्स्वामिकां योणि हिजंदृष्टा तथागतं ॥ ॥ श्रौतो
आपइमे ॥ ॥ श्री भ्मः ॥ ॥ ततः स लुब्धकः पश्यन् क्षुधयापि परिप्लुतः ॥ कपोतमग्निं पतितं वाक्यं पुनरु
वाच ह ॥ किमीदृशं नृशंसेन मया कृतमबुद्धिना ॥ भविष्यति हि मे नित्यं पातकं कृशजीविनः ॥ स विनिंदन्स्व
यात्मानं पुनः पुनरुवाच ह ॥ अविश्वास्यः सुदुर्बुद्धिः सदा निष्कृतिनिश्चयः ॥ शुभं कर्म परित्यज्य सोहं शकुनि
लुब्धकः ॥ नृशंसस्य ममाद्यायं प्रत्यादेशो न संशयः ॥ दत्तः स्वमांसं दहता कपोतेन महात्मना ॥ सोहं त्य
क्ष्ये प्रियान् प्राणान् पुत्रान् दारांस्तथैव च ॥ उपदिष्टो हि मे धर्मः कपोतेन महात्मना ॥ अद्य प्रभृति देहं स्वं स
र्वभोगैर्विवर्जितं ॥ यथा स्वल्पं सरो ग्रीष्मे शोषयिष्याम्यहं तथा ॥ क्षुत्पिपासातपसहः कृशो धमनिसंत
तः ॥ उपवासैर्बहुविधैश्चरिष्ये पारलौकिकं ॥ अहो देहप्रदानेन दर्शिता तिथिपूजना ॥ तस्माद्धर्मं चरिष्या नु२.
मि धर्मो हि परमा गतिः ॥ दृष्टो धर्मो हि धर्मिष्ठे यादृशो विहगोत्तमे ॥ एवमुक्त्वा विनिश्चित्य रौद्रकर्मा स
लुब्धकः ॥ महाप्रस्थानमाश्रित्य प्रययौ शंसितव्रतः ॥ ततः पुष्टिं शलाकां च स्थापनं पंजरं तथा ॥ तांश्च ब

ष्यिधारपूर्व
कउपदेशः ६

तो१ य१ ॥ पा। द्विसंश्लेषा धंत्विकुंण द्व्योपेतं दीर्घदडं१
शालाकाभिः संपिलं पंजरं ॥१

रु ३

आ० ह्यां कपोतीं स प्रमुच्य विससर्जह ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ भीष्मः ॥ ॥ ततो गते शाकुनिके कपोती प्राह दुःखिता ॥ संस्मृ
२९ त्य सा च भर्त्तारं रुदंती शोककर्शिता ॥ नाहं ते विप्रियं कांत कदाचिदपि संस्मरे ॥ सर्वापि विधवा नारी बहुपुत्रापि
शोचते ॥ शोच्या भवति बंधूनां पतिहीना तपस्विनी ॥ लालिताहं त्वया नित्यं बहुमानाच्च पूजिता ॥ वचनैर्मधुरैः स्नि
ग्धैरसंक्लिष्टमनोहरैः ॥ कंदरेषु च शैलानां नदीनां निर्झरेषु च ॥ द्रुमाग्रेषु च रम्येषु रमिताहं त्वया सह ॥ आका
या९ शगमने चैव विहृताहं त्वया सुखं ॥ रमामि स्म पुरा कांत तन्मे नास्त्यद्य किंचन ॥ मितं ददाति हि पिता मितं भ्राता मितं
सुतः ॥ अमितस्य हि दातारं भर्त्तारं का न पूजयेत् ॥ नास्ति भर्त्तृसमो नाथो नास्ति भर्त्तृसमं सुखं ॥ विसृज्य धनसर्वस्वं
भर्त्ता वै शरणं स्त्रियाः ॥ न कार्यमिह मे नाथ जीवितेन त्वया विना ॥ पतिहीना तु का नाम सती जीवितुमुत्सहेत् ॥ रु
एवं विलप्य बहुधा करुणं सा सुदुःखिता ॥ पतिव्रता संप्रदीप्तं प्रविवेश हुताशनं ॥ ततश्चित्रांगदधरं भर्त्तारं सान्व द८
पश्यत ॥ विमानस्थं सुकृतिभिः पूज्यमानं महात्मभिः ॥ विचित्रमाल्यांबरधरं सर्वाभरणभूषितं ॥ विमानशत
कोटीभिर्नावृतं पुण्यकर्मभिः ॥ ततः स्वर्गंगतः पक्षी विमानवरमास्थितः ॥ कर्मणा पूजितस्तत्र रेमे स सह भार्यया ॥ ॥
॥ शांतौ आपद्धर्मे ॥ ॥ भीष्मः ॥ ॥ विमानस्थौ तु तौ राजन्लुब्धकःस्वे ददर्श ह ॥ दृष्ट्वा तौ दंपती राजन्व्यचिंतय २९

ततां गतिं ॥ ईदृशेनैव तपसा गच्छेयं परमां गतिं ॥ इति बुद्ध्या विनिश्चित्य गमनायोपचक्रमे ॥ महाप्रस्थानमाश्रि
त्य लुब्धकः पक्षिजीवकः ॥ निश्चेष्टो मरुदाहारो निर्ममः स्वर्गकांक्षया ॥ ततो पश्यै विस्तीर्णं हृद्यं पद्माभिभूषि
तं ॥ नानापक्षिगणाकीर्णं सरः शीतजलं शिवं ॥ पिपासार्त्तोपि तद्दृष्ट्वा तृप्तः स्यान्नात्र संशयः ॥ उपवासकृशोत्यर्थं
स तु पार्थिव लुब्धकः ॥ अनवेक्ष्यैव संहृष्टः श्वापदाध्युषितं वनं ॥ महांतं निश्चयं कृत्वा लुब्धकः प्रविवेश ह ॥ प्रविशन्ने
व स वनं निगृहीतः सकंटकैः ॥ स कंटकैर्विभिन्नांगो लोहिताड्रिकृतच्छविः ॥ बभ्राम तस्मिन्विजने नानामृग
समाकुले ॥ ततो द्रुमाणां महतां पवनेन वने तदा ॥ उदतिष्ठतेसंघर्षात्सुमहान्हव्यवाहनः ॥ तद्वनं वृक्षसंपूर्णं
लताविटपसंकुलं ॥ ददाह पावकः क्रुद्धो युगांताग्निसमप्रभः ॥ स ज्वालैः पवनोद्धूतैर्विस्फुलिंगैः समंततः ॥
ददाह तद्वनं घोरं मृगपक्षिसमाकुले ॥ ततः स देहमोक्षार्थं संप्रहृष्टेन चेतसा ॥ अभ्यधावत वर्द्धंतं पावकं
लुब्धकस्तदा ॥ ततस्तेनाग्निना दग्धो लुब्धको नष्टकल्मषः ॥ जगाम परमां सिद्धिं ततो भरतसत्तम ॥ ततः स्वर्ग
स्थमात्मानं स पश्यद्विगतज्वरः ॥ यक्षगंधर्वसिद्धानां मध्ये भ्राजंतमिंद्रवत् ॥ एवं खलु कपोतश्च कपोती च
पतिव्रता ॥ लुब्धकेन सह स्वर्गं गताः पुण्येन कर्मणा ॥ यापिचेवंविधा नारी भर्तारमनुवर्त्तते ॥ विराजते हि सा

सि प्रं कपोतीव दिवि स्थिता॥ एवमेतत्पुरावृत्तं लुब्धकस्य महात्मनः॥ कपोतस्य च धर्मिष्ठा गतिः पुण्येन कर्मणा॥
यश्चेदं शृणुयान्नित्यं यश्चेदं परिकीर्त्तयेत्॥ नाशुभं विद्यते तस्य मनसापि प्रमादतः॥ युधिष्ठिर महानेष
धर्मो धर्मभृतां वर॥ गोघ्नेष्वपि भवेदस्मिन्निष्कृतिः पापकर्मणः॥ न निष्कृतिर्भवेत्तस्य यो हन्याच्छरणागतं॥
इतिहासमिमं श्रुत्वा पुण्यं पापप्रणाशनं॥ न दुर्गतिमवाप्नोति स्वर्गलोकं च गच्छति॥ ॥ शांतौ आपद्ध
र्मे। ॥युधिष्ठिरः॥ ॥अबुद्धिपूर्वं यत्पापं कुर्याद्भरतसत्तम॥ मुच्यते स कथं तस्मादेतत्सर्वं ब्रवीहि मे॥ भीष्मः॥
अत्र ते वर्त्तयिष्यामि पुराणमृषिसंस्तुतं॥ इंद्रोतं शौनको विप्रो यदाह जनमेजयं॥ आसीद्राजा महावी
र्यः पारिक्षिज्जनमेजयं॥ अबुद्धिपूर्वमागछद्ब्रह्महत्या महीपतिं॥ ब्राह्मणाः सर्व एवैते तत्यजुः सपु
रोहिताः॥ स जगाम वनं राजा दह्यमानो दिवानिशं॥ प्रजाभिः संपरित्यक्तश्चकार कुशलं महत्॥ अ
तिवेलं तपस्तेपे दह्यमानः स मन्युना॥ ब्रह्महत्यापनोदार्थमापृछद्ब्राह्मणान्बहून्॥ पर्यटन्पृथि
वीं कृत्स्नां देशे देशे नराधिपः॥ तत्रेतिहासं वक्ष्यामि धर्मस्यास्योपबृंहणं॥ दह्यमानः पापकृत्याऽजगाम स ज
नमेजय॥ चरिष्यमाणः इंद्रोतं शौनकं संशितव्रतं॥ समासाद्योपजग्राह पादयोः परिपीडयन्॥

ब३ मा~

क्षपि दृष्ट्वा नृपं तत्र जगाद हे सुमद्रांतदा ॥ कर्त्ता पापस्य महतो भ्रूणहा किमिहागतः ॥ किं त्वयास्मासु कर्तव्यं मौ सौंख्यास्त्रीः
कथंचन ॥ गच्छ गच्छ न ते स्थानं शीपाल्पस्मानिति ब्रुवन् ॥ रुधिरस्येव ते गंधः शवस्येव च दर्शनं ॥ अशिवः शिवसंकाशो
मृते जीवन्निवाटसि ॥ ब्रह्मघ्नस्त्वं दुरात्मा पापमेवानुचिंतयन् ॥ प्रबुध्यसे प्रस्वपिषि वर्त्तसे परमे सुखे ॥ मोघं ते जी
वितं राजन्नुपरिक्लिष्टं च जीवसि ॥ पापायैव हि सृष्टोसि कर्मणोह यवीयसे ॥ बहुकल्याणमिच्छंति ईहंते पितरः सुता
न् ॥ तपसा देवतेज्याभिर्वंदनेन तितिक्षया ॥ पितृवंशामिमं पश्य च त्वत्कृते नरकं गते ॥ निरर्थाः सर्व एवैषामाशाबं
धास्त्वदाश्रयाः ॥ यान्पूजयंतो विंदंति स्वर्गमायुर्यशः प्रजाः ॥ तेभ्यस्त्वं सततं द्वेष्टा ब्राह्मणोपि निरर्थकः ॥ इमं लोकं विमु
कू५ च्यैव मेवाजैमर्द्धापतिष्यति ॥ अशाश्वतीः शाश्वतीश्च समाः पापेन कर्मणा ॥ अर्द्यमानो यत्र गृध्रैः शितिकंठैरयोमु
य४ खैः ॥ ततश्च पुनरावृत्तः पापयोनिं गमिष्यसि ॥ इदं मन्यसे राजन्नायमस्ति कुतः परः ॥ प्रतिस्मारयितारस्त्वां यमदूता न्ना४
यमक्षये ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ भीष्मः ॥ ॥ एवमुक्तः प्रत्युवाच तं मुनिं जनमेजयः ॥ गर्ह्यं भवान्गर्हयते निंद्यं निं
सि२ दति मां पुनः ॥ धिक्कार्यं धिक्कुरुते तस्मात्त्वाहं प्रसादये ॥ सर्वं हीदं स्वकृतं मे ज्वलाम्यग्नाविवाहितः ॥ स्वकर्माण्यभि
संधाय नाभिनंदति मे मनः ॥ प्राप्यं घोरं भयं नूनं मया वैवस्वतादपि ॥ तत्तु शल्यमनिर्हृत्य कथं शक्ष्यामि जीवितुं ॥

दुष्ट२ त्य१

निष्कारि ग्रहाः योगिनो यथा निर्द्धना दीन्नूरक्षति ३ ।। नूनिर्जनाइव पाठः ३
चते ६ नू २

आ०
३१

सर्वं मन्युं विनीय त्वमभिमां वद शौनक ।। महानासं ब्राह्मणानां भूयो वक्ष्यामि सांप्रतं ।। अस्तु शेषं कुलस्यास्य माप
राभूदिदं कुलं ।। न हि नो ब्रह्मशस्तानां शेषं भवितुमर्हति ।। स्तुतीरलभमानानां संविदं वेद निश्चितां ।। निर्विद्यमान
स्त्वात्मानं भूयो वक्ष्यामि शाश्वतं ।। भूयश्चैवाभिरक्षं तु निर्द्धनान्निर्जनानिव ।। न ह्ययज्ञा अमुं लोकं प्राप्नुवंति कथं
नरकान् ४ चन ।। अपातांश्च तितिष्ठंति पुलिंदशबरा इव ।। अविज्ञायैव मे प्रज्ञां बालस्येव स पंडित ।। ब्रह्मन्पितेव पुत्रस्य
पुलिंदाः शबराः म्लेछभेदाः ।। ४ प्रीतिमान्भव शौनक ।। शौनकः ।। ।। किमाश्चर्यं यतः प्राप्तो ब्रह्मकुर्यदसांप्रतं ।। इति वै पंडितो भूत्वा भूतानानोंतं नानु ५
कुप्यते ।। वत्सा प्रासादमास्थाय अशोच्यः शोच्यसे जनातु ।। जगती स्थानिवाद्रिस्थः प्रज्ञयाप्रतिपश्यति ।। न चोपल
भ्यते तेन न चाश्चर्याणि कुर्वते ।। निर्विण्णात्मा परोक्षो वाधिकृतः सर्वसाधुषु ।। विदितं भवतो वीर्यं माहात्म्यं वेद
आगमे ।। कुरुष्वेह यथा शांतिं ब्रह्मा शरणमस्तु ते ।। तद्वै पारत्रिकं तात ब्राह्मणानामकुप्यतां ।। अथवा तप्यसे
पापे धर्ममेवानुपश्यसे ।। ।। जनमेजयः ।। ।। अनुतप्ये च पापेन न चाधर्मं विलोपये ।। बुभूषं भजमानं मां प्री
भवर २ तिमान्वै पश्य शौनक ।। ।। शौनक उवाच ।। ।। छित्वा दंभं च मानं च प्रीतिमिच्छामि ते नृप ।। सर्वभूतहितं तिष्ठ ध
र्मं चैव प्रतिस्मर ।। न भयान्न च कार्पण्यान्न लोभात्तामुपह्वये ।। तेमे दैवीं गिरं सत्यां शृणु त्वं ब्राह्मणैः सह ।। सो ३१

ही४

गता भार्या चरितुं नाभ्यवर्त्तत ॥ आसां चरजनीं दृष्ट्वा स पक्षी पर्यतप्यत ॥ वातवर्षं महच्चासीन्न चागच्छति मे
प्रिया ॥ किं तु तत्कारणं येन साद्यापि न निवर्त्तते ॥ अपि स्वस्ति भवेत्तस्याः प्रियाया मम कानने ॥ तया विरहितं ही
दं शून्यमद्य गृहं मम ॥ पुत्रपौत्रवधूभृत्यैराकीर्णमपि सर्वतः ॥ भार्याहीनं गृहस्थस्य शून्यमेव गृहं भ
वेत् ॥ न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ॥ गृहं तु गृहिणीहीनमरण्यसदृशं मतं ॥ यदि सा रक्तनेत्रां
ता विचित्रांगी मधुरस्वना ॥ अद्य नायाति मे कांता न कार्यं जीवितेन मे ॥ न भुंक्ते मय्यभुक्ते या नास्नाते स्नाति सु
व्रता ॥ न तिष्ठसुपतिष्ठेत शेते च शायिते मयि ॥ हृष्टे भवति सा हृष्टा दुःखिते मयि दुःखिता ॥ प्रोषिते दीनवदना
क्रुद्धे च प्रियवादिनी ॥ पतिव्रता पतिगतिः पतिप्रियहिते रता यस्य स्यात्तादृशी भार्या धन्यः स पुरुषो भुवि ॥
सा४ सा हि श्रांतं क्षुधार्त्तं च जानीते मां तपस्विनी ॥ अनुरक्ता स्थिरा चैव भक्ता स्निग्धा यशस्विनी ॥ वृक्षमूले पि दयि पि४
ता यस्य तिष्ठति तद्गृहं ॥ प्रासादोपि तया हीनः कांतार इति निश्चितं ॥ धर्मार्थकाममोक्षेषु भार्या पुंसः स का३
हायिनी ॥ विदेशगमने चास्य सैव विश्वासकारिका ॥ भार्या हि परमो ह्यर्थः पुरुषस्येह पठ्यते ॥ असहाय
स्य लोकेस्मिंल्लोकयात्रासहायिनी ॥ तथा रोगाभिभूतस्य नित्यं कृच्छ्रगतस्य च ॥ नास्ति भार्यासमं किं

ध्य२

स्त ३ ता

आ०
२६

विन्ननस्यार्तस्य भेषजं ।। नास्ति भार्यासमो बंधुर्नास्ति भार्यासमा गतिः।। नास्ति भार्यासमो लोके सहायो
धर्मसंग्रहे ।। यस्य भार्या गृहे नास्ति साध्वी चा प्रियवादिनी।। अरण्यं तेन गंतव्यं यथारण्यं तथा गृहं ।।
।। ।। शांतौ आपद्धर्मे।। ।। भीष्मः।। ।। एवं विलपतस्तस्य श्रुत्वा तु करुणं वचः।। गृहीता शाकुनिघ्नेन कपोती
वाक्यमब्रवीत्।। ।। कपोत्युवाच।। ।। अहो ऽतीव सुभाग्याहं यस्या मे दयितः पतिः।। असतो वा सतो वापि गुणा
नेवं भाषते मम न सा स्त्रीत्यभिमंतव्या यस्यां भर्त्ता न तुष्यति।। तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्वदेवताः।। अग्निसा
क्षिकमित्येव भर्त्ता वै दैवतं परं।। दावाग्निवेने निर्दग्धा सुपुष्पस्तबका इव।। भस्मीभवतु सा नारी यस्यां भर्त्तानतु न ७
ष्यति ।। इति संचिंत्य दुःखार्ता भर्त्तारं दुःखितं तदा।। कपोती लुब्धकेनापि गृहीता वाक्यमब्रवीत् ।। हंत वक्ष्यामि ते
ता४ श्रेयः श्रुत्वा तु कुरु तत्तथा।। शरणागतसंत्राता भव कांत विशेषतः।। एष शाकुनिकः शेते तव वासं समाश्रितः।। शीता
र्तश्च क्षुधार्तश्च पूजामस्मै समाचर।। यो हि कश्चिद्द्विजं हन्याद्गां च लोकस्य मातरं।। शरणागतं च यो हन्या
त्तुल्यं तेषां च पातकं।। यास्माकं विहिता वृत्तिः कपोतीजातिधर्मतः।। सान्यात्मवता नित्यं त्वद्विधेनानुवर्त्तितुं।। य २६
स्तु धर्मं यथाशक्ति गृहस्थो ह्यनुवर्त्तते।। स प्रेत्य लभते लोकानक्षयानिति शुश्रुम।। स त्वं संतानवानद्य पु

घ्रा २

भवानसि च द्विज ॥ तत्त्व देहे दयां त्यक्त्वा धर्मार्थौ परिगृह्य च ॥ पूजामस्मै प्रयुङ्क्ष्व त्वं प्रीयेतास्य मनो यथा ॥ शरीरे
मा च संतापं कुर्वीथाः स्वे विहंगम ॥ शरीरयात्राकृत्यर्थमन्यान् दारानुपेक्ष्यसि ॥ इति शौकुनी वाक्यं पंजरस्था
त पक्षिणी ॥ अतिदुःखान्विता प्रोक्ता भर्त्तारं समुदैक्षत ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ भीष्म उवाच ॥ ॥ स पत्न्या वचनं
श्रुत्वा धर्मयुक्तिसमन्वितं ॥ हर्षेण महता युक्तो वाष्पव्याकुललोचनः ॥ तं वै शाकुनिकं दृष्ट्वा विधिदृष्टेन क
र्मणा ॥ स पक्षी पूजयामास स यत्नात्तं पक्षिजीवनं ॥ उवाच स्वागतं तेद्य ब्रूहि किं करवाणि ते ॥ संतापश्च न क
र्त्तव्यः स्वगृहे वर्त्तते भवान् ॥ तद्ब्रवीतु भवान् क्षिप्रं किं करोमि किमिच्छसि ॥ प्रेंब्रवीमि त्वां त्वं हि नः शरणमागतः ॥ अ प्रणयेन द्
छे ६ रावप्युचितं कार्यमातिथ्यं गृहमागते ॥ हंतुमप्यागते छायां नोपसंहरते द्रुमः ॥ शरणागतस्य कर्त्तव्यमाति
थ्यमिह यत्नतः ॥ पंचयज्ञप्रवृत्तेन गृहस्थेन विशेषतः ॥ पंचयज्ञांस्तु यो मोहान्न करोति गृहाश्रमे ॥ त
स्य नायं न च परो लोको भवति धर्मतः ॥ तद्ब्रूहि मां सुविश्रब्धो यत्त्वं वाचा वदिष्यसि ॥ तत्करिष्याम्यहं सर्वं मा त्वं शो
के मनः कृथाः ॥ तस्य तद्वचनं श्रुत्वा शाकुने लुब्धकोऽब्रवीत् ॥ बाधते खलु मां शीतं संत्राणं हि विधीयतां ॥ एवमु
क्तस्ततः पक्षी पर्णान्यास्तीर्य भूतले ॥ यथाशक्त्या हि पर्णेन ज्वलनार्थं द्रुतं ययौ ॥ सगत्वांगारकर्मांतं

गृहीत्वाग्निमथागमत्॥ ततः शुष्केषु पर्णेषु पावकं सोप्यदीपयत्॥ स संदीप्त महत्कृत्वा तमाह शरणागतं॥ प्र
तापयस्व विश्रब्धः स्वगात्राण्यकुतोभयः॥ स तथोक्तस्तथेत्युक्त्वा लुब्धो गात्राण्यतापयत्॥ अग्निप्रत्यागत
प्राणस्ततः प्राह विहंगमं॥ हर्षेण महताविष्टो वाक्यं व्याकुललोचनः॥ तथेमं शकुनिं दृष्ट्वा विधिदृष्टेन क
र्मणा॥ दत्तमाहारमिच्छामि त्वया क्षुद्बाधते हि मां॥ स तद्वचः प्रतिश्रुत्य वाक्यमाह विहंगमः॥ न मेस्ति विभवो ये
न नाशयेयं क्षुधां तव॥ उत्पन्नेन हि जीवामो वयं नित्यं वनौकसः॥ संचयो नास्ति चास्माकं मुनीनामिव भो
क्रो ६ जने॥ इत्युक्त्वा स तदा तेन विवर्णवदनोभवत्॥ कथं नु खलु कर्तव्यमिति चिंतापरस्तदा॥ बभूव भरतश्रे
ष्ठ गर्हयन्वृत्तिमात्मनः॥ मुहूर्ताल्लब्धसंज्ञस्तु स पक्षी पक्षिघातनं॥ उवाच तर्पयिष्ये त्वां मुहूर्तं प्रतिपाल
य॥ इत्युक्त्वा शुष्कपर्णैस्तु समुज्वाल्य हुताशनं॥ हर्षेण महताविष्टः स पक्षी वाक्यमब्रवीत्॥ ऋषीणां दे
वतानां च पितृणां च महात्मनां॥ श्रुतः पूर्वं मया धर्मो महानतिथिपूजने॥ कुरुष्वानुग्रहं सौम्य सत्यमेत
द्ब्रवीमि ते॥ निश्चिता खलु मे बुद्धिरतिथिप्रतिपूजने॥ ततः कृतप्रतिज्ञो वै स पक्षी प्रहसन्निव॥ तमग्निं त्रिः
परिक्रम्य प्रविवेश महामतिः॥ अग्निमध्ये प्रविष्टं तु लुब्धो दृष्ट्वा तु पक्षिणं॥ चिंतयामास मनसा किमि

हं न केनचिच्छौर्यीलां च घर्मद्दुपा हृये॥ कोज्ञातो सर्वभूतानां हा हा धिग्धिगिति जल्पतां॥ वध्यंति मामधर्मज्ञं वध्यंति सु
हृदो जनाः॥ ता वाचः सुहृदः श्रुत्वा संज्वरिष्यंति मे भृशं॥ केचिद्देवमहाप्राज्ञास्तिष्ठास्यंति ततस्ततः॥ ज्ञानी हि मे
कृतं तात ब्राह्मणान्प्रति भारत॥ यथा ते मत्कृते क्षेमे लभंते ते तथा कुरु+भाषति ज्ञानी हि चाड्डोहं ब्राह्मणानां न चा
न४ धिपः॥ ॥जनमेजय उ॥ ॥नैव वाचौ मनसा पुनर्जातानु कर्मणा॥ दोग्धास्मि ब्राह्मणान्विप्र चरणौपि ते स्पृशे व४
॥ ॥ शांतो आपद्धर्मे॥ ॥शौनकः॥ ॥ तस्मात्तेहं प्रवक्ष्यामि धर्ममाहतचेतसे॥ श्रीमान्महाबलस्तुष्टः स्वयं
द्वा पुर्ममवेक्षसे॥ पुनस्ताद्धापुणाभूत्वा सुचिरंतनमेव तत्॥ अनुमन्ताति भूतानि स्वेन वृत्तेन पार्थिव॥ हत्
त्वैनं नूनं सदहतिइतिलोकोव्यवस्यति॥ यत्र त्वं तादृशो भूत्वा धर्मन्वानुपश्यसि॥ हित्वा तु सुचिरं भक्ष्यभोज्यां
श्च तपञ्चास्थितः॥ इत्येतदभिभूतानामद्भुतं जनमेजय॥ यो दुर्लभो भवेद्दाता कृपणो वा तपोधनः॥ अनाश्चर्यं
तदित्याहुर्नातिदूरे पावर्तते॥ एतदेव हि कार्पण्यसमग्रमस्समीक्षितुं॥ यद्वेत्समीक्षयेवस्याद्भवेतस्मिंस्ततो
गुणाः॥ यज्ञो दानं दया वेदाः सत्यं च पृथिवीपते॥ पंचैतानि पवित्राणि तेष्यं सुचरितं तपः॥ तदेव राज्ञां परमं प
वित्रं जनमेजय॥ तेन सम्यग्गृहीतेन श्रेयांसं धर्ममाप्स्यसि॥ पुण्यदेशाभिगमनं पवित्रं परमं स्मृतं॥ अत्राप्यु
दाहरंतीमां गाथां गीतां ययातिना॥ यो मर्त्यः प्रतिपद्येत आयुर्जीवितमात्मनः॥ यज्ञमेकांततः कृत्वा तत्संन्यस्य

स्वधर्म
मद्द
ज्यांद्द
वद्दंते

आ०
३२ चर
ता४
श्रे६

त्त२

तपश्चरेत्॥पुण्यमाहुःकुरुक्षेत्रंकुरुक्षेत्रात्सरस्वतीं॥सरस्वत्याश्चतीर्थानितीर्थेभ्यश्चपृथूदकं॥यत्रावगाह्य
पीत्वौनैनंश्वोमरणंतपेत्॥महासरःपुष्कराणिप्रभासोत्तरमानसे॥कालोदकंचगंतासिलब्ध्वायुर्जीविते
पुनः॥सरस्वतीदृषद्वत्योःसंगमोमानसंसरः॥स्वाध्यायशीलस्थानेषुसर्वेषुचसमुपस्पृशेत्॥त्यागधर्मःपवि
त्राणांसंन्यासंमनुरब्रवीत्॥अत्राप्युदाहरंतीमागाथाःसत्यवतीकृताः॥यथाकुमारःसत्योवैनैवपुण्योन
पापकृत्तु॥नह्यस्तिसर्वभूतेषुदुःखमस्मिन्कुतःसुखं॥एवंप्रकृतिभूतानांसर्वसंसर्गयायिनां॥त्यजतांजी
वितंश्रेयोनिवृत्तंपुण्यपापकं॥यत्तेवराज्यंज्यायिष्ठकार्यापातद्ब्रवीमिते॥बलेनसंविभागैश्चजयस्वर्गं
जनेश्वर॥यस्यैवबलमोजश्चसधर्मस्यप्रभुर्नरः॥ब्राह्मणार्थंसुखार्थंहित्वंपाहिवसुधांनृप॥यथैवै
तान्पुरानैक्षेप्सींतथैवैतान्प्रसादय॥अपिविक्रममाणोपित्यजमानोप्यनेकधा॥आत्मनोदर्शनाद्धिप्राज्ञ
हतास्मीतिमार्गये॥घटमानाःस्वकार्येषुकुरुनिःश्रेयसंपरं॥हिमाग्निघोरसदृशोराजाभवतिकश्चन॥
लांगलाशनिकल्पोवाभवेदन्यःपरंतप॥नविशेषेणगंतव्यमविच्छिन्नेनवापुनः॥नजातुनाहमस्मीति
सुप्रसक्तमसाधुषु॥विकर्मणातप्यमानःपापाद्विपरिमुच्यते॥नैतत्कार्यंपुनरितिद्वितीयात्परिमुच्यते॥

आत्मौपम्येन
निश्चनु

हिमवत्
शीतः।[illegible]
अग्निवत्क्रूरः
३२

चोरोयमःतद्धरगुणदोषवि
चारकः३

खा१

चरिष्ये धर्ममेवेति तत्तीयात्पात्विमुच्यते ॥ शुचिस्तीर्थान्यनुचरन् वहुत्वात्परिमुच्यते ॥ कल्यामेपोत्तु कर्त्तव्यं
पुरुषेपानुमृषता ॥ यि सुगंधीनि सेवंते तथागंधा स्रवंतिते ॥ येदुर्गंधानि सेवंते तथागंधास्रवंतिते ॥ तपःश्चर्या
पनः सद्यः पापाद्विपविमुच्यते ॥ संवत्सरमुपास्याग्निमभिशस्तः प्रमुच्यते ॥ त्रीणि वर्षाण्युपास्याग्निं भ्रूण
हा विप्रमुच्यते ॥ महासरः पुष्कराणि प्रभासोत्तरमानसे ॥ अभ्येत्य योजनशतं भ्रूणहा विप्रमुच्यते ॥ या
वतः प्राणिनो हंन्यात् तज्जातीयांस्तु तावतः ॥ प्रमीयमानानुन्मोच्य प्राणिहा विप्रमुच्यते ॥ अपि वाप्सु निमज्जेत ज
पंस्त्रिरघमर्षणं ॥ यथाश्वमेधावभृथस्तथातन्मनुरब्रवीत् ॥ तत्क्षिप्रं नुदते पापं सत्कानं लभते तथा ॥ अ
पि चैनं प्रसीदंति भूतानि जडमूकवत् ॥ वृहस्पतिं देवगुरुं सुरासुराः सर्वे समेत्याभ्यनुयुज्यनाजत्र ॥
धर्मंफलं वेत्थ फलं महर्षे तथैव तस्मिन्नरके पारलोक्ये ॥ उभे तु यस्य सदृशे भवेतां किंचित्तयोस्तत्रजल
योथन स्यात् ॥ आचक्ष्व तैः पुण्यफलं महर्षे कथं पापं नुदते कर्मशीलः ॥ ॥ वृहस्पतिः ॥ ॥ कृत्वा पापं पूर्वमबु
द्धिपूर्वं पुण्यानि च कुरुते बुद्धिपूर्वं ॥ स तत्पापं नुदते कर्मशीलो वासो यथा मलिनं क्षीरयुत्यैः ॥ पापं कृत्वा
भिमन्येत नाहमस्मीति पूरुषः ॥ तच्चिकीर्षति कल्याणं श्रद्दधानोऽनसूयकः ॥ छिद्राणि विवृतान्येव सा

ऋतं च स
त्यं चेति त्रि
कृत्रयं ॥६

न:३

द्वा२ कौ२

आ० धूनां वा वृणोतियः॥ यः पापं पुरुषं हत्वा कल्याणमभिपद्यते। यथादित्यः प्रातरुद्यंस्तमसःसव्यपोहति॥
कल्याणमाचरंस्त्रेवं सर्वपापं व्यपोहति॥ ॥भीष्मः॥ ॥एवमुक्त्वा तु राजानमिंद्रोतो जनमेजय॥ याजं
३३ यामास विधिवद्वाजिमेधेन शौनकः॥ ततः स राजा व्यपनीतकल्मषः श्रियायुतः प्रज्वलिताग्निरूपवान्॥
विवेश राज्यं स्वममित्रकर्षणो यथा दिवं संपूर्णवपुर्निशाकरः॥ ॥शांतौ आपद्धर्मे॥ ॥युधिष्ठिरः॥ ॥कच्चि
त्पितामहेनासीच्छ्रुतं वा दृष्टमेव वा। कश्चिन्मर्त्यो मृतो राजन् पुनरुज्जीवितो भवेत्॥ ॥भीष्मः॥ ॥शृणु पार्थ यथा
वृत्तमितिहासं पुरातनं॥ गृध्रजंबुकसंवादं यो वृत्तो नैमिषे पुरा॥ कस्यचिद्ब्राह्मणस्यासीद्दुःखलब्धः सुतो
य५ मृतः॥ बाल एव विशालाक्षो बालग्रहनिपीडितः॥ दुःखिताः केचिदादाय बालमप्राप्तयौवनं॥ कुलसर्वस्वभू
तं वै रुदंतः शोकविह्वलाः॥ बालं मृतं गृहीत्वाथ श्मशानाभिमुखाः स्थिताः॥ कंठेकरे वै च संक्राम्य रुरुदुर्भृश
दुःखिताः॥ शोचंतस्तस्य पूर्वोक्तान्भाषितांश्चासकृत्पुनः॥ तं बालं भूतले क्षिप्य प्रतिगंतुं न शक्नुयुः॥ तेषां
रुदितशब्देन गृध्रोभ्येत्य वचोब्रवीत्॥ एकात्मजमिमं लोके त्यक्त्वा गच्छत माचिरं॥ इह पुंसां सहस्राणि स्त्री
सहस्राणि चैव ह॥ समानीतानि कालेन नहि त्वावेयांति बांधवाः॥ संपश्यत जगत्सर्वं सुखदुःखैरधिष्ठितं॥ ३३

विनिश्चित्याधवतदा विक्रोशंतस्ततस्ततः ॥ मृतमित्यैवस्यैव गछंतो निराशास्तस्य दर्शने ॥ ६
संयोगो विप्रयोगाश्च पर्यायेणोपलभ्यते ॥ गृहीत्वा ये च गछंति येन यांति च तान्मृतान् ॥ ते प्यायुषप्रमाणेन स्वे
न गछंति जंतवः ॥ अलं स्थित्वा श्मशाने स्मिन् गृध्रगोमायुसंकुले ॥ कंकालबहुले रौद्रे सर्वप्राणिभयंकरे ॥
न पुनर्जीवितः कश्चित्कालधर्ममुपागतः ॥ प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥ सर्वेण खलु मर्त्तव्यं म
र्त्यलोके प्रसूयता ॥ कृतांतविहिते मार्गे मृतं को जीवयिष्यति ॥ कर्मांतविरते लोके अस्तं गछति भास्करः ॥ ग
म्यतां स्वमधिष्ठानं सुतस्नेहं विसृज्य वै ॥ ततो गृध्रवचः श्रुत्वा प्राक्रोशंतस्तदा नृप ॥ बांधवास्तेभ्यगछंत पुत्रमुत्सृ
ज्य भूतले ॥ निश्चितार्थाश्च ते सर्वे संत्यजंतः स्वमात्मजं ॥ निराशा जीविते तस्य मार्गमावृत्य धिष्ठिताः ॥ ध्वांक्षपक्षस
वर्णस्क बिलान्निसृत्य जंबुकः ॥ गछमानां स्म तानाह निर्घृणाः खलु मानुषाः ॥ आदित्यो यं स्थितो मूढाः स्नेहं कु
रुत माभयं ॥ बहुरूपो मुहूर्तश्च जीवत्यपि कदाचन ॥ यूयं भूमौ विनिक्षिप्य पुत्रस्नेहविनाकृताः ॥ श्मशाने पु सु ४
त्रमुत्सृज्य कस्माद्गछत निर्घृणाः ॥ न वोस्त्यस्मिन् सुतस्नेहो बाले मधुरभाषिणि ॥ यस्य भाषितमात्रेण प्र
सादमधिगछत ॥ न पश्यत सुतस्नेहो यादृशाः पशुपक्षिणां ॥ न तेषां धारयित्वा तान्कश्चिदस्ति फलागमः ॥
चतुष्पात्पक्षिकीटानां प्राणिनां स्नेहसंगिनां ॥ परलोकगतिस्थानां मुनेर्यज्ञक्रियामिव ॥ तेषां पुत्राभिरामा

को२ कु१

आ० णामिहलोके परत्र च॥ न गुणो दृश्यते कश्चित्प्रजाः संधारयंति च॥ अपश्यतां प्रियान्पुत्रांस्तेषां शोको न तिष्ठति॥
३५ न च पुष्टातिसंवृद्धा मातापितारौ क्वचित्॥ मानुषाणां कुतः स्नेहो येषां शोको भविष्यति॥ इमं कुलकरं पुत्रं त्य-
क्त्वा क्वानुगमिष्यथ॥ चिरं मुंचत बाष्पं च चिरं स्नेहेन पश्यत॥ एवंविधानीहीष्टानि दुस्त्यजानि विशेषतः॥ क्षीणा-
स्याथाभियुक्तस्य श्मशानाभिमुखस्य च॥ बांधवा यत्र तिष्ठंति तत्रान्यो नाधितिष्ठते॥ सर्वस्य दयिताः
प्राणाः सर्वस्नेहं च विंदति॥ तिर्यग्योनिष्वपि सतां स्नेहं पश्यत यादृशं॥ त्यक्त्वा क गच्छथेमं पद्मलोलायताक्षि-
कं॥ यथा नवोद्वाहकृतं स्नानमाल्यविभूषितं॥ जंबुकस्य वचः श्रुत्वा कृपणंपरिदेवत॥ न्यवर्त्तंत तदा स-
र्वे शवार्थे ते स्म मानुषाः॥ ॥गृध्र उवाच॥ ॥अहो वत नृशंसेन जंबुकेनाल्पमेधसा॥ क्षुद्रेणोक्ता हीनसत्वा
ते मानुषाः किं निवर्त्तथ॥ पंचभूतपरित्यक्तं शून्यं काष्ठत्वमागतं॥ कस्माच्छोचथ तिष्ठंतमात्मानं किं न शोचथ॥ त- ध४
धंरु पः कुरुत वै तीव्रं मुच्यते येन किल्बिषात्॥ तपसा लभ्यते सर्वं विलापः किं करिष्यति॥ अनिष्टानि च भाग्यानि
जातानि सह मूर्त्तिना॥ येन गच्छति वालोयं दत्वा शोकमनंतकं॥ धनं गावः सुवर्णं च मणिरत्नमथापि च॥ अ-
पत्यं च तपोमूलं तपोयोगाच्च लभ्यते॥ यथाकृता च भूतेषु प्राप्यते सुखदुःखिता॥ गृहीत्वा जायते जंतुर्दुः- ३४

खाणि च सुखानि च ।। न कर्मणा पितुः पुत्रः पिता वा पुत्रकर्मणा ।। मार्गेणान्येन गछंति बद्धाः सुकृतदुःष्कृतैः ।। धर्मं
चरत यत्नेन न चाधर्मे मनं कुरुथाः ।। वर्त्तध्वं च यथाकालं दैवतेषु द्विजेषु च ।। शोकं त्यजत दैन्यं च सुतस्नेहा
न्निवर्त्तत ।। त्यजता मय यमा काशे त ततः शीघ्रं न्यवर्त्तत ।। यत्करोति शुभं कर्म तथा कर्मसु दारुणं ।। तत्कर्मैव सम
मश्नाति बांधवानां किमत्र ह ।। इह सत्का न तिष्ठंति बांधवा बांधवप्रियं ।। स्नेहमुत्सृज्य गछंति बाष्पपूर्णा
विलेक्षणाः ।। प्राज्ञो वा यदि वा मूर्खः सधनो निर्धनो पि वा सर्वः कालवशं याति शुभाशुभसमन्वितः ।। किं क
रिष्यथ शोचित्वा मृतं किमनुशोचथ ।। सर्वस्य हि प्रभुः कालो धर्मतः समदर्शनः ।। यौवनस्थांश्च बालांश्च
वृद्धांश्च गर्भगतानपि ।। सर्वानाविशते मृत्युरेवंभूतमिदं जगत् ।। ।। जंबुकउवाच ।। ।। अहो मंदीकृतः स्नेहो
गृध्रेणेहाल्पबुद्धिना ।। पुत्रस्नेहाभिभूतानां युष्माकं शोचतां भृशं ।। समैः सम्यक्प्रयुक्तैश्च वचनैः प्रत्ययोत्प
न्नैः ।। यत्र गछति जनश्चापं स्नेहमुत्सृज्य दुस्त्यजं ।। अहो पुत्रवियोगेन मृतशून्योपसेवनात् ।। क्रोशतां
सुभृशं दुःखं विवत्सानां गवामिव ।। अद्य शोकं विजानामि मानुषाणां महीतले ।। स्नेहं हि कारुणं दृष्ट्वा ममा
प्यश्रूण्ययापतत् ।। यत्नो हि सततं कार्यस्ततो दैवेन सिध्यति दैवं पुरुषकारश्च कृतांतेनोपपद्यते ।। अ

निर्वेदः सदा कार्यो निर्वेदाद्धि कुतः सुखं ॥ प्रयत्नात्प्राप्यते ह्यर्थः कस्माद्गच्छत निर्दयाः ॥ आत्ममांसोपवृत्तं च शरीरा
र्द्धमयीं तनुं ॥ पितॄणां वंशकर्त्तारं वने त्यक्त्वा क्व यास्यथ ॥ अथवा स्तंगते सूर्ये संध्याकाल उपस्थिते ॥ ततो नेष्य
थवा पुत्रं इहस्थावास्तविश्रय ॥ ॥ गृध्र उ० ॥ ॥ अद्य वर्षसहस्रं मे साग्रं जातस्य मानुषाः ॥ न च पश्यामि जी
वंतं मृतं स्त्रीपुंनपुंसकं ॥ मृता गर्भे हि जायंते जाता मात्रा म्रियंति च ॥ चंक्रमंतो म्रियंते च यौवनस्थास्तथा परे ॥
अनित्यानीह भाग्यानि चतुष्पात्पक्षिणामपि ॥ जंगमानां नगानां चाप्यायुरग्रे च तिष्ठते ॥ इष्टदारनियुक्ताश्च
पुत्रशोकान्वितास्तथा ॥ दह्यमानाः स्म शोकेन गृहं गच्छंति नित्यशः ॥ अनिष्टानां सहस्राणि तथेष्टानां
शतानि च ॥ उत्सृज्येह प्रयाता वै बांधवा भृशदुःखिताः ॥ त्यज्यतामेष निस्तेजाः शून्यः काष्ठत्वमागतः ॥ अन्य
देहविषक्तं हि शावं काष्ठत्वमागतं ॥ त्यक्तजीवस्य चैवास्य कस्माद्धित्वा न गच्छथ ॥ निरर्थको ह्ययं स्नेहो निः
फलश्च परिश्रयः ॥ चक्षुर्भ्यां न च कर्णाभ्यां संशृणोति समीक्ष्यते ॥ कस्मादेनं समुत्सृज्य न गृहान्गच्छता
स्तुवै ॥ मोक्षधर्माश्रितैर्वाक्यै हेतुमद्भिः सुनिष्ठुरैः ॥ मयोक्ता गच्छत क्षिप्रं स्वं स्वमेव निवेशनं ॥ प्रज्ञाविज्ञा
नयुक्तेन बुद्धिसंज्ञाप्रदीपिना ॥ वचनं श्राविता न्तेनं मानुषाः संन्यवर्त्तत ॥ शोको द्विगुणतां याति दृष्ट्वा

ते३ नां२ डे२

स्मरत्वाच चेष्टितं ॥ इत्येतद्वचनं श्रुत्वा सन्निवृत्तास्तु मानुषाः ॥ अपश्यंतं तदा मुसंडुतमोगत्य जंबुकः ॥ ॥ जंबुकः ॥
इमं कनकवर्णाभं भूषणैःसमलंकृतं ॥ गृध्रवाक्यात्कथं पुत्रं त्यजध्वं पितृपिंडदं ॥ न स्नेहस्य च विच्छेदो विलाप
रुदितस्य च ॥ मृतस्यास्य परित्यागात्तापो वै भविता ध्रुवं ॥ श्रूयतें शंबुके शूद्रे हते ब्राह्मणदारकः ॥ जीवितो धर्मा
साद्य रामात्सत्यपराक्रमात् ॥ तथा श्वेतस्य राजर्षेर्बालो दिष्टांतमागतः ॥ श्वेतेन धर्मनिष्टेन मृतः संजीवितः पु
नः ॥ तथा कश्चिद्भवेत्सिद्धो मुनिर्वा देवतापि वा ॥ कृपणानामनुक्रोशं कुर्याद्वो वदतामिह ॥ इत्युक्तास्ते निवर्त्तं रू६
त शोकार्त्ताः पुत्रवत्सलाः ॥ अंके शिरः समाधाय रुरुदुर्बहुविस्तरं ॥ तेषां रुदितशब्देन गृध्रोभ्येत्य वचो ब्रु
वीत् ॥ ॥ गृध्र उवाच ॥ ॥ अश्रुपातपरिक्लिन्नैः पाणिस्पर्शप्रपीडितः ॥ धर्मराजप्रयोगाच्च दीर्घनिद्रां प्रवि
शितः ॥ तपसापि हि संयुक्ता धनवंतो महाधियः ॥ सर्वे मृत्युवशं यांति तदिदं प्रेतपत्तनं ॥ बालवृद्धसहस्राणि
सदा संत्यज्य बांधवाः ॥ दिनानि चैव रात्रीश्च दुःखं तिष्ठंति भूतले ॥ अलं निर्बंधमागम्य शोकस्य परिधारणे ॥ अ
प्रत्ययं कुतो ह्यस्य पुनरद्येह जीवितं ॥ मृतस्योत्सृष्टदेहस्य पुनर्देहो न विद्यते ॥ नैव मूर्त्तिप्रदानेन जंबु
कस्य शतैरपि ॥ शक्यं जीवयितुं ह्येष बालो वर्षशतैरपि ॥ अथरुद्रः कुमारो वा ब्रह्मा वा विष्णुरेव च ॥ वरमस्मै ५८
मा१

आ०
३६

प्रयछेत्पुस्ततो जीवेदयं शिशुः॥ नैव बाष्पविमोक्षेण न चाश्वासशतेन च॥ न दीर्घरुदितेनायं पुनर्जीविग
मिष्यति॥ अहं च कौएकश्चैवस्मृयं ये चास्य बांधवाः॥ धर्माधर्मौ गृहीत्वेह सर्वे वर्तामहे ध्वनि॥ अप्रियं पुरु
षं चापि परद्रोहे परस्त्रियं अधर्ममनृतं चैव दूरात्प्राज्ञो विवर्जयेत्॥ धर्मं सत्यं श्रुतं न्याय्यं महतीं प्राणिनां
दयां॥ अजिह्मत्वमशाठ्यं च यत्नतः परिमार्गत॥ मातरं पि चापि बांधवान्सुहृदस्तथा॥ जीवतो येन पश्यं
ति तेषां धर्मविपर्ययः॥ यो न पश्यति चौक्षुर्भ्यां नेशते चकथं च न॥ तस्य निष्ठावसानांते रुदतः किं करिष्यथ॥
इत्युक्तास्ते सुतं त्यक्त्वा भूमौ शोकपरिप्लुताः॥ दह्यमानाः सुतस्नेहात्प्राययौ बांधवा गृहं॥ ॥जंबुक उवाच॥ ॥
दारुणो मर्त्यलोकोयं सर्वप्राणिविनाशनः॥ इष्टबंधुनियोगश्च तथेहाल्पं च जीवितं॥ बिह्वलीकम
सत्यं वाप्यतिवादाप्रियंवदं॥ इमं प्रेक्ष्य पुनर्भाविदुःखं शोकविवर्द्धनं॥ न मे मानुषलोकोयं मुहूर्त्तमपि रो
चते॥ अहो धिगरमगृध्रवाक्येन यथैवाबुद्धयस्तथा॥ कथं गच्छत निस्नेहाः सुतस्नेहं विसृज्य च॥ प्रदीप्ताः
पुत्रशोकेन संनिवर्त्तत मानुषाः॥ श्रुत्वा तु गृध्रवचनं पापस्यैहाकृतात्मनः॥ सुखस्यानंतरं दुःखं दुःखस्या
नंतरं सुखं॥ सुखदुःखावृते लोके नेहास्त्येकमनंतरं॥ इमं क्षितितलेत्यक्त्वा बालं रूपसमन्वितं॥ कुलशोभा

स्त्रे
३६

कथं मूढाः पुत्रं त्यक्त्वा कृपणास्य था ।। रूपयौवनसंपन्नं द्योतमानमिव श्रिया ।। जीवंतमेनं पश्यामि मनसा
नात्र संशयः ।। विनाशो नास्य न हि वै सुखं प्राप्स्यथ मानुषाः ।। पुत्रशोकाभितप्तानां मृतानामपि वः क्षमं ।। सुख स्व २
संभावनं कृत्वा धारयित्वा सुखं स्वयं ।। त्यक्त्वा गमिष्यथ क्वाद्य समुत्सृज्याल्पबुद्धिवत् ।। ।। भीष्मः ।। ।। तथा
धर्मविरोधेन प्रियमिथ्याभिधायिना ।। श्मशानवासिना नित्यं रात्रिं मृगयता तदा ।। ततो मध्यस्थतां नीता
वचनैरमृतोपमैः ।। जंबुकेन स्वकार्यार्थं बांधवास्तस्य धिष्ठिताः ।। ।। गृध्र उवाच ।। ।। अयं प्रेतसमाकीर्णो य
क्षराक्षससेवितः ।। दारुणः काननोद्देशः कौशिकैरभिनादितः ।। भीमः सुघोरश्च तथा नीलमेघसम
प्रभः ।। अस्मिंश्छवं परित्यज्य प्रेतकार्याण्युपासत ।। भानुर्न यावदस्तं याति यावच्च विमला दिशः ।। तावदेनं प
शांपे ४ रित्यज्य प्रेतकार्याण्युपासत ।। वदंति परुषं श्येनाः शिवाः क्रोशंति दारुणाः ।। मृगेंद्राः प्रस्यनंदंति रविरस्तं च ग
पा: ३ च्छति ।। चिताधूमेन नीलेन संरज्यंते च पादपाः ।। श्मशाने च निराहाराः प्रतिनंदंति देवताः ।। सर्वे विकृतदेहा
श्चाप्यस्मिन्देशे सुदारुणे ।। युष्मान्प्रधर्षयिष्यंति विकृता मांसभोजिनः ।। क्रूरश्चायं वनोद्देशो भयमद्य भ
तो १ विष्यति ।। त्यज्यतां काष्ठभूतोयं मृष्यतां जंबुकं वचः ।। यदि जंबुकवाक्यानि निष्फलान्यनृतानि च ।। श्रोष्यथ ८१

रू२ नमु४ १ता

भ्रष्टविज्ञानास्ततः सर्वे विनंक्ष्यथ ।। ।।जंबुकउवाच ।। ।।स्थीयतां नेह भेत्तव्यं यावत्तपति भास्करः ।। तावदस्मि
सुते स्नेहाद निर्वेदेन वर्त्तत ।। स्वैरं वैंदत विस्त्रब्धा चिरं स्नेहेन पश्यत ।। स्थीयतां यावदादित्यः किं वा क्रव्याददसं भा२
षितैः ।। यदि गृध्रस्य वाक्यानि तैर्व्यापिरसत्तानि च ।। गृहीतं तं मोहितात्मानः सुतो वो न भविष्यति ।। ।।भीष्मः ।। ।।गृ
ध्रोस्तमित्याह गतो गतोस्तं नेति जंबुकः ।। मृतस्य तं परिजने पच्चतुस्तो क्षुधान्वितौ ।। स्वकार्यबद्धकक्षौ तौ रा
जन्गृध्रोथ जंबुकः ।। क्षुत्पिपासापरिश्रांतौ शास्त्रमालंब्य जल्पतः ।। तयोर्विज्ञानविदुषोर्द्वयोर्मृगपक्षिणोः ।। त५
वाक्यैरमृतकल्पैस्तैः प्रातिष्ठंते व्रजंति च ।। शोकदैन्यसमाविष्टा रुदंतस्तत्र स्थितास्तदा ।। स्वकार्यकुशलाभ्यां ते संभ्रा
म्यंते ह नैपुणात् ।। ते यातयोर्विवदतोर्विज्ञानविदुषोर्द्वयोः ।। बांधवानां स्थितानां चाप्युपातिष्ठोति शंकरः ।। देव्या प्रणो
दितो देवः कारुण्यार्द्रीकृतेक्षणः ।। ततस्तानाह मनुजान्वरदोस्मीति शंकरः ।। ते प्रत्यूचुरिदं वाक्यं दुःखिताः प्रण
ताः स्थिताः ।। एकपुत्रविहीनानां सर्वेषां जीवितार्थिनां ।। पुत्रस्यास्य नो जीवदानं जीवितं दातुमर्हसि ।। एवमुक्तः सभ
गवान्नेत्रवारिपूर्णेन चक्षुषा ।। जीवितं स्म कुमारायशादाद्वर्षशतानि वै ।। तथा गोमायुगृध्राभ्यां प्राददत्क्षुद्विना न
शनं ।। वरं पिनाकी भगवान् सर्वभूतहिते रतः ।। ततः प्रणम्य ते देवं श्रेयो हर्षसमन्विताः ।। कृतकृत्याः सुखं

श्लो ४ ग्रं ४ द्रु ४

हृष्टाः प्रातिष्ठंततदा विभो ॥ अनिर्वेदेन दीर्घेण निश्चयेन ध्रुवेन च ॥ देवदेवप्रसादाच्च क्षिप्रं फलमवाप्यते ॥
पश्य देवस्य संयोगं बांधवानां च निश्चयं ॥ कृपणानां तु रुदतां कृतमश्रुप्रमार्जनं ॥ पश्य चाल्पेन कालेन
निश्चयान्वेषणेन च ॥ प्रसादं शंकरात्प्राप्य दुःखिताः सुखमाप्नुवन् ॥ ते विस्मिताः प्रहृष्टाश्च पुत्रसंजीवनात्पुनः
॥ बभूवुर्भरतश्रेष्ठ प्रसादाच्छंकरस्य वै ॥ ततस्ते त्वरिता राजन्स्त्यक्त्वा शोकं विदुद्रुवं ॥ विविशुः पुत्रमादा
द९ य नगरं हृष्टमानसाः ॥ एषा बुद्धिः समस्तानां चातुर्वर्ण्येन दर्शिता ॥ धर्मार्थमोक्षसंयुक्तमितिहासमिमं शृ संयुक्तं ९
णु ॥ श्रुत्वा मनुष्यः सततमिह प्रेत्य च मोदते ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ बलिनः प्रत्यमित्र
स्य नित्यमासन्नवर्तिनः ॥ उपकारापकाराभ्यां समर्थस्योद्यतस्य च ॥ मोहाद्विकत्थनामात्रैरसारोल्पबलो
४ पि लघुः ॥ वाग्भिरप्रतिरूपाभिरभिद्रुह्यंतामहं ॥ आत्मनो बलमास्थाय कथं वर्त्तेत मानवः ॥ आगच्छतोतिक्रुद्धस्य रभि ४
तस्योद्धरणकाम्यया ॥ ॥ भीष्मः ॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ संवादं भरतश्रेष्ठ शाल्मलेः पवन जातं
स्य च ॥ हिमवंतं समासाद्य महानासीद्वनस्पतिः ॥ वर्षपूगाभिसंवृद्धः शाखी स्कंधी पलाशवान् ॥ तत्र स्म म हस्तानां च लुब्धयं ॥१
त्तमातंगा घर्मार्त्ताः श्रमकर्षिताः ॥ विश्राम्यंति महाबाहो तथा च मृगजातयः ॥ नल्वमात्रपरीणाहो घनच्छा स्थूलत्वं ।

न५ नृगा२

आ०

३८

यावनस्पतिं ॥ सारिकाशुकसंजुष्टः पुष्पवान्फलवानपि ॥ सार्थिकावजितश्चापि तापसाश्च वनौकसः ॥ वसं
ति तत्र मार्गस्थाः सुरम्ये नगसत्तमे ॥ तस्य ता विपुलाः हे शाखा हृष्टाः स्कंधो च सर्वतः ॥ अभिगम्याब्रवीदे
नं नारदो भरतर्षभ ॥ अहो नु रमणीयस्त्वमहो वासि मनोहरः ॥ तव शाखा महाशाखा स्कंधाश्च विपुलास्त
था ॥ न वै प्रभग्नान् पश्यामि मारुतेन कथंचन ॥ किंनु ते पवनस्तात प्रीतिंवान यवा सुहृत् ॥ त्वां रक्षति सदा
न५ येन वैनं पवनो भक्वे ॥ भगवान्प्रवैस्यानो वृक्षानुच्चावचानपि ॥ पर्वतानां च शिखराण्याचालयति वेग
वान् ॥ शोषयत्येव पातालं वहन्गंधवहः शुचिः ॥ सरांसि सरितश्चैव सागरांश्च तथैव च ॥ संरक्षति त्वां प
वनसखित्वेन न संशय ॥ तस्मात्त्वं बहुशाखोपि पर्णवान्पुष्पवानपि ॥ इदं च रमणीयं ते प्रतिभाति वन
स्पते ॥ यदिमे विहगास्तात रमंते मुदितास्त्वयि ॥ एषां पृथक्समस्तानां श्रूयते मधुरस्वरः ॥ पुष्पसंमोदनेका
व लैंसतां सुमनोहरं ॥ तथेमे गर्जिता नागाः स्वयूथकुलशोभिताः ॥ घर्मार्तास्त्वां समासाद्य सुखं विंदंति शा
ल्मले ॥ तथैव मृगजातीभिरन्याभिरभिशोभसे ॥ तथा सर्वाधिवासैश्च शोभसे मेरुवद्द्रुम ॥ ब्राह्मणैश्च
तपःसिद्धैस्तापसैः श्रमणैस्तथा ॥ त्रिविष्टपसमं मन्ये तवायतनमेव ह ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ नार ३८
द्रियामहे त्वयानिसैंतरुश्चवरस्याल्मले ॥ सदैव नाकुंचामारुतमगाव्याघ्र तथा गजाः ॥ वसंति तव संहृष्टा मनो
हराः हरमनो

दउवाच॥ ॥बंधुत्वादथवा सख्याछाल्मले नात्र संशयः॥ पालयत्येव सततं भीमं सर्वत्रगो निलः॥ न्यग्भा
वं परमं वायोः शाल्मले त्वमुपागतः॥ तवाहमस्मीति सदा येन रक्षति मारुतः॥ न तं पश्याम्यहं वृक्षं पर्वतं वेश्म
चेदृशं॥ यन्न वायुबलाद्भग्नं पृथिव्यामिति मे मतिः॥ त्वं पुनः कारणैर्नूनं रक्ष्यसे शाल्मले यथा॥ वायुना
सपरीवारस्तेन तिष्ठस्यसंशयं॥ ॥शाल्मलिरुवाच॥ ॥न मे वायुः सखा ब्रह्मन्न बंधुर्न च मे सुहृत्॥ पर
मेष्ठी तथा नैव येन रक्षति वानिलः॥ मम तेजो बलं भीमं वायोरपि हि नारद॥ कलामष्टादशीं प्राणैर्न मे प्रा
प्नोति मारुतः॥ आगच्छन्परुषो वायुर्मया विहृतो बलात्॥ भंजन्द्रुमान्पर्वतांश्च यच्चान्यदपि किंचन॥ स
मया बहुशो भग्नः प्रभंजन्वै प्रभंजनः॥ तस्मान्न बिभ्ये देवर्षे क्रुद्धादपि समीरणात्॥ ॥नारदः॥ ॥
शाल्मले विपरीतं ते दर्शनं नात्र संशयः॥ न हि वायोर्बलेनास्ति भूतं तुल्यबलं क्वचित्॥ इंद्रो यमो वैश्रव
णो वरुणश्च जलेश्वरः॥ न ते पि तुल्या मरुतः किं पुनस्त्वं वनस्पते॥ यद्धि किंचिदिह प्राणी चेष्टते शाल्मले
भुवि॥ सर्वत्र भगवान्वायुश्चेष्टाप्राणकरः प्रभुः॥ एष चेष्टयते सम्यक् प्राणिनः सम्यगायतः॥ असम्य
गायतो भूयश्चेष्टते विकृतो नृषु॥ स त्वमेवंविधं वायुं सर्वसत्वभृतां वरं॥ न पूजयसि पूज्यं तं किम

सि२ हा४

आ० न्यद्बुद्धिलाघवात्॥ असारश्चापिदुर्मेधाः केवलंबहुभाषते॥ क्रोधादिभिरवच्छन्नो मिथ्यावदसिशाल्मले॥

३९ ममद्वेषःसमुत्पन्नस्त्वय्येवंसंप्रभाषति॥ ब्रवीम्येषस्वयंवायोस्त्वदुर्भाषितंबहु॥ चंदनैःस्पंदनैःशालैःसर

लैर्देवदारुभिः॥ वेतसैर्धन्विनैश्चापि येचान्येबलवत्तराः॥ तैश्चापिनैवंदुर्बुद्धेक्षितावायुःकृतात्मभिः॥ तेपिजानंति

वायोश्चबलमात्मनएवच॥ तस्मात्तेवैनमस्यंतिश्वसनंतरुसत्तमाः॥ त्वंतुमोहान्नजानीषेवायोर्बलमनंतकं॥

एवंतस्मात्त्वंमिथ्याभिसकाशंमातरिश्वनः॥ ॥शांतौआपद्धर्मे॥ ॥भीष्मः॥ एवमुक्त्वातुराजेंद्रशाल्मलिंब्रह्मवि

त्तमः॥ नारदःपवनेसर्वंशाल्मलेर्वाक्यमब्रवीत्॥ ॥नारदउवाच॥ ॥हिमवत्पृष्ठजःकश्चिच्छाल्मलिःपरि

वा५ वोंनवार॥ बृहन्मूलोबृहच्छायस्सत्वांवायोवमन्यते॥ बहून्याक्षेपयुक्तानित्वामाहवचनानिसः॥ नयुक्तानि

मयावायोतानिवक्तुंतवाग्रतः॥ जानामित्वामहंवायोसर्वप्राणप्रतापनं॥ वरिष्टंचगरिष्टंचक्रोधेवैवस्वतंयथा॥

भीष्मः॥ ॥एतत्तुवचनंश्रुत्वानारदस्यसमीरणः॥ शाल्मलिंतमुपागम्यक्रुद्धोवचनमब्रवीत्॥ ॥वायुरुवाच॥ ॥

म२ शाल्मलेनारदोगच्छंस्त्वयोक्तोमद्विगर्हणे॥ अहंवायुःप्रभावंतेदर्शयाम्यात्मनोबलं॥ अहंत्वामभिजाना

मिविदितश्चासिमेद्रुम॥ पितामहःप्रजासर्गेत्वयिविश्रांतवान्प्रभुः॥ तस्यविश्रमणादेषप्रसादोमत्कृत ३९

र्   षे   तं
स्त्व॥ वं क्ष्यते तेन दुर्बुद्धिनात्मवीर्यात्द्रुमाधम॥ यन्मां त्वमव जानीय थान्यं प्राकृतं यथा॥ दर्शयाम्येष चात्मानं यथा मां
नावमन्यसे॥ ॥भीष्मः॥ ॥एवमुक्तस्ततः प्राह शाल्मलिः प्रहसन्निव॥ पवन त्वं च मे क्रुद्धो दर्शयात्मानमात्मना॥ मयि
वेत्यज्यतां क्रोधः किं मे क्रुद्धः करिष्यसि॥ न ते बिभेमि पवन यद्यपि त्वं स्वयं प्रभुः॥ बलाधिकोहं त्वत्तश्च न भीः कार्या मया
तव॥ ये तु बुध्या हि बलिनस्ते भवंति बलीयसः॥ प्राणमात्रबला ये वै नैव ते बलिनो मताः॥ इत्येवमुक्तः पवनश्श्व इत्येवा
ब्रवीद्वचः॥ दर्शयिष्यामि ते तेजस्ततो रात्रिरुपागमत्॥ अथ निश्चित्य मनसा शाल्मलिर्वातकारितं॥ पश्यमानस्तदा
त्मानं मसमं मातरिश्वना॥ नारदे यन्मया प्रोक्तं पवनं प्रति तन्मृषा॥ असमर्थो ह्यहं वायोर्बलेन बलवान्हि सः॥ मा
रुतो बलवान्नित्यं यथैवं नारदोब्रवीत्॥ अहं तु दुर्बलोन्येभ्यो वृक्षेभ्यो नात्र संशयः॥ किंतु बुध्या समो नास्ति मया क
श्चिद्वनस्पतिः॥ तदहं बुद्धिमास्थाय भयं मोक्ष्ये समीरणात्॥ यदि तां बुद्धिमास्थाय तिष्ठेयुः पर्णिनो वने॥ अरिष्टास्युः
सदा क्रुद्धात्पवनान्नात्र संशयः॥ ते तु बाला न जानंति यथा वै तान्समीरणः॥ समीरयति संक्रुद्धो यथा जानाम्यहं त
था॥ ॥शांतौ आपद्धर्मे॥ ॥भीष्मः॥ ॥ततो निश्चित्य मनसा शाल्मलिः क्षुभितस्तदा॥ शाखास्कंधान्प्रशाखाश्च स्व
यमेव व्यशातयत्॥ स परित्यज्य शाखाश्च पत्राणि कुसुमानि च॥ प्रभाते वायुमायांतं प्रत्यैक्षत वनस्पतिः॥ ततः क्रुद्धः श्वस
न्वायुः पातयन्वै महाद्रुमान्॥ आजगामाथ तं देशमास्ते यत्र स शाल्मलिः॥ तं हीनपर्णं पतिताग्रशाखं विशीर्णपुष्पं

आ॰

४०

सग ४ वृ॰

प्रसमीक्ष्य वायुः ॥ उवाच वाक्यं स्मयमान एवं मुदायुतः शाल्मलिमुग्नशाखं ॥ ॥वायुरुवाच॥ ॥अहमप्येवमेव त्वां कु
र्वाणः शाल्मले रुषा ॥ आत्मना यत्कृतं कृछ्रं शाखानामुपकर्षणं ॥ हीनपुष्पाग्रशाखस्त्वं शीर्णांकुरपलाशकः ॥ आ
त्मदुर्मंत्रितेनेह मद्वीर्यवशगः कृतः ॥ ॥भीष्मः॥ ॥एतछ्रुत्वा वचो वायोः शाल्मलिर्व्रीडितस्तदा ॥ अतप्यत वचः स्मृत्वा ना
रदो यत्तदाब्रवीत् ॥ एवं यो राजशार्दूलदुर्बलेन बलीयसा ॥ वैरमारभते बालस्तप्यते शाल्मलिर्यथा ॥ तस्माद्वैरं न कुर्वीत रं ४
दुर्बलो बलवत्तरैः ॥ शोचेद्धि वैरं कुर्वाणो यथा वै शाल्मलिस्तथा ॥ न हि वैरं महात्मानो विवृण्वंत्यपकारिषु ॥ शनैः शनै महा वि६
नं राजदर्शयंति स्म ते बलं ॥ वैरं न कुर्वीत नरोड दुर्बुद्धिर्बुद्धिजी.विना ॥ बुद्धिर्बुद्धिमतो याति तूलेष्विव हुताशनः ॥ न हि
बुध्यासमं किंचिद्विद्यते पुरुषे नृप ॥ तथा बलेन राजेंद्र न समोस्तीह कश्चन ॥ तस्मात्क्षमेत बालाय जडांधब
धिराय च ॥ बलाधिकाय राजेंद्र तद्दृष्टं त्वयि शत्रुहन् ॥ अक्षौहिण्यो दशैका च सप्त चैव महाद्युते ॥ बलेन न समा
ता ४ राजन्नर्जुनस्य महात्मनः ॥ निहताश्चैव भग्नाश्च पांडवेन यशस्विना ॥ चरता बलमास्थाय पाकशासनिना मृधे ॥ उ
क्ताश्च ते राजधर्मा आपद्धर्माश्च भारत ॥ विस्तरेण महाराज किं भूयः श्रोतुमिछसि ॥ ॥शांतौ आपद्धर्मे॥ ॥युधिष्ठि
र उवाच ॥ ॥पापस्य यदधिष्ठानं यतः पापं प्रवर्त्तते ॥ एतदिछाम्यहं श्रोतुं तत्वेन भरतर्षभ ॥ ॥भीष्म उवाच॥ ॥पाप ४०
स्य यदधिष्ठानं तछृणुष्व नराधिप ॥ एको लोभो महाग्राहो लोभात्कामः प्रवर्त्तते ॥ लोभान्मोहश्च माया च मानस्तं
पापंप्रवर्त्तते ॥ अतः पापमधर्मश्च तथा दुःखमनुत्तमं ॥ निकृत्या मूलमेतद्धि येन पापकृतो जनाः ॥ लोभात्क्रोधः प्रभवति लोभात्द१
न्मो १

यु
भपनास्तु तां ॥ अक्षमा ह्रीपरित्यागः श्रीनाशो धर्मसंक्षयः ॥ अभिध्याप्रज्ञता चैव सर्वं लोभात्प्रवर्त्तते ॥ अत्यागश्चाति
तीर्षश्च विकर्मसु च या क्रिया ॥ कुलविद्यामदश्चैव रूपैश्वर्यमदस्तथा ॥ सर्वभूतेष्वभिद्रोहः सर्वभूतेष्वसत्कृति
॥ सर्वभूतेषु विश्वासः सर्वभूतेष्वनार्जवं ॥ हरणं परवित्तानां परदाराभिमर्षणं ॥ वाग्वेगो मनसो वेगो निंदावेगस्त
थैव च ॥ उपस्थोदरयोर्वेगो मृत्युवेगश्च दारुणः ॥ ईर्ष्यावेगश्च बलवान् मिथ्यावेगश्च दुर्जयः ॥ रसवेगश्च दुर्वा
र्यः श्रोत्रवेगश्च दुःसहः ॥ कुत्सा विकथमात्सर्यं पापं दुष्करकारिताः ॥ साहसानां च सर्वेषामकार्याणां क्रियास्त
था ॥ जातौ बाल्ये च कौमारे यौवने चापि मानवाः ॥ न संत्यजंत्यात्मकर्म यन्न जीर्यति जीर्यतः ॥ यो न पूरयितुं शक्यो
लोभः प्राप्त्या कुरूद्वह ॥ नित्यं गंभीरतोयाभिरापगाभिरिवोदधिः ॥ न प्रहृष्यति यो लाभैः कामैश्चैर्यं न तृप्यति
॥ यो न देवैर्न गंधर्वैर्नासुरैर्न महोरगैः ॥ ज्ञायते नृप तत्वेन सर्वैर्भूतगणैस्तथा ॥ स लोभः सहि मोहेन विजेतव्यो
जितात्मना ॥ दंभो द्रोहश्च निंदा च पैशून्यं मत्सरस्तथा ॥ भवंत्येतानि कौरव्य लुब्धानामकृतात्मनां ॥ सुमहांत्य
पि शास्त्राणि धारयंति बहुश्रुताः ॥ छेत्तारः संशयानां च क्लिश्यंतीहाल्पबुद्धयः ॥ द्वेषक्रोधप्रसक्ताश्च शिष्टा
चारबहिष्कृताः ॥ अंतःक्रूरा वाङ्मधुराः कूपाश्छन्नास्तृणैरिव ॥ धर्मवैतंसिका क्षुद्रा मुष्णंति ध्वजिनो जग

योनद्य

आप०
४१
पध्या४

र्गा

त्ता॥ कुर्वते च बहून्मांस्तांस्तान्हेतुबलमाश्रिताः॥ यस्तं मार्गं विलुंपंति लोभज्ञानेष्ववस्थिताः॥ धर्मस्याहि यमापास्य लो
भग्रस्तैर्दुरात्मभिः॥ या या विक्रियते संस्था ततः सापि प्रपद्यते॥ दर्पः क्रोधो मदः स्वप्नो हर्षः शोकोतिमानिता॥ एत
एव हि कौरव्य दृष्यंते लुब्धबुद्धिषु॥ एतानशिष्टान्बुध्यस्व नित्यं लोभसमन्वितान्॥ शिष्टांस्तु परिपृच्छेथा यान्वक्ष्या
मि शुचिव्रतान्॥ यैष्वावृत्तिभयं नास्ति परलोकभयं न च॥ नामिषेषु प्रसंगोस्ति न प्रियेष्वप्रियेषु च॥ शिष्टाचारः प्रि
यो येषु दमो येषु प्रतिष्ठितः॥ सुखं दुःखं समं येषां सत्यं येषां परायणं॥ दातारो न ग्रहीतारो दयावंतस्तथैव च॥ पितृदे
वातिथेयाश्च नित्योद्युक्तास्तथैव च॥ सर्वोपकारिणो वीराः सर्वधर्मानुपालकाः॥ सर्वभूतहिताश्चैव सर्वदेयाश्च
भारत॥ न ते चालयितुं शक्या धर्मव्यापारकारिणः॥ न तेषां भिद्यते वृत्तं यत्पुरा साधुभिः कृतं॥ नेंतत्रा
सिनो न चपला न रौद्राः सत्पथे स्थिताः॥ ते सेव्याः साधुभिर्नित्यं येष्वहिंसा प्रतिष्ठिता॥ कामक्रोधव्यपेता ये निर्म
मा निरहंकृताः॥ सुव्रताः स्थिरमर्यादास्तानुपास्व च पृच्छ च॥ न धनार्थं यशोर्थं वा धर्मस्तेषां युधिष्ठिर॥ अवश्यं
कार्य इत्येव शरीरस्य क्रियास्तथा॥ न भयं क्रोधचापल्ये न शोकस्तेषु विद्यते॥ न धर्मध्वजिनश्चैव न गुह्यं कंचिदा
स्थिताः॥ येष्वलोभस्तथामोहो ये च सत्यार्जवे स्थिताः॥ तेषु कौंतेय रज्येथा येषां न भ्रश्यते पुनः॥ येन हृष्यं

नेचाप

४१

तिलोभकेषु नाल्लोभेषु न्यथंति च ।। निर्ममो निरहंकारः सत्वस्थः समदर्शिनः ।। लाभालाभौ सुखदुःखे च तात प्रिया-
प्रिये मरणं जीवितं च ।। समानि येषां स्थिरविक्रमाणां बुभुत्सतां सत्वपथे स्थितानां ।। धर्मप्रियांस्तान्सुमहानु-
भावान् दांतोप्रमत्तश्च समर्चयेथाः ।। दैवान्सर्वे गुणवंतो भवंति शुभाशुभे वाक्प्रलापास्तथान्ये ।। रंगितो आप-
द्धर्मेषु ।। ।।युधिष्ठिरः।। ।।अनर्थानामधिष्ठानमुक्तो लोभः पितामह ।। अज्ञानमपि वै तात श्रोतुमिच्छामि
तत्वतः ।। ।।भीष्मः।। ।।करोति पापं योज्ञानान्नात्मनो वेत्ति च क्षयं ।। प्रद्वेष्टि साधुवृत्तांश्च स लोकस्येति वाच्यतां ।।
शां६ अज्ञानान्निरयं याति तथाज्ञानेन दुर्गतिं ।। अज्ञानात्क्लेशमाप्नोति तथापत्सु निमज्जति ।। ।।युधिष्ठिरः।। ।।अज्ञा-
नस्य प्रवृत्तिं च स्थानं वृद्धिक्षयोदयौ मूलं योगं गतिं कालं कारणं हेतुमेव च ।। श्रोतुमिच्छामि तत्वेन यथावदिह पा-
र्थिव ।। अज्ञानप्रसवं हीदं यद्दुःखमुपलभ्यते ।। ।।भीष्मउ।। ।।रागो द्वेषस्तथा मोहो हर्षशोकोभिमानिता ।।
कामक्रोधश्च दर्पश्च तंद्रा चालस्यमेव च ।। इच्छा द्वेषस्तथा तापः परवृद्ध्युपतापिता ।। अज्ञानमेतन्निर्दिष्टं
पापानां चैव याः क्रियाः ।। एतस्य चाप्रवृत्तेश्च वृद्ध्यादीन्यांश्च पृच्छसि ।। विस्तरेण महाराज श्रृणु तच्च विशेषतः ।। उ-
भावेतो समफलो समदोषौ च भारत ।। अज्ञानं चातिलोभश्चाप्येकं जानीहि पार्थिव ।। लोभप्रभवमज्ञानं वृ-

६

आ०
५२

हंमत्यः प्रवर्द्धते॥ स्थाने स्थानं क्षये क्षीणमुपैति विविधां गतिं॥ मूलं लोभस्य मोहो वै कालात्मगतिरेव च॥
छिन्ने भिन्ने तथा लोभे कारणं काल एव च॥ तस्याज्ञानाद्धि लोभो हि लोभाद्ज्ञानमेव च॥ सर्वलदोषास्तथा लो-
भात्तस्माल्लोभं विवर्जयेत्॥ जनको युवनाश्वश्च वृषादर्भिः प्रसेनजित्॥ लोभक्षयाद्दिवं प्राप्तास्तथैवान्ये जना-
धिपाः॥ प्रत्यक्षं तु कुरुश्रेष्ठ त्यज लोभमिहात्मना॥ त्यक्त्वा लोभं सुखं लोके प्रेत्य चानुचरिष्यसि॥ ॥शांतोआ-
पद्धर्मे॥ ॥युधिष्ठिरः॥ ॥स्वाध्याये कृतयत्नस्य नरस्य च पितामह॥ धर्मकामस्य धर्मात्मन् किं नु श्रेय इहो-
च्यते॥ बहुधा दर्शने लोके श्रेयो यदिह मन्यसे॥ अस्मिन्लोके परे चैव तन्मे ब्रूहि पितामह॥ महानयं धर्मपथो
बहुशाखाश्च भारत॥ किंचिदेवेह धर्माणामनुष्ठेयतमं मतं॥ धर्मस्य महतो राजन्बहुशाखस्य यत्नतः॥ य-
न्मूलं परमं तात तत्सर्वं ब्रूहि तत्वतः॥ ॥भीष्मः॥ ॥हंत ते कथयिष्यामि येन श्रेयो ह्यवाप्स्यसि॥ पीत्वामृतमि-
व प्राज्ञो ज्ञानतृप्तो भविष्यसि॥ दमस्य विधयो नैके ये वै प्रोक्ता महर्षिभिः॥ स्वस्वविज्ञानमाश्रित्य दमन्ते-
षां परायणं॥ दमं निश्रेयसं प्राहुर्वृद्धा निश्चयदर्शिनः॥ ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः॥ दमा-
त्तस्य क्रियासिद्धिर्यथावदुपलभ्यते॥ दमो दानं तथा यज्ञानधीतं चातिवर्तते॥ दमस्तेजो वर्द्धयति पवित्रं

धर्म०

५०६

२२
५२

दा०

धि

च दमः परं॥ विपाप्मा तेजसा युक्तः पुरुषो विंदते महत्॥ दमेन सदृशं धर्मं नान्यं लोकेषु शुश्रुम॥ दमो हि परमो
लोके प्रशस्तः सर्वधर्मिणां॥ प्रेत्य चात्र मनुष्येंद्र परमं विंदते सुखं॥ दमेन हि समायुक्तो महांतं धर्ममश्नुते॥ सु
खं दांतः प्रस्वपिति सुखं च प्रतिबुध्यते॥ सुखं पर्येति लोकांश्च मनश्चास्य प्रसीदति॥ अदांतः पुरुषः क्लेशमभी
क्ष्णं प्रतिपद्यते॥ अनर्थांश्च बहूनन्यान्प्रसृजत्यात्मदोषजान्॥ आश्रमेषु चतुर्ष्वाहुर्दममेवोत्तमं व्रतं॥ तस्य लिं
गानि वक्ष्यामि येषां समुदयो दमः॥ क्षमा धृतिरहिंसा च समता सत्यमार्जवं॥ इंद्रियाभिजयो दाक्ष्यं मार्द
वं ह्रीरचापलं॥ अकार्पण्यमसंरंभः संतोषः प्रियवादिता॥ अविहिंसानसूया चाप्येषां समुदयो दमः॥ गु
रुपूजा च कौरव्य दया भूतेष्वपैशुनं॥ जनवादं मृषावादं स्तुतिनिंदाविवर्जनं॥ कामं क्रोधं च लोभं च दंभं स्तंभं वि
कत्थनं॥ रोषमीर्ष्यावमानं च नैव दांतो निषेवते॥ अनिंदितो ह्यकामात्मा नाल्पेष्वर्थानसूयकः॥ समुद्रकल्पः
स नरो कथंचन न दर्यते॥ अहं त्वयि मम त्वं च मयि ते तेषु तथाप्यहं॥ पूर्वसंबंधिसंयोगं नैतद्दांतो निषेवते॥ स
र्वा ग्राम्यास्तथारण्या याश्च लोके प्रवृत्तयः॥ निंदां चैव प्रशंसां च यो नाश्रयति मुच्यते॥ मैत्रोऽथ शीलसंपन्नः
प्रसन्नात्मात्मविच्च यः॥ मुक्तस्य विविधैः संगैःस्तस्य प्रेत्य फलं महत्॥ सुवृत्तः शीलसंपन्नः प्रसन्नात्मा

८५

भा०

४२

मेव हि बुधः॥ प्राप्येह लोके सत्कारं सुगतिं प्रतिपद्यते॥ कर्म यच्छुभमेवेह सद्भिराचरितं च यत्॥ तदेवं ज्ञानयुक्त
स्य मुनेर्वर्त्म न हीयते॥ निष्क्रम्य वनमास्थाय ज्ञानयुक्तो जितेंद्रियः॥ कालाकांक्षी चरत्येवं ब्रह्मभूयाय कल्पते॥ अ
भयं यस्य भूतेभ्यो भूतानामभयं यतः॥ तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन॥ अवाचिनोति कर्माणि न
च संप्रचिनोति ह॥ समः सर्वेषु भूतेषु मैत्रायणगतिश्चरेत्॥ शकुनीनामिवाकाशे जले वारिचरस्य वा॥ यथा
गतिर्न दृश्येत तथा तस्य न संशयः॥ गृहानुत्सृज्य यो राजन्मोक्षमेवाभिपद्यते॥ लोकास्तेजोमयास्तस्य कल्पंते
शाश्वतीः समाः॥ संन्यस्य सर्वकर्माणि संन्यस्य विधिवत्तपः॥ संन्यस्य विविधा विद्याः सर्वं संन्यस्य चैव ह॥
काले शुचिरनावृतः प्रसन्नात्मात्मविच्छुचिः॥ प्राप्येह लोके सत्कारं स्वर्गं समभिपद्यते॥ यच्चपैतामहं स्था
दृमे नं ब्रह्मराशिसमुद्भवं॥ गुहायां पिहितं नित्यं तद्दमेनाभिगम्यते॥ ज्ञानारामस्य बुद्धस्य सर्वभूताविरोधि भरा४
नः॥ नावृत्तिभयमस्तीति परलोकभयं कुतः॥ एक एव दमे दोषो द्वितीयो नोपपद्यते॥ यदेनं क्षमया युक्तमशक्तं
मन्यते जनः॥ एतस्य सुमहाप्राज्ञ दोषस्यास्तु महागुणः॥ क्षमया विपुला लोकाः सुलभा हि ष्णुना॥ दांतस्य
किमरण्येन तथा दांतस्य भारत॥ यत्रैव निवसेद्दांतस्तदरण्यं स चाश्रमः॥ ॥वैशं॥ ॥एतद्भीष्मस्य व ४२

हिसं २

तत्य फल त्री

चनं श्रुत्वा राजा युधिष्ठिरः।। अमृतेनेव संतप्तः प्रहृष्टः समपद्यत।। पुनश्च परिपप्रछ भीष्मं धर्मभृतां वरं।। ततः प्री
तः स चोवाच तस्मै सर्वं कुरूद्वह।। ।। शांतौ आपद्धर्मे ।। ।।भीष्मः।। ।।सर्वमेतत्तपोमूलं कवयः परिचक्षते।। न
ह्यतप्तं तपा मूढाः क्रियाफलमवाप्नुते।। प्रजापतिरिदं सर्वं तपसैवासृजत्प्रभुः।। तथैव वेदानृषयस्तपसा प्र
तिपेदिरे।। तपसैव ससर्जान्नं फलं मूलानि यानि वा।। त्रींल्लोकांस्तपसा सिद्धाः पश्यंति सुसमाहिताः।। औषधा
न्यगदादीनि क्रियाश्च विविधास्तथा।। तपसैव हि सिध्यंति तपोमूलं हि साधनं।। यद्दुरापं भव किंचित्सर्वं त
पसो भवेत्।। ऐश्वर्यमृषयः प्राप्तास्तपसैव न संशयः।। सुरापी संमतादायी भ्रूणहा गुरुतल्पगः।। तपसैव सु
तप्तेन नरः पापाद्विमुच्यते।। तपसो बहुरूपस्य तैस्तैर्द्वारैः प्रवर्ततः।। निवृत्त्या वर्तमानस्य तपो नानशनात्परं।।
अहिंसा सत्यवचनं दानमिंद्रियनिग्रहः।। एतेभ्यो हि महाराज तपो नानशनात्परं।। न दुःकरतरं दानान्ना
ति मातृसमाश्रमः।। त्रैविधेभ्यः परं नास्ति सन्न्यासः परमं तपः।। इंद्रियाणीह रक्षंति स्वर्गधर्माभिगुप्तये।।
तस्मादर्थे च कामे च तपो नानशनात्परं।। ऋषयः पितरो देवा मनुष्या मृगपक्षिणः।। यानि चान्यानि भूतानि स्था
वराणि चराणि च।। तपःपरायणाः सर्वे सिध्यंति तपसा च ते।। इत्येवं तपसा देवा महत्त्वं प्रतिपेदिरे।। इमानी

तत्त

आ०
४४

ष्टविस्मातानि फलानि तपसः सदा॥ तपसा शक्यते प्राप्तुं देवत्वमपि निश्चयात्॥ ॥ शांतौ आपद्धर्मे॥ ॥युधिष्ठि
रः॥ ॥सत्यं धर्मं प्रशंसंति विप्रर्षि पितृदेवताः॥ सत्यमिछाम्यहं श्रोतुं तन्मे ब्रूहि पितामह॥ सत्यं किंलक्षणं राजं
न् कथं वा तदवाप्यते॥ सत्यं प्राप्य भवेत्किं च कथं चैव तदुच्यतां॥ ॥भीष्मः॥ ॥ चातुर्वर्ण्यस्य धर्माणां संकरो न प्र
शस्यते॥ अविकारितमं सत्यं सर्ववर्णेषु भारत॥ सत्यं सत्सु सदा धर्मः सत्यं धर्मः सनातनः॥ सत्यमेव नमस्ये
त सत्यं हि परमा गतिः॥ सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनं॥ सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितं॥
आचारानिह सत्यस्य यथावदनुपूर्वशः॥ लक्षणं च प्रवक्ष्यामि सत्यस्येह यथाक्रमं॥ प्राप्यते च यथा सत्यं त
च्च श्रोतुमिहार्हसि॥ सत्यं त्रयोदशविधं सर्वलोकेषु भारत॥ सत्यं च समता चैव दमश्चैव न संशयः॥ अमात्सर्यं
क्षमा चैव ह्रीस्तितिक्षानसूयता॥ त्यागो ध्यानमथार्यत्वं धृतिश्च सततं दया॥ अहिंसा चैव राजेंद्र सत्याकारास्त्र
यो दश॥ सत्यं नामाव्ययं नित्यमविकारि तथैव च॥ सर्वधर्माविरुद्धं न योगेनैतदवाप्यते॥ आत्मनिष्टे तथा
निष्टे रिपौ च समता तथा॥ इच्छाद्वेषक्षयं प्राप्य कामक्रोधक्षयं तथा॥ दमो नान्यःस्पृहा नित्यं गांभीर्यं
धैर्यमेव च॥ अभयं क्रोधशमनं ज्ञानेनैतदवाप्यते॥ अमात्सर्यं बुधाः प्राहुर्दाने धर्मे च संयमाः॥ अवस्थि

द३

४४

त॰

ते च नित्यं च सत्येनामत्सनी भवेत् ॥ अक्षमायाः क्षमायाश्च प्रियाणीहाप्रियाणि च ॥ क्षमते संमतः साधुः
साध्वाप्नोति च सत्यवाक् ॥ कल्याणं कुरुते बाढं धीमान्न ग्लायते क्वचित् ॥ प्रशांतवाङ्मना नित्यं ह्रीस्तु धर्मा
दवाप्यते ॥ धर्मार्थहेतोः क्षमते तितिक्षा क्षांतिरुच्यते ॥ लोकसंग्रहणार्थं वै सा तु धैर्येण लभ्यते ॥ त्यागः स्ने
हस्य यस्त्यागो विषयाणां तथैव च ॥ रागद्वेषप्रहीणस्य त्यागो भवति नान्यथा ॥ आर्यता नाम भूतानां यः करो
ति प्रयत्नतः ॥ शुभं कर्म निराकारो वीतरागस्तथैव च ॥ धृतिर्नाम सुखे दुःखे यथा नाप्नोति विक्रियां ॥ तां भजेत
सदा प्राज्ञो य इच्छेद्भूतिमात्मनः ॥ सर्वथा क्षमिणा भाव्यं तथा सत्यपरेण च ॥ वीतहर्षभयक्रोधो धृतिमाप्नोति
पंडितः ॥ अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ॥ अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ एते त्रयोदशा
काराः पृथक् सत्यैकलक्षणाः ॥ भजंते सत्यमेवेह बृंहयंते च भारत ॥ नांतः शक्यो गुणानां व वक्तुं सत्यस्य पार्थि
वः ॥ अतः सत्यं प्रशंसंति विप्राः सपितृदेवताः ॥ नास्ति सत्यात्परो धर्मो नानृतात्पातकं परं ॥ श्रुतिर्हि सत्यं धर्मस्य
सत्याः तस्मात्सत्यं न लोपयेत् ॥ उपैति सत्याद्दानं हि तथा यज्ञाः सदक्षिणाः ॥ त्रेताग्निहोत्रं वेदाश्च ये चान्ये धर्मनि
श्चयाः ॥ अश्वमेधसहस्राणि सत्यं च तुलया धृतं ॥ अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ॥ शांतौ

३ त्रयोदशैतेतिबलाः शत्रवः प्राणिनांस्मृताः ॥

आ० आपद्धर्मे ॥ ॥युधिष्ठिरः॥ ॥ यतः प्रभवति क्रोधः कामो वा भरतर्षभ ॥ शोकमोहौ विधित्सा च परासुत्वं च तहुद
४५ ॥ लोभो मात्सर्यमीर्ष्या च कुत्सासूया कृपा भयं ॥ एतत्सर्वं महाप्राज्ञ याथातथ्येन मे वद ॥ ॥भीष्मः॥ ॥लोभो
मात्सर्यमीर्ष्या च कुत्सासूया कृपा भयं ॥ उपासते महाराज समंतात्पुरुषानिह ॥ एते प्रमत्तं पुरुषमप्रमत्तास्तु
द दंति च ॥ वृकाइव विलुंपंति दृष्ट्वैव पुरुषं बलात् ॥ एभ्यः प्रवर्त्तते दुःखमेभ्यः पापं प्रवर्त्तते ॥ इत्यों मेजानीयात्स चि ४
ततं भरतर्षभ ॥ एतेषामुदयं स्थानं क्षयं च पृथिवीपते ॥ हंत ते कीर्त्तयिष्यामि क्रोधस्योत्पत्तिमादितः ॥ यथातत्वं
क्षितिपते तदिहैकमनाः शृणु ॥ लोभात्क्रोधः प्रभवति परदोषैरुदीर्यते ॥ क्षमया तिष्ठते राजन्क्षमया विनिवर्त्त
ते ॥ संकल्पाज्जायते कामः सेव्यमानो विवर्द्धते ॥ यदा प्राज्ञो विरमते तदा सद्यः प्रणश्यति ॥ परासूया क्रोधलो
भावंतरा प्रतिमुच्यते ॥ दयायाः सर्वभूतानि निर्वेशाद्विनिवर्त्तते ॥ अवद्यदर्शनादेति तत्वज्ञानाच्च धीमतां ॥
विरुद्धानीह शास्त्राणि पश्यंतीह कुरूद्वह ॥ विधित्सा जायते तत्र तत्वज्ञानान्निवर्त्तते ॥ प्रीतेः शोकः प्रभवति वियो स्या ३
गात्तस्य देहिनः ॥ यदा निरर्थकं वेत्ति तदा सद्यः प्रणश्यति ॥ परासुता क्रोधलोभावभ्यासाच्च प्रवर्त्तते ॥ दयायाः
सर्वभूतानां निर्वेदात्सा निवर्त्तते ॥ सत्यत्यागात्तु मात्सर्यमहितानां च सेवया ॥ एतत्तु क्षीयते तात साधूनामुप ४५
अज्ञानप्रभवो मोहः पापाभ्यासात्प्रवर्त्तते ॥ यदा प्राज्ञेषु रमते तदा सद्यः प्रणश्यति ॥ ३

ष्पि ३

वैशंपायन उवाच ।।

सेवनात्तु ।। कुलाज्ञानात्तथैश्वर्यान्मदो भवति देहिनां ।। एभिरेव तु विज्ञातैः स च सद्यः प्रणश्यतु ।। ईर्ष्या कामा
त्प्रभवति संहर्षाच्चैव जायते ।। इतरेषां तु सत्वानां प्रज्ञया सा प्रणश्यति ।। विभ्रमाल्लोकबाह्यानां द्वेष्यैर्वाह्यैरसंमतः ।।
कुत्सा संजायते राजन्लोकान्प्रेक्ष्याभिशाम्यति ।। इति कर्तुं न शक्ता ये बलस्थायापकारिणे ।। असूया जाय
ते तीव्रा कारुण्याद्विनिवर्तते ।। कृपणान्संततं दृष्ट्वा ततः संजायते कृपा ।। धर्मनिष्ठां यदा वेत्ति तदा शाम्यति सा
कृपा ।। अज्ञानप्रभवो लोभो भूतानां दृश्यते सदा ।। अस्थिरत्वं च भोगानां दृष्ट्वा ज्ञात्वा निवर्तते ।। एतान्येव जितान्या
हुः प्रशमाच्च त्रयोदश ।। एते हि धार्तराष्ट्राणां सर्वे दोषास्त्रयोदश ।। त्वया सत्यार्थिना नित्यं विजिताःऽज्येष्ठसेव
नात् ।। ।। शांतो आपद्धर्मे ।। ।। युधिष्ठिरः ।। ।। आनृशंस्यं विजानामि दर्शनेन सतां सदा ।। नृशंसांन विजानामि
तेषां कर्म च भारत ।। कंटकान्कूपमग्निं च वर्जयंति यथा नरा ।। तथा नृशंसकर्माणं वर्जयंति नरा नरं ।। नृशंसो
हि दहेद्व्यक्तं प्रेत्य चेह च भारत ।। तस्मात्त्वं ब्रूहि कौरव्य तस्य धर्मविनिश्चयं ।। ।। भीष्मः ।। ।। स्पृहास्यान्तर्हितां
चिवृविधित्सा चैव कर्मणां ।। आक्रोष्टा क्रुश्यते चैव वंचिता बुध्यते स च ।। दत्वाकीर्त्तिर्विशासनः क्षुद्रो नैकृतिकः श
ठः ।। असंविभागी मानी च तथा संगी विकत्थनः ।। सर्वाभिशंकी परुषो वालिशं कृपणो यथा ।। वर्गप्रशंसी सत

र्वाक्यैर
संमतैः २

ऊ२ घि वि२

तमाश्रमद्वेषसंकरी ।। हिंसाविहारः सततमधिक्रोषघृणाघृणः ।। बहूलीकी मनस्वी च लुब्धोत्यर्थं नृशंसकृत
।य एवंशीलगुणोपेतं पापमित्यवगछति ।। आत्मशीलप्रमाणेन न नैश्वसति कस्यचित् ।। परेषां यत्र दोषः स्यात्ते
हुह्यं संप्रकाशयेत् ।। समानेष्वेव दोषेषु वृत्त्यर्थमुपघातयेत् ।। तथोपकारिणं चैव मन्यते वंचितं परं ।। दत्तापि
च धनं काले संतप्स्युपकारिणे ।। भक्ष्यं पेयमथालेह्यं यच्चान्यत्साधु भोजनं ।। प्रेक्ष्यमाणेषु यो श्नीया
न्नत्रं समितितं वदेत् ।। ब्राह्मणेभ्यः प्रदायाग्रं यः सुहृद्भिः सहाश्नुते ।। स प्रेत्य लभते स्वर्गमिह चानंत्यमश्नु
ते ।। एषते भरतश्रेष्ठ नृशंसः परिकीर्तितः ।। सदा विवर्जनीयो हि पुरुषेण विजानता ।। ।।शांतौ आपद्धर्मे ।।
।। भीष्मः ।। ।। हृतार्थो यक्ष्यमाणश्च सर्ववेदांतगश्च यः ।। आचार्यपितृकार्यार्थं स्वाध्यायार्थमथापि च ।।
एते वै साधवो दृष्टा ब्राह्मणा धर्मभिक्षवः ।। निःस्वेभ्यो देयमेतेषां दानं विद्या च भारत ।। अन्यत्र दक्षिणादानं
देयं भरतसत्तम ।। अन्येभ्योपि बहिर्वेदि ना कृतार्थं विधीयते ।। सर्वरत्नानि राजा हि यथार्हं प्रतिपादयेत् ।। ब्रा
ह्मणा एव वेदाढ्या यज्वानश्च बहुदक्षिणाः ।। अन्योन्यविमलाचारास्स्वजंतेषु पातःसदा ।। यस्य त्रैवार्षिकं भक्तं
पर्याप्तं भृत्यवृत्तये ।। अधिकं चापि विद्येत स सोमं पातुमर्हति ।। यज्ञश्चेत्प्रतिरुद्धः स्यादंशेनैकेन यज्वनः ।।

द्यं

निःस्वो
निर्द्धनः ४

उक्तेभ्योन्य
त्रापि ब्राह्मणे
षु ४

अब्राह्मणेभ्यः२ अकृतान्नं३ नं नि२ क्तं

ध्एकाहपर्याप्तधान्यं ॥

यो

ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ॥ तो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोपमः ॥ कुटुंबात्तस्य तद्वित्तं यज्ञा
र्थं पार्थिवो हरेत ॥ आहरेदयनो किंचित्कामं शूद्रस्य वेश्मनः ॥ नहि यज्ञेषु शूद्रस्य किंचिदस्ति परिग्रहः ॥
यो नाहिताग्निः शतगुरयज्वा च सहस्रगुः ॥ तयोरपि कुटुंबाभ्यामाहरेदविचारयन् ॥ अदातृभ्यो हरेद्वित्तं वि
ख्याप्य नृपतिः सदा ॥ तथैवाचरंतो धर्मोन्नृपतेः स्याद्यथाखिलः ॥ तथैव सप्तमे भक्ते भक्तानि षडनश्नतः ॥
धाने ५ अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥ खलात्क्षेत्रात्तथारामाद्यतो वाप्युपपद्यते ॥ आख्यातव्यं नृपस्ये
तस्य पृच्छतोऽपृच्छतेऽपि वा ॥ न तस्मै धारयेद्दंडं राजा धर्मेण धर्मवित् ॥ क्षत्रियस्य तु बालिस्याद्ब्राह्मणः क्लिस्य
ते क्षुधा ॥ श्रुतशीले समाज्ञाय वृत्तिमस्य प्रकल्पयेत् ॥ अथैनं परिरक्षेत पिता पुत्रमिवौरसं ॥ इष्टिं वैश्वा
नरीं नित्यं निर्वपेदब्दपर्यये ॥ अनुकल्पः परो धर्मो धर्मवादैस्तु केवलं ॥ विश्वेदेवैश्च साध्यैश्च ब्राह्मणैश्च
महर्षिभिः ॥ आपत्सु मरणाद्भीतैर्विधिप्रतिनिधीकृतः ॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्त्तते ॥ न सांपरायिकं त
स्य दुर्मतेर्विद्यते फलं ॥ न ब्राह्मणो निवेदेत किंचिद्राजनि वेदवित् ॥ स्ववीर्याद्राजवीर्याच्च स्ववीर्यं बलवत्तरं ॥ तस्माद्ब्राह्मः
सहातेजो दुःसहं ब्रह्मवादिनां ॥ कर्त्ता शास्ता विधाता च ब्राह्मणो देव उच्यते ॥ तस्मिन्नाकुशलं ब्रूयान्न शुकोमीरयेद्गि ष्का १

श्च१ व२

रं॥ क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः॥ धनैर्वैश्यश्च शूद्रस्य मंत्रैर्होमैश्च वै द्विजः॥ नैव कन्या न युवतिर्नाल्पमंत्र
ज्ञो न बालिशः॥ परिवेत्ताग्निहोत्रस्य भवेन्नासंस्कृतस्तथा॥ नरकं निपतंत्येते जुह्वानाः स च यस्य ततु॥ तस्माद्वैतान
श्रा कुशलो होता स्याद्वेदपारगः॥ प्राजापत्यमदत्वाश्वमग्न्याधेयस्य दक्षिणां॥ अनाहिताग्निरिति स प्रोच्यंते यमदर्शि
भिः॥ पुण्यानि यानि कुर्वीत श्रद्दधानो जितेंद्रियः॥ अवाप्तदक्षिणैर्यज्ञैर्न यजेत कथंचन॥ प्रजाः पशूंश्च स्वर्गं च
हंति यज्ञो ह्यदक्षिणो॥ इंद्रियाण्यपि यशां कीर्तिमायुः प्राप्यव हंतीति॥ उदक्यामासते ये च द्विजाः केचिदनग्नयः॥ हो
क६ मं वा श्रोत्रियं येषां ते सर्वे पापकर्मिणः॥ उदपानोद्ग्रामे ब्राह्मणो वृषलीपतिः॥ उषित्वा द्वादशाह्मासान्शू समा६
द्रकर्मैव गच्छति॥ अभार्याशयने विप्रछूद्रं वृद्धं च वै द्विजं॥ अब्राह्मणं मन्यमानस्तृणेष्वासीत पृष्ठतः॥ तथा संशुध्य
ते राजन् शृणु चात्र वचो मम॥ यदेकरात्रेण करोति पापं कृष्णवर्णं ब्राह्मणस्सेवमानः॥ स्थानासनाभ्यां वि
हरन्व्रती सन्त्रिभिर्वर्षैः शमयेदात्मपापं॥ न नर्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन्न विवाहकाले॥ न गुर्व
र्थे नात्मनो जीवितार्थे पंचानृतान्याहुरपातकानि॥ श्रद्दधानः शुभां विद्यां हीनादपि समाप्नुयात्॥ सुवर्णमपि चामे
ध्याददीताविचारयन्॥ स्त्रीरत्नं दुष्कुलाच्चापि विषादप्यमृतं पिबेत्॥ अदूष्या हि स्त्रियो रत्नमाप इत्येव धर्मतः॥
गोब्राह्मणहितार्थं हि वर्णानां संकरेषु च॥ विरेयाग्गृह्णीत शस्त्राणि परित्राणो धर्मात्मनः॥ सुरापानं ब्रह्महत्या गु ५७

नः२ ध्रुवं स्तेन इति स्तेनं तावत्प्राप्नोति किल्बिषं

रुतल्पमथापि वा॥ अनिर्देश्यानि मन्यंते शापांतमिति धारणा॥ सुवर्णहरणं स्तेन्यं विश्वस्वं चेति पातकं॥ विहरन्मद्य
पानाच्च अगम्यागमनादपि॥ पतितैः संप्रयोगाच्च ब्राह्मणीयोनितस्तथा॥ अचिरेण महाराज पतितो वै भव
च्युत॥ संवत्सरेण पतति पतितेन सहाचरन्॥ याजनाध्यापनाद्यौनान्नतु पानासनाशनात्॥ एतानि हि ताना
न्यानि निर्देश्यानीति भारत॥ निर्देश्यानिन विधिना कालेनाव्यसनी भवेत्॥ अन्नं वीर्यंगते हीतं ब्रुवेतक
रण्यपातिते॥ त्रिषु त्वेतेषु पूर्वेषु न कुर्वीत विचारणां॥ अमात्यान्वा गुरून्वापि जह्याद्धर्मेण धार्मिणः॥ प्रायश्चि कें:५
त्तानि कुर्वाणि नैते रहंति संविदं॥ सधर्मकारी धर्मेण तपसा हंति किल्बिषं॥ अस्तेनः स्तेन इत्युक्त्वा द्विगुणं
पापमाप्नुयात्॥ त्रिभागो ब्रह्महत्यायाः कन्याप्राप्नोति दुष्यति॥ यस्तु दूषयिता तस्याः शेषं प्राप्नोति पाप्मनः॥
ग ब्राह्मणानवगूर्येह स्पृष्ट्वा गुरुतरं भवेत्॥ वर्षाणां शततं तावत्प्रतिष्ठां नाधिगच्छति॥ सहस्रं चैव वर्षाणां नि व
से३ पत्य नरकं सेवेत्॥ तस्मान्नैवावगुर्येत नैव जातु निपातयेत्॥ शोणितं यावतः पांशून् संगृह्णीयाद्द्विजक्षतात्॥
तावतीः स समा राजन्नरके परिपच्यते॥ भ्रूणहा हवमध्ये तु शुध्यते शस्त्रपाततः॥ आत्मानं जुहुयाद्वग्नौ स
मिद्धे तेन शुध्यति॥ सुरापी वारुणीमुष्णां पीत्वा पापाद्विमुच्यते॥ तया स कायि निर्दग्धे मृत्युं प्रेत्य विशुध्य
ये ना

आ०

५८

ति॥ लोकांश्च लभते विप्रो नान्यथा लभते हि सः॥ गुरुतल्पमधिष्ठाय यङ्नात्मा पापचेतनः॥ सूर्म्या कानश्र तिमां लिंग्य मत्यु

ना सो ऽभिशुध्यति॥ अथ वा शिश्नवृषणाचादायांजलिना स्वयं॥ नैरृतीं दिशमास्थाय निपतेत्सत्वजिह्मगः॥ ब्राह्म

णार्थे पि वा प्राणान्संत्यजंते न शुध्यति॥ अश्वमेधे पि वा पीष्ट्वा अथ वा गोसवेन वा॥ अग्निष्टोमेन वा सम्यगिह

प्रेत्य च पूज्यते॥ तथैव द्वादशासमासिह प्रेत्य च पूज्यते॥ तथैव द्वादशासमा कपाली ब्रह्महा भवेत्॥ ब्रह्म

चारी भवेन्नित्यं स्वकर्म ख्यापयन्मुनिः॥ एवं वा तपसा युक्तो ब्रह्महा स मुनिर्भवेत्॥ एवं तु समभिज्ञाता तामात्रैवा

भिपातयेत्॥ द्विगुणं ब्रह्महत्याया आत्रेयीनिधने भवेत्॥ सुरापो निरताहारो ब्रह्मचारी दसपाचनः॥ ऊर्ध्वं

त्रिभ्यो पि वर्षेभ्यो यजेताग्निष्टुतापरं॥ ऋषभैकसहस्र वा गां दत्वा शौचमाप्नुयात्॥ वैश्यं हत्वा तु वैश्ये द्वे ऋ

षभैकशतं च गाः॥ शूद्रं हत्वोब्दमेवैकं ऋषभं च शतं च गाः॥ श्ववराहखरान्हत्वा शौद्रमेव व्रतं चरेत्॥ मार्जा

रं चाषमांडूकौ कारकाकं व्यालं च मूषिकं॥ उक्तः पशुसमो दोषो राजञ्श्वापिनिपातनात्॥ प्रायश्चित्तान्यथान्या

नि प्रवक्ष्याम्यनुपूर्वशः॥ अन्यैश्चाप्यनुशोचेत पृथक्संवत्सरं चरेत्॥ चीपिश्रोत्रियभार्यायां पनह्वानेच द्वेस्म

ते॥ काले चतुर्थे भुंजानो ब्रह्मचारी व्रती भवेत्॥ स्थानासनाभ्यां विहरेत्तु त्रिरह्नोभ्युपयन्नपः॥ एवमेव निरा ५८

त्पे २

न्वयः १

छी भा २

केत्तीयश्चाग्नीनपविष्यति।। त्यजत्यकारणे यश्च पितरं मातरं गुरुं।। पतितः स्यात्स कौरव्य यथा धर्मेषु निश्चयः।।
ग्रा यों साच्छादनमात्रं तु दद्यादिति निदर्शनं।। भार्यायां व्यभिचारिण्यां निरुद्धायां विशेषतः।। यत्तु सः परदारेषु तदे
नां चारयेद्व्रतं।। श्रेयांसं शयनं हित्वा नान्यत्पापं नियच्छति।। श्वभिस्तां मर्दयेद्यौ संस्थानेषुं बहुविस्तरे।।पु
मांसमुन्नयेत्प्राज्ञः शयने तप्त आयसे।। आप्यादधीत दारूणि तत्र दह्येत पापकृत्।। एष दंडो महाभाग स्त्रीणां
भर्तृष्विति क्रमात्।। संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो भवेत्।। द्वितस्य त्रीणि वर्षाणि चत्वारि सहसेविभिः।।
कुनिष्टः कुचरः पंचवर्षाणि चरेद्भक्ष्यं मुनिव्रतः।। परिवित्तिः परिवेत्ता च याचैव परिविद्यते।। पापिष्ठाह स्वधर्मेण सर्वे ते
पतिताः स्मृताः।। चरेयुः सर्वएवैते वीरहा यद्व्रतं चरेत्।। चांद्रायणं चरेन्मासं कृच्छ्रं वा पापशुद्धये।। परिवेत्ता प्रय
च्छेत परिवेत्ता यतां स्नुषां।। ज्येष्ठेन त्वभ्यनुज्ञातो यवीयानप्यनंतरं।। एवं च मोक्षमाप्नोति तौ च सा चैव धर्मतः।।
अमानुषीयु गोवर्ज्यं जना दृष्टिर्न दुष्यति।। अधिष्ठातारमेतारं पशूनां पुरुषं विदुः।। परिधायोर्ध्ववाल्वं तु पात्रमा
दायमन्मयं।। चरेत्सप्तगृहान्नित्यं स्वधर्मं परिकीर्तयन्।। तत्रैव लब्धभोजी स्याद्द्वादशाहात्स शुध्यति।। चरेत्सं
वत्सरं चापि तद्व्रतं येन कृंतति।। तद्देवमानुषेष्वेवं प्रायश्चित्तमनुत्तमं।। दानं वा दानशक्तेषु सर्वमेतत्प्रकल्पयेत्।।

आ०
५९

खर

अनाक्तिकेषु गोमात्रं दानमेकं प्रचक्षते ॥ श्ववराहमनुष्याणां कुक्कुटस्य खरस्य च ॥ मांसं मूत्रं पुरीषं वा प्राश्य सं-
स्कारमर्हति ॥ ब्राह्मणस्तु सुरापस्य गंधमादाय सोमपः ॥ अपस्त्र्यहं पिबेदुष्णं त्र्यहमुष्णं जलं पिबेत् ॥ त्र्यहमुष्णं
पयः पीत्वा वायुभक्षो भवेत् त्र्यहं ॥ एवमेतत्समुद्दिष्टं प्रायश्चित्तं सनातनं ॥ ब्राह्मणस्य विशेषेण यदज्ञानेन संभवेत् ॥
॥ शांतौ आपद्धर्मे ॥ ॥ वैशंपायनः ॥ ॥ कथांतरमथासाद्य खड्गयुद्धविशारदः ॥ नकुलः शरतल्पस्थमिदमा-
ह पितामहं ॥ नकुलः ॥ ॥ धनुःप्रहरणं श्रेष्ठं मतीवात्र पितामह ॥ मतस्तु मम धर्मज्ञ खड्ग एव सुसंशितः ॥ वि-
शीर्णे कार्मुके राजन् प्रक्षीणेषु च वाजिषु ॥ खड्गेन शक्यते युद्धे साध्वात्मा परिरक्षितुं ॥ शरासनधरांश्चैव गदा-
शक्तिधरांस्तथा ॥ एकः खड्गधरो वीरः समर्थः प्रतिबाधितुं ॥ २ तन्मे संशयश्चैव कौतूहलमतीव च ॥ किंचित्
प्रहरणं श्रेष्ठं सर्वयुद्धेषु पार्थिव ॥ कथं चोत्पादितः खड्गः कस्मै चार्थाय केन च ॥ पूर्वाचार्यं च खड्गस्य प्रब्रूहि प्रपिता-
मह ॥ ॥ वैशं ॥ ॥ तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य धीमतः ॥ स तु कौशलसंयुक्तं सूक्ष्मं चित्रार्थसंमतं ॥ ततस्तस्यो-
त्तरं वाक्यं स्वरवर्णोपपादितं ॥ शिक्षयाचोपपन्नाय द्रोणशिष्याय भारत ॥ उवाच स तु धर्मज्ञो धनुर्वेदस्य पारगः ॥
शरतल्पगतो भीष्मो नकुलाय महात्मने ॥ ॥ भीष्मः ॥ ॥ तत्वं शृणुष्व माद्रेय यदेतत्परिपृच्छसि ॥ प्रबोधितो

५९

स्मिं भवता धातुमानिव पर्वतः ।। सलिलेकार्णवं तात पूर्णासर्वमभूदिदं ।। निष्प्रकंपमनाकाशमनिर्देश्यं महीत
लं ।। तमसा वृतमस्पर्शमतिगंभीरदर्शनं ।। निःशब्दं चाप्रमेयं च तत्र जज्ञे पितामहः ।। सोसृजद्वातमग्निं च भा
स्करं चापि वीर्यवान् ।। आकाशमसृजच्चोर्ध्वमधो भूमिं च नैर्ऋतिं ।। नभः सचंद्रतारं च नक्षत्राणि ग्रहांस्तथा ।। सं
वत्सरानृतून्मासान्पक्षानथ लवान्क्षणान् ।। ततः शरीरं लोकस्थं स्थापयित्वा पितामहः ।। जनयामास भग
वान्पुत्रानुत्तमतेजसः ।। मरीचिमृषिमत्रिं च पुलस्त्यं पुलहं क्रतुं ।। वसिष्ठांगिरसौ चोभौ रुद्रं च प्रभुरीश्वरं ।। मी८
प्राध प्रचेतसस्तथा दक्षः कन्याः षष्टिमजीजनत् ।। ता वैब्रह्मर्षयः सर्वाः प्रजार्थं प्रतिपेदिरे ।। ताभ्यो विश्वानि भूतानि
देवाः पितृगणास्तथा ।। गंधर्वाप्सरसश्चैव रक्षांसि विविधानि च ।। पतत्रिमृगमीनाश्च प्लवंगाश्च महोरगाः ।। म्ट
तथा पक्षिगणाः सर्वे जलस्थितिविचारिणः ।। उद्भिजाः स्वेदजाश्चैव सांडजाश्च जरायुजाः ।। जज्ञे तात जगत्सर्वं त
था स्थावरजंगमं ।। भूतसर्गमिमं कृत्वा सर्वलोकपितामहः ।। शाश्वतं देवपठितं धर्मं प्रयुयुजे ततः ।। तस्मिं धर्मे स्थि
ता देवाः सहाचार्यपुरोहिताः ।। आदित्या वसवो रुद्राः ससाध्या मरुदश्विनः ।। भृग्वंगिरसः सिद्धाः काश्यपाश्च तपोध ३ य्यं
नाः ।। वसिष्ठगोतमागस्त्यास्तथा नारदपर्वतौ ।। ऋषयो वालखिल्याश्च प्रभासाः सिकतास्तथा ।। घृतपाः सोमवा
यव्या वैखानसमरीचिपाः ।। अकृष्टाश्चैव हंसाश्च ऋषयो वाग्नियोनयः ।। वानप्रस्थाः प्रश्नयश्च स्थिता ब्रह्मानुशा

सने॥ दानवेंद्रास्त्वतिक्रम्य तत्पितामहशासनं॥ धर्मस्यापचयं चक्रुः क्रोधलोभसमन्विताः॥ हिरण्यकशि
५० पुश्चैव हिरण्याक्षो विरोचनः॥ शंबरो विप्रचित्तिश्च प्रह्लादो नमुचिर्बलिः॥ एते चान्ये च बहवः सागपादेष्वदान
वाः॥ धर्मसेतुमतिक्रम्य रेमिरे धर्मनिश्चयाः॥ सर्वे तु तुल्यजातीयास्तथा देवास्तथा वयं॥ इत्येवं धर्ममास्थायसा
ईमानाः सुरविद्विषः॥ न द्वियं नाप्यनुक्रोशं चक्रुर्भूतेषु भारत॥ अनुपायानुपक्रम्य दंडेन तुतुधुः प्रजाः॥ नज
ग्मुः संविदं ते श्च दर्पादसुरसत्तमाः॥ अथैव भगवान् ब्रह्मा ब्रह्मर्षिभिः परिस्थिताः॥ तदा हिमवतः शृंगे सुरम्ये पर्वतो कुधां ६
तारकं ५ रणे॥ शतयोजनविस्तारे मणिपल्लवयाचिते॥ तस्मिन्नगिरिवरेपुत्र पुष्पितद्रुमकानने॥ तस्योत्सविंघः श्रेष्ठो ब्रह्मा
लोकार्थसिद्धये॥ ततो वर्षसहस्रांते वितानमकरोत्प्रभुः॥ विधिना कल्पदृष्टेन यथावच्चोपपादितं॥ ऋषिभिर्यज्ञ
पटुभिर्यथावत्कर्मकर्तृभिः॥ समिद्भिः परिसंकीर्णे दीप्यमानैश्च पावकैः॥ कांचनैर्यज्ञभांडैश्च भ्राजिष्णुभिरलं
कृतं॥ वृतं देवगणैश्चैव प्रवरैर्यज्ञमंडलं॥ तथा ब्रह्मर्षिभिश्चैव सदस्यैरुपशोभितं॥ तत्र घोरतमं वृत्तमृषीणां
लेपरिप्लुतं॥ चंद्रमा विमलं व्योम यथाभ्युदिततारकं॥ विकीर्याग्निं तथाभूतमुत्थितं रूपमेतदा॥ नीलोत्पल ५०
सवर्णां संतीक्ष्णदंष्ट्रं कृशोदरं॥ प्रांशुं सुदुर्धर्षतरं तथैव ह्यमितौजसं॥ तस्मिन्नुत्पद्यमाने च प्रचचाल वसुंध
रा॥ महोर्मिकलिलावर्तश्चक्षुभे च महोदधिः॥ पेतुरुल्का महोत्पाताः शाखा श्चैं मुमुचुर्द्रुमाः॥ अप्रशांता दिशा

यवौ मयैवं

सर्वाः पवनश्चाशिवं ययौ ॥ मुहुर्मुहुश्च भूतानि प्राव्यथंत भयात्तथा ॥ ततः सुतुमुलं दृष्ट्वा तं च भूतमुपस्थितं ॥ मह
र्षिसुरगंधर्वानुवाचेदं पितामहः ॥ तथैवं चिंतितं भूतमसिनामैष वीर्यवान् ॥ रक्षणार्थाय लोकस्य वधाय च सुर
द्विषां ॥ ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः ॥ विमलस्तीक्ष्णधारश्च कालांतक इवोद्यतः ॥ ततः स शितिकंठाय
रुद्रायार्षभकेतवे ॥ ब्रह्मा ददावसिं तीक्ष्णमधर्मप्रतिवारणं ॥ ततः स भगवान्रुद्रो महर्षिगणसंस्तुतः ॥ प्रगृह्या
सिममेयात्मा रूपमन्यच्चकार ह ॥ चतुर्बाहुः स्पृशन्मूर्ध्ना भूस्थितोपि दिवाकरं ॥ ऊर्ध्वदृष्टिर्महालिंगो मुखाज्ज्वा द५
लाः समुत्सृजन् ॥ विकुर्वन्बहुधा वर्णान्नीलपांडुरलोहितान् ॥ बिभ्रत्कृष्णाजिनं वासो हेमप्रवरतारकं ॥ नेत्रं
१ले चैकं ललाटे च भास्करप्रतिमं वहन् ॥ शुशुभाते विमले द्वे नेत्रे कृष्णपिंगले ॥ ततो देवो महादेवः शूलपाणिर्भगा
क्षिहा ॥ संप्रगृह्य तु निस्त्रिंशं कालाग्निसमवर्चसं ॥ त्रिकूटं चर्म चोद्यम्य सविद्युतमिवांबुदं ॥ चचार विविधा
न्मार्गान्महाबलपराक्रमः ॥ विधुन्वंश्चासिमाकाशे तथा युद्धचिकीर्षया ॥ तस्य नादं विनदतो महाहासं च मुंचतः
॥ बभौ प्रतिभयं रूपं तदा रुद्रस्य भारत ॥ तद्रूपधारिणं रुद्रं रौद्रकर्मचिकीर्षवः ॥ निशम्य दानवाः सर्वे हृष्टाः
समभिदुद्रुवुः ॥ अश्मभिश्चाभ्यवर्षंत प्रदीप्तैश्च तथोल्मुकैः ॥ घोरैः प्रहरणैश्चान्यैः क्षुरधानैरयोमयैः ॥ ततस्त

दानवानीकं संप्रपोतारमच्युतं ॥ रुद्रं दृष्ट्वा बलोद्भूतं प्रमुमोच चचाल च ॥ चित्रशीघ्रपदत्वाच्च चरंतमसिपाणिनं ॥ तमेक
मच्युताः सर्वे सहस्रमिति मेनिरे ॥ छिंदन् भिंदन् रुजन् कृंतन् दानयन्सोयं यंन्न पि ॥ आचरन् हरिः संघेषु दावाग्निरिवक
क्षगाः ॥ असिवेगप्रभग्नास्ते छिन्नबाहूरुवक्षसः ॥ संप्रकीर्णशिरोग्रीवाश्च पेतुरुर्व्यां महाबलाः ॥ अपरे दानवा भग्नाः
खड्गपातावपीडिताः ॥ अन्योन्यमभिनंदंतो दिशः संप्रतिपेदिरे ॥ भूमिके चित्वविविशुः पर्वतानपरे तथा ॥ अपरे
त्वमुनाकाशमपरेंभः समाविशन् ॥ तस्मिन्महति संवृत्ते संभ्रमे भस्मदारुणे ॥ वक्त्रवक्त्रः प्रतिभया मांसरुधिरकर्द
माः ॥ दानवानां शरीरैश्च पतितैः शोणितोक्षितैः ॥ समाकीर्णा महावाहो सशैलैरिव किंशुकैः ॥ स तु रुद्रो दानवान् हत्वा
कृत्वा धर्मोत्तरं जगत् ॥ रौद्रं रूपं समाक्षिप्य चक्रे रूपं शिवं शिवः ॥ ततो महर्षयः सर्वे सर्वे देवगणास्तथा ॥ जयेना
द्भुतकल्पेन देवदेवं तथार्चयन् ॥ ततः स भगवान् रुद्रो दानवक्षतजोक्षितं ॥ असिं धर्मस्य गोप्तारं ददौ सत्कृत्य विष्णु
वे ॥ विष्णुर्मरीचये प्रादान्मरीचिर्भगवानपि ॥ महर्षिभ्यो ददौ खड्गमृषयो वासवाय च ॥ महेंद्रो लोकपाले
भ्यो लोकपालास्तु पुत्रक ॥ मनवे सूर्यपुत्राय ददुः खड्गं सुविस्तरं ॥ ऊचुश्चैनं तथा वाक्यं मानुषाणां त्वमीश्वरः ॥ अ
सिना धर्मगर्भेण पालयस्व प्रजा इति ॥ धर्मसेतुमतिक्रांताः सूक्ष्मस्थूलात्मकारणात् ॥ विभज्य दंडं रक्ष्यास्तु

शोणित ८

क्षितं ४

धर्मतो न यदृच्छया ॥ दुर्वाचा निग्रहो दंडो हिरण्यबहुलस्तथा ॥ गंतव्या वशानीरस्य वचो वा नल्पकानणालु ॥ असे
रेतानि रूपाणि दुर्वाराद्दीनि निर्दिशेत् ॥ असेरेव प्रमाणानि परिपाल्यव्यतिक्रमात् ॥ स विसृज्याथ पुत्रं स्वं प्रजा
नामधिपं ततः ॥ मनुः प्रजार्थरक्षार्थं क्षुपाय प्रददावसिं ॥ क्षुपाज्जग्राह चेक्ष्वाकुरिक्ष्वाकोश्च पुरूरवाः ॥ आयुश्च त
स्माल्लेभेतं नहुषश्च ततो भुवि ॥ ययातिर्नहुषाच्चापि मनुस्तस्माच्च लब्धवान् ॥ अमूर्तरयसस्तस्मात्ततो भू
मिशयो नृपः ॥ भरतश्चापि दौष्यंतिर्लेभे भूमिशयादसिं ॥ तस्माल्लेभे च धर्मज्ञो राजन्नैलबिलस्तथा ॥ तत
श्चैलबिलाल्लेभे धुंधुमारो नरेश्वरः ॥ धुंधुमाराच्च कांबोजो मुचुकुंदो ततो लभत् ॥ मुचुकुंदान्मरुत्तश्च मरुत्ताद
पि रैवतः ॥ रैवताद्युवनाश्वश्च युवनाश्वात्ततो रघुः ॥ इक्ष्वाकुवंशजास्तस्माद्धरिणाश्वः प्रतापवान् ॥ हरिणाश्वा
दसिं लेभे शुनकः शुनकादपि ॥ उशीनरो वै धर्मात्मा तस्माद्भोजाः सयादवाः ॥ यदुभ्यश्च शिबिर्लेभे शिबेश्चा
पि प्रतर्दनः ॥ प्रतर्दनादष्टकश्च पृषदश्वोऽष्टकादपि ॥ पृषदश्वाद्भरद्वाजो द्रोणस्तस्मात्कृपस्ततः ॥ ततस्त्वं भ्रात
भिः सार्द्धं परमासिमवाप्तवान् ॥ कृत्तिकास्तस्य नक्षत्रमसेरग्निश्च दैवतं ॥ रोहिणी गोत्रमस्याथ रुद्रश्च
गुरुरुत्तमः ॥ असेरष्टौ हि नामानि रहस्यानि निबोध मे ॥ पांडवेय सदा यानि कीर्त्तयन् लभते जयं ॥ असि

शां०
५२

विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मपालस्तथैव च ॥ अग्न्यः प्रहरणानां च खड्गो माद्र
वतीसुत ॥ महेश्वरप्रणीतश्च पुराणे निश्चयं गतः ॥ पृथुस्तूत्पादयामास धनुराद्यमरिंदम ॥ तेनेयं पृथि
वी पूर्वं वैन्येन परिरक्षिता ॥ तदेतदार्षं माद्रेय प्रमाणं कर्तुमर्हसि ॥ असेश्च पूजा कर्त्तव्या सदा युद्धविशारदैः ॥
इत्येष प्रथमः कल्पो व्याख्यातस्ते सुविस्तरात् ॥ असेरुत्पत्तिसंसर्गो यथावद्भरतर्षभ ॥ सर्वथैतदिदं श्रुत्वा ख
ड्गसाधनमुत्तमं ॥ लभते पुरुषः कीर्तिं प्रेत्य चानंत्यमश्नुते ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ वैशं ॥ ॥ इत्युक्तवति भीष्मे तु तू
ष्णींभूते युधिष्ठिरः ॥ पप्रच्छावसथं गत्वा भ्रातॄन् विदुरपंचमान् ॥ धर्मे चार्थे च कामे च लोकवृत्तिः समाहिता
॥ तेषां गरीयान्कतमो मध्यमः को लघुश्च कः ॥ कस्मिंश्चात्मा नियंतव्यस्त्रिवर्गविजयाय वै ॥ संहृष्टा नैष्ठि
कं वाक्यं यथावद्वक्तुमर्हथ ॥ ततोर्थगतितत्वज्ञः प्रथमं प्रतिभानवान् ॥ जगाद विदुरो वाक्यं धर्मशास्त्रम
नुस्मरन् ॥ ॥ विदुर उवाच ॥ ॥ बाहुश्रुत्यं तपस्त्यागः श्रद्धा यज्ञक्रिया क्षमा ॥ भावशुद्धिर्दया सत्यं संयमश्चा
त्मसंपदः ॥ एतदेवाभिपद्यस्व मा ते भूच्चलितं मनः ॥ एतन्मूलौ हि धर्मार्थावेतदेकपदं हि मे ॥ धर्मेणैवर्ष
यस्तीर्णा धर्मे लोकाः प्रतिष्ठिताः ॥ धर्मेण देवा विवृधुर्धर्मे चार्थः समाहितः ॥ धर्मो राजन् गुणः श्रेष्ठो ५२

विदुरः पंच
मो येषु तान्
स्वयं वष्टः ६

न्र ४

मध्यमो ह्यर्थ उच्यते ।। कामो यवीयानिति च प्रवदंति मनीषिणः ।। तस्माद्धर्मप्रधानेन भवितव्यं यतात्मना ।। त
था च सर्वभूतेषु वर्त्तितव्यं यथात्मनि ।। ।।वैशं।। ।।समाप्तवचने तस्मिन्नर्थशास्त्रविशारदः ।। पार्थो धर्मा
र्थतत्वज्ञो जगौ वाक्यं प्रचोदितः ।। ।।अर्जुनः।। ।।कर्मभूमिरियं राजन्निह वार्त्ता प्रशस्यते ।। कृषिर्वाणिज्यगोर
क्ष्यं शिल्पानि विविधानि च ।। अर्थ इत्येव सर्वेषां कर्मणामव्यतिक्रमः ।। न ऋतेर्थेन वर्त्तेते धर्मकामाविति
श्रुतिः ।। विषयै ह्यर्थवान्धर्ममाराधयितुमुत्तमं ।। कामं च चरितुं शक्तो दुःप्रापमकृतात्मभिः ।। अर्थ
स्यावयवावेतौ धर्मकामाविति श्रुतिः ।। अर्थसिद्धिविनिर्वृत्तावुभावेतौ भविष्यतः ।। उद्भूतार्थं हि पुरुषं विशि
ष्टतरयोनयः ।। ब्रह्माणमिव भूतानि सततं पर्युपासते ।। जटाजिनधरा दांताः पंकदिग्धा जितेंद्रियाः ।। मुंडानि
स्तंतवश्चापि वसंत्यर्थार्थिनः पृथक् ।। काषायवसनाश्चान्ये श्मश्रुला ह्रीनिषेविताः ।। विद्वांसश्चैव शांता
श्च मुक्ताः सर्वपरिग्रहैः ।। अर्थार्थिनः संति केचिदपरे स्वर्गकांक्षिणः ।। कुलप्रत्यागमाश्चैके स्वं स्वं ध
र्ममनुष्ठिताः ।। आस्तिका नास्तिकाश्चैव नियताः संयमे परे ।। अप्रज्ञानं तमोभूतं प्रज्ञानं तु प्रकाशितं ।।
भृत्यान्भोगैर्द्विषो दंडैर्योजयति सोर्थवान् ।। एतन्मतिमति श्रेष्ठ मतं मम यथातथं ।। अनयोस्तु निबोध

न४

तंवचनंवाक्यकंवयोः॥ ॥वैशं॥ ॥ततोधर्मार्थकुशलौमाद्रीपुत्रावनंतरं॥नकुलःसहदेवश्चवाक्यंजगदतुःप
रं॥ ॥नकुलसहदेवावूचतुः॥ ॥आसीनश्चशयानश्चविचरन्नपिवास्थिताः॥अर्थयोगंदृढंकुर्याद्योगैरु
च्चावचैरपि॥अस्मिंस्तुवैविनिर्वृत्तेदुर्लभेपरमप्रिये॥इहकामानवाप्नोतिप्रत्यक्षंनात्रसंशयः॥योर्थोधर्मे
णसंयुक्तोधर्मोयश्चार्थसंयुतः॥तद्धित्वामृतसंवादंतस्मादेतौमताविह॥अनर्थस्यनकामोस्तितथार्थोध
र्मिणःकुतः॥तस्मादुद्विजतेलोकेधर्मार्थाद्योबहिःकृतः॥तस्माद्धर्मप्रधानेनसाध्योर्थःसंयतात्मना॥विश्व
स्तेषुहिभूतेषुकल्पतेसर्वमेवहि॥धर्मंसमाचरेत्पूर्वंततोर्थंधर्मसंयुतं॥ततःकामंचरेत्पश्चात्सिद्धार्थस्य
हितत्सवं॥ ॥वैशं॥ ॥विरेमतुस्तुतद्वाक्यमुक्त्वातौवश्विनोःसुतौ॥भीमसेनस्तदावाक्यमिदंवक्तुं
प्रचक्रमे॥ ॥भीम॥ ॥नकामःकामयत्यर्थंनाकामोधर्ममिच्छति॥नाकामःकामयानोस्तितस्मात्कामो
विशिष्यते॥कामेनयुक्ताऋषयस्तपस्येवसमाहिताः॥पलाशफलमूलाशावायुभक्षाःसुसंयुताः॥वेदो
पवेदेष्वपरेयुक्ताध्यायपारगाः॥श्रद्धायज्ञक्रियायांचतपोदानंप्रतिग्रहे॥वणिजःकर्षकागोपाःकारवःशि
ल्पिकास्तथा॥देवकर्मकृतश्चैवयुक्ताःकामेनकर्मसु॥समुद्रंवाविशंत्यन्येनराःकामेनसंयुताः॥कामोहिवि वि

स्या २

विधाकामाः सर्वे कामेन संततं ।। नास्ति नासी नाभविष्यद्भूतं कामात्मकं परं ।। एतत्सारं महाराज धर्मार्थावत्र संस्थितौ ।।
नवनीतं यथा दध्नस्तथा कामोर्थधर्मतः ।। श्रेयस्तैलं च पिण्याकात् घृतं श्रेय उदश्वितः ।। श्रेयः पुष्पफलं काष्ठा २ छा
त्कामो धर्मार्थयोर्वरः ।। पुष्पितो मध्विव रसः कामसंभूयांत थास्मृतः ।। कामो धर्मार्थयोर्योनिः कामश्चाथ तदा
६४ त्मिकः ।। नाकामतो ब्राह्मणस्वाद्वतथान्ना कामतो यंदति ब्राह्मणेभ्यः ।। नाकामतो विविधा लोकचेष्टा तस्मात्का
मः प्राक्त्रिवर्गस्पृहणैः ।। सुचारुवेषाभिरलंकृताभिर्मदोत्कटाभिः प्रियदर्शनाभिः ।। रमस्व योषाभिरुपेत्य
कामं कामो हि राजन्परमो भवेन्नः ।। बुद्धिर्ममैषा परिखास्थितस्य मा भूद्विचारस्तव धर्मपुत्र ।। स्यात्सं
हितं सद्भिरफल्गुसारं समेतिवाक्यं परमं नृशंस्यं ।। धर्मार्थकामाः सममेव सेव्या यो ह्येकभक्तः स नरो
जघन्यः ।। तयोस्तु दाक्ष्यं प्रवदंति मध्यं स उत्तमो यो निरतस्त्रिवर्गे ।। प्राज्ञः सुहृच्चंदनसारलिप्तो विचित्र
माल्याभरणैरुपेतः ।। ततो वचः संग्रहविस्तरेण प्रोक्ताथवीरान्विनाम भीमः ।। ततो मुहूर्त्तादथ धर्मरा
जो वाक्यानि तेषामनुचिंत्य सम्यक् ।। उवाच वाचावितथं स्मयन्वै बहुश्रुतो धर्मभृतां वरिष्ठः ।। ।। युधिष्ठि
रः ।। ।। निःसंशयं निश्चितधर्मशास्त्राः सर्वे भवंतो विदितप्रमाणाः ।। विज्ञातुकामस्य ममेह वाक्यमुक्तं

आ०
५४

महर्षे नैष्ठिकं तच्छ्रुतं मे ॥ इदं सर्वं वचयं गदतो ममापि वाक्यं निबोधध्वमनन्यभावाः ॥ यो वै न पापे निरतो न पुण्ये
नार्थे न धर्मे मनुजो न कामे ॥ विमुक्तदोषः समलोष्ठकाचनो विमुच्यते दुःखसुखार्थसिद्धेः ॥ भूतानि जातीस्मरणा
न्वितानि जराविकारैश्च समन्वितानि ॥ भूयश्च तैस्तैः प्रतिबोधितानि मोक्षं प्रशंसंति न तं च विद्मः ॥ स्नेहे न युक्तातै स्य२
न चास्ति मुक्तिरिति स्वयंभूर्भगवानुवाच ॥ बुधाश्च निर्वाणपरा भवंति तस्मान्न कुर्यात्प्रियमप्रियं च ॥ एतत्प्र
धानं च न कामकारो यथा नियुक्तोस्मि तथा करोमि ॥ भूतानि सर्वाणि विधिर्नियुंक्ते विधिर्बलीयानिति वित्त स
र्वे ॥ न कर्मणाप्नोत्यनवाप्यमर्थं यद्भावि तद्वै भवतीति वित्तं ॥ त्रिवर्गहीनोपि हि विंदतेर्थं तस्मादहो लोकहिताय
गुह्यं ॥ ॥ वैशं० ॥ ॥ ततस्तदग्र्यं वचनं मनोगतं समस्तमाज्ञाय ततो हि हेतुमत् ॥ तदा प्रणेमुश्च जहर्षिरे
वि ते कुरुप्रवीराय च चक्रिरेंजलिं ॥ सुचारुवर्णाक्षरचारुभूषितां मनोनुगां निर्हुतवाक्यकंटकां ॥ निशम्य तां पार्थि
वाः पार्थभाषितां गिरं नरेंद्राः प्रशशांसुरेव ता ॥ स चापि तान्धर्मसुतो महामनास्तदा प्रतीतान्प्रशशंस वीर्यवान् ॥
पुनश्च पप्रच्छ सरिद्वरासुतं ततः परं धर्ममहीनचेतसं ॥ ॥ शांतौ आपद्धर्मे ॥ ॥ युधिष्ठिरः ॥ ॥ पिताम
ह महाप्राज्ञ कुरूणां प्रीतिवर्द्धन ॥ प्रश्नं किंचित्प्रवक्ष्यामि तन्मे व्याख्यातुमर्हसि ॥ कीदृशा मानवाः सौ ५४

परिणामकाले०

स्याः केः प्रीतिः परमा भवेत्॥ आयत्यां च तदात्वे च के क्षमास्तान्वदस्व मे॥ नहि तत्र धनं स्फीतं न च संबंधिबांधवाः॥
तिष्ठंति यत्र सुहृदस्तिष्ठंतीति मतिर्मम॥ दुर्लभो हि सुहृच्छ्रोता दुर्लभश्च हितः सुहृत्॥ एतद्धर्मभृतां श्रेष्ठ सर्वं व्या-
ख्यातुमर्हसि॥ ॥भीष्मः॥ ॥संधेयान्पुरुषान्राजन्नसंधेयांश्च तत्वतः॥ वदतो मे निबोध त्वं निखिलेन युधिष्ठि-
र॥ लुब्धः क्रूरस्त्यक्तधर्मा निकृतिः शठ एव च॥ क्षुद्रः पापसमाचारः सर्वशंकी तथालसः॥ दीर्घसूत्रोनृजुः कु-
ष्टो गुरुदारप्रधर्षकः॥ व्यसने यः परित्यागी दुरात्मा निरपत्रपः॥ सर्वतः पापदर्शी च नास्तिको वेदनिंदकः॥
संप्रकीर्णेंद्रियो लोके यः कामनियतेश्च नरः॥ असत्यो लोकविद्विष्टः समये चानवस्थितः॥ पिशुनोथा-
कृतप्रज्ञो मत्सरी पापनिश्चयः॥ दुःशीलो घातकात्मा च नृशंसः कितवस्तथा॥ मित्रैरुपकृतिं नित्यमिच्छते र्थं
त ४ पत्नस्य यः॥ दददैश्च यथाशक्ति यो न तुष्यति मंदधीः॥ अधैर्यमपि यो युंक्ते सदा मित्रं नरर्षभ॥ अस्थानंक्रोधनो
श्रु युक्तो यश्चाकस्माद्विरुध्यते॥ सुहृदश्चैव कल्याणानाशुं त्यजति किल्बिषी॥ अल्पेप्युपकृते मूढस्तथा-
ज्ञानात्कृतेपि च॥ कार्यसेवी च मित्रेषु मित्रद्वेषी नराधिप॥ शत्रुर्मित्रमुखो यश्च जिह्मप्रेक्षी विलोचनः॥
न रज्यति च कल्याणे यः कुर्यात्तादृशं प्रियं॥ पाने यो द्वेषपाः क्रोधी निर्घृणः पुरुषस्तथा॥ पानोपतापी मित्रध्रु-

आ०
५५

कृतथाप्राणिवधेनतः ।। कृतघ्नश्चाधमो लोके न संधेयः कदाचन ।। छिद्रान्वेषी ह्यसंधेयः संधेयानपि मे शृणु ।। कु
लीना वाक्यसंपन्ना ज्ञानविज्ञानकोविदाः ।। रूपवंतो गुणोपेतास्तथालुब्धा जितश्रमाः ।। सन्मित्राश्च कृतज्ञाश्च सर्वज्ञा
लोभवर्जिताः ।। आयुर्गणोन संपन्नाः सत्यसंधा जितेंद्रियाः ।। व्यायामशीलाः सततं कुलपुत्राः कुलोद्वहाः ।। दोषैः
प्रमुक्ताः प्रथितास्ते ग्राह्याः पार्थिव नह ।। यथाशक्ति समाचाराः संतुष्यंति हि प्रभो ।। नास्थाने क्रोधवंतश्च न चाकस्मादि
रागिणः ।। विरक्ताश्च न दुष्यंति मनसाप्यर्थकोविदाः ।। आत्मानं पीडयित्वापि सुहृत्कार्यपरायणाः ।। विरज्यंति न
मित्रेभ्यो वाससो रक्तमिवाविकं ।। क्रोधाच्च लोभमोहाभ्यां नानर्थे युवतीषु च ।। न दर्शयंति सुहृदो विश्वस्ता धर्मवत्सलाः
।। लोष्टकांचनतुल्यार्थाः सुहृत्सु दृढबुद्धयः ।। ये चरंत्यभिमानानि सृष्टार्थे च विकर्षणाः ।। संगृह्णंतः परिजनं स्वा
म्यर्थपरमाः सदा ।। ईदृशैः पुरुषश्रेष्ठैर्यः संधिं कुरुते नृपः ।। तस्य विस्तार्यते राज्यं ज्योत्स्ना ग्रहपतेरिव ।। शास्त्र
नित्या जितक्रोधा बलवंतो रणे सदा ।। जन्मशीलगुणोपेताः संधेयाः पुरुषोत्तमाः ।। ये च दोषसमायुक्ता मया प्रो
क्ता मयानघ ।। तेषामप्यधमा राजन् कृतघ्ना मित्रघातकाः ।। त्यक्तव्यास्तु दुराचाराः सर्वेषामिति निश्चयः ।।
।। ।। युधिष्ठिरः ।। ।। विस्तरेणार्थसंबंधं श्रोतुमिच्छामि तत्त्वतः ।। मित्रद्रोही कृतघ्नश्च यः प्रोक्तस्तद्वदस्व मे ।।

श्य ६
वत्सलाः ६

५५

॥ भीष्मः॥ ॥ हंत ते वर्त्तयिष्येहमितिहासं पुरातनं ॥ उदीच्यां दिशि यद्वृत्तं म्लेच्छेषु मनुजाधिप ॥ ब्राह्मणो म
ध्यदेशीयः कश्चिद्वै ब्रह्मवर्जितः॥ ग्रामं वृद्धियुतं वीक्ष्य प्राविशद्भैक्षकांक्षया ॥ तत्र दस्युर्धनियुतः सर्ववर्णविशेषवित् ॥ ब
ह्मण्यः सत्यसंधश्च दाने च निरतोभवत् ॥ तस्य क्षयमुपागम्य ततो भिक्षामयाचत ॥ प्रतिश्रयं च वासार्थं भिक्षां
चैवाथ वार्षिकीं ॥ प्रादात्तस्मै स विप्राय वस्त्रं च सदशं नवं ॥ नारीं चापि वयोपेतां भर्त्रा विरहितां तथा ॥ एतत्संप्राप्य हृष्टा
त्मा दस्योः सर्वं द्विजस्तथा ॥ तस्मिन्गृहवरे राजन्तया रेमे स गौतमः॥ कुटुंबार्थं च दास्याश्च साहाय्यं चाप्यथाकरोत् ॥ ५ष्प
वा तत्रावसत्समा वर्षाश्चैः समृद्धे शवरालये ॥ बाणवेधे परं यत्नमकरोद्वै गौतमः॥ चक्रांगान्स च नित्यं वै सर्वतो वनगोचरान् ॥ रान् ६
जघान गौतमो राजन् यथा दस्युगणास्तथा ॥ हिंसापटुर्घृणाहीनः सदा प्राणिवधे रतः॥ गौतमः संनिकर्षेण दस्युभिः सम
न् तामियात् ॥ तथा तु वसतस्तस्य दस्युग्रामे सुखं तदा ॥ अगमन्बहवो मासा निघ्नतः पक्षिणो बहून् ॥ ततः कदाचिदपरो द्विज
स्तं देशमागतः॥ जटाचीराजिनधरः स्वाध्यायपरमः शुचिः॥ विनीतो नियताहारो ब्राह्मणो वेदपारगः॥ स ब्रह्मचारी त
द्देश्यः सखा तस्यैव सुप्रियः॥ तं दस्युग्राममगमद्यत्रासौ गौतमोवसत् ॥ स तु विप्रगृहान्वेषी शूद्रान्नपरिवर्जकः॥ ग्राममदस्यु
वे २ जनाकीर्णं व्यचरत्सर्वतो दिशं ॥ ततः स गौतमगृहं प्रविशद्द्विजोत्तमः॥ गौतमश्चापि संप्राप्तस्तावन्योन्येन संगतं ॥ चक्रां
गभारस्कंधं तं धनुष्पाणिं धृतायुधं ॥ रुधिरेणावसिक्तांगं गृहद्वारमुपागतं ॥ तं दृष्ट्वा पुरुषादाभमपध्वस्तं क्षयागतं ॥

२ स्क ९

त्र विज्ञाय द्विजो ब्रीडेनिदं वाक्यमथाब्रवीत् ॥ किमिदं कुरुषे मोहात् द्विजस्त्वं हि कुलोद्वह ॥ मध्यदेशपरिज्ञातो दस्युभावं गतोऽभ
वां ॥ पूर्वान् स्मर द्विजातीं त्र प्रख्याता वेदपारगाः ॥ तेषां वंशे भिजातस्त्वमीदृशः कुलपांसनः ॥ अवबुध्यात्मनात्मानं स
त्वं शीलं श्रुतं दमं ॥ अनुक्रोशं च संस्मृत्य त्यज वासमिदं द्विज ॥ एवमुक्तः स सुहृदा तेन तत्र हितैषिणा ॥ प्रत्युवाच ततो रा
जन् विनिश्चित्य तदार्त्तवत् ॥ निर्द्धनोस्मि द्विजश्रेष्ठ नापि वेदविदप्यहं ॥ वित्तार्थमिह संप्राप्तं विद्धि मां द्विजसत्तम ॥ त्वद्द
र्शनात्तु विप्रेंद्र कृतार्थोस्म्यद्य वै द्विज ॥ आवां हि सह यास्यावः श्वो वसस्वाद्य शर्वरीं ॥ स तत्र न्यवसद्द्विजो घृणी किंचि
द् संस्पृशन् ॥ क्षुधितश्चंद्यमानो पि भोजनं नाभ्यनंदत ॥ ॥ शांतो आपद्धर्मे ॥ ॥ भीष्म उवाच ॥ ॥ तस्यां निशायां व्युष्टा
यां गते तस्मिन् द्विजोत्तमे ॥ निष्क्रम्य गौतमोगाछत्समुद्रं प्रति भारत ॥ सामुद्रिकान् स वणिजस्ततो पश्यत् स्थितान् पथि ॥
स तेन सह सार्थेन प्रययौ सागरं प्रति ॥ सौ तु सार्थो महाराज कस्मिंश्चिद्गिरिगह्वरे ॥ मत्तेन द्विरदेनाथ निह
तः प्रायशो भवत् ॥ स कथंचिद्भयात्तस्माद्द्विमुक्तो ब्राह्मणस्तदा ॥ कांदिशीकस्ततो जीवितार्थी प्रदुद्रावोत्तरां दिशं ॥ स तु सा
र्थपरिभ्रष्टस्तस्माद्देशात्तथाच्युतः ॥ एकाकी व्यचरत्तत्र वने किंपुरुषो यथा ॥ स पंथानमथासाद्य समुद्राभिसरं तदा ॥
आससाद वनं रम्यं दिव्यं पुष्पितपादपं ॥ सर्वर्तुकैराम्रवनैः पुष्पितैरुपशोभितं ॥ नंदनोद्देशसदृशं यक्षकिन्नरसे
वितं ॥ शालैस्तालैस्तमालैश्च कालागुरुवनैस्तथा ॥ चंदनस्य च मुख्यस्य पादपैरुपशोभितं ॥ गिरिप्रस्थेषु रम्येषु ते

कांदिशं
व्रजामीत्या
कुलः ४

॥२

षुतेषु सुगंधिषु ॥ रम्यं ततो द्विजश्रेष्ठास्तत्राकूजंत वै तदा ॥ मनुष्यवदनाश्चान्ये नेदुरुंडा इति विश्रुताः ॥ भूलिंगशकु
नाश्चान्ये सामुद्राः पर्वतोद्भवाः ॥ स तान्यपि मनोज्ञानि विहंगानां रुतानि वै ॥ शृण्वन्सुरमणीयानि विप्रोगछत गौतमः ॥ त
तोपश्यत्सु रम्येषु सुवर्णसिकताचिते ॥ देशे समे सुखे चित्रे स्वर्गोद्देशसमे नृप ॥ श्रियाजुष्टं समाहृक्षं न्यग्रोधं च सुमेउ
त्तं ॥ शाखाभिरनुरूपाभिर्भूषितं छत्रसंनिभं ॥ तस्य मूलं च संसिक्तं वरचंदनवारिणा ॥ दिव्यपुष्पान्वितं श्रीमत्पितामह
पितोपमं ॥ तं दृष्ट्वा गौतमः प्रीतो मुनिः कांतमनुत्तमं ॥ मेध्यं सुरगृहप्रख्यं पुष्पितैः पादपैर्वृतं ॥ तमासाद्य मुदा युक्तस्तस्या
धस्तादुपाविशत् ॥ तत्रासीनस्य कौंतेय गौतमस्य सुखः शिवः ॥ पुष्पाणि समुपस्पृश्य प्रववावनिलः शुभः ॥ ह्लादय
न्सर्वगात्राणि गौतमस्य तदानघ ॥ स तु विप्रः प्रशांतः स्पृष्टः पुण्येन वायुना ॥ सुखमासाद्य सुष्वाप भास्करश्चास्त
मभ्ययात् ॥ ततोस्तं भास्करे याते संध्याकाल उपस्थिते ॥ आजगाम स्वभवनं ब्रह्मलोकात्खगोत्तमः ॥ नाडीजंघ इति ख्या नृ स ५
तो दयितो ब्राह्मणः सखा ॥ बकराजो महाप्राज्ञः कश्यपस्यात्मसंभवः ॥ राजधर्मेति विख्यातो बभूवाप्रतिमो भुवि ॥
देवकन्यासुतः श्रीमान्विद्वान्देवसमप्रभः ॥ मृष्टाभरणसंपन्नो भूषणैरर्कसंनिभैः ॥ भूषितः सर्वगात्रेषु देवगर्भः श्रि
या ज्वलन् ॥ तमागतं खगं दृष्ट्वा गौतमो विस्मितोभवत् ॥ क्षुत्पिपासापरिश्रांतो हिंसार्थी चाप्यवैक्षत ॥ ॥ राजधर्मोवाच ॥
स्वागतं भवते विप्र दिष्ट्या प्राप्तोसि मे गृहं ॥ अस्तं च सविता यातः संध्येयं समुपस्थिता ॥ मम त्वं निलयं प्राप्तः प्रियाति

थिरनिंदितः।। त्व जितो यास्यसि प्राप्तविधिदृष्टेन कर्मणा।। ।।शांतौ आपद्धर्मे।। ।।भीष्म।। ।।गिरं तां मधुरां श्रुत्वा गौतमो विस्मि-
तस्तदा।। कौतूहलान्वितो राजन्राजधर्माणमैक्षत।। ।।राजधर्मोवाच।। ।।भोः कश्यपस्य पुत्रोहं माता दाक्षायणी च मे।।अ-
तिथिस्त्वं गुणोपेतः स्वागतं ते द्विजोत्तम।। ।।भीष्मः।। ।।तस्मै दत्वा स सत्कारं विधिदृष्टेन कर्मणा।। शालपुष्पमयीं दिव्यां बृषीं
वै समकल्पयत्।। भगीरथरथक्रांतदेशान् गंगानिषेवितान्।। ये चरंति महामीनास्तांश्च तस्याचकल्पयत्।। वह्निं चापि
सुसंदीप्तं मीनांश्चापि सुपीवरान्।। स गौतमायातिथये न्यवेदयत काश्यपिः।। भुक्तवंतं च तं विप्रं प्रीतात्मानं महातपाः।।
श्रमापनयनार्थं स पक्षाभ्यामभ्यवीजयत्।। ततो विश्रांतमासीनं गोत्रप्रश्नमपृच्छत।। सोब्रवीद्गौतमोस्मीति
ब्रह्म नान्यदुदाहरत्।। तस्मै पर्णमयं दिव्यं दिव्यपुष्पाधिवासितं।। गंधाढ्यं शयनं प्रादात्स शिश्ये तत्र वै सुखं।। अथो-
पविष्टं शयने गौतमं धर्मराट् तदा।। पप्रच्छ कश्यपो वाग्मी किमागमनकारणं।। ततोब्रवीद्गौतमस्तं दरिद्रोहं महामते।। समु-
द्रगमनाकांक्षी द्रव्यार्थमिति भारत।। तं काश्यपोब्रवीत्प्रीतो नोत्कंठां कर्तुमर्हसि।। कृतकार्यो द्विजश्रेष्ठ सद्रव्यो यास्यसे गृ-
हान्।। चतुर्विधा ह्यर्थगतिर्बृहस्पतिमतं यथा।। पारंपर्यं यथा दैवं काम्यं मैत्रमिति प्रभो।। प्रादुर्भूतोस्मि ते मित्रं सुहृत्वं
च मम त्वयि।। सोहं तथा यतिष्यामि भविष्यसि यथार्थवान्।। ततः प्रभातसमये सुखं पृष्ट्वाब्रवीदिदं।। गच्छ सौम्य पथानेन
कृतकृत्यो भविष्यसि।। इतस्त्रियोजनं गत्वा राक्षसाधिपतिर्महान्।। विरूपाक्ष इति ख्यातः सखा मम महाबलः।। तं गच्छ द्विजमु

गत

रम्यतं समतिक्रम्य प्रणोदितः॥ कामानभीप्सितांस्तुभ्यं दाता नास्त्यत्र संशयः॥ इत्युक्तः स प्रययौ राजन् गौतमो विगतक्लमः॥ फलान्य
मृतकल्पानि भक्षयन्स यथेष्टतः॥ चंदनागरुमुख्यानि त्वक्पत्राणां वनानि च॥ तस्मिन्पथि महाराज सेवमानो द्रुतं ययौ॥
ततो मेरुव्रजं नाम नगरं शैलतोरणं॥ शैलप्राकारवप्रं च शैलयंत्राकुलं तथा॥ विदितश्चाभवत्तस्य राक्षसेंद्रस्य धीमतः॥
स्त४ प्रहितः सुहृदा राजन् प्रीयमाणः प्रियातिथिः॥ ततः स्वै राक्षसेंद्रः स्वान्प्रेष्यानाह युधिष्ठिर॥ गौतमो नगरद्वाराच्छीघ्रमानीय
व१ तामिति॥ ततः पुरवरात्तस्मात्पुरुषाः श्येनं एनाः॥ गौतमेत्यभिभाषंतः पुरद्वारमुपागमन्॥ ते तमूचुर्महाराजनाज
प्रेष्यास्तदा द्विजं॥ त्वरस्व तूर्णमागच्छ राजा त्वां द्रष्टुमिच्छति। राक्षसाधिपतिर्वीरो विरूपाक्ष इति श्रुतः॥ स त्वां त्वरति वै द्रष्टुं तत्क्षिप्रं
संविधीयतां॥ ततः स प्राद्रवद्विप्रो विस्मयाद्विगतक्लमः॥ गौतमः परमर्द्धिं तां पश्यन्परमविस्मितः॥ तैरेव सहितो मा
ह्रावेश्म तूर्णमुपाद्रवत्॥ दर्शनं राक्षसेंद्रस्य कांक्ष्यमाणो द्विजस्तदा॥ ॥शांतौ आपद्धर्मे॥ ॥भीष्मः॥ ततः स विदि
तो राज्ञः प्रविश्य गृहमुत्तमं॥ पूजितो राक्षसेंद्रेण निषसादासनोत्तमे॥ पृष्टश्च गोत्रचरणं स्वाध्यायं ब्रह्मचारिकं॥ न
तत्र व्याजहारान्यद्गोत्रमात्राहृते द्विजः॥ ब्रह्मवर्चसहीनस्य स्वाध्यायोपरतस्य च॥ गोत्रमात्रविदं राजा निवासं स
मपृच्छत॥ ॥राक्षस उवाच॥ ॥क्व ते निवासः कल्याणः किंगोत्रा ब्राह्मणी च ते॥ न तत्त्वं ब्रूहि न भीः कार्या विश्वसस्व यथासु
खं॥ ॥गौतम उवाच॥ ॥मध्यदेशप्रसूतोऽहं वासो मे शबरालये॥ शूद्रा पुनर्भूर्भार्या मे सत्यमेतद्ब्रवीमि ते॥ ॥भी

६२

आ० ष्मः॥ ॥ततो राजा विममञ्शो कथं कार्यमिदं भवेत्॥ कथं वा सुकृतं मे स्यादिति बुध्या च चिंतयत्॥ अयं वै जन्मना विप्रः सुहृत्तस्य
५८ महात्मनः॥ संप्रेषितश्च तेनायं काश्यपेन ममांतिकं॥ तस्य प्रियं करिष्यामि संमामाश्रितः सदा॥ भ्राता मे बांधवश्चासौ स
खा च हृदयंगमः॥ कार्त्तिक्यामद्य भोक्तारः सहास्त्वं मे द्विजोत्तमाः॥ तत्रायमपि भोक्ता च देयमस्मै च मे धनं॥ स चाद्य दि
वसः पुण्यो ऽतिथिश्चायमद्य तः॥ संकल्पितं चैव धनं किं विचार्यमतः परं॥ ततः सहस्रं विप्राणां विदुषां समलं कृतं॥
स्नातानामनुसंप्राप्तं सुमहत्सौमवाससं॥ तानागतान् द्विजश्रेष्ठान् विरूपाक्षो विशांपते॥ यथार्थर्ह प्रतिज्ञयाह विधि
दृष्टेन कर्मणा॥ वृष्यस्तेषां युंवैतु संन्यस्ता राक्षसेंद्रस्य रा॥ सनातन॥ जमेवनकुशास्तीर्णाः ऽग्रेष्वेर्मर्चितसत्तम॥ तासु ते पूजि
ता राजा विषणा द्विजसत्तमाः॥ तिलदर्भोदर्भोदकेनाय अर्चिता विधिवद्द्विजाः॥ विश्वेदेवाः सपितरः सात्मनयः श्रोपकल्पिताः॥
विलिप्ताउध्यवंतश्च सुपचानास्तु पूजिताः॥ व्यराजंत महाराज नक्षत्रपतयो यथा॥ ततो तांबूनदीः पित्रीर्वज्ञागा विमला आ०
न्शुभाः॥ वरान्नप्रणीविप्रेभ्यः प्रादान्मधुघृतप्लुताः॥ तस्य नित्यं सदा प्राट्या भ्राध्यांच बहवो द्विजाः॥ ईप्सितं भोजनवरं
लभंते सत्कृतं सदा॥ विशेषतस्तु कार्त्तिक्यां द्विजेभ्यः संप्रयच्छति॥ शान व्याघाये रत्नानि पौर्णमास्यामिति स्मृतिः॥ सु
वर्णरजतं चैव मणीन्यच्च मौक्तिकान्॥ वस्त्राण्महाधनान्यश्चैव वैडूर्याणि नवांकवान्॥ रत्नराशीन् विनिक्षिप्य दक्षिणाये मि०
समानत॥ ततः प्राह द्विजश्रेष्ठान् विरूपाक्षो महामनाः॥ गृह्णीत रत्नान्येतानि यथोत्साहं यथेप्सितः॥ येषु येषु च भो ५८

हेषु भुक्तं वो द्विजसत्तमाः ॥ तान्येवाद्य गछध्वं स्ववेश्मानीति भारत ॥ इत्युक्तेव वने तस्मिं राक्षसेंद्रे महात्मनि ॥ यथेष्टता
नि यत्ता निर्जग्मुर्ब्राह्मणर्षभाः ॥ ततो महार्हास्ते सर्वैरलैरभ्यर्चिताः शुभैः ॥ ब्राह्मणा मृष्टवसनाः सुप्रीतास्म
त्तो मवद्र ॥ ततस्तान्राक्षसेंद्रस्तु द्विजानाह पुनर्वचः ॥ नानादेशागतान्राजन्राक्षसासे विध्यवे ॥ अद्यैकं दिवसं विप्रा सान्न्प्रातेषि ३
न चोऽस्तीति भयं कृचित् ॥ राक्षसेभ्यः प्रमोदध्वमित्युक्तो यात माचिरं ॥ ततः प्रदुद्रुवुः सर्वे विप्रासंघाः समंततः ॥ गौतमोपि
सुवर्णस्य भारमादाय सत्वरः ॥ कृच्छ्रात्समुद्वहन्भारं न्यग्रोधं समुपागमत् ॥ न्यषीदच्च परिश्रांतः क्लांतश्च क्षुधि
तश्च सः ॥ ततस्तमभ्यगाद्राजन्राजधर्मः खगोत्तमः ॥ स्वागतेनाभिनंदंश्च गौतमं मित्रवत्सलः ॥ तस्य पक्षाग्र
विक्षेपैः क्लमं व्यपनयत्खगः ॥ पूजां चाप्यकरोद्धीमान्भोजनं चाप्यकल्पयत् ॥ स भुक्तवान्स विश्रांतो गौतमो चिंतयत्त
दा ॥ हाटकस्याभिरूपस्य भारोयं सुमहान्मया ॥ गृहीतो लोभमोहाभ्यां दूरं च गमनं मम ॥ न चास्ति पथि भोक्तव्यं प्राण
संधारणं मम ॥ किं कृत्वा धारयेयं वै प्राणानित्यभ्यचिंतयत् ॥ ततस्स पथि भोक्तव्यं प्रेक्षमाणो न किंचन ॥ कृतघ्नः पुरुषव्या
घ्र मनसेदं विचिंतयत् ॥ अयं बकपतिः पार्श्वे मांसराशिः स्थितो महान् ॥ इमं हत्वा च यास्येहं समभिद्रुतं ॥ ॥शांतो गृहीर
आपद्गते ॥ ॥भीष्मः ॥ ॥अथ तत्र महार्चिष्माननलो वातसारथिः ॥ तस्याविदूरे रक्षार्थं खगेंद्रेण कृतो भवत् ॥
स चापि पार्श्वे सुष्वाप विश्वस्तो बकराट्तदा ॥ कृतघ्नस्तु स दुष्टात्मा तं जिघांसुरथाग्रतः ॥ ततो दीप्तेन लोभेन

विश्वस्तं निजघान तं ॥ निहत्य च मुदा युक्तः सोनुबंधं न दृष्टवान् ॥ स तं विपक्षरोमाणं कृत्वाग्नावपचत्तदा ॥ तं गृहीत्वा सुवर्णं च
ययौ द्रुततरं द्विजः ॥ ततोन्यस्मिन्गते चाह्नि विरूपाक्षोब्रवीत्सुतं ॥ न द्रेक्षे राजधर्माणमद्य पुत्र खगोत्तमं ॥ स पूर्वसंध्यां
ब्रह्माणं वंदितुं याति सर्वदा ॥ मां दृष्ट्वा कदाचित्स न गच्छति गृहं खगः ॥ उभे द्विरात्रि संध्ये वै नाभ्यगात्स ममालयं ॥ तस्माज्ज्ञा
स्यते भावो मम स ज्ञायतां सुहृत् ॥ स्वाध्यायेन वियुक्तो हि ब्रह्मवर्चसवर्जितः ॥ तं गतस्तत्र मे शंका हन्यात्तं स द्विजाधमः
॥ गौतमः स गतस्तत्र तेनोद्विग्नं मनो मम ॥ पुत्र शीघ्रमितो गत्वा राजधर्मनिवेशनं ॥ ज्ञायतां स विशुद्धात्मा यदि
जीवति मा चिरं ॥ स एवमुक्तस्त्वरितो रक्षोभिः सहितो ययौ ॥ न्यग्रोधं तत्र चापश्यत्कंकालं राजधर्मणः ॥ सरु
दन्नगमत्तूर्णो राक्षसेंद्रस्य धीमतः ॥ त्वरमाणः परं शक्त्या गौतमग्रहणाय वै ॥ ततो विदूरे जगृहुर्गौतमं राक्षसास्त
दा ॥ राजधर्मशरीरं च पक्षास्थिचरणोज्झितं ॥ तमादायाथ रक्षांसि द्रुतं मेरुव्रजं ययुः ॥ राज्ञे स्म दर्शयामासुः
शरीरं राजधर्मणः ॥ कृतघ्नं पुरुषं तं च गौतमं पापकारिणं ॥ रुरोद राजा तं दृष्ट्वा सामात्यः सपुरोहितः ॥ आर्तनादश्च
सुमहाञ्जज्ञे तस्य निवेशने ॥ सस्त्रीकुमारं च पुरं बभूवास्वस्थमानसं ॥ अथाब्रवीन्नृपः पुत्रं पापोयं वध्यतामिति ॥
अस्य मांसेन मे सर्वे विहरंतु यथेप्सितं ॥ पापाचारः पापकर्मा पापात्मा पापसाधनः ॥ हंतव्यो मम मतिः सर्वविद्भिरिति राक्ष
साः ॥ इत्युक्ता राक्षसेंद्रेण राक्षसा घोरविक्रमाः ॥ नैच्छंत तं भक्षयितुं पापकर्माणमित्युत ॥ दस्यूनां दीयतामेष वसा

घ्नः पुरुषाधमः ॥ इत्युक्ते महाराज राक्षसेंद्रे निशाचराः ॥ शिरोभिः प्रणताः सर्वे व्याहरन्राक्षसाधिपं ॥ न दातुम
र्हसि त्वन्नो भक्षणायास्य किल्बिषं तं ॥ एवमस्त्विति तानाह राक्षसेंद्रो निशाचरान् ॥ दस्यूनां दीयतामेष कृतघ्नोद्यैव रा
क्षसाः ॥ इत्युक्ता राक्षसास्तेन शूलपट्टिशपाणयः ॥ कृत्वा तं खंडशः कृत्वा दस्युभ्यः प्रददुस्तदा ॥ दस्यवश्चापि नेच्छंत तम
त्तुं पापकारिणं ॥ क्रव्यादा अपि राजेंद्र कृतघ्नं नोपभुंजते ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता राज
न्कृतघ्ने नास्ति निष्कृतिः ॥ मित्रद्रोही कृतघ्नश्च नृशंसश्च नराधमः ॥ क्रव्यादैः कृमिभिश्चान्यैर्न भुज्यंते हि तादृशाः ॥
॥ शांतौ आपद्धर्मे ॥ ॥ ततश्चितां बकपतेः कारयामास राक्षसः ॥ रत्नैर्गंधैश्च बहुभिर्वस्त्रैश्च समलंकृतं ॥ ततः प्रज्वा
ल्य नरपतिर्बकराजं प्रतापवान् ॥ प्रेतकार्याणि विधिवद्राक्षसेंद्रश्चकार ह ॥ तस्मिन्काले च सुरभिर्देवी दाक्षायणी
शुभा ॥ उपरिष्टात्ततस्तस्य सा बभूव पयस्विनी ॥ तस्या वक्त्राच्च्युतः फेनः क्षीरमिश्रस्तदानघ ॥ सोपतद्वै ततस्त न्र५
स्यां चितायां राजधर्मणः ॥ ततः संजीवितस्तेन बकराजस्तदानघ ॥ उत्पत्य च समीयाय विरूपाक्षं बकाधिपः ॥ ततो
भ्ययाद्देवराजो विरूपाक्षपुरं तदा ॥ प्राह चेदं विरूपाक्षं दिष्ट्या संजीवितस्त्वया ॥ श्रावयामास चेंद्रस्तं विरूपाक्षं पुरा
तनं ॥ यथा शापः पुरा दत्तो ब्रह्मणा राजधर्मणः ॥ यदा बकपती राजन्ब्रह्माणं नोपसर्पति ॥ ततो रोषादिदं प्राह खगें
द्राय पितामहः ॥ यस्मान्मूढो मम सभां नागतो सौ बकाधमः ॥ तस्माद्वधं स दुष्टात्मा न चिरात्समवाप्स्यति ॥

नु नर

तदर्थं तस्य वचनान्निहतो गौतमेन वै॥ तेनैवासिम्रतस्तिक्तश्च पुनःसंजीवितो बकः॥ राजधर्मा बकः प्राह प्रणिपत्य सु
रेंद्रं॥ यदि तेऽनुग्रहकृता मयि बुद्धिः सुरेश्वर॥ सखायं मे सुदयितं गौतमं जीवयेत्युत॥ तस्य वाक्यं समाज्ञाय वासवः पु
रुषर्षभः॥ सिक्त्वामृतेन तं विप्रं गौतमं जीवयत्तदा॥ सभांडोपस्करं राजंस्तमासाद्य बकाधिपः॥ संपरिष्वज्य सुहृदं
प्रीत्या परमया युतः॥ अथ तं पापकर्माणं राजधर्मा बकाधिपः॥ विसर्जयित्वा सधनं प्रविवेश स्वमालयं॥ यथोचितं च
स बको ययौ ब्रह्मसदस्तथा॥ ब्रह्मा चैनं महात्मानमातिथ्येनाभ्यपूजयत्॥ गौतमश्चापि संप्राप्य पुनस्तं पुरुष
र्षभ॥ संजीवयित्वा सख्यैवैतं प्रादाद्गौतमस्तदा॥ ब्रह्मा च तं महात्मानं स्वागतेनाभ्यपूजयत्॥ गौतमश्चापि संप्राप
पुनस्तं शबरालयं॥ शूद्रायां जनयामास पुत्रान्दुष्कृतकारिणः॥ शापश्च सुमहांस्तस्य दत्तः सुरगणैस्तदा॥ कु
क्षौ पुनर्भ्वाः पापोयं जनयित्वा चिरात्सुतान्॥ निरयं प्राप्स्यति महत्कृतघ्नोयमिति प्रभो॥ एतत्प्राह पुरा सर्वं
नारदो मम भारत॥ एतत्प्राह पुरा सर्वं नारदो मम भारत॥ संस्मृत्य चापि सुमहदाख्यानं भरतर्षभ॥ मयापि
भवते सर्वं यथावदनुवर्णितं॥ कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखं॥ अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः॥
मित्रद्रोहो न कर्तव्यः पुरुषेण विशेषतः॥ मित्रध्रुक् निरयं घोरमनंतं प्रतिपद्यते॥ कृतज्ञेन सदा भाव्यं मित्रकामेन
चैव ह॥ मित्राल्लभते सर्वं मित्रात्पूजां लभेत च॥ मित्राद्भोगांश्च भुंजीत मित्रेणापत्सु मुच्यते॥ सत्कारैरुत्तमैर्मित्रं प

च्ये तेन मार्गेण गच्छतो परमां गतिं॥ अजं पुराणमजरं सनातनं यदिंद्रियैरुपलभेत निश्चलैः॥ अणोरणीयान्मह
तो महत्तरं तदात्मना पश्यति मुक्त आत्मवान्॥ इदं महर्षेर्वचनं महात्मनो यथावदुक्तं मनसानुदृश्य च॥ अवेक्ष्य
चेमां परमेष्ठिसाम्यतां प्रयांति चाभूतगतिं मनीषिणः॥ ॥ शांतौ मोक्षधर्मे॥ ॥ शुक उवाच॥ ॥ यदिदं वेदवच
नं कुरु कर्म त्यजेति च॥ कां दिशं विद्यया यांति कां च गच्छंति कर्मणा॥ एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे
॥ एतच्चान्योन्यवैरूप्ये वर्त्तते प्रतिकूलतः॥ ॥ भीष्म उवाच॥ ॥ इत्युक्तः प्रत्युवाचेदं पराशरसुतस्सुतं॥ कर्मवि
द्यामयौ चैतौ व्याख्यास्यामि क्षराक्षरौ॥ यां दिशं विद्यया यांति यां तिगच्छंति कर्मणाः॥ शृणुष्वैकमनास्तात गह्वरं ह्ये
तदंतरं॥ अस्ति धर्म इति प्रोक्तं नास्तीत्यत्रैव यो वदेत्॥ तस्य पक्षस्य सदृशमिदं मम भवेदथ॥ द्वाविमावथ
पंथानौ यत्र वेदाः प्रतिष्ठिताः॥ प्रवृत्तिलक्षणो धर्मो निवृत्तो च सुभाषितः॥ कर्मणा बध्यते जंतुर्विद्यया च प्रमु
ते॥ तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः॥ कर्मणा जायते प्रेत्य मूर्त्तिमान्षोडशात्मकः॥ विद्यया जाय
ते नित्यमव्यक्तं ह्यव्ययात्मकं॥ कर्म त्वेके प्रशंसंति स्वल्पबुद्धिरता नराः॥ तेन ते देहजालानि रमयंत उपासते
॥ ये स्तु बुद्धिं परां प्राप्ता धर्मनैपुण्यदर्शिनः॥ न ते कर्म प्रशंसंति कूपं नद्यां पिबन्निव॥ कर्मणां फलमाप्नोति

सुखदुःखे समावुभौ॥ विद्ययात दृवा सो ति यत्रगत्वा न शोचति॥ तत्रगत्वा न म्रियते यत्रगत्वा न जायते॥ न पुनर्जायते
यत्र यत्रगत्वा न वर्तते॥ यत्र तद्ब्रह्म परममव्यक्तमचलं ध्रुवं॥ अव्याकृतमनायासमव्यक्तमवियोगि च॥ द्वंद्वै
र्यत्र न बाध्यंते मानसेन च कर्मणा॥ समाः सर्वत्र मैत्राश्च सर्वभूतहिते रताः॥ विद्यामयोन्यः पुरुषस्तात कर्ममयो
ऽपरः॥ विद्धि चंद्रमसं दर्शे सूक्ष्मया कलया स्थितं॥ तदेतदृषिणा प्रोक्तं विस्तरेणानुगीयते॥ नवजं शशिनं दृ
ष्ट्वा वक्रं तंतुमिवांबरे॥ एकादशविकारात्मा सा कलासंभार संभृतः॥ मूर्तिमानिति तं विद्धि तात कर्मगुणात्म
कं॥ देवो यः संश्रितस्तस्मिन्नबिंदुरिव पुष्करे॥ क्षेत्रज्ञं तं विजानीयान्नित्यं योगजितात्मकं॥ तमोरजश्च सत्वं च
विद्धि जीवगुणात्मकं॥ जीवमात्मगुणं विद्यादात्मानं परमात्मनः॥ सचेतनं जीवगुणं वदंति स चेष्टते जीवयते सर्वं॥ त
तः परं क्षेत्रविदो वदंति प्रावर्त्तयद्यो भुवनानि सप्त॥ ॥ शांतौ मोक्षधर्मे॥ ॥ शुकदेव उवाच॥ ॥ क्षरात्प्रभृति यः सर्गः सगु
णानींद्रियाणि चाबुध्यैश्वर्याभिसर्गो यं प्रधानस्यात्मनः श्रुतं॥ भूय एव तु लोके स्मिन्सद्वृत्तिं कालहेतुकीं॥ यथा संतः प्रवर्त्तंते त
दिच्छाम्यनुवर्त्तितुं॥ वेदे वचनमुक्तं तु कुरु कर्म त्यजेति च॥ कथमेतद्विजानीयां तत्त्वमाख्यातुमर्हसि॥ लोकवृत्तांततत्त्वज्ञः पूतो
हं गुरुशासनात्॥ कृत्वा बुद्धिं विमुक्तात्मा त्यक्ष्याम्यात्मानमव्ययं॥ ॥ व्यास उवाच॥ ॥ यथा वै विहिता वृत्तिपुरस्ताद्ब्रह्मणः स्व

यं॥ एषा पूर्वतरैः सद्भिराचीर्णा परमर्षिभिः॥ ब्रह्मचर्येण वै लोकाञ्जयंति परमर्षयः॥ आत्मनश्च ततः श्रेयःश्वाचिछन्मन
सात्मनि॥ वने मूलफलाशी च तप्यन्सुविपुलं तपः॥ पुण्यायतचारी च भूतानामविहिंसकः॥ विधूमे सन्नमुशले वान
प्रस्थः प्रतिश्रये तु॥ कालेप्राशं च नन्भैक्ष्यं कल्पते ब्रह्मभूयसे॥ निष्कृतिर्निर्नमस्कारः परित्यज्यशुभाशुभे॥ अरण्ये
विचरैकाकी येन केनचिदाशितः॥ ॥शुक उवाच॥ ॥यदिदं वेदवचनं लोकवादे विरुध्यते॥ प्रमाणे चाप्रमाणे च विरु
द्धे शास्त्रतः कुतः॥ इत्येतच्छ्रोतुमिच्छामि प्रमाणं तूभयं कथं॥ कर्मणामविरोधेन कथं मोक्षः प्रवर्त्तते॥ ॥भीष्म उवाच॥
इत्युक्तः प्रत्युवाचेदं गंधवत्याः सुतः सुतं॥ ऋषिस्तत्पूजयद्वाक्यं पुत्रस्यामिततेजसः॥ ॥व्यासः॥ ॥ब्रह्मचारी गृह
स्थश्च वानप्रस्थोऽथ भिक्षुकः॥ यथोक्तचारिणः सर्वे गच्छंति परमां गतिं॥ एको वाप्याश्रमानेतान्वपतिष्ठेद्यथाविधि॥
अकामद्वेषसंयुक्तः स परत्र विधीयते॥ चतुष्पादी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता॥ एतामारुह्य निःश्रेणीं ब्रह्म
लोके महीयते॥ आयुषस्तु चतुर्भागं ब्रह्मचार्यनसूयकः॥ गुरौ वा गुरुपुत्रे वा वसेद्धर्मार्थकोविदः॥ जघन्यशायी पूर्वं स्या
दुत्थाय गुरुवेश्मनि॥ यच्च शिष्येण कर्त्तव्यं कार्यं दासेन वा पुनः॥ कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत पार्श्वतः॥ किंकरः
सर्वकारी स्यात्सर्वकर्मसु कोविदः॥ कर्मातिशेषेण गुरावध्येतव्यं बुभूषता॥ दक्षिणो नापवादी स्यादाहूतो गुरुमाश्र
येत्॥ शुचिर्दक्षो गुणोपेतो ब्रूयादिष्टमिवांतरा॥ चक्षुषा गुरुमव्यग्रो निरीक्षेत जितेंद्रियः॥ नाभुक्तवति चाश्नीया

दपीत चति नो पिबेत्॥ नातिष्ठति तथासीत नाभ्युत्से प्रस्वपेत च॥ उत्तानाभ्यां च पाणिभ्यां पादावस्य मृदु स्पृशेत्॥ दक्षिणं दक्षि
णेनैव सव्यं सव्येन पीडयेत्॥ अभिवाद्य गुरुं ब्रूयादधीष्व भगवन्निति॥ इदं करिष्ये भगवन्निदं वापि कृतं मया॥ ब्रह्मंस्त
दपि कर्त्तास्मि यद्भवान्वक्ष्यते पुनः॥ इति सर्वमवज्ञाप्य निवेद्य च यथाविधि॥ कुर्यात्कृत्वा च तत्सर्वमाख्येयं गुरवे नः॥ यांस्तु प
गंधान्रसान्वापि ब्रह्मचारी न सेवते॥ सेवेत तान्समावृत्त इति धर्मेषु निश्चयः॥ ये केचिद्विस्तरेणोक्ता नियमा ब्रह्मचारि
णः॥ तान्सर्वानाचरेन्नित्यं भवेच्चानपगो गुरोः॥ स एवं गुरवे प्रीतिमुपाहृत्य यथाबलं॥ आश्रमादाश्रमेष्वेव शिष्यो वर्त्तेत कर्मणा॥
वेदव्रतोपवासेन चतुर्थे चायुषो गते॥ गुरवे दक्षिणां दत्वा समावर्त्तेद्यथाविधि॥ धर्मलब्धैर्युतो दारैरग्नीनाहृत्य सुव्रतः॥ द्विती
यमायुषो भागं गृहमेधी भवेद्व्रती॥ ॥ शांतौ मोक्षे शुकानुप्रश्ने॥ ॥ व्यासः॥ ॥ द्वितीयमायुषो भागं गृहमेधी गृहे वसेत्॥
धर्मलब्धैर्युतो दारैरग्नीनाहृत्य सुव्रतः॥ गृहस्थवृत्तयश्चैव चतस्रः कविभिः स्मृताः॥ कुशूलधान्यः प्रथमः कुंभधान्यस्त्वनं
तरं॥ अश्वस्तनोथ कापोतीमाश्रितो वृत्तिमाहरेत्॥ तेषां परः परो ज्यायान्धर्मतो लोकजित्तमः॥ षट्कर्त्ता वर्त्तयेत्येकस्त्री
भिरन्यः प्रवर्तते॥ द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रे व्यवस्थितः॥ गृहमेधिव्रतान्यत्र महांतीह प्रचक्षते॥ नात्मार्थं पाचर्दे ये
न्नं न वृथा पातयेत्पशून्॥ प्राणी वा यदि वाप्राणी संस्कारं यजुरर्हति॥ न दिवा प्रस्वपेज्जातु न पूर्वापररात्रिषु॥ न भुंजीतांत
राकाले नानृतावाह्वयेत्स्त्रियं॥ नाप्यनश्नन्गृहे विप्रो वसेत्कश्चिदपूजितः॥ तथास्यातिथयः पूज्या हव्यकव्यवहाः स

दा ।। वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः ।। स्वधर्मजीविनो दांताः क्रियावंतस्तपस्विनः ।। तेषां हव्यं च कव्यं चाप्यर्हणार्थं वि
धीयते ।। नश्वरैः संप्रयातस्य स्वधर्मसापकस्य वा ।। यः पवित्राग्निहोत्रस्य पुरोबलीककारणाः ।। संविभागोत्रभूतानां सर्वेषा
मेव शिष्यते ।। तथैवापच्यमानेभ्यः प्रदेयं गृहमेधिना ।। विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः ।। अमृतं यज्ञशेषं स्याद्भोजनं ह
विषासमं ।। भृत्यशेषं तु योऽश्नाति तमाहुर्विघसाशिनं ।। विघसं भृत्यशेषं तु यज्ञशेषं तथामृतं ।। स्वदारनिरतो दांतो दांतोत्यन
सूयुर्जितेंद्रियः ।। कृत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ।। वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबंधिबांधवैः ।। मातापितृभ्यां जामी
भिर्भ्राता पुत्रेण भार्यया ।। दुहित्रा दासवर्गेण विवादं न समाचरेत् ।। एतान्विमुच्य संवादान्सर्वपापैः प्रमुच्यते ।। एतैर्जितैस्तु ज
यति सर्वान्लोकानसंशयः ।। आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः ।। अतिथिस्त्विंद्रलोकस्य देवलोकस्य चर्त्विजः ।। जामयोऽप्स
रसां लोके वैश्वदेवे तु ज्ञातयः ।। संबंधिबांधवा दिक्षु पृथिव्यां मातृमातुलैः ।। वृद्धबालातुरकृशास्त्वाकाशे प्रभविष्णवः ।। भ्राता ज्येष्ठः समः
पित्रा भार्या पुत्रः स्वका तनुः ।। छायास्वा दासवर्गश्च दुहिता कृपणं परं ।। तस्मादेतैरधिक्षिप्तः सहेन्नित्यमसंज्वरः ।। गृहधर्मपरो विद्वा
न् धर्मशीलो जितक्लमः ।। न चार्थबहुलः कश्चिद्धर्मवान्किंचिदाचरेत् ।। गृहस्थवृत्तयस्तिस्रस्तासां निःश्रेयसं परं ।। परस्परं त
थैवाहुश्चातुराश्रम्यमेव तत् ।। यथोक्तानियमास्तेषां सर्वं कार्यं भ्रमपतां ।। कुंभधान्यैरुंछशीलैः कापोतीं चाश्रितैस्तथा ।। यस्मिंश्चै
ते वसंत्यर्हास्तद्राष्ट्रमभिवर्द्धते ।। दशपूर्वान्दशपरान्पुनाति च पितामहान् ।। गृहस्थवृत्तीश्चाप्येता वर्तयेद्यागतव्यथः ।। स च क
चपलोकानां सदृशीं प्राप्नुयाद्गतिं ।। जितेंद्रियाणामथवा गतिरेषा विधीयते ।। स्वर्गलोको गृहस्थानां प्रतिष्ठा नियतात्मनां ।। ब

ह्मणानियता योनिरेषा यस्माद्विधीयते ॥ द्वितीयं क्रमशश्चाप्य स्वर्गलोके महीयते ॥ अतःपरं परममुदारमाश्रमं तृतीयमाहुस्त्यजतां
कलेवरं ॥ वनौकसां गृहपतिनामनुत्तमंभ्र पुष्पसंक्लिष्टशरीरकारिणां ॥ ॥ मोक्षधर्मे ॥ ॥ भीष्मउवाच ॥ ॥ प्रोक्तास्ते गृहस्थवृत्ति
नं स्ते विहिता या मनीषिभिः ॥ तदनंतरमुक्तं यत्तन्निबोध युधिष्ठिर ॥ क्रमशस्त्ववधूयैतां तृतीयां वृत्तिसत्तमं ॥ योगव्रतखिन्नानां वानप्र सं
स्थाश्रमौकसां ॥ श्रूयतां पुत्र भद्रं ते सर्वलोकाश्रमात्मनां ॥ प्रेक्षापूर्वं निवृत्तानां पुण्यदेशनिवासिनां ॥ ॥ व्यासउवाच ॥ ॥ गृह
स्थस्तु यदा पश्येद्वलीपलितमात्मनः ॥ अपत्यस्यैव चापत्यं वनमेव तदाश्रयेत् ॥ तृतीयमायुषो भागं वानप्रस्थाश्रमे वसेत् ॥
तानेवाग्नीन्परिचरेद्यजमानो दिवौकसः ॥ नियतो नियताहारः षष्ठभक्तोप्रमत्तवान् ॥ तदग्निहोत्रं ता गावो यज्ञांगानि च सर्वशः त
॥ अफालकृष्टं व्रीहियवं नीवारं विघसानि च ॥ हवींषि संप्रयच्छेत मखेष्वत्रापि पंचसु ॥ वानप्रस्थाश्रमेप्येताश्चतस्रो वृत्तयः स्मृताः ॥
सद्यःप्रक्षालनाः केचित्केचिन्मासिकसंचयाः ॥ वार्षिकं संचयं केचित्केचिद्द्वादशवार्षिकं ॥ कुर्वंत्यतिथिपूजार्थं यज्ञतंत्रार्थमेव च ॥ ति
अभ्रावकाशा वर्षासु हेमंते जलसंश्रयाः ॥ ग्रीष्मे च पंचतपसः शश्वच्च मितभोजनाः ॥ भूमौ विपरिवर्तंते तिष्ठंति प्रपदैरपि ॥
स्थानाशनैर्वर्तयंति सवनेष्वभिषिंचते ॥ दंतोलूखलिकाः केचिदश्मकुट्टास्तथापरे ॥ शुक्लपक्षे पिबंत्येके यवागूं क्वथितां सकृत् ॥ कृ
ष्णपक्षे पिबंत्येके भुंजते वा यथागतं ॥ मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः ॥ वर्तयंति यथान्यायं वैखानसगतिंश्रिताः ॥ एताश्चान्या
श्च विविधा दीक्षास्तेषां मनीषिणां ॥ चतुर्थश्चौपनिषदो धर्मः साधारणः स्मृतः ॥ वानप्रस्थाद्गृहस्थाच्च ततोन्यः संप्रवर्तते ॥ अस्मि
न्नेव युगे तात विप्रैः सर्वार्थदर्शिभिः ॥ अगस्त्यः सप्तऋषयो मधुच्छंदोघमर्षणः ॥ सांकृतिः सुदिवा तंडिर्यथावासो कृतश्रमः ॥ अ ८१

हावीर्यस्तथा काव्यस्तांड्यो मेधातिथिर्बुधः॥ वलवान्कर्णनिर्वापः शून्यपालः कृतश्रमः॥ एवंधर्मीकृतवंतस्ततः स्वर्गमुपागमन्॥ तातप्र
त्यक्षधर्माणस्तथा यायावरगणाः॥ ऋषीणामुग्रतपसां धर्मनैपुण्यदर्शिनां॥ अन्ये चाप्यपरिमेयाश्च ब्राह्मणा वनमाश्रिताः॥ वैखा
नसा वालखिल्याः सैकताश्च तथा परे॥ कर्मभिस्ते निरानंदा धर्मनित्या जितेंद्रियाः॥ गताः प्रत्यक्षधर्माणस्ते सर्वे वनमाश्रिताः॥ अन
क्षत्रास्त्वनाधृष्या दृश्यंते ज्योतिषां गणाः॥ जरया परिघ्नना व्याधिना च प्रपीडिताः॥ चतुर्थे चायुषः शेषे वानप्रस्थाश्रमं त्यजेत्॥ सद्यस्का
नां निरूप्येष्टिं सर्ववेदसदक्षिणां॥ आत्मयाजी सात्मरतिरात्मक्रीडात्मसंश्रयः॥ आत्मन्यग्नीन्समारोप्य त्यक्त्वा सर्वपरिग्रहान्॥ सद्य
स्कांश्च यजेद्यज्ञान्निष्टीश्चैवेह सर्वदा॥ सदैव याजिनां यज्ञादात्मनीज्या प्रवर्त्तते॥ त्रींश्चैवाग्नीन्यजेत्सम्यक् आत्मन्येवात्ममोक्षणात्॥
प्राणेभ्यो यजुषा पंच षट् प्राश्नीयादकुत्सयन्॥ केशलोमनखान्वाप्य वानप्रस्थो मुनिस्ततः॥ आश्रमादाश्रमं पुण्यं पूतो गच्छति क
र्मभिः॥ अभयं सर्वभूतेभ्यो दत्वा सप्रव्रजेद्द्विजः॥ लोकास्तेजोमयास्तस्य प्रेत्य चानंत्यमश्नुते॥ सुशीलवृत्तो व्यपनीतकल्मषो न चेह
नामुत्र च कर्तुमीहते॥ अरोषमोहो गतसंधिविग्रहो भवेदुदासीनवदात्मविन्मुनिः॥ यमेषु चैवानुगतेषु न व्यथेत्स्वशास्त्रसूत्रा
हुतिमंत्रविक्रमः॥ भवेद्यथेष्टागतिरात्मवेदिनो न संशयो धर्मपरे जितेंद्रिये॥ अतः परं श्रेष्ठमतीवसद्गुणैरधिष्ठितं त्रीनतिवृत्त
मुत्तमं॥ चतुर्थमुक्तं परमाश्रमं शृणु प्रकीर्त्यमानं परमं परायणं॥ ॥शांतिमोक्षधर्मे॥ ॥शुक उवाच॥ ॥प्राप्य संस्कारमेताभ्या
माश्रमाभ्यां ततः परं॥ यत्कार्यं परमार्थं तु तदिहैकमनाः शृणु॥ × वर्तमानस्तथैवात्र वानप्रस्थाश्रमे यथा॥ योक्तव्यात्मा कथं शक्त्या ×
वेद्यं वै वाक्यतां परं॥ ॥व्यासः॥ × कषायं पाचयित्वाशु श्रेणिस्थानेषु च त्रिषु॥ प्रव्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमं॥ तद्भवानेवमभ्य
स्य वर्ततां श्रूयतां तथा॥ एक एव चरेद्धर्मं सिध्यर्थमसहायवान्॥ एकश्चरति यः पश्यन्न जहाति न हीयते॥ अनग्निरनिकेतश्च

ग्राममन्नार्थमाश्रयेत्॥ अश्वस्तनविधाता स्यान्मुनिर्भावसमाहितः॥ लघ्वाशी नियताहारः सकृदन्ननिषेविता॥ कपालं वृक्ष
मूलानि कुचेलमसहायता॥ उपेक्षा सर्वभूतानामेतावद्भिक्षुलक्षणं॥ यस्मिन्वाचः प्रपाश्यंति कूपे त्रस्ता द्विपा इव॥ न व
क्तारं पुनर्यांति स कैवल्याश्रमे वसेत्॥ नैव पश्येन्न शृणुयादवाच्यं जातु कस्यचित्॥ ब्राह्मणानां विशेषेण नैव ब्रूयात्कथं
चन॥ यद्ब्राह्मणस्य कुशलं तदेव सततं वदेत्॥ तूष्णीमासीत निंदायां कुर्वन्भेषज्यमात्मनः॥ येन पूर्वमिवाकाशं भवत्ये
तेन सर्वदा॥ शून्यं येन जनाकीर्णं तं देवा ब्राह्मणं विदुः॥ येन केनचिदाच्छन्नो येन केनचिदाशितः॥ यत्र क्वचन शायी च तं देवा
ब्राह्मणं विदुः॥ अहेरिव गणाद्भीतः सौहित्यान्नरकादिव॥ कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः॥ न क्रुध्येन्न प्रहृष्ये
च्च मानितोऽमानितश्च यः॥ सर्वभूतेष्वभयदस्तं देवा०॥ नाभिनंदेत मरणं नाभिनंदेत जीवितं॥ कालमेव प्रतीक्षेत निर्वेशं
न भृतको यथा॥ अनभ्याहतचित्तः स्यादनभ्याहतवाग्भवेत्॥ निर्मुक्तः सर्वपापेभ्यो निरमित्रस्य किं भयं॥ अभयं सर्वभू
तेभ्यो भूतानामभयं यतः॥ तस्य मोहाद्विमुक्तस्य भयं नास्ति कुतश्चन॥ यथा नागपदेऽन्यानि पदानि पदगामिनां॥
सर्वाण्येवापिधीयंते यदिजातानि कौंजरे। एवं सर्वमहिंसायां धर्माख्यमभिधीयते॥ अमृतः स नित्यं वसति यो हिंसां न
प्रपद्यते॥ अहिंसकः समः सत्यो धृतिमान्नियतेंद्रियः॥ शरण्यः सर्वभूतानां गतिमाप्नोत्यनुत्तमां॥ एवं प्रज्ञानतृप्तस
स्य निर्भयस्य निराशिषः॥ न मृत्युरतिगो भावः स मृत्युमधिगच्छति॥ विमुक्तं सर्वसंगेभ्यो मुनिमाकाशवत्स्थितं॥ अस्व

वा॰
मेकचरंशांतंतंदेवाब्राह्मणंविदुः॥जीवितंयस्यधर्मार्थंधर्मेस्त्यर्थमिवंच॥अहोरात्राश्चपुण्यार्थंतंदेवाब्राह्मणंविदुः॥
निराशिषमनारंभंनिर्नमस्कारमस्तुतिं॥निर्मुक्तंबंधनैःसर्वैःतंदेवाब्राह्मणंविदुः॥सर्वाणिभूतानिसुखेरमंतेसर्वा
णिदुःखस्यभृशंत्रसंते॥तेषांभयोत्पादनजातखेदःकुर्यान्नकर्माणिहिश्रद्दधानः॥दानंहिभूताभयदक्षिणायाःसर्वा
णिदानान्यधितिष्ठतीह॥तीक्ष्णांतनुंयःप्रथमंजहातिसोनंतमाप्नोत्यभयंप्रजाभ्यः॥उत्तानआस्येनहविर्जुहोतिलो
कस्यनाभिर्जगतःप्रतिष्ठा॥तस्यांगमंगानिकृताकृतंचवैश्वानरःसर्वमिदंप्रपेदे॥प्रादेशमात्रेहृदिनिस्सृतंयत्तस्मि
न्प्राणेनात्मयाजीजुहोति॥तस्याग्निहोत्रंहुतमात्मसंस्थंसर्वेषुलोकेषुसदेवकेषु॥देवंत्रिधातुंत्रिवृतंसुवर्णंये
विदुरग्र्यांपरमात्मतांच॥तेसर्वलोकेषुमहीयमानादेवाःसमर्थाश्चमृतंभवंति॥देवांश्चवेद्यंतुविधिंचकृत्स्नमथा
निरुक्तंपरमार्थतांच॥सर्वंशरीरात्मनियःप्रपेदेतस्यस्मदेवाःस्पृहयंतिनित्यं॥भूत्वावसक्तोदिविवाप्रमेयंहिर
मंड ण्मयंयोंडजंमध्ये॥पतत्रिणंपक्षिणमंतरिक्षेयोवेदभोग्यात्मनिदीप्तरश्मिं॥आवर्त्तमानमजरंविवर्त्तमानं
षण्णेमिकंद्वादशारंसुपर्णं॥यस्येदमास्योपरिपातिविश्वंतत्कालचक्रंनिहितंगुहायां॥यःसंप्रसीदंजगतःश
लो रीरंसर्वान्सकानधिगच्छतीह॥तस्मिन्हुतंतर्पयतीहदेवांस्तेवैतृप्तास्तर्पयंत्यास्यमस्य॥तेजोमयंनित्यम
जःपुराणोलोकाननंतानुभयोनुपेति॥भूतानियस्मान्नत्रसंतेकदाचित्सभूतानानत्रसतेकदाचित्॥अहिंणी

योन च गार्हते न्याद्र सवै विप्रः परमानमीक्षेत ॥ नीवीतमोहो व्यपनीतकल्मषो न चेह नामुत्र च सोनमर्छति ॥ अरोषमो
हः समलोष्टकांचनः प्रहीणकोशो गतसंधिविग्रहः ॥ अपेतनिंदास्तुतिरप्रियाप्रियः श्चरन्नुदासीनवदेश भिक्षुकः ॥ ॥
शांतौ मोक्षधर्मे ॥ ॥ व्यासः ॥ ॥ प्रकृत्यास्तु विकारा ये क्षेत्रज्ञस्तैरधिष्ठितः ॥ ते वै तन्न प्रजानंति स तु जानाति तानपि ॥ तेश्चै
वं कुरुते कार्यं मनःषष्ठैरिवेंद्रियैः ॥ सुदांतैरिव संयंता दृढैः परमवाजिभिः ॥ इंद्रियेभ्यः परं ह्यर्थाः अर्थेभ्यश्च परं मनः ॥ म
नसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरतोमृतं ॥ अमृतान्न परं किंचित्सा काष्ठा सा प
रा गतिः ॥ एव सर्वेषु भूतेषु गूढात्मा न प्रकाशते ॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ अंतरात्म निसं
लीय मनःषष्ठानि मेधया ॥ इंद्रियाणींद्रियार्थांश्च बहुचिंत्यमचिंतयन् ॥ ध्यानेनोपरमं कृत्वा विद्यासंपादितं मनः त
॥ अनीश्वरः प्रशांतात्मा ततो र्छत्यमृतं पदं ॥ इंद्रियाणां तु सर्वेषां वश्यात्मा चलितस्मृतिः ॥ आत्मनः संप्रदानेन मर्त्यो
मृत्युमुपाश्नुते ॥ आहृत्य सर्वसंकल्पान्सत्त्वे चित्तं निवेशयेत् ॥ सत्त्वे चित्तं समावेश्य ततः कालंजरो भवेत् ॥ चित्तप्र
सादेन यतिर्जहाति हि शुभाशुभं ॥ प्रसन्नात्मात्मनि स्थित्वा सुखमव्यक्तमश्नुते ॥ लक्षणं तु प्रसादस्य यथा स्वप्ने
सुखे स्वपेत् ॥ निवाते वा यथा दीपो दीप्यमानो न कंपते ॥ एवं पूर्वापरे कालेसुं जन्नात्मानमात्मनि ॥ लघ्वाहारो विशु
द्धात्मा पश्यत्यात्मानमात्मनि ॥ रहस्यं सर्ववेदानामनेतिह्यमनागमं ॥ आत्मप्रत्ययिकं शास्त्रमिदं पुत्रानुशासि

ने॥धर्माख्यानेषु सर्वेषु सत्याख्यानेषु यद्वसु॥दशेदमृक्सहस्राणि निर्मथ्यामृतमुद्धृतं॥नवनीतं यथा दध्नः का
ष्ठादग्निर्यथैव च॥ तथैव विदुषां ज्ञानं पुत्रहेतोः समुद्धृतं॥स्नातकानामिदं शास्त्रं वाच्यं पुत्रानुशासनं॥तदिदं
नप्रशांताय नादांताय तपस्विने॥नावेदविदुषे वाच्यं तथा नानुगताय च॥नासूयकायानृजवे न चानिष्टकारि
णे॥न तर्कशास्त्रदग्धाय तथैवापिशुनाय च॥श्लाघिने श्लाघनीयाय प्रशांताय तपस्विने॥इदं प्रियाय पुत्रा
य शिष्यायानुगताय च॥रहस्यं धर्मं वक्तव्यं नान्यस्मै तु कथंचन॥यद्यप्यस्य महीं दद्याद्रत्नपूर्णामिमां नरः॥
इदमेव ततः श्रेय इति मन्येत तत्ववित्॥अतो गुह्यतरार्थं तदध्यात्ममतिमानुषं॥यत्तन्महर्षिभिर्दृष्टं वेदांतेषु
च गीयते॥तत्तेहं संप्रवक्ष्यामि यन्मां त्वं परिपृच्छसि॥ यच्चैतन्मनसि वर्त्तते परं यत्र नास्ति तव संशयः क्वचित्॥श्रू
यतामध्यमहं तवाग्रतः पुत्र किं हि कथयामि ते पुनः॥ ॥शांतिमोक्षधर्मे॥ ॥शुकः॥ ॥अध्यात्मं विस्तरेणे
ह पुनरेव वदस्व मे॥यदध्यात्मं यथा चेदं भगवन्नृषिसत्तम॥ ॥व्यासः॥ ॥अध्यात्मं यदिदं तात पुरुषस्येह प
ठ्यते॥तत्तेहं वर्त्तयिष्यामि तस्य व्याख्यामिमां शृणु॥भूमिरापस्तथा ज्योतिर्वायुराकाशमेव च॥महाभूता व
नि भूतानां सागरस्योर्मयो यथा॥प्रसार्येह यथांगानि कूर्मः संहरते पुनः॥तद्वन्महांति भूतानि यवीयःसु वि
कुर्वते॥इति तन्मयमेवेदं सर्वं स्थावरजंगमं॥सर्गे च प्रलये चैव तस्मिन्निर्दिश्यते तथा॥महाभूतानि

पंचैव सर्वभूतेषु भूतकृत्॥ अकरोत्तात वैषम्यं यस्मिन्नन्यदनुपश्यति॥ ॥शुक उवाच॥ ॥अकरोद्यच्छरीरेषु कथं त
दुपलक्षयेत्॥ इंद्रियाणि गुणाः केचित्कथं तदुपलक्षये॥ ॥व्यास उवाच॥ ॥एतत्ते वर्तयिष्यामि यथावदनुपूर्व
शः॥ शृणु तत्त्वमिहैकाग्र्यो यथातत्त्वं यथा च तत्॥ शब्दः श्रोत्रं तथा खानि त्रयमाकाशसंभवं॥ प्राणश्चेष्टा तथा स्प
र्श एते वायुगुणास्त्रयः॥ रूपं चक्षुर्विपाकश्च तथा ज्योतिर्विधीयते॥ र[illegible]नं स्नेहो गुणास्त्वेते त्रयोंभसः॥ घ्रे
२ यं घ्राणं शरीरं च भूमैते गुणास्त्रयः॥ एतावानिंद्रियग्रामे व्याख्यातः पांचभौतिकः॥ वायोः स्पर्शो रसोद्भ्यश्च ज्यो
तिषो रूपमुच्यते॥ आकाशप्रभवो शब्दो गंधो भूमिगुणः स्मृतः॥ मनो बुद्धिःस्वभावश्च त्रय एते स्वयोनिजाः॥ न
गुणा नातिवर्तंते गुणेभ्यः परमा गतिः॥ यथा कूर्मइवांगानि प्रसार्य विनियच्छति॥ एवमेवेंद्रियग्रामं बुद्धिःसृष्ट्वा
नियच्छति॥ यदूर्ध्वं पादतलयोरवाङ्मूर्ध्नश्च पश्यति॥ एतस्मिन्नेव कृत्ये तु वर्तते बुद्धिरुत्तमा॥ गुणान्नेनीयते
बुद्धि बुद्धेरेवेंद्रियाण्यपि॥ मनःषष्ठानि सर्वाणि बुध्यभावे कुतो गुणाः॥ इंद्रियाणि नरे पंच षष्ठं तु मन उच्यते॥
सप्तमीं बुद्धिमेवाहुः क्षेत्रज्ञं पुनरष्टमं॥ चक्षुरालोचनायैव संशयं कुरुते मनः॥ बुद्धिरध्यवसानाय साक्षी
क्षेत्रज्ञ उच्यते॥ रजस्तमश्च सत्वं च त्रय एते स्वयोनिजाः॥ समाः सर्वेषु भूतेषु तान्गुणानुपलक्षयेत्॥ तत्र य

सीतिसंयुक्तं किंचिदात्मनि लक्षयेत्॥ प्रशांतमिव संशुद्धं सत्वं तदुपधारयेत्॥ यत्तु संतापसंयुक्तं काये मनसि
वा भवेत्॥ प्रवृत्तं रज इत्येवं तत्र चाप्युपलक्षयेत्॥ यत्तु संमोहसंयुक्तमव्यक्तविषयं भवेत्॥ अप्रतर्क्यमविज्ञेयं
तमस्तदुपधारयेत्॥ प्रहर्षः प्रीतिरानंदः स्वाम्यं स्वस्थात्मचित्तता॥ अकस्माद्यदि वा कस्माद्वर्त्तते सात्विका गुणाः
॥ अभिमानो मृषावादो लोभो मोहस्तथाक्षमा॥ लिंगानि रजसस्तानि वर्त्तंते हेत्वहेतुतः॥ तथा मोहः प्रमा
दश्च निद्रा तंद्री प्रबोधिता॥ कथंचिदतिवर्त्तते विज्ञेयास्तामसा गुणाः॥ ॥शांतौ मोक्षधर्मे॥ ॥व्यास उवाच॥
मनः प्रसृजते भावं बुद्धिरध्यवसायिनी॥ हृदयं प्रियाप्रिये वेद त्रिविधा कर्मचोदना॥ इंद्रियेभ्यः परा ह्यर्था अर्थे
भ्यः परमं मनः॥ मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ बुद्धिरात्मा मनुष्यस्य बुद्धिरेवात्मनात्मनि॥ यदा वि
कुरुते भावं तदा भवति सा मनः॥ इंद्रियाणां पृथग्भावाद्बुद्धिर्विक्रियते ततः॥ शृण्वती भवति श्रोत्रं स्पृशती स्प
र्श उच्यते॥ पश्यती भवते दृष्टी रसती रसनोच्यते॥ जिघ्रती भवति घ्राणं बुद्धिर्विक्रियते पृथक्॥ इंद्रियाणि तु
तान्याहुस्तेष्वदृश्योधितिष्ठति॥ तिष्ठती पुरुषे बुद्धिस्त्रिषु भावेषु वर्त्तते॥ कदाचिल्लभते प्रीतिः कदाचिदनुशो
चति॥ न सुखेन न दुःखेन कदाचिदिह युज्यते॥ सेयं भावात्मिका भावांस्त्रीनेतान्नातिवर्त्तते॥ सरितां सागरो भ

त्मिहावेक्षामि शाम्निवाइ॥ यदा प्रार्थयते किंचित्तदा भवति सा मनः॥ अधिष्ठानानि वै बुध्या पृथगेतानि संस्मरेत्॥ इं
द्रियाण्येव मेध्यानि विजेतव्यानि कृत्स्नशः॥ सर्वाण्येवानुपूर्वेण यदा नानुविधीयते॥ आविर्भागबाता वुद्धिर्भाविस
न्निवर्त्तते॥ ये चैव भावा वर्त्तंते सर्व एष्वेव ते त्रिषु॥ अन्वर्थाः संप्रवर्त्तंते रथनेमिमराइव॥ प्रदीपार्थं मनः कुर्यादिंद्रि
यैर्वुद्धिसत्तमैः॥ निश्चरद्भिर्यथायोगमुदासीनैर्यदृछया॥ एवंस्वभावमेवेदमिति विद्वान्न मुह्यति॥ अशोचन्न
प्रहृष्यंश्च हि नित्यं विगतमत्सरः॥ नह्यात्मा शक्यते द्रष्टुमिंद्रियैः कामगोचरैः॥ प्रवर्त्तमानैरनयैर्दुर्द्धरैरकृतात्म
भिः॥ तेषां तु मनसा रश्मीन्यदा सम्यङ्नियछति॥ यदा प्रकाशतेस्यात्मा दीपदीप्ता यथाकृतिः॥ सर्वेषामेव भू
तानां तमस्युपगते तथा॥ प्रकाशं लभते सर्वे इति येदमुपधार्यतां॥ यथा वारिचरः पक्षी न लिप्यति जले चरन्॥
विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते॥ एवमेव कृतप्रज्ञो न दोषैर्विषयांश्चरन्॥ असज्जमानः सवीपि
कथंचन न लिप्यते॥ त्यक्त्वा पूर्वकृतं कर्म रतिर्यस्य सदात्मनि॥ सर्वभूतात्मभूतः स गुणसंगेषु सज्जते॥ स
त्वमात्मप्रसरति गुणांश्चापि कदाचन॥ न गुणा विदुरात्मानं गुणान्वेद स सर्वदा॥ परिद्रष्टा गुणानां च परिस्रष्टा यथा
यथातथं॥ सत्त्वक्षेत्रज्ञयोरेतदंतरं विद्धि सूक्ष्मयोः॥ सृजते तु गुणानेक एको न सृजते गुणान्॥ पृथ

ग्भूतौ प्रकृत्यातौ संप्रयुक्तौ तु सर्वदा।।यथा मत्स्यो ऽद्भिरन्यः स्यात्संप्रयुक्तौ तथैव तौ।।मशकोदुंबरौ वापि संप्रयुक्तौ
यथा सह।।इषीका वा यथा मुंजे पृथक्च सह चैव च।।तथैव सहितावेतावन्योन्यस्मिन्प्रतिष्ठितौ।। ।।शांतौ मोक्ष
धर्मे।। ।।व्यासः।। ।।सृजते तु गुणान्सत्वं क्षेत्रज्ञस्त्वनुतिष्ठति।।गुणान्विक्रियतः सर्वानुदासीनवदीश्वरः।।स्वभा
वयुक्तं तत्सर्वं यदिमान्सृजते गुणान्।।ऊर्णनाभिर्यथा सूत्रं सृजते तद्गुणांस्तथा।।प्रध्वस्ता न निवर्तंते प्रवृत्तिर्नोप
लभ्यते।।एवमेके व्यवस्यंति निवृत्तिरिति चापरे।।उभयं संप्रधार्यैतद्व्यवस्येद्यथामति।।इतीमं हृदयग्रंथिं बुद्धि
चिंतामयं दृढं।।अनित्ये सुखमासीन अशोच च्छिन्नसंशयः।।अनेनैव विधानेन भवेद् गर्भशयो महान्।।अ
नादिनिधनो ह्यात्मा तं बुध्वा विचरेन्नरः।।अक्रुध्यन्नप्रहृष्यंश्च नित्यं विगतमत्सरः।।तं पेतुः प्रच्युताः पथ्याः
यथा पूर्णां नदीं नराः।।अवगाह्य विद्वांसो विद्धि लोकमिमं तथा।।न तु ताम्यति वै विद्वान्स्थले चरति तत्ववि
त्।।एवं यो विंदतेत्मानं केवलं ज्ञानमात्मनः।।एवं बुध्वा नरः सर्वं भूतानामागतिं गतिं।।समवेक्ष्य च वैषम्यं लभते
शममनुत्तमं।।एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः।।आत्मज्ञानं शमश्चैव पर्याप्तं तत्परायणं।।एतद्बुध्वा
भवेद्बुद्धः किमन्यद्बुद्धलक्षणं।।विज्ञायैतद्विमुच्यंते कृतकृत्या मनीषिणः।।न भवति विदुषां महद्भयं यं

नत्रा।।नहिगतिरधिकास्तिकस्यचिद्भवतिहियाविदुषःसनातनी।।लोकमातुरमसूयतेजनःतत्तदेवचनिरीक्ष्यशो
चते।।तत्रपश्यकुशलानशोचतोयेविदुस्तदुभयंकृताकृतं।।यैःकुरोत्यनभिसंधिपूर्वकंतच्चनिर्नुदतियत्पुरा
कृतं।।नप्रियंतदुभयंनचाप्रियंतस्यतज्जनयतीहकुर्वतः।। ।।शांतौमोक्षधर्मे।। ।।श्रीशुकउवाच।। ।।य
स्माद्धर्मात्परोधर्मोविद्यतेनेहकश्चन।।योविशिष्टश्चधर्मेभ्यस्तंभवान्प्रब्रवीतुमे।। ।।व्यासः।। ।।धर्मंतेसं
प्रवक्ष्यामिपुराणमृषिभिःकृतं।।विशिष्टंसर्वधर्मेभ्यस्तदिहैकमनाःशृणु।।इंद्रियाणिप्रमाथीनिबुध्यासंयम्य
यत्नतः।।सर्वतोनिष्पतिष्णूनिपिताबालानिवात्मजान्।।मनसश्चेंद्रियाणांचाप्यैकाग्र्यंपरमंतपः।।तज्ज्यायःस
र्वधर्मेभ्यःसधर्मःपरउच्यते।।तानिसर्वाणिसंधायमनःषष्ठानिमेधया।।आत्मतृप्तइवासीतबहुचिंत्यम
चिंतयन्।।गोचरेभ्योनिवृत्तानियदास्थास्यंतिवेश्मनि।।तदात्वमात्मनात्मानंपरंद्रक्ष्यसिशाश्वतं।।सर्वात्मानंमहात्मा
नंविधूममिवपावकं।।तंपश्यंतिमहात्मानंब्राह्मणायेमनीषिणः।।यथापुष्पफलोपेतोबहुशाखोमहाद्रुमः।।आत्मनो
नाभिजानीतेक्वमेपुष्पंक्वमेफलं।।एवमात्मानजानीतेक्वगमिष्येकुतस्त्वहं।।अन्योह्यत्रांतरात्मास्तियःसर्वमनुप
श्यति।।ज्ञानदीपेनदीप्तेनपश्यत्यात्मानमात्मना।।दृष्ट्वात्वमात्मनात्मानंनिरात्माभवसर्ववित्।।विमुक्तःसर्वपापे

भ्योमुक्तत्वचइवोरगाः॥ परां बुद्धिमवाप्येह विपाप्मा विगतज्वरः॥ सर्वतःस्रोतसं घोरां नदीं लोभप्रवाहिनीं॥ पंचेंद्रिय
ग्राहवतीं मनःसंकल्परोधसां॥ लोभमोहतृणच्छन्नां कामक्रोधसरीसृपां॥ सत्यतीर्थानृतक्षोभां क्रोधपंकां सरिद्व
रां॥ अव्यक्तप्रभवां शीघ्रां दुस्तरामकृतात्मभिः॥ प्रतरस्व नदीं बुद्ध्या कामग्राहसमाकुलां॥ संसारसागरगमां योनिपा
तालदुस्तरां॥ आत्मजन्मोद्भवां तात जिह्वावर्तां दुरासदां॥ यां तरंति कृतप्रज्ञा धृतिमंतो मनीषिणः॥ तां तीर्णः सर्वतोऽमुक्तो
विपूतात्मात्मविच्छुचिः॥ उत्तमां बुद्धिमास्थाय ब्रह्मभूयं गमिष्यसि॥ संतीर्णः सर्वसंसारात्प्रसन्नात्मा विकल्मषः॥ भूमिष्ठा
नांच भूतानि पर्वतस्थो निशामय॥ अक्रुध्यन्नप्रहृष्यंश्च न नृशंसमतिस्तथा॥ ततो द्रक्ष्यसि सर्वेषां भूतानां प्रभवाप्ययौ॥
एवं वै सर्वधर्मेभ्यो विशिष्टं मेनिरे बुधाः॥ धर्मं धर्मभृतां श्रेष्ठ मुनयस्तत्वदर्शिनः॥ आत्मनो व्यापिनो ज्ञानमिदं पु
त्रानुशासनं॥ प्रयताय प्रवक्तव्यं हितायानुगताय च॥ आत्मज्ञानमिदं गुह्यं सर्वगुह्यतमं महत्॥ अब्रुवं यदहं तात आ
त्मसाक्षिकमंजसा॥ नैव स्त्री न पुमानेतन्नैव चेदं नपुंसकं॥ अदुःखमसुखं ब्रह्म भूतभव्यभवात्मकं॥ नैतज्ज्ञात्वा पुमान्
स्त्री वा पुनर्भवमवाप्नुते॥ अभवप्रतिपत्यर्थमेतं धर्मं विधीयते॥ यथा मतानि सर्वाणि यथैतानि यथातथा॥ कथितानि मया
पुत्र भवंति न भवंति च॥ ॥ भीष्म उवाच॥ ॥ तत्प्रीतियुक्तेन गुणान्वितेन पुत्रेण सत्पुत्र दयान्वितेन॥ पृष्टो हि संप्रीतिमता हि
तार्थं ब्रूयात्सुतस्येह यदुक्तमेतत्॥ ॥ शांतौ मोक्षधर्मे॥ ॥ व्यासः॥ ॥ गंधान्नरसान्नानुरुंध्यात्सुखं वा नालंकारांश्चाप्नुया

तस्य तस्य॥ मानं च कीर्तिं च यशश्च नेछेत्स वै प्रचारः पश्यतो ब्राह्मणस्य॥ सर्वान्वेदानधीयीत शुश्रूषुर्ब्रह्मचर्यवान्॥ ऋचो य
जूंषि सामानि यो वेद न स वै द्विजः॥ इष्टीश्च विविधाः प्राप्य क्रतूंश्चैवाप्तदक्षिणान्॥ आप्नोति नैव ब्राह्मण्यमविज्ञानात्कथंचन॥
यदा चायं न बिभेति यदा चास्मान्न बिभ्यति॥ यदा नेछति न द्वेष्टि ब्रह्म संपद्यते तदा॥ ज्ञातयः सर्वभूतानां सर्ववित्सर्ववेदवि
त्॥ नाकामो म्रियते जातु न तेन न च वै द्विजः॥ यदा न कुरुते भावं सर्वभूतेषु पापकं॥ कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा॥
कामबंधनमेवैकं नान्यदस्तीह बंधनं॥ कामबंधनमुक्तो हि ब्रह्मभूयाय कल्पते॥ कामतो मुच्यमानस्तु धूम्राभ्रादिव चंद्रमाः
॥ विरजाः कालमाकांक्षन्धीरो धैर्येण वर्तते॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः विशंति यद्वत्॥ तद्वत्कामा यं प्रविशंति प्र
सर्वे स शांतिमाप्नोति न कामकामी॥ स कामकांतो न तु कामकामः स वै कामात्स्वर्गमुपैति देही॥ वेदस्योपनिषत्सत्यं
सत्यस्योपनिषद्दमः॥ दमस्योपनिषद्दानं दानस्योपनिषत्तपः॥ तपसोपनिषत्त्यागस्त्यागस्योपनिषत्सुखं॥ सुख
स्योपनिषत्स्वर्गः स्वर्गस्योपनिषच्छमः॥ क्लेदनं शोकतमसोः संतापं कलुषासहा॥ सत्त्वमिच्छति संतोषाछांतिलक्षण
मुत्तमं॥ विशोको निर्ममः शांतः प्रशांतात्मा विमत्सरः॥ षड्भिर्लक्षणवानेतैः समग्रं पुनरेष्यति॥ षड्भिः सत्त्वगुणोपेतैः
प्राज्ञैरधिकमंत्रिभिः॥ ये विदुः प्रत्यगात्मानमिहस्थानमृतं विदुः॥ अकृत्रिममसंहार्यं प्राकृतं निरुपस्कृतं॥ अध्यात्मं
स्वकृतप्राज्ञः सुखमव्ययमश्नुते॥ निश्चार्य च मनः कृत्वा प्रतिष्ठाप्य च सर्वतः॥ यामयं लभते तुष्टिं सा न शक्यात्मनोन्य ८७

था ॥ येन तृप्यति भुंजानो येन तृप्यत्यवित्तवान् ॥ येनास्नेहो बलं धत्ते यस्तं वेद स वेदवित् ॥ स संगृह्यात्मनो द्वाराण्यभिधाय विचिंतयन् ॥ योध्यास्ते ब्रह्मणाश्लिष्टः स ब्राह्मतिरुच्यते ॥ समाहितः पचेतले क्षीणकामो व्यवस्थितः ॥ सर्वतः सुखमन्वेति वपुश्चांद्रमसं यथा ॥ सविशेषाणि भूतानि गुणांश्चाभजतो मुनेः ॥ सुखेनापोह्यते दुःखं भास्करेण तमो यथा ॥ तमतिक्रांतकर्माणमतिक्रांतगुणक्षयं ॥ ब्राह्मणं विषयाश्लिष्टं जरामृत्युर्नविंदति ॥ स यदा सर्वतो मुक्तः समः पर्यवतिष्ठते ॥ इंद्रियाणींद्रियार्थांश्च शरीरस्थोतिवर्त्तते ॥ कारणं परमं प्राप्य अतिक्रांतस्य कार्यता ॥ पुनरावर्त्तनं नास्ति संप्राप्तस्य परं पदं ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ व्यासः ॥ ॥ द्वंद्वानि मोक्षजिज्ञासुरर्थकामाननुष्ठितः ॥ वक्ता गुणवता शिष्यः श्राव्यः पूर्वमिदं महत् ॥ आकाशं मारुतो ज्योतिरापः पृथ्वी च पंचमी ॥ भावाभवौ च कालश्च सर्वभूतेषु पंचसु ॥ अंतरात्मकमाकाशं तन्मयं श्रोत्रमिंद्रियं ॥ तस्य शब्दगुणं विद्यान्मूर्त्तिशास्त्रविधानवित् ॥ चरणं मारुतात्मेति प्राणापानौ च तन्मयौ ॥ स्पर्शनं चेंद्रियं विद्यात्तथा स्पर्शं च तन्मयं ॥ तापः पाकः प्रकाशश्च ज्योतिश्चक्षुश्च पंचमं ॥ तस्य रूपं गुणं विद्यात्ताम्रगौरासितात्मकं ॥ प्रक्लेदो द्रवता स्नेह इत्यपामुपदिश्यते ॥ असृङ्मज्जा च यच्चान्यत्स्निग्धं विद्यात्तदात्मकं ॥ रसनं चेंद्रियं जिह्वा रसश्चापां गुणो मतः ॥ संघातः पार्थिवो धातुरस्थिदंतनखानि च ॥ श्मश्रुरोम च केशाश्च शिरा स्नायु च चर्म च ॥ इंद्रियं घ्राणसंज्ञानं नासिकेत्यभिसंज्ञिता ॥ गंधश्चैवेंद्रियार्थोयं विज्ञेयः पृथिवीमयः ॥ उत्तरेषु गुणाः संति सर्वसत्वेषु चोत्तमाः ॥ पंचानां भूतसंघानां संततिं मुनयो विदुः ॥ मनो नवममेतेषां तु बुद्धिस्तु दशमी स्मृ

परं

मोक्षधर्म॰
८८

ता ॥ एकादशास्त्वनंतात्मा स सर्वः परउच्यते ॥ व्यवसायात्मिका बुद्धिर्मनो व्याकरणात्मकं ॥ कर्मानुमानाद्विज्ञेयः स जीवः क्षेत्रसं
ज्ञकः ॥ एभिः कालाष्टकैर्भावैर्यः सर्वैः सर्वमन्वितं ॥ पश्यत्यकलुषं कर्म स मोहं नानुवर्तते ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ व्यासः ॥
शरीराद्विप्रमुक्तं हि सूक्ष्मभूतं शरीरिणां कर्मभिः परिपश्यंति शास्त्रोक्तैः शांतचेतसः ॥ यथा मरीच्यः सहिताश्चरंति सर्व
त्र तिष्ठंति च दृश्यमानाः ॥ देहैर्विमुक्तानि चरंति लोकांस्तथैव सत्वान्यतिमानुषाणि ॥ प्रतिरूपं यथैवाप्सु तावत्कार्येन ल
क्ष्यते ॥ सत्ववांस्तु तथा सत्वं प्रतिरूपं स पश्यति ॥ तानि सूक्ष्माणि सत्वानि विमुक्तानि शरीरतः ॥ स्वेन सत्वेन सत्वस्थाः पश्यंति नि
यतेंद्रियाः ॥ स्वपतां जाग्रतां चैव सर्वेषामात्मचिंतितं ॥ प्रधानद्वैधयुक्तानां जहतां कर्मजं रजः ॥ यथाहनि तथा रात्रौ यथा
रात्रौ तथाहनि ॥ दृश्ये तिष्ठति सत्वात्मा सततं योगयोगिनां ॥ तेषां नित्यं सदा नित्यो भूतात्मा सततं गुणैः ॥ सप्तभिस्त्वन्वितः
सूक्ष्मैश्चरिष्णुरजरामरः ॥ मनोबुद्धिपराभूतः स्वदेहपरदेहवित् ॥ स्वप्नेष्वपि भवत्येष विज्ञाता सुखदुःखयोः ॥ तत्रापि ल
भते दुःखं तत्रापि लभते सुखं ॥ क्रोधलोभौ तु तत्रापि कृत्वा व्यसनमर्छति ॥ प्रीतिश्चापि भवति महतोर्थानवाप्य हि ॥ क
रोति पुण्यं तत्रापि जाग्रन्निव च पश्यति ॥ अहोभ्यंतर्गतश्चापि गर्भत्वं समुपेयिवान् ॥ दशमासान्वसन्कुक्षौ नैवान्न
मिव जीर्यते ॥ तमेव मतितेजोंत्रो भूतात्मानं हृदि स्थितं ॥ तमोरजोभ्यामाविष्टा नानुपश्यंति मूर्तिषु ॥ योगशास्त्र
परा भूत्वा तमात्मानं परीप्सवः ॥ अनुच्छ्वासान्यमूर्तानि यानि वज्रोपमान्यपि ॥ पृथक्भूतेषु सृष्टेषु चतुर्ष्वाश्रमकर्मसु ॥ ८८

समाधौ योगमेवेतत्तु शांडिल्यः शममब्रवीत्॥ विदित्वा सप्तसूक्ष्माणि षडंगांच महेश्वरं॥ प्रधानविनियोगस्थः परं ब्रह्मा
नुपश्यति॥ ॥शांतौ मोक्षधर्मे॥ ॥व्यास उवाच॥ ॥हृदि कामद्रुमश्चित्रो मोहसंचयसंभवः॥ क्रोधमानमहास्कंधो विवि
त्सापरिवेषणः॥ तस्य चाज्ञानमाधारः प्रमादः परिषेचनं॥ सोभ्यसूयापलाशो हि पुराडुष्कृतसारवान्॥ संमोहचिंताविटप
शोकशाखो भयांकुरः॥ मोहनीभिः पिपासाभिर्लताभिरनुवेष्टितः॥ उपासते महावृक्षं सुलुब्धास्तं फलेप्सवः॥ आयसैः संयु
ताः पाशैः फलदं परिवेष्ट्य तं॥ यस्तान्पाशान्वशे कृत्वा तं वृक्षमपकर्षति॥ गतः स दुःखयोरंतं यतमानस्तयोर्द्वयोः॥ संरो
हत्यकृतप्रज्ञः सदा येन हि पादपं॥ स तमेव ततो हंति विषग्रंथिरिवातुरं॥ तस्यानुगतमूलस्य मूलमुद्ध्रियते बलात्॥ योग
प्रसादात्कृतिना साम्येन परमासिना॥ एवं यो वेद कामस्य केवस्य निवर्तनं॥ बधं वै कामशास्त्रस्य सुदुःखान्यतिवर्तते॥ श
रीरं पुरमित्याहुः स्वामिनी बुद्धिरुच्यते॥ तत्र बुद्धेःशरीरस्थं मनो नामार्थचिंतकं॥ इंद्रियाणि मनः पौरास्तदर्थे तु परा कृ
तिः॥ तत्र द्वौ दारुणौ दोषौ तमो नाम रजस्तथा॥ यमर्थमुपजीवंति पौराः सहपुरेश्वरे॥ अद्वारेण तमेवार्थं द्वौ दोषावुप
जीवतः॥ तत्र बुद्धिर्हि दुर्धर्षा मनः सामान्यमुच्यते॥ पौराश्चापि मनस्त्रस्तास्तेषामपि चलाहृदा॥ यमर्थं बुद्धिरध्यास्ते सोन
र्थः परिसीदति॥ यदर्थं पृथगध्यास्ते मन सपरिसीदति॥ पृथक्कृतं मनो बुध्या मनो भवति केवलं॥ तत्रैवं विकृतं अन्यं र
जः पर्यवतिष्ठते॥ तन्मनः कुरुते सख्यं रजसा सह संगतं॥ तं चोदायजनः पौरो रजसे संप्रयच्छति॥ ॥ शांतौ मोक्षधर्मे॥

।। ।।श्रीभगवानुवाच।। ।।भूतानां गुणसंख्यानं भूयः पुत्र निशामय।। द्वैपायनमुखाद्भ्रष्टं श्लाघया परयानघ।। दीप्तानलनिभः
प्राह भगवान्धूमवर्जितः।। ततोहमपि वक्ष्यामि भूयः पुत्र निदर्शनं।। भूमेः स्थैर्यं गुरुत्वं च काठिन्यं प्रसवार्थता।। गंधो गु
रुत्वं शक्तिश्च संतापः स्थापना धृतिः।। अपां शैत्यं रसः क्लेदो द्रवत्वं स्नेहसौम्यता।। जिह्वा विस्यंदिनी चापि भौमानाश्रयपांत
या।। अग्नेर्दुर्धर्षता ज्योतिस्तापः पाकः प्रकाशनं।। शोको रागो लघुस्तैक्ष्ण्यं स ततं चोर्ध्वभाविता।। वायोरनियमस्पर्शो नादःस्था
ने स्वतंत्रता।। बलं शैघ्र्यं च मोक्षश्च कर्मचेष्टात्मना भवः।। आकाशस्य गुणः शब्दो व्यापित्वं छिद्रतापि च।। अनाश्रयमनालं
बमव्यक्तमविकारिता।। अप्रतीघातता चैव भूततत्वं विवचाणि च।। गुणाः पंचाशतं प्रोक्ताः पंचभूतात्मभाविताः।। चलोपप
त्तिर्व्यक्तिश्च विसर्गः कल्पना क्षमा।। सदसच्चाशुभश्चैव मनसो नव वै गुणाः।। इष्टानिष्टविपत्तिश्च व्यवसायः समाधिता।।
संशयः प्रतिपत्तिश्च बुद्धेः पंच गुणान्विदुः।। ।।युधिष्ठिर उवाच।। ।।कथं पंचगुणा बुद्धिः कथं पंचेंद्रिया गुणाः।। एतन्मे सर्वमा
चक्ष्व सूक्ष्मज्ञानं पितामह।। ।।भीष्म उवाच।। ।।आहुः षष्टिं भूतगुणान्वै भूतविसक्ताः प्रकृतिविसृष्टाः।। भूतविभक्तिश्चाक्षरसंस्पृशाः
पुत्र न नित्यं तदिह वदंति।। तत्पुत्र चिंताकलिलं तदुक्तमनागतं वै तव संप्रतीह।। भूतार्थतत्वं तदवाप्य सर्वं भूतप्रभावाद्भव शांतबुद्धिः।। ।।
वांतौ मोक्षधर्मे।। ।।शुकानुप्रश्नः समाप्तः।। ।।युधिष्ठिर उवाच।। ।।य इमे पृथिवीपाल शेरते पृथिवीतले।। पृतनामध्य एते हि गतसंज्ञा
महाबलाः।। एकैकशो भीमबला नागायुतबलास्तु।। एते हि निहिताः संख्ये तुल्यतेजोबलैर्नरैः।। नैषां पश्यामि हंतारं प्राणिनां सं

युगे परं ।। विक्रमेणोपसंपन्नास्तेजोबलसमन्विताः ।। अथ चेमे महाप्राज्ञाः शेरते हि गतासवः ।। मृताइति च शब्दोयं वर्त्तस्येषु गतात्मसु
।। इमे मृतान्नृपतयः प्रायशो भीमविक्रमाः ।। तत्र मे संशयो जातः कुतः संज्ञा मृताइति ।। कस्य मृत्युः कुतो मृत्युः केन मृत्युरिह प्रजाः ।।
हरत्यमरसंकाश तन्मे ब्रूहि पितामह ।। ।।भीष्म उवाच ।। ।।पुरा कृतयुगे तात राजासीदनुकंपनः ।। स शत्रुवशमापन्नः संग्रामे क्षी
णवाहनः ।। तस्य पुत्रो हरिर्नाम नारायणसमो बले ।। स शत्रुभिर्हतः संख्ये सबलः सपदानुगः ।। स राजा शत्रुवशगः पुत्रशोकसम
छया न्वितः ।। यदृ शांतिपरो ददर्श भुवि नारदं ।। तस्मै स सर्वमाचष्ट यथावृत्तं जनेश्वरः ।। शत्रुभिर्ग्रहणं संख्ये पुत्रस्य मरणं तथा ।। तस्य
तद्वचनं श्रुत्वा नारदोथ तपोधनः ।। आख्यानमिदमाचष्ट पुत्रशोकापहं तदा ।। ।।नारदः।। ।।राजञ्शृणु समाख्यानमद्येदं ब
प्र हुविस्तरं ।। यथावृत्तं श्रुतं चैव मयेदं वसुधाधिप ।। जाः सृष्ट्वा महातेजाः प्रजासर्गे पितामहः ।। अतीव वृद्धा बहुला नामृष्यत पु
नः प्रजाः ।। नह्यंतरमभूत्किंचित्क्वचिज्जंतुभिरच्युतः ।। निरुछ्वासमिवोन्नद्धं त्रैलोक्यमभवन्नृप ।। तस्य चिंता समुत्पन्ना संहारं
प्रति भूपते ।। चिंतयन्नाध्यगच्छच्च संहारे हेतुकारणं ।। तस्य रोषान्महाराज खेभ्योग्निरुदतिष्ठत ।। तेन सर्वा दिशो राजन्ददाह
स पितामहः ।। ततो दिवं भुवं खं च जगच्च सचराचरं ।। ददाह पावको राजन्भगवान्कोपसंभवः ।। तत्रादह्यंत भूतानि जंगमानि ध्रु
वाणि च ।। महता क्रोधवेगेन कुपिते प्रपितामहे ।। ततो हरिजटः स्थाणुर्वेदाध्वरपतिः शिवः ।। जगाम शरणं देवो ब्रह्माणं परवीर
हा ।। तस्मिन्नभिगते स्थाणौ प्रजानां हितकाम्यया ।। अब्रवीत्परमो देवो ज्वलन्निव तदा शिवं ।। करवाण्यद्य किं कामं वरार्होसि
मतो मम ।। कर्त्ता ह्यस्मि प्रियं शंभो तव यद्धृदि वर्त्तते ।। ।।शांतौ मोक्षधर्मे ।। ।।स्थाणुरुवाच ।। ।।प्रजासर्गनिमित्तं तु कार्य

वत्तामि मां प्रभो ॥ विद्धि सृष्टास्त्वया हीमा मा कुप्यासां पितामह ॥ तव तेजोग्निना देव प्रजा दह्यंति सर्वशः ॥ ता दृष्ट्वा मम कारुण्यं मा
कुप्यासां जगत्प्रभो ॥ ॥प्रजापतिरुवाच ॥ ॥न कुप्ये न च मे कामो न भवेयुः प्रजा इति ॥ लाघवार्थं धरण्यास्तु ततः संहार इष्यते ॥
इयं हि मां सदा देवी भारार्त्ता समचोदयत् ॥ संहानार्थं महादेव भारेणाप्सु निमज्जती ॥ यदाहं नाधिगच्छामि बुद्ध्या बहु विचार
यन् ॥ संहारमासां वृद्धानां ततो मां क्रोध आविशत् ॥ ॥स्थाणुरुवाच ॥ ॥ संहारार्थं प्रसीदस्व मा क्रुद्धो विबुधेश्वर ॥ मा प्रजाः
स्थावरं चैव भूतग्रामं चतुर्विधं ॥ तदेतद्भस्मसाद्भूतं जगत्सर्वमुपप्लुतं प्रसीद भगवान्साधो वर एष वृतो मया ॥ नष्टा न पुन
र्भविष्यंति प्रजा ह्येताः कथंचन ॥ तस्मान्निवर्त्ततामेतत्तेजः स्वेनैव तेजसा ॥ उपायमन्यं संपश्य भूतानां हितकाम्यया ॥ यथामी
जंतवः सर्वे न दह्येरन्पितामह ॥ अभावे हि न गच्छेयुरुच्छिन्नजनाः प्रजाः ॥ अपि दैवे नियुक्तोस्मि त्वया लोके सुरेश्वर ॥
चा त्वद्भवं हि जगन्नाथ जगत्स्थावरजंगमं ॥ प्रसाद्य त्वां महादेव यांस्यावृत्तिजाः प्रजाः ॥ ॥नारद उवाच ॥ ॥श्रुत्वा तु वचनं
देवस्थाणोर्नियतवाङ्मनाः ॥ तेजस्तत्संन्निजग्राह पुनरेवांतरात्मनि ॥ ततोग्निमुपसंहृत्य भगवान्लोकपूजितः ॥ प्रवृत्तिं
च निवृत्तिं च कल्पयामास वै प्र(स्त)भुः ॥ उपसंहरतस्तस्य तमग्निरुषजं तदा ॥ प्रादुर्बभूव विश्वेभ्यः खेभ्यो नारी महा
त्मनः ॥ कृष्णरक्तांबरधरा कृष्णनेत्रतलांतरा ॥ दिव्यकुंडलसंपन्ना दिव्याभरणभूषिता ॥ सा विनिःसृत्य वै खेभ्यो दक्षि
णामाश्रितां दिशं ॥ ददृशाते च तां कन्यां देवौ विश्वेश्वरावुभौ ॥ तामाहूय तदा देवो लोकानामादिरीश्वरः ॥ मृत्यो इति

ही पालतहि वेमाः प्रजाइति ।। त्वं हि संहारबुध्या मे चिंतिता रुषितेन च ।। तस्मात्संहर सर्वास्त्वं प्रजाः सजडपंडिताः ।। अवि
शेषपा चैव त्वं प्रजाः संहर कामिनी ।। मम त्वं हि नियोगेन श्रेयः परमवाप्स्यसि ।। एवमुक्ता तु सा देवी मृत्युः कमलमालिनी
।। प्रदध्यौ दुःखिता बाला साश्रुपातमतीव च ।। पाणिभ्यैव जग्राह तान्यश्रूणि जनेश्वरः ।। मानवानां हितार्थाय ययाचे पुनरे
व ह ।। ।।इति शांतो मोक्षधर्मे ।। ।।नारद उवाच ।। ।। विनीय दुःखमबलात्सात्मन्येवायतेक्षणा ।। उवाच प्रांजलिर्भू
त्वा लतेवावर्जिता तदा ।। त्वया स्रष्टा कथं नारी मादृशी वदतां वर ।। रौद्रं कर्माभिजायेत सर्वप्राणिभयंकरी ।। बिभेम्यहमधर्म
स्य धर्म्यमादिश कर्म मे ।। त्वं मां भीतामवेक्षस्व शिवेनेक्षस्व चक्षुषा ।। बालान्वृद्धान्वयस्थांश्च न हरेयमनागसः ।। प्राणिनः
प्राणिनामीश नमस्तेस्तु प्रसीद मे ।। प्रियान्पुत्रान्वयस्यांश्च भ्रातृन्मातृः पितृनपि ।। अपध्यास्यंति यद्देव मृतास्तेषां बि
भेम्यहं ।। कृपणास्तु परिक्लेदो दहेन्मां शाश्वतीः समाः ।। तेभ्योहं बलवद्भीता शरणं त्वामुपागता ।। यमस्य भवने देव पात्यंते पाप
कर्मिणः ।। प्रसादये त्वां वरद प्रसादं कुरु मे प्रभो ।। एतदिच्छाम्यहं कामं त्वत्तो लोकपितामह ।। इच्छेयं त्वत्प्रसादार्थं तपस्तप्तुं महे
श्वर ।। ।।पितामह उवाच ।। ।।मृत्यो संकल्पिता मे त्वं प्रजासंहारहेतुना ।। गच्छ संहर सर्वास्त्वं प्रजा मा च विचारय ।। एत
देवमवश्यं हि भविता नैतदन्यथा ।। क्रियतामनवद्यांगी यथोक्तं यद्वचोनघे ।। एवमुक्ता महाबाहो मृत्युः परपुरंजय ।। नया
जहार ततस्योच प्रह्वाभवदुदङ्मुखी ।। पुनः पुनरथोक्ता सा गतसत्वेव भाविनी ।। तूष्णीमासीत्ततो देवो देवानामीश्वरेश्वरः ।।
आससक्षिल ब्रह्मा स्वयमेवात्मनात्मनि ।। स्मयमानश्च लोकेशो लोकान्सर्वान्निवैक्षत ।। निवृत्तरोषे तस्मिंस्तु भगव

स्यपनाजिते।।साकन्याथ स्वभामास्य समीपादिति नः श्रुतं।।अपसृत्याप्रतिश्रुत्य प्रजासंहरणात्तदा।।त्वरमाणेवरा
जेंद्र मृत्युर्धेनुकमभ्यगात्।।सा तत्र परमं देवी तपोचरत दुश्चरं।।सा माह्येकपदे तस्थौ दश पद्मानि पंच च।।तां तथा
कुर्वतीं तत्र तपः परमदुश्चरं।।पुनरेव महातेजा ब्रह्मा वचनमब्रवीत्।।कुरुष्व मे वचो मृत्यो तदनादृत्य सत्वरा।।ततो वै
कपदे तात पुनरन्यानि सप्त सा।।तस्थौ पद्मानि षट् चैव पंच द्वे चैव मानद।।ततः पद्मायुतं तात मृगैः सह चचार सा।।
द्विचा पुते नरश्रेष्ठ वाय्वाहारा महामते।।पुनरेव ततो राजन्मौनमातिष्ठदुत्तमं।।अप्सु वर्षसहस्राणि सप्त चैकं च पा
र्थिव।।ततोऽगमत्सा कन्या कौशिकीं नृपसत्तम।।तत्र वायुजलाहारा चचार नियमं पुनः।।ततो ययौ महाभागा गंगां
मेरुं च केवला।।तस्थौ दार्विव निश्चेष्टा प्रजानां हितकाम्यया।।ततो हिमवतो मूर्ध्नि यत्र देवाः समीजिरे।।तत्रांगुष्ठे
नराजेंद्र निखर्वमपरं ततः।।तस्थौ पितामहं चैव तोषयामास यत्नतः।।ततस्तामब्रवीत्तत्र लोकानां प्रभवाव्ययः।।कि
मिदं वर्त्तते पुत्रि क्रियतां मम तद्वचः।।ततोऽब्रवीत्पुनर्मृत्युर्भगवंतं पितामहं।।न हरेयं प्रजा देव पुनस्त्वाहं प्रसादये।।
तामधर्मभयाद्भीतां पुनरेव प्रयाचतीं।।तदाब्रवीद्देवदेवो निगृह्येदं वचस्ततः।।अधर्मो नास्ति ते मृत्यो संयच्छेमाः
प्रजाः शुभे।।मया ह्युक्तं मृषा भद्रे भविता नेह किंचन।।धर्मः सनातनश्च त्वामिहैवानुप्रवेक्ष्यति।।अहं च विबुधाश्चै
व त्वद्धिते निरताः सदा।।इममन्यं च ते कामं ददामि मनसेप्सितं।।न त्वां दोषेण यास्यंति व्याधिसंपीडिताः प्रजाः।।पु

ऋषैषु स्वरूपेण प्रवर्तस्व भविष्यसि ॥ स्त्री पुंस्त्वरूपिणी चैव तृतीये च नपुंसकं ॥ सैवमुक्ता महाभाग कृतांजलिरुवा
च ह ॥ पुनरेव महात्मानं नेति देवेशमव्ययं ॥ तामब्रवीत्तदा देवो मृत्यो संहर मानवान् ॥ अधर्मस्ते न भविता तथा ध्यास्या
म्यहं शुभे ॥ यानश्रुबिंदून्पतितान पश्यंतिये पाणिभ्यां धारितास्ते पुरस्तात् ॥ ते व्याधयो मानवान्घोररूपाः प्राप्ते काले
कर्षयिष्यंति मृत्यो ॥ सर्वेषां त्वं प्राणिनामंतकाले कामक्रोधौ सहितौ योजयेथाः ॥ एवं धर्मस्त्वामुपैष्यत्यमेयो न वा
धर्मं लप्स्यसे तुल्यवृत्तिः ॥ एवं धर्मं पालयिष्यस्यथो त्वं न चात्मानं मज्जयिष्यस्यधर्मे ॥ तस्मात्कामं रोचयस्वागतं
त्वं संयोज्याथा संहरस्वेह जंतून् ॥ सा वै तदा मृत्युसंज्ञोपदेशाद्भीता शापाद्बाढमित्यब्रवीत्तं ॥ अथो प्राणान्प्राणि
नामंतकाले कामक्रोधौ प्राप्य निर्मोह्य हंति ॥ मृत्योर्ये ते व्याधयश्चाश्रुपाता मनुष्याणां रुज्यते यैः शरीरं ॥ सर्वे
षां वै प्राणिनां प्राणनांते तस्माच्छोकं मा कृथा बुध्य बुध्या ॥ सर्वे देवाः प्राणिनां ते प्राणनांते गत्वा वृत्ताः संनिवृत्ता
स्तथैव ॥ एवं सर्वे मानवाः प्राणनांते गत्वा वृत्ता देववद्राजसिंह ॥ वायुर्भीमो भीमनादो महौजाः सर्वेषां च प्राणि
नां प्राणभूताः ॥ अनावृत्तिर्देहिनां देहभेदे तस्माद्वायुर्देवदेवो विशिष्टः ॥ सर्वे देवा मर्त्यसंज्ञाविशिष्टाः सर्वे मर्त्या दे
वसंज्ञाविशिष्टाः ॥ तस्मात्पुत्रं मा शुचो राजसिंह पुत्रः स्वर्गं प्राप्य ते मोदतेह ॥ एवं मृत्युर्देवसृष्टा प्रजानां प्राप्ते काले सं
हरंतीयथावत् ॥ तस्याश्चैव व्याधयस्ते स्रपाताः प्राप्तकाले संहरंतीह जंतून् ॥ ॥मोक्षधर्मे॥ ॥शुभिविरः॥

इमे वै मानवाः सर्वे धर्मं प्रति विशंकिताः॥ कोयं धर्मः कुतो धर्मस्तन्मे ब्रूहि पितामह॥ धर्मस्त्वयमिहार्थः किममुत्रार्थो
पि वा भवेत्॥ उभयार्थो हि वा धर्मः तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥सदाचारः स्मृतिर्वेदस्त्रिविधं धर्मलक्ष
णं॥ चतुर्थमर्थमित्याहुः कवयो धर्मलक्षणं॥ अपि ह्युक्तानि धर्माणि व्यवस्यत्युत्तरोवरे॥ लोकयात्रार्थमेवेह धर्म
स्य नियमः कृतः॥ उभयत्र सुखोदर्क इह चैव परत्र च॥ अलब्ध्वा निपुणं धर्मं पापः पापेन युज्यते॥ न च पापकृ
तः पापान्मुच्यते केचिदापदि॥ अपापवादी भवति यथा भवति धर्मवित्॥ धर्मनिष्ठाः सदाचाराः स्तेनैवाश्रित्य नोत्स
हेत॥ यदा धर्मसमाविष्टो धनं गृह्णाति तस्करः॥ रमते निर्हरं स्तेनः परवित्तमराजके॥ यदास्य तद्धरंत्य
न्येत दा राजानमिच्छति॥ तदा तेषां स्पृहयते ये वै तुष्टाः स्वकैर्धनैः॥ अभीतः शुचिरभ्येति राजद्वारमशंकितः॥
न हि दुश्चरितं किंचिदंतरात्मनि पश्यति॥ सत्यस्य वचनं साधु न सत्याद्विद्यते परं॥ सत्येन विधृतं सर्वं सर्वं
सत्ये प्रतिष्ठितं॥ अपि पापकृतो ज्ञात्वा मिथः कृत्वा पृथक् पृथक्॥ अद्रोहमविसंवादे प्रवर्त्तते तदाश्रयाः॥ ते च
न्मिथ्या धृतिं कुर्युर्विनश्येयुरसंशयं॥ न हर्त्तव्यं परधनमिति धर्मः सनातनः॥ मन्यते बलवंतस्ते दुर्बलैस्सं
प्रवर्त्तितं॥ यदा नियतिदौर्बल्यमथैषामेव रोचते॥ न ह्यत्यंतं बलवता भवंति सुखिनोपि वा॥ तस्माद्दनार्ज

विबुद्धिर्नकार्यीतिकदाचन॥ असाधुभ्योस्य नभयंनचोरेभ्योनराजतः॥ नकिंचित्कस्यचित्कुर्वन्निर्भयःशुचिराव
सेत्॥ सर्वतःशंकतेस्तेनोमृगोग्राममपेयिवान्॥ बहुधाचरितंपापमन्यत्रैवानुपश्यति॥ मुदितःशुचिरभ्ये
तिसर्वतोनिर्भयःसदाभ्रनहिदुःश्चरितेकिंचिदात्मनोन्येषुपश्यति॥ दातव्यमित्ययंधर्मउक्तोभूतहितेरतैः॥
तंमन्यंतेधनयुताःकृपणैःसंप्रवर्त्तितं॥ यदानियतिकार्पण्यमथैषामेवनोवते॥ नह्यत्यंतंधनवतोभवंतिसुखि
नोपिवा॥ यदन्यैर्विहितंनेच्छेदात्मनाकर्मपूरुषः॥ नतत्परेषुकुर्वीतजानन्नप्रियमात्मनः॥ योन्यस्यस्यादुपपतिः
सकंकिंवक्तुमर्हति॥ यदन्यस्यततःकुर्यान्नमृष्येदितिमेमतिः॥ जीवितुंचेत्स्वयंचेत्स्येकथंसोन्यंप्रघात येत्॥
न यद्यदात्मनिचेच्छेततत्परस्यापिचिंतयेत्॥ अतिरिक्तैःसंविभजेतुभोगैरन्यान्नकिंचनान्॥ एतस्मात्कारणाद्धा
त्राकुसीदंसंप्रवर्तितं॥ यस्मिंस्तुदेवाःसमयेसंतिष्ठेयंस्तथाभवेत्॥ अथवाल्लाभसमयेस्थितिर्धर्मेपिशो
भना॥ सर्वंप्रियाभ्युपगतंधर्ममाहुर्मनीषिणः॥ पश्यैतंलक्षणोद्देशंधर्माधर्मेयुधिष्ठिर॥ लोकसंग्रहसंयु
क्तंविधात्राविहितंपुरा॥ सूक्ष्मधर्मार्थनियतंसतांचरितमुत्तमं॥ धर्मलक्षणमाख्यातमेतत्तेकुरुसत्तम॥
तस्मादनार्जवेबुद्धिर्नकार्यातेकथंचन॥ ॥भीष्मउवाच॥ ॥युधिष्ठिरउवाच॥ ॥सूक्ष्मःसाधुसमुद्दिष्टनि

यतंब्रह्मलक्षणं॥ प्रतिभात्वस्तिमेकाचित्तांब्रूयामनुमानतः॥ भूयांसोहृदयेयेमेप्रश्नास्तेव्याहृतास्त्वया॥ इदंत्व
न्यत्प्रवक्ष्यामिनराजंविग्रहादिव॥ इमानिहिप्रापयंतिसृजंत्युत्तारयंतिचा॥ नधर्मःपरिपाठेनशक्योभारत
वेदितुं॥ अन्योधर्मःसमस्थस्यविषमस्थस्यवापुनः॥ आपदस्तुकथंशक्याःपरिपाठेनवेदितुं॥ सदाचारोम
तोधर्मःसंतस्त्वाचारलक्षणाः॥ साध्यासाध्यंकथंक्यंसदाचारोप्यलक्षणः॥ दृश्यतेधर्मरूपेणअधर्मंप्राकृ
तश्चरन्॥ धर्मंचाधर्मरूपेणकश्चिदप्राकृतश्चरन्॥ पुननस्यप्रमाणंहिनिर्दिष्टंशास्त्रकोविदैः॥ वेदवेदा
श्चानुयुगंह्रसंतीतिहनःश्रुतं॥ अन्येकृतयुगेधर्मास्त्रेतायांद्वापरेयुगे॥ अन्येकलियुगेधर्मायथाशक्तिः
कृताइति॥ आम्नायवचनंसत्यमित्ययंलोकसंग्रहः॥ आम्नायेभ्यःपुनर्वेदाःप्रसृताःसर्वतोमुखाः॥ ए
तेसर्वेप्रमाणंवैप्रमाणंतन्नविद्यते॥ प्रमाणेचाप्रमाणेनविरुद्धेशास्त्रताकुतः॥ धर्मस्यह्रियमाणस्यब
लवद्भिर्दुरात्मभिः॥ यायाविक्रियतेसंस्थाततःसापिप्रणश्यति॥ विद्मचैवंनचापिविद्मशक्यंवावेदितुंनवा
॥ अणीयान्क्षुरधारायायानपिपर्वतात्॥ गंधर्वनगराकारःप्रथमंसंप्रदृश्यते॥ अन्वीक्ष्यमाणःकविभिःपुन
र्गच्छत्यदर्शनं॥ निपानानीवगोभ्यासेक्षेत्रेकुल्येचभारत॥ स्मृतिर्हिशाश्वतोविप्रहीनोनदृश्यते॥

कामादन्ये क्षयाचान्ये कारणैरपरैस्तथा ।। असंतोपि हि वृथाचारं भजंते बहवो परे ।। धर्मो भवति स क्षिप्रं प्रलापस्तेव साधुषु
।। अथैतानाहुरुन्मत्तानपि चावहसंयुत ।। महाजना ह्युपावृत्ता राजधर्मसमाश्रिताः ।। न हि सर्वहितः कश्चिदाचारः संप्रदृश्यते
।। तेनैवान्यः प्रभवति सोपरं बाधते पुनः ।। दृश्यते चैव स पुनः स्थूलरूपो यदृच्छया ।। येनैवान्यः प्रभवति सोपरानपि बाधते
।। आचाराणामनैकाग्र्यं सर्वेषामुपलक्षेत् ।। चिराभिपन्नः कविभिः पूर्वं धर्म उदाहृतः ।। तेनाचारेण
पूर्वेण संस्था भवति शाश्वती ।। ।। शांतौ मोक्षधर्मे ।। ।। भीष्म उवाच ।। ।। अत्राप्युदाहरंतीममितिहासं पुरातनं ।। तुलाधारस्य
वाक्यानि धर्मं जाजलिना सह ।। वनेवनचरः कश्चिज्जाजलिर्नाम वै द्विजः ।। सागरोद्देशमागम्य तपस्तेपे महातपाः
।। नियतो नियताहारश्चीराजिनजटाधरः ।। मलपंकधरो धीमान्बहून्वर्षगणान्मुनिः ।। स कदाचिन्महातेजा
जलवासी महीपते ।। चचार लोकान्विप्रर्षिः प्रेक्षमाणो मनोजवः ।। स चिंतयामास मुनिर्जलवासे कदाचन ।। विप्रेक्ष्य
सागरांतां वै महीं सवनकाननां ।। न मया सदृशोस्तीह लोके स्थावरजंगमे ।। अप्सु वैहायसं गच्छेन्मया योन्यः सहेति वै ।।
स दृश्यमानो रक्षोभिर्जलमध्येवदत्तदा ।। अब्रुवंश्च पिशाचास्तं नैवं त्वं वक्तुमर्हसि ।। तुलाधारो वणिग्धर्मा वाराणस्यां
महायशाः ।। सोप्येवं नार्हते वक्तुं यथा त्वं द्विजसत्तम ।। इत्युक्तो जाजलिर्भूतैः प्रत्युवाच महातपाः ।। पश्येयं तमहं प्राज्ञं
तुलाधारं यशस्विनं ।। इति ब्रुवाणं तमृषिं रक्षांस्युद्धृत्य सागरात् ।। अब्रुवन्गच्छ पंथानमास्थाय द्विजसत्तम ।। इत्युक्तो
जाजलिर्भूतैर्जगाम विमनास्तदा ।। वाराणस्यां तुलाधारं समासाद्याब्रवीदिदं ।। ।। युधिष्ठिर उवाच ।। ।।

श्री

किंरूतं दुःकृते तात कर्मजाजलिना पुरा॥ येन सिद्धिं परां प्राप्तस्तन्मे व्याख्यातुमर्हसि॥ ॥भीष्मः॥ ॥अतीव तपसा युक्तो
घोरेण स बभूव ह॥ तथोपस्पर्शनरतः सायंप्रातर्महातपाः॥ अग्नीर परिचरन्सम्यक्स्वाध्यायपरमो द्विजः॥ वानप्रस्थवि
धानज्ञो जाजलिर्ज्वलितः श्रिया॥ वने तपस्यतिष्ठं स न च धर्ममवेक्षत॥ वर्षास्वाकाशशायी च हेमंते जलसंश्रयः॥ वा
तातपसहो ग्रीष्मे न चाधर्ममविंदत॥ दुःखशय्याश्च विविधा भूमौ च परिवर्तनं॥ ततः कदाचित्समुनिर्वर्षास्वाकाशमास्थि
तः॥ अंतरिक्षाज्जलं मूर्ध्ना प्रत्यगृह्णान्मुहुर्मुहुः॥ अथ तस्य जटाः क्लिन्ना बभूवुर्ग्रथिता प्रभो॥ अरण्यगमनान्नित्यं म
लिनो मलसंयुतः॥ स कदाचिन्निराहारो वायुभक्षो महातपाः॥ तस्थौ काष्ठवदव्यग्रो न चचाल च कहिचित्॥ तस्य स्म स्था
णुभूतस्य निर्विचेष्टस्य भारत॥ कुलिंगशकुनौ राजन्नीडं शिरसि चक्रतुः॥ स तौ दयावान्ब्रह्मर्षिरुपप्रेक्षत दंपती
॥ कुर्वाणौ नीडकं तत्र जटासु तृणतंतुभिः॥ यदा स न चलत्येव स्थाणुभूतो महातपाः॥ ततस्तौ च वसुविश्वस्तौ सुखं तत्रो
षतुस्तदा॥ अतीतास्वथ वर्षासु शरत्कालउपस्थिते॥ प्राजापत्येन विधिना विश्वासात्काममोहितौ॥ तत्रापातयतां राजञ्शि
रस्यंडानि खेचरौ॥ तान्यबुध्यत तेजस्वी स विप्रः संशितव्रतः॥ बुध्वा च स महातेजा न चचाले न च जाजलिः॥ धर्मे कृतमना
नित्यं माधर्मं स तु रोचयत्॥ अहन्यहन्निचागम्य ततस्तौ तस्य मूर्धनि॥ आश्वासितौ निवसतां संप्रहृष्टौ तदा विभो॥ अं
डेभ्यः स्वथ पुष्टेभ्यः प्रजायंते शकुंतकाः॥ व्यवर्धेत च तत्रैव न चाकंपत जाजलिः॥ स रक्षमाणस्त्वंडानि कुलिंगानां यतव्र

तः॥ तथैव तस्थौ धर्मात्मा निर्विचेष्टः समाहितः॥ ततस्तु कालसमये वभूवुस्तेय पक्षिणः॥ बुबुधे तांश्च स मुनिर्जात पक्षा
न्स कुलिंगकान्॥ ततः कदाचित्तांस्तत्र पश्यन् पक्षान्यतव्रतः॥ बभूव परमप्रीतस्तदा मतिमतां वरः॥ तथा तानपि सं
वृद्धान्दद्दृष्ट्वा प्लुवतां मुदं॥ शकुनौ निर्भयौ तत्रूषतुश्चात्मजैः सह॥ जातपक्षांश्च सोपश्यद्दुड्डीनान्पुनरागतान्॥
सायं सायं द्विजान्विप्रो न चाकंपत जाजलिः॥ कदाचित्पुनरभ्येत्य पुनर्गच्छंति संततं॥ त्यक्ता मातापितृभ्यां ते न चाकंपत जा प
जलिः॥ तथा दिवससंचारी गत्वा सायं पुनर्नृप॥ उपावर्तंत तत्रैव निवासार्थं शकुंतकाः॥ कदाचिद्दिवसान्पंच समुत्
त्य विहंगमाः॥ षष्ठे हनि समाजग्मुर्न चाकंपत जाजलिः॥ क्रमेण च पुनः सर्वे दिवसान्सुबहून्यथ॥ नोपावर्तंत शकु
ना जातप्राणा गतास्ते यदा॥ कदाचिन्मासमात्रेण समुत्पत्य विहंगमाः॥ नैवागच्छंस्ततो राजन्प्रातिष्ठत्स जाजलिः॥ तत
स्तेषु प्रलीनेषु जाजलिर्जातविस्मयः॥ सिद्धोस्मीति मतिं चक्रे ततस्तं मान आविशत्॥ स तथा निर्गतान्दृष्ट्वा शकुंता
न्नियतव्रतः॥ संभावितात्मा संभाव्य भृशं प्रीतमनाभवत्॥ स नद्यां समुपस्पृश्य तर्पयित्वा हुताशनं॥ उदयंतमथा
दित्यमुपातिष्ठन्महातपाः॥ संभाव्य चटकान्मूर्ध्नि जाजलिर्जपतांवरः॥ आस्फोटयत्तदाकाशे धर्मः प्राप्तो मयेति वै॥
अथांतरिक्षे वागासीत्तां स शुश्राव जाजलिः॥ धर्मेण न समस्त्वं वै तुलाधारस्य जाजले॥ वाराणस्यां महाप्राज्ञस्तुला
पारः प्रतिष्ठितः॥ सोप्येवं नार्हते वक्तुं यथा त्वं भाषसे द्विज॥ सोमर्षवशमापन्नस्तुलाधारदिदृक्षया॥ पृथिवीमचरज्जा

जद्रयत्रस्थायंग्रहोमुनिः॥ कालेन महता गछन्स तु वाराणशीं पुरीं॥ विक्रीणंतं च पण्यानि तुलाधारं ददर्श सः॥ सोपि
दृष्ट्वैव तं विप्रमायांतं भांडजीवनः॥ समुत्थाय सुसंहृष्टः स्वागतेनाभ्यपूजयत्॥ ॥तुलाधार उवाच॥ ॥आयानेवासिवि
दितो मम ब्रह्मन्न संशयः॥ ब्रवीमि यत्तु वचनं तच्छृणुष्व द्विजोत्तम॥ सागरानूपमाश्रित्य तपस्तप्तं त्वया महत्॥ न च ध
र्मस्य संज्ञां त्वं पुरा वेत्थ कथंचन॥ ततः सिद्धस्य तपसा तव विप्र शकुंतकाः॥ क्षिप्रं शिरस्यजायंत ते च संभाविता त्वया॥ जा
तपक्षा यदा च गताश्चारीमितस्ततः॥ मन्यमानस्ततो धर्मं चटकप्रभवं द्विज॥ खे वाचस्त्वं यदाश्रौषीर्मां प्रति द्विजसत्तम॥
अमर्षवशमापन्नस्ततः प्राप्तो भवानिह॥ करवाणि प्रियं किं ते तद्ब्रूहि द्विजसत्तम॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्मउवाच॥
इत्युक्तः स तदा तेन तुलाधारेण धीमता॥ प्रोवाच वचनं धीमान् जाजलिर्जपतांवरः॥ ॥जाजलिरुवाच॥ ॥विक्रीणानः
सर्वरसान्सर्वगंधांश्च वाणिज॥ वनस्पतीनोषधीश्च तेषां मूलफलानि च॥ अध्यगा नैष्ठिकीं बुद्धिं कुतस्त्वामिदमा
गतं॥ एतदाचक्ष्व मे सर्वं निखिलेन महामते॥ ॥भीष्मउवाच॥ ॥एवमुक्तस्तुलाधारो ब्राह्मणेन यशस्विना॥ उवाच
धर्मसूक्ष्माणि वैश्यो धर्मार्थतत्त्ववित्॥ जाजलिं कष्टतपसं ज्ञानतृप्तस्तदा नृप॥ ॥तुलाधार उवाच॥ ॥वेदाहं जाजले ध
र्मं सरहस्यं सनातनं॥ सर्वभूतहितं मैत्रं पुराणं यं जना विदुः॥ अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः॥ या वृत्तिः स परो
धर्मस्तेन जीवामि जाजले॥ परच्छिन्नैः काष्ठतृणैर्मयेदं शरणं कृतं॥ अलक्तं पद्मकं तुंगं गंधांश्चोच्चावचांस्तथा॥ रसांश्च

तोस्तान्विप्रर्षे मद्यवर्जान्बहूनहं ॥ क्रीत्वा वै प्रतिविक्रीणे परहस्तादमायया ॥ सर्वेषां यस्सुहृन्नित्यं सर्वेषां च हिते रतः ॥ कर्म
णा मनसा वाचा ना धर्मं वेद जाजले ॥ नानुरुध्ये विरुध्ये वा न द्वेष्मि न च कामये ॥ समोस्मि सर्वभूतेषु पश्य मे जाजले व्रतं ॥
तुला मे सर्वभूतेषु समा तिष्ठति जाजले ॥ नाहं परेषां कृत्यानि प्रशंसामि न गर्हये ॥ आकाशस्येव विप्रेंद्र पश्यल्लोकस्य
चित्रतां ॥ इति मां त्वं विजानीहि सर्वलोकस्य जाजले ॥ सम मे मतिमतां श्रेष्ठ समलोष्टाश्मकांचनं ॥ यथांधबधिरोन्मत्ता उ
च्छ्वासपरमाः सदा ॥ देवैरपिहितद्वारास्सोपमा पश्यतो मम ॥ यथा वृद्धातुरकृशा निस्पृहा विषयाइ प्रति ॥ तथार्थकाम
भोगेषु ममापि विगता स्पृहा ॥ यदा चायं न बिभेति यदा चास्मान्न बिभ्यति ॥ यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥ य
दा न कुरुते भावं सर्वभूतेषु पापकं ॥ कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ न भूतो न भविष्योस्ति न च धर्मोस्ति कश्च
न ॥ योभयः सर्वभूतानां स प्राप्नोत्यभयं पदं ॥ यस्मादुद्विजते लोकः सर्वो मृत्युमुखादिव ॥ वाक्क्रूराद्दंडपुरुषात्स प्रा
प्नोति महद्भयं ॥ यथावद्वर्तमानानां वृद्धानां पुत्रपौत्रिणां ॥ अनुवर्तामहे वृत्तमहिंस्राणां महात्मनां ॥ प्रनष्टः शाश्वतो
धर्मः सदाचारेण मोहितः ॥ तेन वैद्यस्तपस्वी वा ज्ञानवान्वा विमुह्यते ॥ आचाराज्जाजले प्राज्ञः क्षिप्रं धर्ममवाप्नुयात् ॥
एवं यः साधुभिर्दांतश्चरेदद्रोहचेतसा ॥ नद्यां चैव यथा काष्ठमुह्यमानं यदृच्छया ॥ यदृच्छयैव काष्ठेन संधिर्गच्छेत के
नचित् ॥ तत्रापराणि दारूणि संसृज्यंते परस्परं ॥ तृणकाष्ठकरीषाणि कदाचिन्न समीक्षया ॥ एवमेवायमा

मोक्षधर्म॰
९६

चानः प्रादुर्भूतो यतस्ततः॥ यस्मान्नोद्विजते भूतं जातु किंचित्कथंचन॥ अभयं सर्वभूतेभ्यो स प्राप्नोति तदा मुने॥ यस्मादुद्विज
ते विद्वन्सर्वलोको वृकादिव॥ क्रोशतस्तीरमासाद्य यथा सर्वे जले चराः॥ एवमेवायमाचारः प्रादुर्भूतो यतस्ततः॥ सहाय
वानिद्रव्यवांश्च सुभगोन्यो परस्तथा॥ ततस्तानेव कवयः शास्त्रे प्रवदंत्युत॥ कीर्त्यर्थमल्पहृल्लेखाः पटवः कृत्स्ननिर्ण
याः॥ तपोभिर्यज्ञदानैश्च वाक्यैः प्रज्ञाश्रितैस्तथा॥ प्राप्नोत्यभयदानस्य यद्यत्फलमिहाश्नुते॥ लोके यः सर्वभूतेभ्यो ददा
त्यभयदक्षिणां॥ स सर्वयज्ञैरीजानः प्राप्नोत्यभयदक्षिणां॥ न भूतानामहिंसाया ज्यायान्धर्मोस्ति कश्चन॥ यस्मान्नो
द्विजते भूतं जातु किंचित्कथंचन॥ सोभयं सर्वभूतेभ्यः संप्राप्नोति महामुने॥ यस्मादुद्विजते लोकः सर्पाद्वेश्मगता
दिव॥ न स धर्ममवाप्नोति इह लोके परत्र च॥ सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः॥ देवापि मार्गे मुह्यंति अ
पदस्य पदैषिणः॥ दानं भूताभयस्याहुः सर्वदानेभ्य उत्तमं॥ ब्रवीमि ते सत्यमिदं श्रद्दधस्व च जाजले॥ स एव सुभ
गो भूत्वा पुनर्भवति दुर्भगः॥ व्यापत्तिं कर्मणां दृष्ट्वा जुगुप्संति जनाः सदा॥ अकारणो हि नैवास्ति धर्मः सूक्ष्मो हि जाजले
॥ भूतभव्यार्थमेवेह धर्मप्रवचनं कृतं॥ सूक्ष्मत्वान्न स विज्ञातुं शक्यते बहुनिह्नवः॥ उपलभ्यांतरा चान्यानाचारा
नवबुध्यते॥ ये च छिंदंति वृषणान्ये च भिंदंति मस्तकं॥ वहंति महतो भारान्बध्नंति दमयंति च॥ हत्वा सत्वानि
खादंति तान्कथं न विगर्हसे॥ मानुषा मानुषानेव दासभावेन भुंजते॥ वधबंधविरोधेन कारयंति दिवानिशं॥ आ

९६

स्मिनश्चापि जानाति य दुःखं वधबंधने ।। पंचेंद्रियेषु भूतेषु सर्वं वसति दैवतं ।। आदित्यश्चंद्रमा वायुर्ब्रह्मा प्राणः क्रतुर्यमः ।।
तानि जीवानि विक्रीय कामृतेषु विचारणा ।। अजो ग्निर्वरुणो मेषः सूर्यो श्वः पृथिवी विराट् ।। वत्सश्च सोमो वै विक्रीये
तन्न सिध्यति ।। का तैले का घृते ब्रह्मन्मधून्यप्स्वोषधेषु च ।। अदंशमशके देशे सुखं संवर्द्धि धेनुर्व+तान्पशून् ।। तांश्च
मातुः प्रियान्जानन्नाक्रम्य बहुधा नराः ।। बहुदंशकुले देशे नयंति बहुकर्दमान् ।। वाहसंपीडिता धुर्याः सीदंत्यविधिना
परे ।। न मन्ये भ्रूणहत्यापि विशिष्टा तेन कर्मणा ।। कृषिं साध्विति मन्यंते सा च वृत्तिः सुदारुणा ।। भूमिं भूमिशयांश्चैव हंति का
ष्ठमयोमुखं ।। तथैवानडुहो युक्तान्समवेक्षस्व जाजले ।। अघ्न्या इति गवां नाम क एता हंतुमर्हति ।। महच्चाकारकुश
लं वृषं गां वालभेत्तु यः ।। ऋषयो यतयो ह्येतन्नहुषे प्रत्यवेदयन् ।। गां मातरं चाप्यवधीर्वृषभं च प्रजापतिं ।। अकार्यं नहु
षाकार्षीर्लप्स्यामस्त्वत्कृते व्यथां ।। शतं चैकं च रोगाणां सर्वभूतेषु पातयन् ।। ऋषयस्ते महाभागाः प्रजास्वेव हि जाजले ।।
भ्रूणहा नहुष त्वाहुर्न ते होष्यामहे हविः ।। इत्युक्त्वा ते महात्मानासर्वे तत्त्वार्थदर्शिनः ।। ऋषयो यतयः शांतास्तपसा प्र
त्यवेदयन् ।। ईदृशानशिवान्घोरानाचारानिह जाजले ।। केवलाचरितत्वात्तु निपुणो नावबुध्यसे ।। कारणाद्धर्ममन्विच्छे
न्न लोकचरितं चरेत् ।। यो हन्याद्यश्च मां स्तौति तत्रापि शृणु जाजले ।। समौ तावपि मे स्यातां न हि मे स्तः प्रियाप्रियं ।। एत
दीदृशकं धर्मं प्रशंसंति मनीषिणः ।। उपपत्त्या हि संपन्नो यतिभिश्चैव सेव्यते ।। सततं धर्मशीलैश्च निपुणेनोपलक्षि

तः॥ ॥मोक्षधर्मे॥ ॥जाजलिः॥ ॥यथाप्रवर्त्तितो धर्मस्तुलां धारयता त्वया॥ स्वर्गद्वारं च वृत्तिं च भूतानामवरोत्स्यते
॥कृष्या ह्यन्नं प्रभवति ततस्त्वमपि जीवसि॥ पशुभिश्चौषधीभिश्च मर्त्या जीवंति वाणिज॥ ततो यज्ञः प्रभवति नास्ति
क्यमपि जल्पसि॥ नहि वर्त्तेदयं लोको वार्त्तामुत्सृज्य केवलं॥ ॥तुलाधार उवाच॥ ॥वक्ष्यामि जाजले वृत्तिं नास्मि ब्रा
ह्मण नास्तिकः॥ न यज्ञं च विनिंदामि यज्ञवित्तु सुदुर्लभः॥ नमो ब्राह्मणयज्ञाय ये च यज्ञविदो जनाः॥ स्वयज्ञं ब्राह्मणा हि
त्वा क्षत्रयज्ञमिहास्थिताः॥ लुब्धैर्वित्तपरैर्ब्रह्मन्नास्तिकैः संप्रवर्त्तितं॥ वेदवादानविज्ञाय सत्याभासमिवानृतं॥ इदं दे
यमिदं देयमिति चायं चिकीर्षति॥ देवैः प्रवर्त्तितं विद्धि धर्मे हि ते च जाजले॥ अपना ह्यनवस्थैषा नास्मैके बुद्धिरीदृशी
॥अतः स्तैन्यं प्रभवति विकर्माणि च जाजले॥ यदेव सुकृतं हव्यं तेन तुष्यंति देवताः॥ नमस्कारेण हविषा स्वाध्यायैरौ
षधैस्तथा॥ पूजा स्याद्देवतानां हि यथाशास्त्रनिदर्शनं॥ इष्टापूर्त्ताद्ध्यसाधूनां विगुणा जायते प्रजाः॥ लुब्धेभ्यो जाय
ते लुब्धः समेभ्यो जायते समः॥ यजमानस्तथात्मानमृत्विजश्च तथा प्रजाः॥ यज्ञात्प्रजा संभवति नभसोंभ इवामलं॥
अग्नौ प्रास्ताहुतिर्ब्रह्मन्नादित्यमुपगच्छति॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥ तस्मात्सुनिष्ठिताः पूर्वे स
र्वान्कामांश्च लेभिरे॥ अकृष्टपच्या पृथिवी आशीर्भिर्वीरुधो भवान्॥ न ते यज्ञेष्वात्मसु वा फलं पश्यंति किंच

न॥ शंकमानाः फलं यज्ञे ये यजंते कथंचन॥ ज्ञानं तत्साधवो ऽप्रवर्त्ता लुब्धा वित्तप्रयोजनाः॥ स तथा पापकृतां लोका
न्गच्छेदशुभकर्मणा॥ प्रमाणमप्रमाणेन यः कुर्यादशुभं नरः॥ पापात्मा सो ऽकृतप्रज्ञः सदैवेह द्विजोत्तम॥ कर्त्त
व्यमिति कर्त्तव्यं वेत्ति वै ब्राह्मणो भयं॥ ब्रह्मैव वर्त्तते लोके नैव कर्त्तव्यता पुनः॥ विगुणं च पुनः कर्म ज्यायस्तदनुशुश्रुम
॥ सर्वभूतोपकारश्च फलभावे च संयमः॥ सत्ययज्ञा दमं यत्तो ऽर्थलुब्धात्मवृत्तयः॥ उत्पन्नत्यागिनः सर्वे जना आ
सन्नमत्सराः॥ क्षेत्रक्षेत्रज्ञतत्वज्ञाः स्वयज्ञपरिनिष्ठिताः॥ ब्राह्मं वेदमधीयंतस्तोषयंत्यमरानपि॥ अखिलं दैवतं स
र्वं ब्रह्म ब्राह्मणे संश्रितं॥ तृप्यंति तृप्यतो देवास्तृप्तास्तृप्तस्य जाजले॥ यथा सर्वरसैस्तृप्तो नाभिनंदति किंचन॥ त
था प्रज्ञानतृप्तस्य नित्यतृप्तिसुखोदया॥ धर्मारामा धर्मसुखाः कृत्स्नव्यवसितास्तथा॥ अस्ति नस्तत्ततो भूय इ
ति प्राज्ञस्य वीक्ष्यते॥ ज्ञानविज्ञानिनः केचित्परं पारं तितीर्षवः॥ अतीव पुण्यदं पुण्यं पुण्याभिजनशोभितः॥ यत्र ग
त्वा न शोचंति न च्यवंति व्यथंति वा॥ ते तु तद्ब्रह्मणः स्थानं प्राप्नुवंतीह सात्विकाः॥ नैव ते स्वर्गमिच्छंति न यजंति यशोधनाः॥ सतां
वर्त्मानुवर्त्तंते यजंते चाविहिंसकाः॥ वनस्पतीनोषधीश्च फलमूलं च ते विदुः॥ न चैतानृत्विजो लुब्धा याजयंति फलार्थिनः॥ स्व
एवार्थं विकुर्वाणा यज्ञं चक्रुः पुनर्द्विजाः॥ परिनिष्ठितकर्माणः प्रजानुग्रहकाम्यया॥ तस्मात्तानृत्विजो लुब्धा उद्धारपामयंत्यशुभान्न
रान्॥ प्रापयेयुः प्रजाः स्वर्गं स्वधर्माचरणेन वै॥ इति मे वर्त्तते बुद्धिः समा सर्वत्र जाजले॥ यानि यज्ञेष्विहेज्यंते सदा प्रा

ह्याद्विजर्षभाः॥ तेन ते देवयानेन पथा यांति महामुने॥ आवृत्तिस्तस्य नैकस्य नास्त्यावृत्तिर्मनीषिणां॥ उभौ तौ देवयानेन ग
पतो जाजले पथा॥ स्वयं चैषामनडुहो युज्यंति च हंति च॥ स्वयमुस्त्राश्च दुह्यंते मनःसंकल्पसिद्धिभिः॥ स्वयं यूपानुपाद
यय जंते स्वाप्तदक्षिणैः॥ यस्तथाभावितात्मा स्यात्स गामालब्धुमर्हति॥ ओषधीभिस्तथा ब्रह्मन्यजेरंस्ते न तादृशाः॥
दृत्यागं पुरस्कृत्य तादृशं प्रब्रवीमि ते॥ निराशिषमनारंभं निर्नमस्कारमस्तुतिं॥ अक्षीणं क्षीणकर्माणं देवा ब्राह्मणं
विदुः॥ नाश्रावयन्न च यजन्न ददद्ब्राह्मणेषु च॥ काम्यां वृत्तिं लिप्स्यमानः कां गतिं याति जाजले॥ इदं तु दैवतं कृत्वा तथा य
ज्ञमवाप्नुयात्॥ ॥जाजलिरुवाच॥ ॥न वै मुनीनां शृणुमः स्म तत्त्वं पृच्छामि ते वाणिज कष्टमेतत्॥ पूर्वे पूर्वे चास्य नावे
द्यमाम्नायपरं तमृषयः स्वा पश्यंति॥ यस्मिन्नेवात्मतीर्थेन पशवः प्राप्नुयुः सुखं॥ अथ स्म कर्मणा केन वणिज
प्राप्नुयात्सुखं॥ शंस मे तन्महाप्राज्ञ भृशं वै श्रद्दधामि ते॥ ॥तुलाधारः॥ ॥उत यज्ञा उतायज्ञा मखं नार्हंति ते क्व
चित्॥ आज्येन पयसा दध्ना पूर्णाहुत्या विशेषतः॥ बालैः शृंगेण पादेन संभवत्येव गोर्मखं॥ पत्नी चानेन विधिना
प्रकरोति नियोजयन्॥ इष्टं तु दैवतं कृत्वा यथा यज्ञमवाप्नुतु॥ पुरोडाशो हि सर्वेषां पशूनां मेध्य उच्यते॥ सर्वा नद्यः
ज सरस्वत्यः सर्वे पुण्याः शिलोच्चयाः॥ जाजले तीर्थमात्मैव मास्म देशातिथिर्भव॥ एतानीदृशकान्धर्मा ९८
न्नाचरन्निह जाजले॥ कारणैर्धर्ममन्विच्छन्स लोकानाप्नुते शुभान्॥ ॥भीष्मउवाच॥ ॥एतानीदृशा

कारध मंस्तुलाधारः प्रशंससेति॥ उपपत्यासिसंपन्नान्नित्यं सद्भिर्निषेवितान्॥ ॥शांतौ मोक्षधर्मे॥ ॥तुलाधा
रउवाच॥ सद्भिर्वा यदि वासद्भिः पंथानमिममास्थितं॥ प्रत्यक्षं क्रियतां साधु ततो ज्ञास्यसि तद्यथा॥ एते शकुंता बहवः
समंताद्विचरंति हि॥ तवोत्तमांगे संभूताः श्येनाश्चान्याश्च जातयः॥ आहूयैतान्महाब्रह्मन्विशमानांस्ततस्ततः॥
पश्येमान्हस्तपादेषु श्लिष्टान्देहेषु सर्वतः॥ संभावयंति पितरं त्वया संभाविताः खगाः॥ असंशयं पिता वै त्वं
पुत्रानाह्वयजाजले॥ ॥भीष्म उवाच॥ ॥ततो जाजलिनाते न समाहूताः पतत्रिणः॥ वाचमुच्चारयंति स्म धर्मस्य
वचनात्किल॥ अहिंसादिकृतं कर्म इह चैव परत्र च॥ श्रद्धां निहंति वै ब्रह्मन्सा हता हंति तं नरं॥ समानां श्रद्द
धानानां संयतानां सुचेतसां॥ कुर्वतां यज्ञ इत्येवं न यज्ञो जातु नेष्यते॥ श्रद्धा वैवस्वती देवी सूर्यस्य दुहिता द्विज॥
सावित्री प्रसवित्री च बहिर्वाङ्मनसी ततः॥ वाग्वृद्धं त्रायते श्रद्धा मनो वृद्धं च भारत॥ श्रद्धा वृद्धं वाङ्मनसी
न यज्ञस्त्रातुमर्हति॥ अत्र गाथा ब्रह्मगीताः कीर्तयंति पुराविदः॥ शुचेरश्रद्दधानस्य श्रद्दधानस्य चाशुचेः॥
देवा वित्तममन्यंत सदृशं यज्ञकर्मणि॥ श्रोत्रियस्य कदर्यस्य वदान्यस्य वार्द्धुषेः॥ मीमांसित्वोभयं देवाः
सममन्नमकल्पयन्॥ प्रजापतिस्तानुवाच विषमं कृतमित्युत॥ श्रद्धापूतं वदान्यस्य हतमश्रद्धयेत

रत्॥ भोज्यमन्नं वदान्यस्य कदर्यस्य न वार्द्धुषेः॥ अश्रद्दधान एवैको देवानां नार्हति हविः॥ तस्यैवान्नमभोक्तव्यमिति
धर्मविदो विदुः॥ अश्रद्धा परमं पापं श्रद्धा पापप्रमोचनी॥ जहाति पापं श्रद्धावान्सर्पो जीर्णामिव त्वचं॥ ज्यायसी
या पवित्राणां निवृत्तिः श्रद्धया सह॥ निवृत्तशीलदोषो यः श्रद्धावान्पूत एव सः॥ किं तस्य तपसा कार्यं किं वृत्तेन कि
मात्मना॥ श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः॥ इति धर्मः समाख्यातः सद्भिर्धर्मार्थदर्शिभिः॥ वयं जिज्ञा
समानास्तु संप्राप्ता धर्मदर्शनात्॥ श्रद्धां कुरु महाप्राज्ञ ततः प्राप्स्यसि यत्परं॥ श्रद्धावाञ्छ्रद्दधानश्च धर्मश्चैव
हि जाजले॥ स्ववर्त्मनि स्थितश्चैव गरीयान्नेव जाजले॥ ॥भीष्म उवाच॥ ॥ततोचिरेण कालेन तुलाधारः स ए
व च॥ दिवं गत्वा महाप्राज्ञौ विहरेतां यथासुखं॥ स्वं स्वं स्थानमुपागम्य स्वकर्मफलनिर्जितं॥ एवं बहुविधार्थं च
तुलाधारेण भाषितं॥ सम्यक्चैवमुपालब्धो धर्मश्चोक्तः सनातनः॥ तस्य विख्यातवीर्यस्य श्रुत्वा वाक्यानि स
द्विजः॥ तुलाधारस्य कौंतेय शांतिमेवाभ्यपद्यत॥ एवं बहुमतार्थं च तुलाधारेण भाषितं॥ यथा यस्योपदेशेन
किं भूयः श्रोतुमिच्छति॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं॥
प्रजानामनुकंतीव पुल्पदं पुण्यपुण्याभिजनशोभिनः॥ पार्थगीतं राज्ञा विचक्षुणा॥ छिन्नस्थूणं वृषं दृष्ट्वा विरा

रंच गवां वृषं ॥ गोग्रहे यज्ञवाटस्थे प्रेक्ष्यमाणः स पार्थिवः ॥ स्वस्ति गोभ्योस्तु लोकेभ्यो ततो निर्वचनं कृतं ॥ हिंसायां
हि प्रवृत्तायामाशिरेषानुकल्पिता ॥ अव्यावस्थित मर्यादैर्विमूढैर्नास्तिकैर्नरैः ॥ संशयात्मभिरव्यक्तैर्हिंसा सम
नुवर्णिता ॥ सर्वकर्मस्वहिंसा च धर्मात्मा मनुरब्रवीत् ॥ कामकाराद्विहिंसंति बहिर्वेद्यां पशून्नराः ॥ तस्मात्प्रमाप
तः कार्यो धर्मः सूक्ष्मो विजानता ॥ अहिंसा सर्वभूतेभ्यो धर्मेभ्यो ज्यायसी मता ॥ उपोष्य शंसितो भूत्वा हित्वा वेदकृ
ताश्रुतिः ॥ आचार इत्यनाचाराः कृपणाः फलहेतवः ॥ यदि यज्ञांश्च वृक्षांश्च यूपांश्चोद्दिश्य मानवाः ॥ वृथा मांसा
नि खादंति नैष धर्मः प्रशस्यते ॥ सुरां मत्स्यान्मधु मांसमासवं कृशरौदनं ॥ धूर्तैः प्रवर्त्तितं ह्येतन्नैतद्वेदेषु कल्पि
लो तं ॥ मानान्मोहाच्च भाच्च लौल्यमेतत्प्रकल्पितं ॥ विष्णुमेवाभिजानंति सर्वयज्ञेषु ब्राह्मणाः ॥ पायसैः सुमनो
भिश्च तस्यापि यजनं स्मृतं ॥ यज्ञियाश्चैव ये वृक्षा वेदेषु परिकल्पिताः ॥ यच्चापि किंचित्कर्त्तव्यमन्यं चोक्षैः सु
संस्कृतं ॥ महासत्वैः शुद्धभावैः सर्वं देवार्हमेव तत् ॥ ॥युधिष्ठिरः ॥ ॥शरीरमापदश्चापि विवदंत्य विहिंसतः
॥ कथं यात्रा शरीरस्य निरारंभस्य सेत्स्यते ॥ ॥भीष्म उवाच ॥ ॥यथा शरीरं न ग्लायेन्नेयान्मृत्युवशं
यथा ॥ तथा कर्मसु वर्त्तेत समर्थो धर्ममाचरेत् ॥ ॥शांतौ मोक्षधर्मे ॥ ॥युधिष्ठिर उवाच ॥ ॥कथं का

र्यं परीक्षेत शीघ्रं वाथ्य चिरेण वा ।। सर्वथा कार्यदुर्गेस्मिन् भवान्नः परमो गुरुः ।। ।।भीष्म उवाच ।। ।।अत्राप्युदाहरंती
ममितिहासं पुरातनं ।। चिरकारेस्तु यत्वृत्तं तमांगिरसे कुले ।। चिरकारिक भद्रं ते भद्रं ते चिरकारिक ।। चिरका
री हि मेधावी नापराध्यति कर्मसु ।। चिरकारी महाप्राज्ञो गौतमस्याभवत्सुतः ।। चिरेण सर्वकार्याणि विमृष्यार्थान्
प्रपद्यते ।। चिरं संचिंतयन्नर्थांश्चिरं जाग्रच्चिरं स्वपन् ।। चिरं कार्याभिपत्तिश्च चिरकारी तथोच्यते ।। अल
संग्रहणप्राप्तो दुर्मेधावी तथोच्यते ।। बुद्धिलाघवयुक्तेन जनेनादीर्घदर्शिना ।। व्यभिचारे तु कस्मिंश्चिद्व्यतिक्र
म्यापरान्सुतान् ।। पित्रोक्तः कुपितेनाथ जहीमां जननीमिति ।। स तथेति चिरेणोक्त्वा स्वभावाच्चिरकारिकः ।।
विमृष्य चिरकारित्वाच्चिंतयामास वै चिरं ।। पितुराज्ञां कथं कुर्यां न हन्यां मातरं कथं ।। कथं धर्मछलेनास्मिन्नि
मज्जेयमसाधुवत् ।। पितुराज्ञा परो धर्मः स्वधर्मो मातृरक्षणं ।। अस्वतंत्रं च पुत्रत्वं किं तु मां नानुपीडयेत् ।। स्त्रि
यं हत्वा मातरं च को हि जातु सुखी भवेत् ।। पितरं चाप्यवज्ञाय कः प्रतिष्ठामवाप्नुयात् ।। अनवज्ञा पितुर्युक्ता धार
णं मातृरक्षणं ।। युक्तक्षमावुभावेतौ नातिवर्तेत मां कथं ।। पिता ह्यात्मानमाधत्ते जायायां जज्ञिवानिति ।। शील
चारित्रगोत्रस्य धारणार्थं कुलस्य च ।। सोहमात्मा स्वयं पित्रा पुत्रत्वेन कृतः पुनः ।। विज्ञानं मे कथं न स्याद्बुबुधे

शास्त्रसंभवं ।। जातकर्माणि यस्याह पिता यच्चोपकर्मणि ।। पर्याप्तः सदृढीकारः पितुर्गौरवनिश्चये ।। गुरुरग्र्यः परो
धर्मः पोषकाध्यापनान्वितः ।। पिता यदाह धर्मः स वेदेष्वपि सुनिश्चितः ।। प्रीतिमात्रं पितुः पुत्रः सर्वं पुत्रस्य वै पि
ता ।। शरीरादीनि देयानि पिता त्वेकः प्रयच्छति ।। तस्मात्पितुर्वचः कार्यं न विचार्यं कदाचन ।। पातकान्यपि पूयंते पि
तुः शासनकारिणः ।। भोग्ये भोज्ये पुंसवने सर्वलोकनिदर्शने ।। भर्त्रा चैव समायोगे सीमंतोन्नयने तथा ।। पि
ता धर्मः पिता स्वर्गः पिता हि परमं तपः ।। पितरि प्रीतिमापन्ने सर्वाः प्रीयंति देवताः ।। आशिषस्ता भजंत्येनं पु
रुषं प्राह याः पिता ।। निष्कृतिः सर्वपापानां पिता यच्चाभिनंदति ।। मुच्यते बंधनात्पुष्पं फलं वृक्षात्प्रमुच्यते ।।
क्लिश्यन्नपि सुतं स्नेहैः पिता पुत्रं न मुंचति ।। एतद्विचिंतितं तावत्पुत्रस्य पितृगौरवं ।। पिता ह्यल्पं तु मे स्था
नं चिंतयिष्यामि मातरं ।। यो ह्ययं मयि संघातो मर्त्यत्वे पांचभौतिकः ।। अस्य मे जननी हेतुः पावकस्य यथार
णिः ।। माता देहारणिः पुंसां सर्वस्यार्तस्य निर्वृतिः ।। मातृलाभे सनाथत्वमन्यथात्वे विपर्यये ।। न च शोच
ति नाप्येवं स्थाविर्यमपकर्षति ।। श्रिया हीनोपि यो गेहमंबेति प्रतिपद्यते ।। पुत्रपौत्रोपपन्नोहि जननीयः
समाश्रितः ।। अपि वर्षशतस्यांते स द्विहायनवच्चरेत् ।। समर्थं वासमर्थं वा कृशं वाप्यकृशं तथा ।। रक्षत्ये

राम

वसुतं मासा नान्यः पोष्टा विधानतः॥ तदा स वृद्धो भवति तदाप्रवति दुःखितः॥ तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते॥ नास्ति मातृसमा छाया नास्ति मातृसमा गतिः॥ नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रिया॥ कुक्षिसंधारणाद्धात्री जननाज्जननी स्मृता। अंगानां वर्द्धनादंबा वीरसूत्वेन वीरसूः॥ शिशोः शिश्रूषणाच्छुश्रूर्माता देहमनंतरं॥ चेतनावान्नरो हंन्याद्यस्य नाश्रूषिरशिरः॥ दंपत्योः पाणिसंश्लेषे वोभिसंधिः कृतः किल॥ तन्माता वा पिता वेति भूतार्थो मातरि स्थितः॥ माता जानाति यद्गोत्रं माता जानाति यस्य सः॥ मातुर्भर्च पामात्रे प्रीतिः स्नेह पितुः प्रजाः॥ पाणिबंधं स्वयं कृत्वा सहधर्ममुपेत्य च॥ यदि यास्यंति पुरुषाः स्त्रियो नार्हंति याच्यतां॥ भरणाद्धि स्त्रिया भर्त्ता पस्याच्चैव स्त्रिया गतिः॥ गुणस्यास्य निवृत्तौ तु न भर्त्ता न पुनः पतिः॥ एवं स्त्री नापराध्नोति नर एवापराध्यति॥ व्युच्चरंश्च महादोषं नर एवापराध्यति॥ स्त्रिया हि परमो भर्त्ता दैवतं परमं स्मृतं॥ तस्यात्मना तु सदृशमात्मानं परमं ददौ॥ नापराधोस्ति नारीणां नर एवापराध्यति॥ सर्वकार्यापराध्यत्वान्नापराध्यंति चांगनाः॥ यश्च नोक्तो यं निर्देशः स्त्रिया मैथुनरत्तये॥ तस्य तानयतो व्यक्तमधर्मो नास्ति संशयः॥ एवं नारीं मातरं च गौरवे चाधिके स्थितां॥ अवध्यां तु विजानीयुः पशवोप्यविचक्षणाः॥

देवतानां समाधाय एकस्थं पितरं विदुः॥ मर्त्यानां देवतानां च स्नेहादभ्येति मातरं॥ एवं विमृशतस्तस्य चिरकारितया
बहु॥ दीर्घः कालो व्यतिक्रांतस्ततोस्याभ्यागमत्पिता॥ मेधातिथिर्महाप्राज्ञो गौतमस्तपसि स्थितः॥ विमृश्य तेन काले
पत्न्या नं संस्थाव्यतिक्रमं॥ सोब्रवीद्भृशसंततो दुःखेनाश्रूणि वर्त्तयन्॥ श्रुतधैर्यप्रसादेन पतोश्चौंपमुपागतः॥ आश्रमे म
मसंप्राप्तस्त्रिलोकेशः पुरंदरः॥ अतिथिव्रतमास्थाय ब्राह्मणं रूपमास्थितः॥ स मया सांत्वितो वाग्भिः स्वागतेनाभि
पूजितः॥ अर्घ्यं पाद्यं यथान्यायं मया च प्रतिपादितः॥ परवानस्मि चेत्युक्तः प्रणयिष्यति तेन च॥ अत्र चाकुशले जाते
स्त्रिया नास्ति व्यतिक्रमः॥ एवं न स्त्री न चैवाहं नाध्वगस्त्रिदशेश्वरः॥ अपराध्यति धर्मस्य प्रमादस्त्वपराध्यति॥ ईर्ष्या
जं व्यसनं प्राहुस्तेन चैवोर्ध्वरेतसः॥ ईर्ष्यया त्वहमाक्षिप्तो मग्नो दुष्कृतसागरे॥ हत्वा साध्वीं च नारीं च व्यसनित्वाच्च वा
सितां॥ भर्त्तव्यत्वेन भार्यां च को नु मां तारयिष्यति॥ अंतरेण मयाज्ञप्तश्चिरकारी ह्युदारधीः॥ यद्यद्य चिरकारी स्यात्स
मां त्रायेत पातकात्॥ चिरकारिक भद्रं ते भद्रं ते चिरकारिका॥ यद्यद्य चिरकारित्वं ततोसि चिरकारिकः॥ त्राहि मां मा
तरं चैव तपो यच्चार्जितं मया॥ आत्मानं पातकेभ्यश्च भवाद्य चिरकारिकः॥ सहजं चिरकारित्वं मतिप्रज्ञतया तव॥ स
फलं तत्तथा तेस्तु भवाद्य चिरकापकारिकः॥ चिरमाशंसितो मात्रा चिरं गर्भेण धारितः॥ सफलं चिरकारित्वं कुरु त्वं चिरका
रिक॥ चिरायते च संतापः चिरं स्वपिति धारितः॥ आवयोश्चिरसंतापादवेक्ष्य चिरकारिक॥ एवं स दुःखितो राजन्मह

र्षिर्गौतमस्तदा ॥ चिरकारि ददर्शाथ पुत्रं स्थितमथांतिके ॥ चिरकारी तु पितरं दृष्ट्वा परमदुःखितः ॥ शास्त्रं त्यक्त्वा ततो मू
र्ध्ना प्रसादायोपचक्रमे ॥ गौतमस्तं ततो दृष्ट्वा शिरसा पतितं भुवि ॥ पत्नीं चैव निराकारां परामभ्यागमन्मुदं ॥ न हि
सा तेन संभेदं पत्नी नीता महात्मना ॥ विजने नाश्रमस्थेन पुत्रश्चापि समाहितः ॥ हन्याइति समादेशः दशस्त्रपाणौ
सुते स्थिते ॥ विनीते प्रसवस्यार्थे विवासे चात्मकर्मसु ॥ बुद्धिश्चासीत्सुतं दृष्ट्वा पितुश्चरणयोर्नतं ॥ शास्त्रग्रहणचापल्यं
संवृणोति भयादिति ॥ ततः पित्रा चिरं स्तुत्वा चिरं चाघ्राय मूर्धनि ॥ चिरं दोर्भ्यां परिष्वज्य चिरंजीवेत्युदाहृतः ॥ ए
वं स गौतमः पुत्रं प्रीतिहर्षगुणान्वितः ॥ अभिनंद्य महाप्राज्ञ इदं वचनमब्रवीत् ॥ चिरकारिक भद्रं ते चिरकारी चि
रं भव ॥ चिराय यदि ते सौम्य चिरमस्मि न दुःखितः ॥ गाथाश्चाप्यब्रवीद्विद्वान् गौतमो मुनिसत्तम ॥ चिरकारिषु धीरे
षु गुणोहि शसमाश्रया ॥ चिरेण मित्रं बध्नीयाच्चिरेण च कृतं त्यजेत् ॥ चिरेण हि कृतं मित्रं चिरं धारणमर्हति ॥
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ॥ अप्रिये चैव कर्त्तव्ये चिरकारी प्रशस्यते ॥ बंधूनां सुहृदां चैव भृत्यानां स्त्री
जनस्य च ॥ अव्यक्तेष्वपराधेषु चिरकारी प्रशस्यते ॥ एवं स गौतमस्तत्र प्रीतः पुत्रस्य भारत ॥ कर्मणा तेन कौरव्य
चिरकारितया तथा ॥ एवं सर्वेषु कार्येषु विमृश्य पुरुषस्ततः ॥ चिरं धारयते रोषं चिरं कर्म नियच्छतः ॥ पश्चात्तापकरं
कर्म न किंचिदुपपद्यते ॥ चिरं वृद्धानुपासीत चिरमन्वास्य पूजयेत् ॥ चिरं धर्मं निषेवेत कुर्याच्चान्वेषणं चिरं ॥ चिर

मन्वानस्य विदुषाश्चिरं शिष्टानिषेव्य च॥ चिरं विनीय चात्मानं चिरं यात्यनवज्ञतां॥ ब्रुवतश्च परस्यापि वाक्यं धर्मोपसंहि-
तं॥ चिरं पृष्टोपि च ब्रूयाच्चिरं न परितप्यते॥ उपास्य बहुलास्तस्मिन्नाश्रमेषु महातपाः॥ समासर्गं गतो विप्रः पुत्रेणास-
हितस्तदा॥ ॥शांतौ मोक्षधर्मे॥ ॥युधिष्ठिरः॥ ॥कथं राजा प्रजा रक्षेन्नच किंचित्स घातयेत्॥ पृच्छामि त्वां सतां श्रे-
ष्ठ तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं॥ द्युमत्सेनस्य संवादं राज्ञा सत्यवता
सह॥ अव्याहृतं व्याजहार सत्यवानिति नः श्रुतं॥ वधायोन्नीयमानस्य पितुरेवानुशासनात्॥ अधर्मतां याति धर्मो यात्य-
धर्मश्च धर्मतां॥ वधो नाम भवेद्धर्मो नैतद्भवितुमर्हति॥ ॥द्युमत्सेन उवाच॥ ॥अथ चेदवधो धर्मो धर्मः को जातु विद्-
वेत्॥ दस्यवश्चेन्न हन्येरन्सत्यवन्संकरो भवेत्॥ ममेदमिति नास्यैतत्प्रवर्तेत कलौ युगे॥ लोकयात्रा न चैव स्याद् अथ चे-
द्वेत्थ शंस नः॥ ॥सत्यवानुवाच॥ ॥सर्व एव त्रयो वर्णाः कार्या ब्राह्मणपावधनाः॥ धर्मपाशनिबद्धानामन्योप्येवं चरिष्यति
॥ यो यस्तेषामपचरेत्तमाचक्षीत वै द्विजः॥ अयं मे न शृणोतीति तस्मिन्राजा प्रधारयेत्॥ सत्वभेदेन यच्छास्त्रं तत्कार्यं
नान्यथाविधं॥ असमीक्ष्यैव कर्माणि नीतिशास्त्रं यथाविधि॥ दस्यून्हिनस्ति वै राजा भूयसो वाप्यनागसः॥ भार्या मा-
ता पिता पुत्रो हन्यते पुरुषेपाते॥ परेणापकृते राजा तस्मात्सम्यक्प्रधारयेत्॥ असाधुश्चैव पुरुषो लभते शीमेकदा॥
साधोश्चापि ह्यसाधुभ्यः शोभनाज्जायते प्रजा॥ न मूलघातः कर्तव्यो नैष धर्मः सनातनः॥ अपि खल्ववधेनैव प्राय

श्चित्तं विधीयते ॥ उद्वेजनेन बंधेन विरूपकरणेन च ॥ वधदंडेन ते क्लेश्या न पुरोहितसंपदा ॥ यदा पुरोहितं वा ते पर्य्येयुः श
रणैषिणः ॥ करिष्यामः पुनर्ब्रह्मन्न पापमिति वादिनः ॥ तदा विसर्गमर्हास्युरितीदं धातृशासनं ॥ बिभ्रद्दंडाजिनं मुं
डो ब्राह्मणोर्हति शासनं ॥ गरीयांसो गरीयांसमपराधे पुनःपुनः ॥ तदा विसर्गमर्हंति न यथा प्रथमे तथा ॥ ॥द्युमत्सेन
२ उवाच ॥ ॥यत्र तत्रैव शक्येरन्संयंतु समये प्रजाः ॥ स तावान्प्रोच्यते धर्मो यावन्न प्रतिलंघ्यते ॥ अहन्यमाने तु पुनः स
र्वमिव पराभवेत् ॥ पूर्वे पूर्वतने चैव सुशास्या ह्यभवन्प्रजाः ॥ मृदवः सत्यभूयिष्ठा अल्पद्रोहाल्पमन्यवः ॥ पुरा धिग्दंड ए
वासीद्वाग्दंडस्तदनंतरं ॥ आसीदादानदंडोपि वधदंडोद्य वर्त्तते ॥ वधेनापि न शक्यंते नियंतुमपरे जनाः ॥ पद्मं श्मशाना
दादत्ते पिशाचाच्चापि दैवतं ॥ तेषु यः समयं कश्चित्कुर्वीत हतबुद्धिषु ॥ नैव दस्युर्मनुष्याणां न देवानामिति श्रुतिः ॥ न गांध
र्वपितृणां च कः कस्येह न कश्चन ॥ ॥सत्यवानुवाच ॥ ॥तान्न शक्नोषि चेत्साधून्परित्रातुमहिंसया ॥ कस्यचिद्भूतभव्य
स्य लाभेनांतं तथा कुरु ॥ राजानो लोकयात्रार्थं तप्यंते परमं तपः ॥ तेपत्रपंति तादृग्भ्यस्तथा वृत्ता भवंति च ॥ वित्रास्यमा
नास्सुकृतो न कामाद्घ्नंति दुष्कृतान् ॥ सुकृतेनैव राजानो भूयिष्ठं शासते प्रजाः ॥ श्रेयसः श्रेयसीमेवं वृत्तं लोकोनुवर्त्त
ते ॥ सदैव हि गुरोर्वृत्तमनुवर्त्तंति मानवाः ॥ आत्मानमसमाधाय समाधित्सति यः परान् ॥ विषयेष्विंद्रियवशं मानवाः
प्रहसंति तं ॥ यो राज्ञो दंभमोहेन किंचित्कुर्यादसांप्रतं ॥ सर्वोपायैर्नियम्यः स यथा पापान्निवर्त्तते ॥ आत्मैवादौ नियंतव्यो १०३

दुष्कृतं संन्नियच्छता ॥ दंडयेच्च महादंडैरपि बंधूननंतरान् ॥ एवं वै पापकृत्तु क्लीबो न मदुःखमृच्छति ॥ वर्द्धते तत्र पापानि धर्मोह्रा
स च ध्रुवं ॥ इति कारुण्यशीलस्तु विद्वान्वै ब्राह्मणोचशास्त् ॥ इति चैवानुशिष्टोस्मि पूर्वैस्तात पितामहैः ॥ आश्वासयद्भिः सुकृत
मनुक्रोशात्तथैव च ॥ एतत्प्रथमकल्पेन राजा कृतयुगेऽनयेत् ॥ पादेनानापि धर्मेण गच्छेत्रेतायुगे तथा ॥ द्वापरे तु द्विपादेन पा
देन त्वपरे युगे ॥ तथा कलियुगे प्राप्ते राज्ञो दुश्चरितेन ह ॥ भवेत्कालविशेषेण कला धर्मस्य षोडशी ॥ अथ प्रथमकल्पेन
सत्यसंकरतो भवेत् ॥ आयुः शक्तिं च कालं च निर्दिश्य तप आदिशेत् ॥ सत्याय हि यथा नेह जह्याद्धर्मफलं महत् ॥ भूतानामना
मनुकंपार्थं मनुः स्वायंभुवोब्रवीत् ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अविरोधेन भूतानां योगः षाड्गुण्यका
स्य रकः ॥ यस्यादुभयय धर्मस्तन्मे ब्रूहि पितामह ॥ गार्हस्थ्यं च धर्मस्य योगधर्मस्य चोभयोः ॥ अदूरसंप्रस्थितयोः
किंस्विच्छ्रेयः पितामह ॥ ॥ भीष्म उवाच ॥ ॥ उभौ धर्मौ महाभागावुभौ परमदुश्चरौ ॥ उभौ महाफलौ तौ तु सद्भिरा
चरिताविभौ ॥ अत्र ते वर्त्तयिष्यामि प्रामाण्यमुभयोस्तयोः ॥ शृणुष्वैकमनाः पार्थ छिन्नधर्मार्थसंशयं ॥ अत्राप्यु
दाहरंतीममितिहासं पुरातनं ॥ कपिलस्य गोश्च संवादं तन्निबोध युधिष्ठिर ॥ आम्नायमनुपश्यन्हि पुराणं शाश्व
तं ध्रुवं ॥ नहुषः पूर्वमालेभे त्वष्टुर्गामिति नः श्रुतं ॥ तां नियुक्तामदीनात्मा सत्वस्थः संयमे रतः ॥ ज्ञानवान्नियताहारो
ददर्श कपिलस्तदा ॥ स बुद्धिमुत्तमां प्राप्तो नैष्ठिकीमकुतोभयं ॥ सतीमशिथिलां सत्यां वेदा इत्यब्रवीत्सकृत् ॥ तांस्य तां

षिः स्यूमरश्मिः प्रविश्य यतिमब्रवीत्॥ भो न वेदा यदि मता धर्माः केनापरे इमताः॥ तपस्विनो धृतिमतः श्रुतिविज्ञानचक्षुषः॥ सर्वमार्षं हि मन्यंते व्याहृतं विदितात्मनः॥ तस्यैवं गततृष्णस्य विज्वरस्य निराशिषः॥ का विवक्षास्ति वेदेषु निरारंभस्य सर्वतः॥ ॥कपिलउ॥ ॥नाहं वेदान्विनिंदामि न विवक्ष्यामि कर्हिचित्॥ पृथगाश्रमिणां कर्माण्येकार्थानीति नः श्रुतं॥ गच्छत्येव परित्यागी वानप्रस्थश्च गच्छति॥ गृहस्थो ब्रह्मचारी च उभौ तावपि गच्छतः॥ देवयाना हि पंथानश्चत्वारः शाश्वता मताः॥ एषां ज्यायः कनीयस्त्वं फलेषूक्तं बलाबलं॥ एवं विदित्वा सर्वार्थानारभेतेति वैदिकं॥ नारभेतेति चान्यत्र नैष्ठिकी श्रूयते श्रुतिः॥ अनारंभे ह्यदोषः स्यादारंभे दोष उत्तमः॥ एवं स्थितस्य शास्त्रस्य दुर्विज्ञेयं बलाबलं॥ यद्यत्र किंचित्प्रत्यक्षमहिंसायाः परं मतं॥ ऋते त्वागमशास्त्रेभ्यो ब्रूहि यद्यदि पश्यसि॥ ॥स्यूमरश्मिरुवाच॥ ॥स्वर्गकामो यजेतेति सततं श्रूयते श्रुतिः॥ फलं प्रकल्प्य पूर्वं हि ततो यज्ञः प्रतायते॥ अजश्चाश्वश्च मेषश्च गौश्च पक्षिगणाश्च ये॥ ग्राम्यारण्याश्चौषधयः प्राणस्यान्नमिति श्रुतिः॥ तथैवान्नं ह्यहरहः सायंप्रातर्निरूप्यते॥ पशवश्चाथ धान्यं च यज्ञस्यांगमिति श्रुतिः॥ एतानि सह यज्ञेन प्रजापतिरकल्पयत्॥ तेन प्रजापतिर्देवान्यज्ञेनायजत प्रभुः॥ तस्माद्योन्यतराः सर्वे प्राणिनः सप्त सप्त वा॥ यज्ञेषूपाकृतं विश्वं प्राहुरुत्तमसंज्ञितं॥ एतच्चैवाभ्यनुज्ञातं पूर्वैः पूर्वतरैस्तथा॥ कोऽजातु न विचिन्वीत विद्वान्स्वां शक्तिमात्मनः॥

पशवश्च मनुष्याश्च द्रुमाश्चौषधिभिःसह॥ स्वर्गमेवाभिकांक्षंते न च स्वर्गमृते सुखं॥ ॐषध्यः पशवो वृक्षा वीरुद्धाज्यं पयो दधि॥ हविर्भिर्मिः र्द्दिशः श्रद्धा कालेश्चैतानि द्वादश॥ ऋचो यजूंषि सामानि यजमानाश्च षोडश॥ अग्निर्ह्रीयो ग्रहपतिःसप्तसदशाउच्यते॥ अंगान्येतानि यज्ञस्य यज्ञो मूलमिति श्रुतिः॥ आज्येन पयसा दध्ना शकृतामिक्षया त्वच॥ वालैः शृंगेण पादेन संपन्नत्येव गोमखं॥ एवं प्रत्येकशःसर्वं यद्यदस्य विधीयते॥ यज्ञं वहंति संभूय सहर्त्विग्भिः सदक्षिणैः॥ संहृत्यैतानि सर्वाणि यज्ञं निर्वर्तयंत्कत॥ यज्ञार्थानि हि सृष्टानि यथार्थाश्रूयते श्रुतिः॥ एवं प्रवर्तनाःसर्वे प्रवृत्ताश्चैव मानवाः॥ नहि नास्ति नाभ्रमते नाभिद्रुत्यति किंचन॥ यज्ञो यष्टव्य इत्येव योजयस्य फलेप्सया॥ यज्ञांगान्यपि चैतानि यज्ञोक्तान्यनुपूर्वशः॥ विधिनो विधियुक्तानि धारयंति परस्परं॥ आम्नायमार्षं पश्यामि यस्मिन्वेदाः प्रतिष्ठिताः॥ तं विद्वांसो नुपश्यंति ब्राह्मणस्यानुदर्शनात्॥ ब्राह्मणः प्रभवो यज्ञो ब्राह्मणार्पण एव च॥ अनु यज्ञं जगत्सर्वं यज्ञश्चानुजगत्सदा॥ ओमिति ब्रह्मणो योनिर्नमः स्वाहा स्वधा वषट्॥ यस्यैतानि प्रयुज्यंते यथाशक्ति कृतान्यपि॥ न तस्य त्रिषु लोकेषु परलोकभयं विदुः॥ इति वेदा वदंतीह सिद्धाश्च परमर्षयः॥ ऋचो यजूंषि सामानि स्तोभाश्च विधिचोदिताः॥ यस्मिन्नेतानि सर्वाणि भवतीह स वेद द्विजः॥ अग्न्याधेये यद्भवति यच्च सोमे सुते द्विजं॥ यद्वेतरैर्महायज्ञैर्वेद तद्भगवान्पुनः॥

न चायोनीयस्य श्रुतं प्रगल्हरे।। क्रुद्धो न चैव प्रहरेत धीमान्न तथास्य तस्याणि पदे स्वरुत्त।। नाक्रोश मर्हेन्न वृथा
वदेच्च न पैशुनं जनवादं च कुर्वन्।। सत्यव्रतो मितभाषी प्रमत्तस्तथास्य वाग्द्वारमथो सुगुप्तं।। नानाशनः स्यान्महा म
शनः स्यादलोलुपः साधुभिरागतः स्यात्।। यात्रार्थमाहारमिहाददीत तथास्य स्याज्जाठरी द्वारगुप्तिः।। न वीरपत्नीं
विहरेत नारीं न चापि नारीमनृतावाह्वयीत।। भार्याव्रतं ह्यात्मनि धारयीत तथास्योपस्थद्वारगुप्तिर्भवेत्।। द्वा
राणीयस्य सर्वाणि सुगुप्तानि मनीषिणः।। उपस्थमुदरं बाहू वाक्चतुर्थी भवेद्द्विज।। मोघान्यगुप्तद्वार
स्यस्सर्वाण्येव भवंत्युत।। किं तस्य तपसा कार्यं किं यज्ञेन किमात्मना।। अनुत्तरीयवसनमनुपस्तीर्णशायि
नं।। बाहूपधानं शाम्यंतं तं देवा ब्राह्मणं विदुः।। द्वंद्वारामेषु सर्वेषु य एको रमते मुनिः।। परेषामननुध्यायंस्तं
देवा ब्राह्मणं विदुः।। येन सर्वमिदं बुद्धं प्रकृतिर्विकृतिश्च या।। गतिज्ञः सर्वभूतानां तं देवा ब्राह्मणं विदुः।। अभ
यः सर्वभूतेभ्यः सर्वेषामभयं यतः।। सर्वभूतात्मभूतो यस्तं देवा ब्राह्मणं विदुः।। नांतरेणानुजानंति दानय
ज्ञक्रियाफलं।। अविज्ञाय च तत्सर्वमन्यज्ञो च्यते फलं।। स्वकर्मभिः संश्रितानां तपो घोरत्वमागतं।। तं सदा ब्रा
ह्मणमाश्रित्य पुराणं शाश्वतं ध्रुवं।। अशक्नुवंतश्चरितुं किंचिद्धर्मेषु सूत्रितं।। निपापद्धमर्ज्ञो वानो ह्यप्रमादा

पनाभवः।।फलवंति च कर्माणिव्युष्टिमंति ध्रुवाणि च।।विगुणानि च पश्यंति तथा नैकांतिकानि च।।गुणाश्च
व सुदुर्ज्ञेया ज्ञाताश्चान्ये सुदुष्कराः।।अनुष्ठिताश्चांतवंत इति त्वमनुपश्यसि।। ।।स्यूमरश्मिरुवाच।। ।।यथा
च वेद प्रामाण्यं त्यागश्च सफलो यथा।।तौ पंथानावुभौ व्यक्तौ भगवंस्तद्ब्रवीहि मे।। ।।कपिलउवाच।। ।।प्रत्य
क्षमिह पश्यंतो भवंतः सत्पथे स्थिताः।।किमत्र प्रत्यक्षतमं भवंतो यदुपासते।।अन्यत्र तर्कशास्त्रेभ्य आग
मार्थं यथागमं।।आगमो वेदवादस्तु तर्कशास्त्राणि चागमः।।यथाश्रममुपासीत आगमस्तत्र सिध्यति।।सि
द्धिः प्रत्यक्षरूपा च दृश्यत्यागमनिश्चयात्।।नौर्नावीव निबद्धा हि स्रोतसा सनिबंधना।।ह्रीयमाणाः कथं
विप्रकुबुद्धिंस्तारयिष्यति।।एतद्ब्रवीतु भगवानुपपन्नोस्म्यधीहि भो।।नैव त्यागी न संतुष्टो नाशोको न नि
रामयः।।नानिर्विधित्सो नावृत्तो नापवृत्तोस्ति कश्चन।।भवंतोपि च हृष्यंति शोचंति च यथा वयं।।इंद्रि
यार्थाश्च भवतां समानाः सर्वजंतुषु।।एवं चतुर्णां वर्णानामाश्रमाणां प्रवृत्तिषु।।एकमालंबमानानां नि
र्णये किं निरामयं।। ।।कपिलउवाच।। ।।यद्यदाचरते शास्त्रमथ सर्वप्रवृत्तिषु।।यस्य यत्र ह्यनुष्ठानं
तत्र तत्र निरामयं।।ज्ञानं त्वावयते सर्वं यो ज्ञानं ह्यनुवर्तते।।ज्ञानादपेत्य या वृत्तिः सा विनाशयति प्र

जाः॥ भवंतो ज्ञानिनो युक्तं सर्वतश्च निरामयाः॥ ऐकात्म्यं नाम कश्चिद्धि कदाचिदुपपद्यते॥ शास्त्रं ह्यबुध्वा तत्वेन
केचिद्वादबलाज्जनाः॥ कामद्वेषाभिभूतत्वादहंकारवशंगताः॥ याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः॥
ब्रह्मस्तेना निरारंभा दंभमोहवशानुगाः॥ नैर्गुण्यमेव पश्यंति न गुणाननुयुंजते॥ तेषां मेतंशरीराणां तम ए
व परायणं॥ यो यथा प्रकृतिर्जंतुः प्रकृतेः स्याद्वशानुगः॥ तस्य द्वेषश्च कामश्च क्रोधो दंभोनृतं मदः॥ नित्यमेवा
भिवर्तंते गुणाः प्रकृतिसंभवाः॥ एवं बुध्वा न पश्यंतः संत्यजेयुः शुभाशुभं॥ परां गतिमभीप्संतो यतयः सम
यिरताः॥ ॥स्त्रमर३मिरु॥ ॥ सर्वमेतन्मया राजञ्शास्त्रतः परिकीर्तितं॥ न ह्यविज्ञाय शास्त्रार्थं प्रव
र्तंते प्रवर्त्तयः॥ यः कश्चिन्न्याय आचारः सर्वशास्त्रमिति श्रुतिः॥ यदन्यायमशास्त्रं तदित्येषा श्रूयते श्रुतिः
॥ न प्रवृत्तिर्ऋते शास्त्रात्काचिदस्तीति निश्चयः॥ यदन्यद्वेदवादेभ्यस्तदशास्त्रमिति श्रुतिः॥ शास्त्रादपे
तं पश्यंति बहवो व्यक्तमानिनः॥ अविज्ञानहतप्रज्ञा हीनप्रज्ञास्तमोवृताः॥ शास्त्रदोषान्न पश्यंति शोचंति च
यथा वयं॥ इंद्रियार्थांश्च भवतां समानाः सर्वजंतुषु॥ एवं चतुर्णां वर्णानामाश्रमाणां प्रवृत्तिषु॥ एकमालंब्यमा
नानां निर्णये सर्वतो दिशं॥ आनंत्यं वदमानेन शक्तेनावर्जितात्मना॥ अविज्ञानहतप्रज्ञा हीनप्रज्ञास्तमो

कृताः॥ शाक्यं त्वेकेन युक्तेन कृतकृत्येन सर्वशः॥ पिंडमात्रं व्यपाश्रित्य चरितुं विजितात्मना॥ वेदवादं व्यपाश्रि-
त्यमोक्षोस्तीति प्रभाषितुं॥ अपेतं न्यायशास्त्रेण सर्वलोकविगर्हिणा॥ इदं तु दृष्ट्वा स्वं कर्म कुटुंबमभिसंश्रितं
॥ दानमध्ययनं यज्ञः प्रजासंतानमार्जवं॥ यद्येतदेवं कृत्वा न विमोक्षोस्ति कस्यचित॥ धिक् कर्त्तारं च कार्यं
च श्रमश्चायं निरर्थकः॥ नास्तिकमन्यथा च स्याद्वेदानां पृष्टतः क्रिया॥ एतस्यानंत्यमिच्छामि भगवं श्रोतु-
मंजसा॥ तत्वं वदस्व मे ब्रह्मन्नुपसन्नोस्म्यधीहि भो॥ यथा ते विदितो मोक्षस्तथेच्छाम्युपशिक्षितुं॥ ॥शांतौ मोक्ष-
धर्मे। ॥कपिल उवाच॥ ॥वेदाः प्रमाणं लोकानां न वेदाः पृष्टतः कृताः॥ द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म
परं च यत॥ शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगछति॥ शरीरमेतत्कुरुते यद्वेदे कुरुते तनुं॥ कृतशुद्धशरी-
रो हि पात्रं भवति ब्राह्मणः॥ आनंत्यमवबुध्येदं कर्मणां तद्ब्रवीमि ते॥ निरागममनैतिह्यं प्रत्यक्षं लोकसा-
क्षिकं॥ धर्म इत्येव ये यज्ञान्वितन्वंति निराशिषः॥ उत्पन्नत्यागिनो लुब्धाः कृपासूया विवर्जिताः॥ धनाना-
मेष वै पंथास्तीर्थेषु प्रतिपादनं॥ अनाश्रिताः पापकर्म कदाचित्कर्मयोगिनः॥ मनःसंकल्पसंसिद्धा वि-
शुद्धज्ञाननिश्चयात॥ अक्रुध्यंतो नसूयंतो निरहंकारमत्सराः॥ ज्ञाननिष्टास्त्रिशुक्लास्च सर्वभूतहि-

मोक्षधर्म०

१०८

तेरताः॥ आसन्गृहस्था भूयिष्ठा अव्युत्क्रांताः स्वकर्मसु॥ राजानश्च तथायुक्ता ब्राह्मणाश्च यथाविधि॥ समा
ह्यार्जवसंपन्नाः संपन्नातुष्टा ज्ञाननिश्चयाः॥ प्रत्यक्षधर्माः शुचयः श्रद्दधानाः परावरे॥ पुरस्ताद्भावितात्मानो
यथावच्चरितव्रताः॥ चरंति धर्मं कृच्छ्रेपि दुर्गे चैवापि संहताः॥ संहत्य धर्मं चरतां पुरासीत्सुखमेव तत्॥ तेषां
नासीद्विधातव्यं प्रायश्चित्तं कथंचन॥ सत्यं हि धर्ममास्थाय दुराधर्षतमा मताः॥ न मात्रामनुरुध्यंते न
धर्मे छलमंततः॥ य एव प्रथमः कल्पस्तमेवाभ्याचरन्सह॥ तेषां नासीद्विधातव्यं प्रायश्चित्तं कदाचन॥
तस्मिन्विधौ स्थितानां हि प्रायश्चित्तं न विद्यते॥ दुर्बलात्मनेउत्पन्नं प्रायश्चित्तमिति श्रुतिः॥ एवं बहुवि
धा विप्राः पुराणा यज्ञवाहनाः॥ त्रैविद्या वृद्धाः शुचयो वृत्तवंतो यशस्विनः॥ यजंतोहरहर्यज्ञैर्निराशीर्बंध
नाबुधाः॥ तेषां यज्ञाश्च वेदाश्च कर्माणि च यथागमं॥ आगमाश्च यथाकालं संकल्पाश्च यथाक्रमं॥ अपेत
कामक्रोधानां दुश्चराचारकर्मणां॥ स्वकर्मभिः शंसितानां प्रकृत्याशंसितात्मनां॥ ऋजूनां शमनित्यानां
स्वेषु कर्मसु वर्ततां॥ सर्वमिवासीदिति नः शाश्वती श्रुतिः॥ तेषामदीनसत्वानां दुश्चराचारकर्मणां॥ स्वक
र्मभिः संभृतानां तपो घोरत्वमागतं॥ तं सदाचारमाश्चर्यं पुराणं शाश्वतं ध्रुवं॥ अशक्नुवद्भिश्चरितुं किं

मा

मानंस्य

१०८

विद्धर्मेषुसूक्ष्मतां॥ निरापद्धर्मसूत्राणाम्प्रमतोपराभवः॥ सर्ववर्णेषुजातेषुनास्तीतिकश्चिदतिक्रमः॥ य
स्तमेकंचतुर्द्धाहि ब्राह्मणाआश्रमे विदुः॥ तंसंतो विधिवत्प्राप्यगछंति परमांगतिं॥ गृहेभ्य एवनिष्क्रम्यव
नमन्ये समाश्रिताः॥ गृहमेवाभिसंश्रित्य ततोन्येब्रह्मचारिणः॥ अनंतंब्रह्मणःस्थानंब्राह्मणेनामनिश्च
यः॥ एतएवंविधाविप्राः पुराणे धर्मचारिणः॥ तएतेदिविदृश्यंतेज्योतिर्भूता द्विजातयः॥ नक्षत्राणीवधिष्
ण्येषुबहवस्तारकागणाः॥ आनंत्यमुपसंप्राप्ताःसंतोषादितिवैदिकं॥ यद्यागछंतिसंसारंपुनर्योनिषु
तादृशाः॥ नलिप्यंते पापकृत्यैःकदाचित्कर्मयोनितः॥ एवमेवब्रह्मचारीशुश्रूषुर्घोरनिश्चयः॥ एवंयुक्तो
ब्राह्मणःस्यादन्योब्राह्मणकोभवेत्॥ कर्मैवंपुरुषस्याहस्तुशुभंवा यदिवाशुभं॥ एवंपक्वकषायाणामानंत्ये
नश्रुतेनच॥ सर्वमानंत्यमासीद्वै एवंनःशाश्वतीश्रुतिः॥ तेषामपेततृष्णानांनिर्णिक्तानांशुभात्मनां॥ च
तुर्थोपनिषद्धर्मःसाधारण इतिस्मृतिः॥ संसिद्धैःसाध्यतेनित्यंब्राह्मणैर्नियतात्मभिः॥ संतोषमूलस्त्या
गात्माज्ञानाधिष्ठानमुच्यते॥ अपवर्गमतिनित्योयतिधर्मःसनातनः॥ साधारणःकेवलोवा यथाबल
मुपास्यते॥ गछतांगछतांक्षेमंदुर्बलोत्रावसीदति॥ ब्राह्मणःपदमन्विछन्संसारान्मुच्यतेशुचिः॥ ॥

स्यूमरश्मिरु।। ।।येभुंजतेयेददंतेयजंतेधीयतेचये।।पात्राभिर्धर्मलब्धाभिर्येचात्यागंसमाश्रिताः।।२
तेषांप्रेत्यसभावेतुकतमःस्वर्गजित्तमः।।एतदाचक्ष्वमेब्रह्मन्यथातत्त्वेनपृच्छतः।। ।।कपिलउवाच।। ।।परिग्र
हाःशुभाःसर्वेगुणतोभ्युदयागताः।।नतुत्यागसुखंप्राप्ताएतत्त्वमपिपश्यसि।। ।।स्यूमरश्मिरु०।। ।।
भवंतोज्ञाननिष्ठावैगृहस्थाःकर्मनिश्चयाः।।आश्रमाणांचसर्वेषांनिष्ठायामैक्यमुच्यते।।एकत्वेनपृथ
क्त्वेनविशेषोनात्रदृश्यते।।तद्यथावद्यथान्यायंसमवाद्प्रब्रवीतुमे।। ।।कपिलउवाच।। ।।शरीरपक्तिः
कर्माणिज्ञानंतुपरमागतिः।।कषायेकर्मभिःपक्केरसज्ञानेचतिष्ठति।।आनृशंस्यंक्षमाशांतिरहिंसासत्य
मार्जवं।।अद्रोहोनाभिमानश्चह्रीस्तितिक्षाशमस्तथा।।पंथानोब्रह्मणस्त्वेतेएतैःप्राप्नोतियत्परं।।तद्विद्वा
ननुबुध्येतमनसाकर्मनिश्चयं।।यांविप्राःसर्वतःशांताविशुद्धाज्ञाननिश्चयाः।।गतिंगच्छंतिसंतुष्टास्ता
माहुःपरमांगतिं।।वेदांश्चवेदितव्यंचविदित्वाचतथास्थितिं।।एवंवेदविदित्याहुरतोन्योवातरेचकः।।सर्वं
विदुःवेदविदोवेदेसर्वंप्रतिष्ठितं।।वेदेहिनिष्ठासर्वस्ययद्यस्तिचननास्तिच।।एषैवनिष्ठासर्वस्ययद
दस्तिचनास्तिच।।एतदंतंचमध्यंचसच्चासच्चविजानतः।।समासंत्यागइत्येवसर्वंवेदेषुनिष्ठितं।।संतोष

दस्युगतमपवर्गे प्रतिष्ठितं ।। ऋतं सत्यं विदितं वेदितव्यं सर्वस्यात्मा स्थावरं जंगमं च ।। सर्वं सुखं यच्छिवमु
त्तमं च ब्रह्माव्यक्तं प्रभवश्चाव्ययश्च ।। तेजः क्षमा शांतिरनामयं शुभं तथाविधं व्योम सनातनं ध्रुवं ।। एतैः स
र्वैर्गम्यते बुद्धिनेत्रैस्तस्मै नमो ब्रह्मणे ब्राह्मणाय ।। ।। शांतौ मोक्षधर्मे ।। ।। युधिष्ठिर उवाच ।। ।। यमीमर्थं
च कामं च वेदाः शंसति भारत ।। कस्य लाभो विशिष्टोत्र तन्मे ब्रूहि पितामह ।। ।। भीष्म उवाच ।। ।। अत्र ते व
र्तयिष्यामि इतिहासं पुरातनं ।। कुंडधारेण यत्प्रीत्या भक्तायोपकृतं पुरा ।। अधनो ब्राह्मणः कश्चित्कामा
द्धर्ममवेक्षत ।। यज्ञार्थं सततोर्थार्थी तपोतप्यत दारुणं ।। स निॅयमथो कृत्वा पूजयामास देवताः ।। भक्त्या श्च
न चैवाध्यगच्छद्धनं संपूज्य देवताः ।। ततश्चिंतामनुप्राप्तः कतमं दैवतं नु तत् ।। यन्मे द्रुतं प्रसीदेत मानुषैर
जडीकृतं ।। सोऽपश्यत्सौम्येन मनसा देवानुचरमंतिके ।। प्रत्यपश्यज्जलधरं कुंडधारमवस्थितं ।। दृष्ट्वैव
तं महाबाहुं तस्य भक्तिरजायत ।। अयं मे धास्यति श्रेयो वपुरेतद्धि तादृशं ।। संनिकृष्टश्च देवस्य न चान्यै
र्मानुषैर्वृतः ।। एष मे दास्यति धनं प्रभूतं शीघ्रमेव च ।। ततो धूपैश्च गंधैश्च माल्यैरुच्चावचैरपि ।। बलिभि
र्विविधाभिश्च पूजयामास तं द्विजः ।। ततस्त्वल्पेन कालेन तुष्टो जलधरस्तदा । तस्योपकारनियतामिमां

वाचमुवाच ह ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ आशायास्तनयो
धर्मः क्रोधोसूयासुतः स्मृतः ॥ लोभः पुत्रो निकृत्यास्तु कृतघ्नो नार्हति प्रजां ॥ ततः स ब्राह्मणः स्वप्ने कुंडधारस्य तेजसा ॥
अपश्यत्सर्वभूतानि कुशेषु शयितस्तदा ॥ शमेन तपसा चैव भक्त्या च निरुपस्कृतः ॥ शुद्धात्मा ब्राह्मणो रात्रौ निदर्श
नमपश्यत ॥ मणिभद्रं स तत्रस्थं देवतानां महाद्युतिं ॥ अपश्यत महात्मानं व्यादिशंतं युधिष्ठिर ॥ तत्र देवाः प्रयच्छंति
राज्यानि च धनानि च ॥ शुभैः कर्मभिरारब्धाः छिंदंत्यशुभे पुनः ॥ पश्यतामथ यक्षाणां कुंडधारो महाद्युतिः ॥ निःपसपति
तोह्रमौ देवानां भरतर्षभ ॥ ततो देववचनान्मणिभद्रो महामनाः ॥ उवाच पतितं भूमौ कुंडधारं किमिष्यते ॥ ॥कुंडधा
र उवाच ॥ ॥यदि प्रसन्ना देवा मे भक्तोयं ब्राह्मणो मम ॥ अस्यानुग्रहमिच्छामि कृतं किंचित्सुखोदयं ॥ ततस्तं म
णिभद्रस्तु पुनर्वचनमब्रवीत् ॥ देवानामेव वचनात्कुंडधारं महाद्युतिं ॥ ॥मणिभद्र उवाच ॥ ॥उत्तिष्ठोत्तिष्ठ भद्रं ते कृ
तकृत्यः सुखी भव ॥ धनार्थी यदि विप्रोयं धनमस्मै प्रदीयतां ॥ यावद्धनं प्रार्थयते ब्राह्मणोयं सखा तव ॥ देवानां शा
सनात्तावदसंख्येयं ददाम्यहं ॥ विचार्य कुंडधारस्तु मानुष्यं चलमध्रुवं ॥ तपसे मतिमाधत्त ब्राह्मणस्य युधिष्ठिर ॥
॥ ॥कुंडधार उवाच ॥ ॥नाहं धनानि याचामि ब्राह्मणाय धनप्रद ॥ अन्यमेवाहमिच्छामि भक्तायानुग्रहं कृतं ॥ पृ
थिवीं रत्नपूर्णां वा महद्वानंत्नसंचयं ॥ भक्ताय नाहमिच्छामि भवेदेष तु धार्मिकः ॥ धर्मेस्य रमतां बुद्धिर्धर्मं चैवोपजी

वतु॥ धर्मप्रधानो भवतु ममैषोनुग्रहो मतः॥ ॥मणिभद्रउवाच॥ ॥सदा धर्मफलं राज्यं सुखानि विविधानि च॥ फला
न्येवायमश्नातु कायक्लेशविवर्जितः॥ ॥भीष्मउवाच॥ ॥ततस्तदेव बहुशः कुंडधारो महायशाः॥ अभ्यासकरोद्द्विजस्तत
स्तुष्टास्य देवताः॥ मणिभद्रउवाच॥ ॥प्रीतास्ते देवताः सर्वा द्विजस्यास्य तथैव च॥ भविष्यत्येष धर्मात्मा धर्मबाधास्य ते म
तिः॥ ततः प्रीतो जलधरः कृतकार्यो युधिष्ठिर॥ ईप्सितं मनसो लब्ध्वा वरं मन्यैः सुदुर्लभं॥ ततो पश्यत चीराणि सूक्ष्माणि हि
जसत्तम॥ पार्श्वतोभ्याशतो न्यस्तान्यथ निर्वेदमागतः॥ ॥ब्राह्मणउवाच॥ ॥अयं न सुकृतं वेत्ति कोन्यो वेत्स्यते कृतं॥ गच्छा
वनमेवाहं वरं धर्मेण जीवितं॥ ॥भीष्मउवाच॥ ॥निर्वेदाद्देवतानां च प्रसादात्स द्विजोत्तमः॥ वनं प्रविश्य सुमहत्तपआ
रब्धवांस्तदा॥ देवतातिथिशेषेण फलमूलाशनो द्विजः॥ धर्मे चास्य महाराज हृदा बुद्धिरजायत॥ त्यक्त्वा मूलफलं स
र्वं पर्णाहारो द्विजोभवत्॥ पर्णं त्यक्त्वा जलाहारः पुनरासीद्द्विजस्तदा॥ वायुभक्षस्ततः पश्चाद्बहून्वर्षगणान्प्रभुः॥ न चास्य
क्षीयते प्राणास्तदद्भुतमिवाभवत्॥ धर्मे च श्रद्दधानस्य तपस्युग्रे च वर्ततः॥ कालेन महता तस्य दिव्या दृष्टिरजायत॥ तस्य
बुद्धिः प्रादुरासीद्यदि दद्यां महद्धनं॥ तुष्टः कस्यचिदेवेह मिथ्यावाङ्न भवेन्मम॥ ततः प्रहृष्टवदनो भूय आरब्धवांस्तपः॥
भूयश्चाचिंतयत्सिद्धो यत्परं सोभिमन्यते॥ यदि दद्यां महद्राज्यं तुष्टो वै यस्य कस्यचित्॥ स भवेदचिराद्राजा न मिथ्यावा
ग्भवेन्मम॥ तस्य साक्षात्कुंडधारो दर्शयामास भारत॥ ब्राह्मणस्य तपोयोगात्सौहृदेनाभिचोदितः॥ समागम्य स तेनाथ

प्रज्ञांचक्रेययथाविधि ।। ब्राह्मणः कुंउधानस्य विस्मिताश्चाभवन्नृप ।। ततोऽब्रवीत्तुं उधाचो दिव्यं तेचक्षुरुत्तमं । पश्यतामेवराशां
गातिं विश्लोकांश्चैवतु चक्षुषा ।। ततोराजसहस्राणि मग्नानि निरयेतदा ।।इनाद पश्य हि प्रसन्दिव्ययुक्तेन चक्षुषा ।। ।।कुंउधा
नउवाच ।। ।।मांक्षुज्ज्वयित्वा भावेन यदितं दुःखमाप्नुयाः ।।कृतंमयासवेलिं तेकश्चतेनु प्रहोभवेत् ।।पश्य पश्य च मम यस्तेका
मानिदेहलकथंनरः ।।स्वगह्निनं हि संरुद्धं मानुषेषु विशेषतः ।। ।।भीष्मउवाच ।। ।। ततोऽपश्यन्नृपस्कामंच क्रोधंलोभंभयंमदं ।।
निद्रांतंद्रींतथालस्यमाहत्यपुरुषस्थिताः ।। ।।कुंउधारउवाच ।। ।।एतेलोकेस्तुसंरुद्धा देवानां मानुषाद्वयं ।।तथैवदेवचो
नाहि पश्यंति सर्वशः ।। नदेवे वननुत्तातःकश्चिद्भवतिधार्मिकः ।।एषशांतोऽसितपसा दातुंराज्यंधनानिच ।। ।।भीष्मउवाच ।। ।।
ततःपपात शिरसा ब्राह्मणस्तो यथाद्विपो ।।उवाच चैनं धर्मात्मा महात्मनुग्रहःकृतः ।।कामलोभानुबंधेन पुराते यदसूयित
।।मयास्त्रिहमविज्ञाय तत्रमे क्षंतुमर्हसि ।।शांतमेव मयेस्य क्षोकुंउधापा द्विजर्षभं ।।संपतिष्व्यबाहुभ्यां तत्रैवातन
धीयत ।। ततःसर्वास्तदालोकान् ब्राह्मणोत्तरचामहे ।।कुंउधानप्रसादेन तपसा सिद्धिमागतः ।। विहायसाचगमनं तथा
संकल्पितार्थता ।।धर्माधिक्यात्तयायोगा घ्याचैव परमागतिः ।।देवताब्राह्मणोमंतोयक्षा मानुषचारणाः ।।धार्मिका
न्पूजयंतीह नधनाढ्यान्नकामिनः ।।स्तुप्रसन्नाहितेदेवा यतेधर्मेरतामतिः ।।धनेनसुखलक्ष्य लोकाविद्धमितु पनमंसुखं
।। ।।शांतौमोक्षधर्मे ।। ।।युधिष्ठिरः ।। ।।बहूनांयत्नतपसामेककार्यानां पितामह ।।धर्मार्थन्नसुखपार्थेकथंय

स्मा

नः समाहितः॥ ॥भीष्म उवाच॥ ॥अत्र ते वर्तयिष्यामि नारदेनानुकीर्तितं॥ उंछवृत्तेः पुरावृत्तं यज्ञे ब्राह्मणस्य च॥ ॥ना
रद उवाच॥ ॥राष्ट्रे धर्मोत्तरे श्रेष्ठे विदर्भेष्वभवद्द्विजः॥ उंछवृत्तिर्ऋषिः कश्चिद्यज्ञं यष्टुं समादधे॥ श्यामाकमशनं तत्र सू
र्यपर्णी सुवर्चला॥ तिक्तं च विरसं शाकं तपसा स्वादुतां गतं॥ उपगम्य वने कश्चित्सिद्धिं सर्वभूतविहिंसया॥ अपि मूलफ
लैरिष्टो यज्ञस्स्वर्ग्यः परंतप॥ तस्य भार्या व्रतकृशा शुचिः पुष्करधारिणी॥ यज्ञपत्नी समानीता सत्येनानुविधीयते॥ सा तु शा
पपरित्रस्ता न स्वभावानुवर्तिनी॥ मयूरजीर्णपर्णानां वस्त्रे तस्याश्च पर्णितं॥ अकामया हूतस्तत्र यज्ञो होत्रानुशास
नात्॥ शुक्रस्य पुनराजातिरपध्यानादधर्मवित्॥ तस्मिन्वने समीपस्थो मृगोभूत्सहवासिकृत्॥ वचोभिरब्रवीत्सत्यं त्वया
दुष्कृतं कृतं॥ यदि मंत्रांगहीनोयं यज्ञो भवति वैकृतः॥ मां भोः प्रक्षिप होत्रे त्वं गच्छ स्वर्गमनिंदितः॥ ततस्तु यज्ञे सावित्री सा
क्षात्तं समन्यमंत्रयत्॥ निमंत्रयंती प्रत्युक्ता न हन्यां सहवासिनं॥ एवमुक्ता निवृत्ता सा प्रविष्टा यज्ञपावकं॥ किं नु दुश्चरितं
यज्ञे दिदृक्षुस्सा रसातलं॥ स तु बद्धांजलिस्सत्यमयाचद्धरिणः पुनः॥ सत्येन संपरिष्वज्य संदिष्टो गम्यतामिति॥ ततः
सहस्रिणो गत्वा पदान्यष्टौ स वर्तते॥ साधु हिंसय मां सत्य हतो यास्यामि सद्गतिं॥ पश्य ह्यप्सरसो दिव्या मया दत्तेन चक्षु
षा॥ विमानानि विचित्राणि गंधर्वाणां महात्मनां॥ ततः सुचिरं दृष्ट्वा स स्पृहालग्नेन चक्षुषा॥ मृगमालोक्य सिंहा
याः स्वर्गवासं समर्थयत्॥ स तु धर्मो मृगो भूत्वा बहुवर्षोषितो वने॥ तस्य निष्कृतिमाधत्त न ह्यसौ यज्ञसंविधिः॥

तस्यतेन तु भावेन मृगहिंसात्मनस्तदा ॥ तपो महत्समुछिन्नं तस्माद्धिंसा न यज्ञिया ॥ ततस्तं भगवान्धर्मो यज्ञं याजयत स्व
यं ॥ समाधानं च भार्याया लेभे स तपसा परं ॥ अहिंसा सकलो धर्मो हिंसाधर्मस्तथाहितः ॥ सत्यं तेहं प्रवक्ष्यामि यो धर्मः स
त्यवादिनां ॥ ॥शांतौ मोक्षधर्मे ॥ ॥युधिष्ठिर उवाच ॥ कथं भवति पापात्मा कथं धर्मं करोति वा ॥ केन निर्वेदमाधत्ते ऽ
मोक्षं वा केन गच्छति ॥ ॥भीष्म उवाच ॥ ॥विदिताः सर्वधर्मास्ते स्थित्यर्थं त्वं तु पृच्छसि ॥ शृणु मोक्षं सनिर्वेदं पापं धर्मं च
मूलतः ॥ विज्ञानार्थं हि पंचानामिच्छा पूर्वं प्रवर्त्तते ॥ प्राप्य ताञ्जायते कामो द्वेषो वा भरतर्षभ ॥ ततस्तदर्थे यतते कर्म
चारभते महत् ॥ इष्टानां रूपगंधानामभ्यासं च किर्षति ॥ ततो रागः प्रभवति द्वेषश्च तदनंतरं ॥ ततो लोभः प्रभवति मोह व
श्च तदनंतरं ॥ लोभमोहाभिभूतस्य रागद्वेषान्वितस्य च ॥ न धर्मे जायते बुद्धिर्व्याजाद्धर्मं करोति वा ॥ व्याजेन चरते धर्म
मर्थं व्याजेन रोचते ॥ व्याजेन सिध्यमानेषु धनेषु कुरुनंदन ॥ तत्रैव कुरुते बुद्धिं ततः पापं चिकीर्षति ॥ सुहृद्भिर्वार्यमाणोपि पं शि
डितैश्चापि भारत ॥ उत्तरं न्यायसंबद्धं ब्रवीति विधिचोदितं ॥ अधर्मस्त्रिविधस्तस्य वर्द्धते रागमोहजः ॥ पापं चिंतयते चैव ब्रू
ब्रवीति करोति वा ॥ तस्याधर्मप्रवृत्तस्य दोषान्पश्यंति साधवः ॥ एकशीलाश्च मित्रत्वं भजंते पापकर्मिणः ॥ स नेह सुखमाप्नो
ति कुत एव परत्र वै ॥ एवं भवति पापात्मा धर्मात्मानं तु मे शृणु ॥ यथा कुशलधर्मा स कुशलं प्रतिपद्यते ॥ कुशलेनैव धर्मे
ण गतिमिष्टां प्रपद्यते ॥ य एतान्प्रज्ञया दोषान्पूर्वमेवानुपश्यति ॥ कुशलः सुखदुःखानां साधूंश्चाप्युपसेवते ॥ तस्यसा

११२

सुसमाचारादभ्यासाच्चैव वर्द्धते ॥ प्रसन्नो धर्मे चरमते धर्मं चैवोपजीवति ॥ सोथ धर्मादवाप्तेषु धनेषु कुरुते मनः ॥ तस्यैव सिं
चते मूलं गुणान् पश्यति यत्र वै ॥ धर्मात्मा भवति ह्येवं मित्रं च लभते सुखं ॥ स मित्रधनलाभात्तु प्रेत्य चेह च नंदति ॥
शब्दे स्पर्शे रसे रूपे तथा गंधे च भारत ॥ प्रभुत्वं लभते जंतुर्धर्मस्यैतत्फलं विदुः ॥ स तु धर्मफलं लब्ध्वा न तृष्यति युधिष्ठि
र ॥ अतृप्यमाणो निर्वेदमादत्ते ज्ञानचक्षुषा ॥ प्रज्ञाचक्षुर्यदा कामा रसे गंधे न रज्यते ॥ शब्दे स्पर्शे तथा रूपे न च भावय
ते मनः ॥ विमुच्यते तदा कामान्न च धर्मं विमुंचति ॥ धर्मत्यागे च यतते दृष्ट्वा लोकं क्षयात्मकं ॥ ततो मोक्षाय यतते नानुपा
यादुपायतः ॥ ज्ञाने निर्वेदमादत्ते पापं कर्म जहाति च ॥ धर्मात्मा चैव भवति मोक्षं च लभते परं ॥ एतत्ते कथितं तात य
न्मां त्वं परिपृच्छसि ॥ पापं धर्मस्तथा मोक्षो निर्वेदश्चैव भारत ॥ तस्माद्धर्मे प्रवर्त्तेथाः सर्वावस्थं युधिष्ठिर ॥ धर्मे स्थिता
नां कौंतेय सिद्धिर्भवति शाश्वती ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ मोक्षः पितामहेनोक्त उपायान्नानुपा
यतः ॥ तमुपायं यथान्यायं श्रोतुमिच्छामि भारत ॥ ॥ भीष्म उवाच ॥ ॥ त्वय्येवैतन्महाप्राज्ञ युक्तं निपुणदर्शनि ॥
यनोपायेन सर्वार्थं नित्यं मृगयसेनघ ॥ करणे घटस्य या बुद्धिर्घटोत्पत्तौ न सा मता ॥ एवं धर्माभ्युपायेषु नान्यधर्मेषु
कारणं ॥ पूर्वे समुद्रे यः पंथा न स गच्छति पश्चिमं ॥ एकः पंथा हि मोक्षस्य तन्मे विस्तरतः शृणु ॥ क्षमया क्रोधमुच्छिंद्यात्का
मं संकल्पवर्जनात् ॥ सत्वसंचयनाद्धीरो निद्रां चोच्छेत्तुमर्हति ॥ अप्रमादाद्भयं रक्षेच्छ्वासं क्षेत्रज्ञशीलनात् ॥ इच्छां

द्वेषं च कामं च धैर्येण विनिवर्त्तयेत्॥ भ्रमं संमोहमावर्त्तमभ्यासाद्विनिवर्त्तयेत्॥ निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्व
वित्॥ उपद्रवांस्तथा रोगांहितजीर्णमिताशनात्॥ लोभं मोहं च संतोषाद्विषयांस्तत्वदर्शनात्॥ अनुक्रोशादधर्मं च
जयेद्धर्ममवेक्षया॥ आयत्या च जयेदाशामर्थं संगविवर्जनात्॥ अनित्यत्वेन च स्नेहं क्षुधां योगेन पंडितः॥ कारु
ण्येनात्मनो मानं तृष्णां च परितोषतः॥ उत्थानेन जयेत्तंद्रीं वितर्कं निश्चयाज्जयेत्॥ मौनेन बहुभाष्यं च शौर्येण च भयं त्य
जेत्॥ यच्छेद्वाङ्मनसी बुध्या तां यच्छेज्ज्ञानचक्षुषा॥ ज्ञानमात्मावबोधेन यच्छेदात्मानमात्मना॥ तदेतदुपशांतेन बोद्ध
व्यं शुचिकर्मणा॥ योगदोषान्समुच्छिद्य पंच यान्कवयो विदुः॥ कामं क्रोधं च लोभं च भयं स्वप्नं च पंचमं॥ परित्यज्य नि
षेवेत यतवाग्योगसाधनात्॥ ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा॥ शौचमाहारतः शुद्धिरिंद्रियाणां च संयमः॥
एतैर्विवर्द्धते तेजः पाप्मानमुपहंति च॥ सिध्यंति चास्य संकल्पा विज्ञानं च प्रवर्त्तते॥ धूतपापः स तेजस्वी लघ्वाहारो जितें
द्रियः॥ कामक्रोधौ वशे कृत्वा निनीषेद्ब्रह्मणः पदं॥ अमूढत्वमसंगित्वं कामक्रोधविवर्जितं॥ अदीनत्वमनुदीर्णत्वम
नुक्रोशो व्यवस्थितिः॥ एष मार्गो हि मोक्षस्य प्रसन्नो विपुलः शुचिः॥ तथा वाक्कायमनसां नियमः कामतोन्यथा॥ ॥
शांतौ मोक्षधर्मे॥ ॥भीष्म उवाच॥ ॥अत्रैवोदाहरंतीममितिहासं पुरातनं॥ नारदस्य च संवादं देवलस्यासितस्य च॥
आसीनं देवलं वृद्धं बुद्ध्वा बुद्धिमतां वरं॥ नारदः परिपप्रच्छ भूतानां प्रभवाप्ययं॥ ॥नारद उवाच॥ ॥कुतः सृष्टमिदं वि

दं ब्रह्मन्स्थावरजंगमं ।। प्रलये चक्रमभ्येति तद्भगवान्प्रब्रवीतु मे ।। ।। असित उवाच ।। ।। येभ्यः सृजति भूतानि कालो भावप्र
चोदितः ।। महाभूतानि पंचेति तान्याहुर्भूतचिंतकाः ।। तेभ्यः सृजति भूतानि काल आत्मप्रचोदितः ।। एतेभ्यो यः परं ब्रूयादस
द्ब्रूयादसंशयं ।। विद्धि नारद पंचैतान्शाश्वतानचलान्ध्रुवान् ।। महतस्तेजसो राशीन्कालषष्ठान्स्वभावतः ।। आपश्चैवां
तरिक्षं च पृथिवी वायुपावकौ ।। नासीद्धि परमेतेभ्यो भूतेभ्यो मुक्तसंशयं ।। नोपपत्त्या न वा युक्त्या त्वसद्ब्रूयादसंशयं ।। वेत्थ ता
नभिनिर्वृत्तान्षडेते यस्य राशयः ।। पंचैव तानि कालश्च भावाभावौ च केवलौ ।। अष्टौ भूतानि भूतानां शाश्वतानि भवाप्ययौ ।। अ
भावं यांति तेष्वेव तेभ्यश्च प्रभवंत्यपि ।। विनष्टोपि च तान्येव जंतुर्भवति पंचधा ।। तस्य भूमिमयो देहः श्रोत्रमाकाशसंभवं ।।
सूर्यश्चक्षुरसुर्वायोरद्भ्यस्तु खलु शोणितं ।। चक्षुषी नासिका कर्णौ त्वग्जिह्वेति च पंचमी ।। इंद्रियाणींद्रियार्थानां ज्ञानानि क
वयो विदुः ।। दर्शनं श्रवणं घ्राणं स्पर्शनं रसनं तथा ।। उपपत्त्या गुणान्विद्धि पंच पंचसु पंचधा ।। रूपं गंधो रसः स्पर्शः शब्दश्चैवा
थ तद्गुणाः ।। इंद्रियैरुपलभ्यंते पंचधा पंच पंचभिः ।। रूपं गंधं रसं स्पर्शं शब्दं चैवाथ तद्गुणान् ।। इंद्रियाणि न बुध्यंते क्षेत्रज्ञ
स्तैस्तु बुध्यते ।। चित्तमिंद्रियसंघातात्परं तस्मात्परं मनः ।। मनसस्तु परा बुद्धिः क्षेत्रज्ञो बुद्धितः परं ।। पूर्वं चेतयते जं
तुरिंद्रियैर्विषयान्पृथक् ।। विचार्य मनसा पश्चादथ बुद्ध्या व्यवस्यति ।। इंद्रियैरुपलब्धार्थान्बुद्धिमांस्तु व्यवस्यति ।।
चित्तमिंद्रियसंघातं मनो बुद्धिं तथाष्टमी ।। अष्टौ ज्ञानेंद्रियाण्याहुरेतान्यध्यात्मचिंतकाः ।। पाणिपादं च पायुश्च मेहनं पं

मोक्षधर्म०

११५

च मे ॥ इति संशब्दमानानि शृणु कर्मेंद्रियाण्यपि ॥ जल्पनाभ्यवहारार्थमुखमिंद्रियमुच्यते ॥ गमनेंद्रियं तथा पा
दौ कर्मणः करणे करौ ॥ पायूपस्थ विसर्गार्थमिंद्रिये तुल्यकर्मणी ॥ विसर्गे च पुरीषस्य विसर्गे चापि कामिके ॥ बलं ष
ष्ठं षडेतानि वाचा सम्यग्यथागमं ॥ ज्ञानचेष्टेंद्रियगुणाः सर्वे संशब्दिता मया ॥ इंद्रियाणां स्वकर्मभ्यः श्रमादुपरमो य
दा ॥ भवंतींद्रियसंन्यासादथ स्वपिति वै नरः ॥ इंद्रियाणां व्युपरमे मनोव्युपरतं यदि ॥ सेवते विषयानेवं तद्विद्यात्स्वप्न
दर्शनं ॥ सात्विकाश्चैव ये भावास्तथा राजसतामसाः ॥ कर्मयुक्तान्प्रशंसंति सात्विकानितरांस्तथा ॥ आनंदः कर्मणां
सिद्धिः प्रतिपत्तिः परा गतिः ॥ सात्विकस्य निमित्तानि भावान्संश्रयते स्मृतिः ॥ जंतुष्वेकतमेष्वेवं भावा ये विधिमास्थिताः ॥
भावयोरीप्सितं नित्यं प्रत्यक्षगमनं तयोः ॥ इंद्रियाणि च भावाश्च गुणाः सप्तदश स्मृताः ॥ तेषामष्टादशो देही यः शरी
रे स शाश्वतः ॥ अथवा सशरीरास्ते गुणाः सर्वे शरीरिणां ॥ संश्रितास्तद्वियोगे हि सशरीरा न संति ते ॥ अथवा संनि
पातोयं शरीरं पांचभौतिकं ॥ एकश्च दश चाष्टौ च गुणाः सह शरीरिणां ॥ ऊष्मणा सह विंशो वा संघातः पांचभौतिकः ॥
महान्संधारयत्येतच्छरीरं वायुना सह ॥ तस्य प्रभावयुक्तस्य निमित्तं देहभेदने ॥ यथैवोत्पद्यते किंचित्पंचत्वं गच्छ
ति तथा ॥ पुण्यपापविनाशांते पुण्यपापसमीरितं ॥ देहं विशति कालेन ततोयं कर्मसंभवं ॥ हित्वा हित्वा ह्ययं प्रैति
देहाद्देहं कृताश्रयः ॥ कालसंचोदितः क्षेत्री विशीर्णाद्वा गृहाद्गृहं ॥ तत्र नैवानुतप्यंते प्राज्ञा निश्चितनिश्चयाः ॥ ११५

कृपणास्त्वनुतप्यंते जनाः संबंधदर्शिनः ॥ नह्ययं कस्यचित्कश्चिन्नाभाव्य कश्चन विद्यते ॥ नवत्स्ये कोह्ययं नित्यं शारीरेसु
खदुःखकृत् ॥ नैव संज्ञायते जंतुर्न च जातु विपद्यते ॥ याति देहमयं त्यक्त्वा कदाचित्परमां गतिं ॥ पुण्यपापमयं देहं क्षप
यत्कर्मसंक्षयात् ॥ क्षीणदेहः पुनर्देही ब्रह्मत्वमुपगच्छति ॥ पुण्यपापक्षयार्थं हि सांख्यज्ञानं विधीयते ॥ तत्क्ष
ये ब्रह्म पश्यंति ब्रह्मभावे परां गतिं ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भ्रातरः पितरः पौत्रा ज्ञातयः सु
हृदः सुताः ॥ अर्थहेतोर्हताः क्रूरैरस्माभिः पापकर्मभिः ॥ येयमर्थोद्भवा तृष्णा कथमेतां पितामह ॥ निवर्तयेम पापा
नि तृष्णया कारिता वयं ॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ गीतं विदेहराजेन मांडव्या
यानुपृच्छते ॥ सुसुखं वत जीवामि यस्य मे नास्ति किंचन ॥ मिथिलायां प्रदीप्तायां न मे दह्यति किंचन ॥ अर्थाः ख
लु समृद्धा हि बाढं दुःखं विजानतां ॥ असमृद्धास्त्वपि सदा मोहयंत्यविचक्षणान् ॥ यच्च काममुखं लोके यच्च दि
व्यं महत्सुखं ॥ तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां ॥ यथैव शृंगं गोः काले वर्द्धमानस्य वर्द्धते ॥ तथैव तृ
ष्णा वित्तेन वर्द्धमानेन वर्द्धते ॥ किंचिदेव ममत्वेन यदा भवति कल्पितं ॥ तदेव परितापाय नाशे संपद्यते पुनः ॥
न कामाननुरुध्येत दुःखं कामेषु वै रतिः ॥ प्राप्यार्थमुपयुंजीत धर्मे कामान्विवर्जयेत् ॥ विद्वान्सर्वेषु भूतेषु आत्म

नास्योपमो भवेत्॥ कृतकृत्यो विशुद्धात्मा सर्वस्त्यजति चेव ह॥ उभे सत्यानृते त्यक्ता शोकानंदौ प्रियाप्रिये॥ भया
भये च संत्यज्य संप्रशांतो निरामयः॥ या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः॥ योसौ प्राणांतिको रोगस्तां तृ
ष्णां त्यजतः सुखं॥ चारित्रमात्मनः पश्यंश्चंद्रं शुद्धमनामयं॥ धर्मात्मा लभते कीर्तिं प्रेत्य चेह यथासुखं॥ राज्ञस्त
द्वचनं श्रुत्वा प्रीतिमानभवद्द्विजः॥ पूजयित्वा तद्वाक्यं मांडव्यो मोक्षमाश्रितः॥ ॥ शांतौ मोक्षधर्मे॥ ॥ युधि
ष्ठिर उवाच॥ ॥ किंशीलः किंसमाचारः किंविद्यः किंपरायणः॥ प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृते ध्रुवं॥ ॥
भीष्म उवाच॥ ॥ मोक्षधर्मेषु नियतो लघ्वाहारो जितेंद्रियः॥ प्राप्नोति परमं स्थानं यत्परं प्रकृतेर्ध्रुवं॥ स्वगृ
हादभिनिःसृत्य लाभालाभे समो मुनिः॥ समुपोढेषु कामेषु निरपेक्षः परिव्रजेत्॥ न चक्षुषा न मनसा न
वाचा दूषयेदपि॥ न प्रत्यक्षं परोक्षं वा दूषणं व्याहरेत्क्वचित्॥ न हिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत्॥
नेदं जीवितमासाद्य वैरं कुर्वीत केनचित्॥ अतिवादांस्तितिक्षेत नाभिमन्येत कंचन॥ क्रोध्यमानः प्रियं ब्रूया
दाक्रुष्टः कुशलं वदेत्॥ प्रदक्षिणं च सव्यं च ग्राममध्ये च नाचरेत्॥ भैक्ष्यचर्यामनापन्नो न गच्छेत्पूर्वकेतितः॥
अवकीर्णः सुगुप्तश्च न वाचा ह्यप्रियं वदेत्॥ मृदुः स्यादप्रतिक्रूरो विस्रब्धः स्यादकत्थनः॥ विधूमे न्यस्तमुसले

ध्यं गते भुक्तवज्जने ॥ अतीतयात्रसंचारे भिक्षां लिप्सेत वै मुनिः ॥ प्राणयात्रिकमात्रं स्यान्मात्रालाभेषनादृतः ॥ अ
लाभे न विहन्येत लाभश्चैनं न हर्षयेत् ॥ लाभं साधारणं नेच्छन्न भुंजीतानपूजितः ॥ अभिपूजितलाभं हि जुगुप्सेतैव
चे तादृशः ॥ न चानुदोषान्निंदेत न गुणानपि पूजैत् ॥ शय्यासने विविक्ते च नियमे वाभिपूजयेत् ॥ शून्यागारं वृक्षमू
लमरण्यमथ वा गुहां ॥ अज्ञातचर्यां गत्वायांत तोत्रैव संविशेत् ॥ अनुरोधविरोधाभ्यां समः स्यादचलो ध्रुवः ॥ सु
कृतं दुष्कृतं चोभ नानुरुध्येत कर्मणा ॥ नियतस्सुसंतुष्टः प्रसन्नवदनेंद्रियः ॥ विजीर्णप्यपयो मौनी वैराग्यं स
मुपाश्रितः ॥ अस्यंतं भौतिकं पश्यन्नकृतानाशमातिं गतिं ॥ निस्पृहः समदर्शी च पंकापंके न वर्त्तयन् ॥ आत्मा
नायः प्रशांतात्मा लब्धाहारो जितेंद्रियः ॥ वाचो वेगं मनसः क्रोधवेगं हिंसाविरामुदरोपस्थवेगं ॥ एतान्वेगान्वि
जुहेद्वै तपस्वी निंदा चास्य हृदयं नोपहन्यात् ॥ मध्यस्थ एव तिष्ठेत प्रशंसानिंदयोः समः ॥ एतत्पवित्रं परमं
परिव्राजकआश्रमे ॥ महात्मा सर्वतो दांतः सर्वत्रैवानपाश्रितः ॥ अपूर्ववायकः सोम्यो अनिकेतः समाहितः ॥
वानप्रस्थगृहस्थाभ्यां न संसृज्येत कर्हिचित् ॥ अज्ञातलिप्सां लिप्सेत न चैनं हर्ष आविशेत् ॥ विजानतां मो
क्ष एष श्रमः स्याद विजानतां ॥ मोक्षयानमिदं कृत्स्नं विदुषां हारितो ब्रवीत् ॥ अभयं सर्वभूतेभ्यो दत्वा यः प्रव्रजेद्गृ

हातु॥ लोकास्तेजोमयास्तस्य तथानंत्याय कल्पते॥ ॥ शांतौ मोक्षधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥धन्या धन्या इति जनाः
सर्वेस्मान्प्रवदंत्युत॥ न दुःखिततरः कश्चित्पुमानस्माभिरस्ति ह॥ लोकसंभाविते दुःखे प्राप्य संकुरुसत्तम॥ प्राप्य जातिं
मनुष्येषु देवैरपि पितामह॥ कदा वयं करिष्यामः संन्यासं दुःखसंज्ञकं॥ दुःखमेतच्छरीराणां धारणं कुरुसत्तम॥ विमु
क्ताः सप्तदशभिर्हेतुभूतैश्च पंचभिः॥ इंद्रियार्थैर्गुणैश्चैव अष्टाभिश्च पितामह॥ नागच्छंति पुनर्भावं मुनयः शंसितव्र
ताः॥ कदा वयं भविष्यामो राज्यं हित्वा परंतप॥ ॥भीष्म उवाच॥ ॥नास्त्यनंतं महाराज सर्वं संख्यानगोचरं॥ पुन
र्भावोपि संख्यातो नास्ति किंचिदिहाचलं॥ न चापि मन्यते राजन्नेष दोषः प्रसंगतः॥ उद्योगादेव धर्मज्ञ कालेनैव ग
मिष्यथ॥ नेशोपसंततं देही नृपते पुण्यपापयोः॥ तत एव समुत्थेन तमसा रुध्यतेपि च॥ यथांजनमयो वायुः
पुनर्मानःशिलं रजः॥ अनुप्रविश्य तद्वर्णो दृश्यते रंजयन्दिशः॥ तथा कर्मफलैर्देही रंजितस्तमसावृतः॥ विव
र्णो वर्णमाश्रित्य देहेषु परिवर्तते॥ ज्ञानेन हि सदा जंतुरज्ञानप्रभवं तमः॥ व्यपोहति तदा ब्रह्म प्रकाशति सना
तनं॥ अयत्नसाध्यं मुनयो वदंति ये चापि मुक्तास्त उपासितव्याः॥ त्वया लोकेन च सामरेण तस्मान्न शाम्यंति
महर्षिसंघाः॥ अस्मिन्नर्थे पुरागीतं शृणुष्वैकमना नृप॥ यथा दैत्येन वृत्रेण भ्रष्टैश्वर्येण चेष्टितं॥ निर्जितेना

सहायेन हृतराज्येन भारत॥ अशोचंतां शत्रुमध्ये बुद्धिमास्थाय केवलं॥ अथैश्वर्यं पुरावृत्तमुशना वाक्यमब्रवी
त्॥ कच्चित्स्वराजितस्याद्य न व्यथा तेऽस्ति दानव॥ ॥वृत्रउवाच॥ ॥सत्येन तपसा चैव विदित्वा संशयं स्पृहे॥ नशो
चामि नहृष्यामि भूतानामागतिंगतिं॥ कालसंचोदिता जीवा मज्जंति नरकेऽवशाः परितुष्टानि सर्वाणि दिव्यान्या
हुर्मनीषिणः॥ क्षपयित्वा तु तं कालं गणितं कालचोदिताः॥ सावशेषेण कालेन संभवंति पुनः पुनः॥ तिर्यग्यो
निसहस्राणि गत्वा नरकमेव च॥ निर्गछंत्यवशा जीवाः कामबंधनबंधनाः॥ एवं संसरमाणानि जीवान्यहमदृ
ष्टवान्॥ यथाकर्म तथा लाभ इति शास्त्रनिदर्शनं॥ तिर्यग्गछंति नरके मानुष्यं दैवमेव च॥ सुखदुःखे प्रिये
द्वेषे चरित्वा पूर्वमेव ह॥ कृतांतविधिसंयुक्तः सर्वो लोकः प्रपद्यते॥ गतं गछंति चाध्वानं सर्वभूतानि सर्वदा॥ का
लसंख्यानसंख्यातं सृष्टिस्थितिपरायणं॥ तं भाषमाणं भगवानुशना प्रत्यभाषत॥ धीमन्दुष्टप्रलापांस्त्वं
तात कस्मात्प्रभाषसे॥ ॥वृत्रउवाच॥ ॥प्रत्यक्षमेतद्भवतस्तथान्येषां मनीषिणां॥ मयायज्जयलुब्धेन पुरा तप्तं
महत्तपः॥ गंधानादाय भूतानां रसांश्च विविधानपि॥ अवर्द्धं च त्रीन्समाक्रम्य लोकान्वै स्वेन तेजसा॥ ज्वा
लामालापरिक्षिप्तो वैहायसचरस्तथा॥ अजेयः सर्वभूतानामासन्नित्यामपेतभीः॥ ऐश्वर्यं तपसा प्राप्तं भ्रष्टं

तच्च स्वकर्मभिः ।। धृतिमास्थाय भगवन्नशीवासि ततस्त्वहं ।। युयुत्सुना महेंद्रेण पुरा सार्द्धं महात्मना । ततो मे भगवा
न्दृष्टो हरिर्नारायणः प्रभुः । वैकुंठः पुरुषोनंतः शुक्लो विष्णुः सनातनः ।। मुंजकेशो हरिश्मश्रुः सर्वभूतपितामहः ।।
नूनं तु तस्य तपसः सावशेषमिहास्ति वै ।। यदहं प्रष्टुमिच्छामि भगवन्कर्मणः फलं । ऐश्वर्यं वै महद्ब्रह्मन्वर्णे
कस्मिन्प्रतिष्ठितं ।। निवर्तेते चापि पुनः कथमैश्वर्यमुत्तमं ।। कस्माद्भूतानि जीवंति प्रवर्ततेतथा पुनः ।। किं वा फ
लं परं प्राप्य जीवस्तिष्ठति शाश्वतः ।। केन वा कर्मणा शक्यमथ ज्ञानेन केनवा ।। तदवाप्तुं फलं विप्र तन्मे व्याख्यातुम
र्हसि ।। इतीदमुक्तः स मुनिस्तदानीं प्रत्याह यत्तच्छृणु राजसिंह ।। मयोच्यमानं पुरुषर्षभ त्वमनन्यचित्तः सह सो
दरीयैः ।। ॥ शांतौ मोक्षधर्मे ।। ।। उशनसोवाच ।। ।। नमस्तस्मै भगवते देवाय प्रभविष्णवे ।। तस्य पृथ्वीतलं तात
साकाशं बाहुगोचरं ।। मूर्द्धा यस्य त्वनंतश्च स्थानं दानवसत्तम ।। तस्याहं ते प्रवक्ष्यामि विष्णोर्माहात्म्यमुत्तमं ।।
तयोः संवदतोरेवमाजगाम महामुनिः ।। सनत्कुमारो धर्मात्मा संशयच्छेदनाय वै ।। स पूजितोसुरेंद्रेण मुनिनो
शनसा तथा ।। निषसादासने राजन्महार्हे मुनिपुंगवः ।। तमासीनं महाप्रज्ञमुशना वाक्यमब्रवीत् ।। ब्रूह्यस्मै
दानवेंद्राय विष्णोर्माहात्म्यमुत्तमं ।। सनत्कुमारस्तु ततः श्रुत्वा प्राह वचोर्थवत् ।। विष्णोर्माहात्म्यसंयुक्तं दानवें

११८

ज्ञाय धीमते॥ शृणु सर्वमिदं दैत्य विष्णोर्माहात्म्यमुत्तमं॥ विष्णौ जगत्स्थितं सर्वमिति विद्धि परंतप॥ सृजत्येष महाबाहो सृत्यत्ता संचराचरं॥ एष चाक्षिपते काले काले विसृजते पुनः॥ अस्मिन्गछंति विलयमस्माच्च प्रभवं स्मृत॥ नैष ज्ञानव्रताशक्यस्तपसा नैव चेज्यया॥ संप्राप्यमिंद्रिणां तु संयमेनैव शक्यते॥ बाह्ये चाभ्यंतरे चैव कर्मणो मनसि स्थितः॥ निर्मलीकुरुतो बुध्या सामुज्ञानेस्य समस्नुते॥ यथा हि पण्यकर्त्ता वै रूप्यमग्नौ विशोधयेत्॥ बहुशोति प्रयत्नेन महता स्मकृतेन ह॥ तद्वज्जातिशतैर्जीवः शुध्यते ल्पेन कर्मणा॥ बलेन महता चैवाप्येक जातौ विशुध्यते॥ लीलयाल्पं यथा दा गाच्चात्सम्भूज्योत्स्नेनोरजः॥ बहुयत्नेन महता दोषनिर्हरणं तथा॥ यथा चाल्पेनमाल्पेन वा सितं तिलसर्षपं॥ न मुंचति स्वकं गंधं तद्वत्सूक्ष्मस्य दर्शनं॥ तदेव बहुभिर्मील्यैर्वास्यमानं पुनः पुनः॥ विमुंचति स्वकं गंधं माल्याघ्रेव तिष्ठति॥ एवं जातिशतैर्युक्तो गुणैरेव प्रसंगिषु॥ बुध्या निवर्त्तते दोषो यत्नेनाभ्याससंज्ञेन ह॥ कर्मिपास्वनुरक्ता निभिन्नानि च दानव॥ यथा कर्मविशेषांश्च प्राप्नुवंति तथा शृणु॥ यथा यवत्संप्रवर्त्तंते यस्मिन्निष्ठति वा विभो॥ तत्तेनु पृथिव्याख्यास्यतदिहैकमनाः शृणु॥ अनादिनिधनः श्रीमान्हरिर्नारायणः प्रभुः॥ स वै सृजति भूतानि स्थावराणि चराणि च॥ एष सर्वेषु भूतेषु क्षरश्चाक्षर एव च॥ एकादश विकारात्मा जगत्सिव्याति रश्मिभिः॥ पादौ तस्य मही विद्धि मूर्धानं दिवमिस्मृत॥ बाहवस्तु दिशो दैत्य श्रोत्रमाकाशमेव च॥ तस्य तेजो मयः सूर्यो मनश्चंद्रमसि स्थितं॥ बुद्धिर्ज्ञानगता नित्यं

रसस्तस्य प्रतिष्ठितः ॥ भ्रुवौनंतरास्तस्य ग्रहा दानवसत्तम ॥ नक्षत्रचक्रं नेत्राभ्यां पादयोर्भूश्च दानव ॥ रजस्तमश्च स
त्वं च विद्धि नानायणात्मकौ ॥ सोश्रमाणां फलं तात कर्मपास्तत्फलं विदुः ॥ अकर्मणः फलं चैव स एव परमव्ययः ॥ छं
दांसि यस्य रोमाणि ह्यक्षरं च सरस्वती ॥ बह्वाश्रयो बहुमुखो धर्मो हृदि समाश्रितः ॥ स ब्रह्म परमो धर्मस्तपश्च सद
सच्च सः ॥ श्रुतिशास्त्रग्रहोपेतः षोडशर्त्विक्रतुश्च सः ॥ पितामहश्च विष्णुश्च सोश्विनौ स पुरंदरः ॥ मित्रोय वरुणश्चैव
यमोथ धनदुस्तथा ॥ ते पृथक् दर्शनास्तस्य संविदंति तथैकतां ॥ एकस्य विद्धि देवस्य सर्वं जगदिदं वशे ॥ नानाभूत
स्य दैत्येंद्र तस्यैकत्वं वदत्ययं ॥ जंतुः पश्यति विज्ञानात्ततो ब्रह्म प्रकाशते ॥ संहारविक्षेपसहस्रकोटीस्तिष्ठंति जीवाः
प्रचरंति चान्ये ॥ प्रजाविसर्गस्य च पारिमाण्यं वापीसहस्राणि बहूनि दैत्यः ॥ वाप्यः पुनर्योजनविस्तृतास्ताः क्रोशं
च गंभीरतयावगाढाः ॥ आयामतः पंचशताश्च सर्वाः प्रत्येकशो योजनतः प्रवृद्धाः ॥ वाप्या जलं क्षिप्यति वालकोट्या त्व
ह्ना सकृच्चाप्यथ न द्वितीयं ॥ तासां क्षये विद्धि परं विसर्गं संहारमेकं च तथा प्रजानां ॥ षड्जीववर्णाः परमं प्रमाणं कृ
ष्णो धूम्रो नीलमथास्य मध्यं ॥ रक्तं पुनः संहृततरं सुखं तु हारिद्रवर्णं सुसुखं च शुक्लं ॥ परं तु शुक्लं विमलं विशोकं ग
तक्लमं सिध्यति दानवेंद्र ॥ गत्वा तु योनिप्रभवाणि दैत्य सहस्रशः सिद्धिमुपैति जीवः ॥ गतिं च यां दर्शनमाह देवो ग
त्वा शुभं दर्शनमेव चापि ॥ गतिः पुनर्वर्णकृता प्रजानां वर्णस्तथा कालकृतोसुरेंद्र ॥ शतं सहस्राणि चतुर्दशेह परा गति

र्जीविगुणास्य दैत्य।।आरोहणं तत्कृतमेव विद्धि स्थानं तथा निःसरणं च तेषां।।कृष्णस्य वर्णस्य गतिं निकृष्टां स सज्यते
नरके पच्यमानः।।स्थानं तथा दुर्गतिभिस्तु तस्य प्रजाविसर्गान्सुबहून्वदंति।।शतं सहस्राणि ततश्चरित्वा प्राप्नोति
वर्णं हरितं तु पश्चात्।।स चैव तस्मिन्निवसत्यनीशो युगाक्षये तपसा संहृतात्मा।।स वै यदा सत्वगुणेन युक्तस्तमो व्य
पोहन्घटते स्वबुद्ध्या।।स लोहितं वर्णमुपैति नीलो मनुष्यलोके परिवर्त्तते च।।स तत्र संहारविसर्गमेकं स्वधर्मजैर्बं
धनैः क्लिश्यमानः।।ततः स हारिद्रमुपैति वर्णं संहारविक्षेपशते व्यतीते।।हारिद्रवर्णस्तु प्रजाविसर्गान्सहस्रशस्ति
ष्ठति संचरन्वै।।अविप्रमुक्तो निरये च दैत्य ततः सहस्राणि दशापराणि।।गतीः सहस्राणि च पंच तस्य चत्वारि संव
र्तकृतानि चैव।।विमुक्तमेनं निरयाच्च विद्धि सर्वेषु चान्येषु च संभवेषु।।स दैवलोके विहरत्यभीक्ष्णं ततश्च्युतो मानु
षतामुपैति।।संहारविक्षेपशतानि चाष्टौ मर्त्येषु तिष्ठस्यमृतत्वमेति।।सोस्मादथ भ्रस्यति कालयोगात्कृष्णे तले ति
ष्ठति सर्वकष्टे।।यथा त्वयं सिध्यति जीवलोकस्तत्तेभिधास्याम्यसुरप्रवीर।।दैवानि सव्यूहशतानि सप्त रक्तो हरि
द्रो यतथैव शुक्ले।।संश्रित्य संधावति शुक्लमेतमष्टापरानर्च्यतमान्स लोकान्।।अष्टौ च षष्टिं च शतानि यानि मनो
विरुद्धानि महाद्युतीनां।।शुक्लस्य वर्णस्य परागतिर्या त्रीण्येव रुद्धानि महानुभाव।।संहारविक्षेपमनिष्टमेकं चता
रि चान्यानि वसत्यनीशः।।षष्ठस्य वर्णस्य परागतिर्या सिद्धा विशिष्टस्य गतक्लमस्य।।स सप्तोत्तरं ह्येत्र वसत्यनीशः संहा

न विष्णो परतप्रभावः॥ तत्रैव संहारमुपप्लवानि संभाय्य संतिष्ठति जीवलोके॥ ततो व्ययं स्थानमनंतमेति देवस्य विष्णोरथ ब्रह्म
णश्च॥ शेषस्य चैवाथ नरस्य चैव देवस्य विष्णोःपरमस्य चैव॥ संहारकाले परिदग्धकाया ब्रह्माणमायांति सदा प्रजा हि॥ चे
ष्टात्मनो देवगणाश्च सर्वे ये ब्रह्मलोकादपराः स्म तेपि॥ प्रजाविसर्गं तु सशेषकालं स्थानानि स्वान्येव सरंति जीवाः॥ निःशे
षतस्तत्सदयांति चांते सर्वे देवाये सदृशा मनुष्याः॥ ये तु च्युताः सिद्धलोकाक्रमेण तेषां गतिं याति यथानुपूर्व्या॥ जीवाः परे
तद्बलतुल्यरूपाः स्वं स्वं विधिं यांति विपर्ययेण॥ स यावदेवास्ति सशेषभुक्ते प्रजाश्च देव्यौ च तथैव शुक्ले॥ तावत्तदंगेषु विशु
द्धभावः संयम्य पंचेंद्रियरूपमेतत्॥ शुद्धां गतिं तां परमां परैति शुद्धेन नित्यं मनसा विचिन्वन्॥ ततो व्ययं स्थानमुपैति ब्रह्म
दुष्प्रापमभ्येति स शाश्वतं वै॥ इत्येतदाख्यातमहीनसत्व नारायणस्येह बलं मयाते॥ ॥वृत्र उवाच॥ ॥एवं गते मे न विषादो
स्ति कश्चित्सम्यक् पश्यामि वचस्तथैतत्॥ श्रुत्वा तु ते वाचमदीनसत्व वीकल्मषोस्म्यद्य तथा विपाप्मा॥ प्रवृत्तमेतत् भ
गवन्महर्षे महाद्युतेश्चक्रमनंतवीर्यं॥ विष्णोरनंतस्य सनातनं तत्स्थानं सर्गा यत्र सर्वे प्रवृत्ताः॥ स वै महात्मा पुरुषोत्तमो
वै तस्मिन् जगत्सर्वमिदं प्रतिष्ठितं॥ ॥भीष्म उवाच॥ ॥एवमुक्त्वा स कौंतेय वृत्रः प्राणानवासृजत्॥ योजयित्वा तथात्मानं
परं स्थानमवाप्तवान्॥ ॥युधिष्ठिर उवाच॥ ॥अयं स भगवान्देवः पितामह जनार्दनः॥ सनत्कुमारो वृत्राय यत्तवाख्या
तवान्पुरा॥ ॥भीष्म उवाच॥ ॥मूलस्थायी महादेवो भगवान्स्वेन तेजसा॥ तत्स्थः सृजति तान्भावान्नानारूपान्महा

[illegible] ॥ तुरीयार्द्धेन तस्येमं विद्धि केशवमच्युतं ॥ तुरीयार्द्धेन लोकांस्त्रीन्भावयत्येष बुद्धिमान् ॥ अर्वाक्स्थितस्तु यः स्थायी क-
ल्पांते परिवर्त्तते ॥ स शेते भगवानप्सु योसावतिबलप्रभुः ॥ तान्विधाता प्रसंन्नात्मा लोकांश्चरति शाश्वतान् ॥ सर्वाण्यशून्या-
निकरोत्यनंतः सनातनः संचरते च लोकान् ॥ स चानिरुद्धः सृजते महात्मा तत्स्थं जगत्सर्वमिदं विचित्रं ॥ ॥ युधिष्ठिर उवाच ॥
वृत्रेण परमार्थज्ञ दृष्टा मन्ये त्मनो गतिः ॥ शुभा तस्मात्स सुखितो न शोचति पितामह ॥ शुक्लः शुक्लाभिजातीयः साध्यो
नावर्त्तते नघ ॥ तिर्यग्गतेश्च निर्मुक्तो निरयाच्च पितामह ॥ हरिद्रवर्णे रक्ते वा वर्त्तमानस्तु पार्थिव ॥ तिर्यगेवानुपश्येत क-
र्मभिस्तामसैर्वृतः ॥ वयं तु भृशमापन्ना रक्ता दुःखसुखे ऽसुखे ॥ कां गतिं प्रतिपत्स्यामो नीलां कृष्णाधमामथ ॥ ॥ भीष्म
उवाच ॥ ॥ शुद्धाभिजनसंपन्नाः पांडवाः संशितव्रताः ॥ विहृत्य देवलोकेषु पुनर्मानुषमेष्यथ ॥ प्रजाविसर्गं च सुखे-
न काले प्रत्येत्य देवेषु सुखानि भुक्त्वा ॥ सुखेन संयास्यथ सिद्धसंख्यां मा वो भयं भूद्विमलाः स्थ सर्वे ॥ ॥ शांतौ मोक्ष-
धर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अहो धर्मिष्ठता तात वृत्रस्यामिततेजसः ॥ यस्य विज्ञानमतुलं विष्णो भक्तिश्च तादृ-
शी ॥ दुर्विज्ञेयं पदं तात विष्णोरमिततेजसः ॥ कथं वा राजशार्दूल पदं तज्ज्ञातवानसौ ॥ भवता कथितं ह्येतच्छ्रद्दधे चाह-
मच्युत ॥ भूयस्तु मे समुत्पन्ना बुद्धिरव्यक्तदर्शनात् ॥ कथं विनिहतो वृत्रः शक्रेण पुरुषर्षभ ॥ धार्मिको विष्णुभक्तश्च
तत्त्वज्ञश्च पदान्वये ॥ एतन्मे संशयं ब्रूहि पृच्छते भरतर्षभ ॥ वृत्रस्तु राजशार्दूल यथा शक्रेण निर्जितः ॥ यथा चैवाभ

मोक्षधर्म॰

१२०

व युद्धं तच्चापि वृत्रस्य पितामह ॥ विस्तरेण महाबाहो परं कौतूहलं हि मे ॥ ॥भीष्म उवाच ॥ ॥रथेनेंद्रः प्रयातो वै सार्द्धं देवगणैः
पुरा ॥ ददर्शाथाग्रतो वृत्रं धिष्ठितं पर्वतोपमं ॥ योजनानां शतान्यूर्ध्वं पंचोच्छ्रितमरिंदम ॥ शतानि विस्तरेणाथ त्रीण्येवा
भ्यधिकानि वै ॥ तत्प्रेक्ष्य तादृशं रूपं त्रैलोक्येनापि दुर्जयं ॥ वृत्रस्य देवाः संत्रस्ता न शांतिमुपलेभिरे ॥ शक्रस्य तु तदा रा
जन्नूरुस्तंभो व्यजायत ॥ भयाद्वृत्रस्य सहसा दृष्ट्वा तद्रूपमुत्तमं ॥ ततो नादः समभवद्वादित्राणां च निःस्वनः ॥ देवासु
राणां सर्वेषां तस्मिन्युद्ध उपस्थिते ॥ अथ वृत्रस्य कौरव्य दृष्ट्वा शक्रमवस्थितं ॥ न संभ्रमो न भीः काचिदास्था वा सम
जायत ॥ ततः समभवद्युद्धं त्रैलोक्यभयंकरं ॥ शक्रस्य च सुरेंद्रस्य वृत्रस्य च महात्मनः ॥ असिभिः पट्टिशैः शूलैः श
क्तितोमरमुद्गरैः ॥ शिलाभिर्विविधाभिश्च कार्मुकैश्च महास्वनैः ॥ शस्त्रैश्च विविधैर्दिव्यैः पावकोल्काभिरेव च ॥ देवा
सुरैस्ततः सैन्यैः सर्वमासीत्समाकुलं ॥ पितामहपुरोगाश्च सर्वे देवगणास्तथा ॥ ऋषयश्च महाभागास्तद्युद्धं द्र
ष्टुमागमन् ॥ विमानाग्र्यैर्महाराज सिद्धाश्च भरतर्षभ ॥ गंधर्वाश्च विमानाग्र्यैरप्सरोभिः समागमन् ॥ ततोंतरिक्षमावृ
त्य वृत्रो धर्मभृतां वर ॥ अश्मवर्षेण देवेंद्रं समाकिरदतिद्रुतं ॥ ततो देवगणाः क्रुद्धाः सर्वतः शरवृष्टिभिः ॥ अश्मव
र्षमपाहरन्वृत्रप्रेरितमाहवे ॥ वृत्रस्तु कुरुशार्दूल महामायो महाबलः ॥ मोहयामास देवेंद्रं मायायुद्धेन सर्वशः ॥
तस्य वृत्रार्दितस्याथ मोह आसीच्छतक्रतोः ॥ रथंतरेण तं तत्र वसिष्ठः समबोधयत् ॥ ॥वसिष्ठ उवाच ॥ ॥दे

१२०

वश्रेष्ठोसि देवेंद्र दैत्यासुरनिबर्हण ।। त्रैलोक्यबलसंयुक्तः कस्माच्छक्र विषीदसि ।। एष ब्रह्मा च विष्णुश्च शिवश्चैव जगत्प
तिः ।। सोमश्च भगवान्देवः सर्वे च परमर्षयः ।। माकार्षीः कश्मलं शक्र कश्चिदेवेतरो यथा ।। आर्यां युद्धे मतिं कृत्वा ज
हि शत्रून्सुराधिप ।। एष लोकगुरुस्त्र्यक्षः सर्वलोकनमस्कृतः ।। निरीक्षते त्वां भगवांस्त्यज मोहं सुराधिप ।। एते ब्र
ह्मर्षयश्चैव बृहस्पतिपुरोगमाः ।। स्तवेन शक्र दिव्येन स्तुवंति त्वां जयाय वै ।। ।। भीष्म उवाच ।। ।। एवं संबोध्यमान
स्य वसिष्ठेन महात्मना ।। अतीव वासवस्यासीद्बलमुत्तमतेजसः ।। ततो बुद्धिमुपागम्य भगवान्पाकशासनः ।। योगेन मह
ता युक्तस्तो मायां व्यपकर्षति ।। ततो गिरःसुतः श्रीमांस्ते चैव सुमहर्षयः ।। दृष्ट्वा वृत्रस्य विक्रांतमुपागम्य महेश्वरं ।। ऊचु
र्वृत्रविनाशार्थं लोकानां हितकाम्यया ।। ततो भगवतस्तेजो ज्वरो भूत्वा जगत्पतेः ।। समाविशत्तदा रौद्रो वृत्रं दैत्यवरं तदा ।।
विष्णुश्च भगवान्देवः सर्वलोकाभिपूजितः ।। ऐंद्रं समाविशद्वज्रं लोकसंरक्षणे रतः ।। ततो बृहस्पतिर्धीमानुपागम्य
शतक्रतुं ।। वसिष्ठश्च महातेजाः सर्वे च परमर्षयः ।। ते समासाद्य वरदं वासवं लोकपूजितं ।। ऊचुरेकाग्रमनसो जहि वृ
त्रमिति प्रभो ।। ।। महेश्वर उवाच ।। ।। एष वृत्रो महान्छक्र बलेन महता वृतः ।। विश्वात्मा सर्वगश्चैव बहुमायश्च विश्रुतः ।।
तदेनमसुरश्रेष्ठं त्रैलोक्येनापि दुर्जयं ।। जहि त्वं योगमास्थाय मावमंस्थाः सुरेश्वर ।। अनेन हि तपस्तप्तं बलार्थममरा
धिप ।। षष्टिं वर्षसहस्राणि ब्रह्मा चास्मै वरं ददौ ।। महत्त्वं योगिनां चैव महामायत्वमेव च ।। महाबलत्वं च तथा तेजश्चा

ष्ट्यं सुरेश्वर ॥ एतत्तां मामकं तेजः समाविशति वासव ॥ हत्वमेनेत्वमप्येनं वज्रेणाजहि दानवं ॥ ॥ शक्र उवाच ॥ ॥ भगवंस्त्वत्प्र
सादेन दितिजं तु दुरासदं ॥ वज्रेण निहनिष्यामि पश्यतस्ते सुरर्षभ ॥ ॥ भीष्म उवाच ॥ ॥ आविश्यमाने दैत्ये तु ज्वरेणाथ
महासुरे ॥ देवतानामृषीणां च हर्षान्नादो महानभूत् ॥ ततो दुंदुभयश्चैव शंखाश्च सुमहास्वनाः ॥ मुरजा डिंडिमा
श्चैव प्रावाद्यत सहस्रशः ॥ असुराणां तु सर्वेषां स्मृतिलोपो महानभूत् ॥ मायानाशश्च बलवान्क्षणेन समपद्यत ॥ त
थाविष्टमथो ज्ञात्वा ऋषयो देवतास्तथा ॥ स्तुवंतः शक्रमीशानं तथा प्राचोदयन्नपि ॥ रथस्थस्य हि शक्रस्य युद्धकाले
महात्मनः ॥ ऋषिभिः स्तूयमानस्य रूपमासीत्सुदुर्दृशं ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ वृत्रस्य तु महा
राज ज्वराविष्टस्य सर्वशः ॥ अभवन्यानि लिंगानि शरीरे तानि मे शृणु ॥ ज्वलितास्योभवद्घोरो वैवर्ण्यं चागमत्परं ॥
गात्रकंपश्च सुमहान्श्वासश्चाप्यभवन्महान् ॥ रोमहर्षश्च तीव्रोभून्निश्वासश्च महान्नृप ॥ शिवा चाशिवसंकाशा
तस्य वक्त्रात्सुदारुणा ॥ निष्पपात महाघोरा स्मृतिः सा तस्य भारत ॥ उल्काश्च ज्वलितास्तस्य दीप्ताः पार्श्वे प्रपेदिरे ॥
गृध्राः कंकाबलाकाश्च वाचो मुंचन्सुदारुणाः ॥ वृत्रस्योपरि संहृष्टाश्चक्रवत्परिबभ्रमुः ॥ ततस्तं रथमास्थाय देवाप्या
यित आहवे ॥ वज्रोद्यतकरः शक्रः तं दैत्यं समवेक्षत ॥ अमानुषमथो नादं समुमोच महासुरः ॥ व्यजृंभच्चैव राजेंद्र तीव्र
ज्वरसमन्वितः ॥ अथास्य जृंभतः शक्रस्ततो वज्रमवासृजत् ॥ स वज्रः सुमहातेजाः कालाग्निसदृशोपमः ॥ क्षिप्रमे

वमहाकायंवृत्रंदैत्यमपातयत्॥ ततोनादःसमभवत्पुनरेवसमंततः॥ वृत्रंविनिहतंदृष्ट्वादेवानांभरतर्षभ॥ वृत्रंहत्वामघवा
न्दानवारिर्महायशाः॥ वज्रेणविष्णुयुक्तेनदिवमेवसमाविशत्॥ अथवृत्रस्यकौरव्यशरीरादभिनिःसृता॥ ब्रह्म
वध्यामहाघोरारौद्रालोकभयावहा॥ करालदशनाभीमाविकृताकृष्णपिंगला॥ प्रकीर्णमूर्द्धजाचैवघोरनेत्राचभार
त॥ कपालमालिनीचैवकृत्येवभरतर्षभ॥ रुधिरार्द्राचधर्मज्ञचीरवल्कलवासिनी॥ साभिनिष्क्रम्यराजेंद्रता
दृग्रूपाभयावहा॥ वज्रिणंमृगयामासतदाभरतसत्तम॥ कस्यचित्त्वथकालस्यवृत्रहाकुरुनंदन॥ स्वर्गायाभिमु
खःप्रायाल्लोकानांहितकाम्यया॥ साविनिःसरणंदृष्ट्वाशक्रंमहौजसे॥ जग्राहवध्यादेवेंद्रंसुलग्नाचाभवत्त
दा॥ सहितस्मिन्समुत्पन्नेब्रह्मवध्याकृतेभये॥ नलिन्याबिसमध्यस्थउवासाब्दगणान्बहून्॥ अनुसृत्यतुयत्ना
त्सातयावैब्रह्महत्यया॥ तदागृहीतःकौरव्यनिश्चेष्टःसमपद्यत॥ तस्याव्यपोहनेशक्रःपरंयत्नंचकारह॥ नचा
शकत्तांदेवेंद्रोब्रह्महत्यांव्यपोहितुं॥ गृहीतएवतुतयादेवेंद्रोभरतर्षभ॥ पितामहमुपागम्यशिरसाप्रत्यपूज
यत्॥ ज्ञात्वागृहीतंशक्रंसद्विजप्रवरवध्यया॥ ब्रह्मासंचिंतयामासतदाभरतसत्तम॥ तामुवाचमहाबाहोब्रह्म
वध्यांपितामहः॥ स्वरेणमधुरेणाथसांत्वयन्निवभारत॥ मुच्यतांत्रिदशेंद्रोयंमत्प्रियंकुरुभाविनि॥ ब्रूहिकिंते
करोम्यद्यकामंकिंत्वमिहेच्छसि॥ ॥ब्रह्मवध्योवाच॥ ॥त्रिलोकपूजितेदेवेप्रीतेत्रैलोक्यकर्तरि॥ कृतमेव

हमन्यास्मिन्निवासं तु विधत्स्व मे ॥ त्वया कृतेयं मर्यादा लोकसंरक्षणार्थिना ॥ स्थापना वै सुमहती त्वया देव प्रव
र्तिता ॥ प्रीते तु त्वयि धर्मज्ञे सर्वलोकेश्वर प्रभो ॥ शक्रादपगमिष्यामि निवासं संविधत्स्व मे ॥ ॥ भीष्म उवाच ॥
तथेति तां प्राह तदा ब्रह्मवध्यां पितामहः ॥ उपायतः स शक्रस्य ब्रह्मवध्यां व्यपोहत ॥ ततः स्वयंभुवा ध्यातस्तत्र वह्नि
र्महात्मना ॥ ब्रह्माणमुपसंगम्य ततो वचनमब्रवीत् ॥ प्राप्तोऽस्मि भगवन्देव त्वत्सकाशमनिंदित ॥ यत्कर्तव्यं
मया देव तद्भवान्वक्तुमर्हसि ॥ ॥ ब्रह्मोवाच ॥ ॥ बहुधा विभजिष्यामि ब्रह्मवध्यामिमामहं ॥ शक्रस्याद्य वि
मोक्षार्थं चतुर्भागं प्रतीच्छ वै ॥ ॥ अग्निरुवाच ॥ ॥ मम मोक्षस्य कोंतो वै ब्रह्मंध्यायस्व वै प्रभो ॥ एतदिच्छामि
विज्ञातुं तत्त्वतो लोकपूजित ॥ ॥ ब्रह्मोवाच ॥ ॥ यस्त्वां ज्वलंतमासाद्य स्वयं वै मानवः क्वचित् ॥ बीजौषधिर
सैर्वह्ने न यक्ष्यति तमोवृतः ॥ तमेषा यास्यति क्षिप्रं तत्रैव च निवत्स्यति ॥ ब्रह्मवध्या हव्यवाह व्येतु ते मानसो ज्व
रः ॥ इत्युक्तः प्रतिजग्राह तद्वचो हव्यकव्यभुक् ॥ पितामहस्य भगवांस्तथा च तदभूत्प्रभो ॥ ततो वृक्षौषधितृणं समा
हूय पितामहः ॥ इममर्थं महाराज वक्तुं समुपचक्रमे ॥ ततो वृक्षौषधितृणं यथैवोक्तं यथातथं ॥ व्यथितं तवाहि
वेङ्गाऽस्त्र ब्रह्माणमिदमब्रवीत् ॥ अस्माकं ब्रह्मवध्यायाः कोंतो लोकपितामह ॥ देवेनाभिहतानस्मान्न पुनर्हं

तुमर्हसि ॥ वयमग्निं तथासीत वर्षं च पवनेरितं ॥ सहामः सततं देव तथा छेदनभेदने ॥ ब्रह्मवध्यामिमामद्य
प्रभवतः शासनाद्वयं ॥ ग्रहीष्यामि त्रिलोकेश मोक्षं चिंतयतां भवान् ॥ ॥ ब्रह्मोवाच ॥ ॥ पर्वकाले तु संप्राप्ते
यो वै छेदनभेदनं ॥ करिष्यति नरो मोहात्तमेषा तु गमिष्यति ॥ ॥ भीष्म उवाच ॥ ॥ ततो वृक्षौषधितृणमेव
मुक्तं महात्मना ॥ ब्रह्माणमभिसंपूज्य जगामाशु यथागतं ॥ आहूयाप्सरसो देवस्ततो लोकपितामहः ॥ वाचा
मधुरया प्राह सांत्वयन्निव भारत ॥ इयमिंद्रादनु प्राप्ता ब्रह्मवध्या वरांगना ॥ चतुर्थमस्या भागांशं मयोक्ताः सं
प्रतीछत ॥ ॥ अप्सरस ऊचुः ॥ ॥ ग्रहणे कृतबुद्धीनां देवेश तव शासनात् ॥ मोक्षं समयतोस्माकं चिंतयस्व पिता
मह ॥ ॥ ब्रह्मोवाच ॥ ॥ रजस्वलासु नारीषु यो वै मिथुनमाचरेत् ॥ तमेषा यास्यति क्षिप्रं व्येतु वो मानसो ज्व
रः ॥ ॥ भीष्म उवाच ॥ ॥ तथेति हृष्टमनस इत्युक्त्वाप्सरसां गणाः ॥ स्वानि स्थानानि संप्राप्य रेमिरे भरतर्ष
भ ॥ ततस्त्रिलोककृद्देवः पुनरेव महातपाः ॥ अपः संचिंतयामास ध्यातास्ताश्चाप्यथागमन् ॥ तास्तु सर्वाः स
मागम्य ब्रह्माणममितौजसं ॥ इदमूचुर्वचो राजन्प्रणिपत्य पितामहं ॥ इमाः स्म देव संप्राप्तास्त्वत्सकाश
मरिंदम ॥ शासनात्तव लोकेश समाज्ञापय तत्प्रभो ॥ ॥ ब्रह्मोवाच ॥ ॥ इयं वृत्रादनुप्राप्ता पुरुहूतं महाभ

याः॥ ब्रह्महत्या चतुर्थींशमस्याप्स्वयं प्रतीछत॥ ॥आप ऊचुः॥ ॥एवं भवतु लोकेश यथा वदसि तः प्रभो॥ मोक्षं सम
यतोस्माकं संचिंतयितुमर्हसि॥ त्वं हि देवेश सर्वस्य जगतः परमा गतिः॥ कोन्यः प्रसादो हि भवेद्यः कृच्छ्रात्स
मुद्धरेत्॥ ॥ब्रह्मोवाच॥ ॥अल्पा इति मतिं कृत्वा यो नरो बुद्धिमोहितः॥ श्लेष्ममूत्रपुरीषाणि युष्मासु प्रतिमो
क्ष्यति॥ तमियं यास्यति क्षिप्रं तत्रैव च निवत्स्यति॥ तथा वो भविता मोक्ष इत्यसत्यं ब्रवीमि वः॥ ततो विमुच्य देवेंद्रं
ब्रह्मवध्या युधिष्ठिर॥ यथा विसृष्टं तं वासमगमद्देवशासनात्॥ एवं शक्रेण संप्राप्ता ब्रह्मवध्या जनाधिप॥ पि
तामहमनुज्ञाप्य सोश्वमेधमकल्पयत्॥ श्रूयते च महाराज संप्राप्ता वा[illegible]न वे ध्यान वै॥ ब्रह्मवध्या ततः शुद्धिं हय
मेधेन लब्धवान्॥ समवाप्य श्रियं देवो हत्वारींश्च सहस्रशः॥ प्रहर्षमतुलं लेभे वासवः पृथिवीपते॥ वृत्रस्य रु
धिराच्चैव शिखंडाः पार्थ जज्ञिरे॥ द्विजातिभिरभक्ष्यास्ते दीक्षितैश्च तपोधनैः॥ सर्वावस्थं त्वमप्येषां द्विजा
तीनां प्रियं कुरु॥ इमे हि भूतले देवाः प्रथिताः कुरुनंदन॥ एवं शक्रेण कौरव्य बुद्धिसौक्ष्म्यान्महासुरः॥ उपायप
र्वं निहतो वृत्रो ह्यमिततेजसा॥ एवं त्वमपि कौंतेय पृथिव्यामपराजितः॥ भविष्यसि यथा देवः शतक्रतुरमित्रहा॥
ये तु शक्रकथां दिव्यामिमां पर्वसु पर्वसु॥ विप्रमध्ये वदिष्यंति न ते प्राप्स्यंति किल्बिषं॥ इत्येतद्वृत्रमाश्रित्यश

कस्यात्यद्भुतमहत्॥ कथितं कर्म ते तात किं भूयः श्रोतुमिच्छसि॥ ॥शांतौ मोक्षधर्म॥ ॥युधिष्ठिरः॥ ॥पितामह महाप्राज्ञ सर्वशास्त्रविशारद॥ अस्मिन्वृत्रवधादेव विवक्षा मम जायते॥ ज्वरेण मोहितो वृत्रः कथितस्ते जनाधिप॥ निहतो वासवेनेह वज्रेणेति तदानघ॥ कथमेष महाप्रज्ञ ज्वरः प्रादुर्बभौ कुतः॥ ज्वरोत्पत्तिं निपुणातः श्रोतुमिच्छाम्यहं प्रभो॥ ॥भीष्म उवाच॥ ॥शृणु राजन्ज्वरस्येमं संभवं लोकविश्रुतं॥ विस्तरं चास्य वक्ष्यामि यादृशश्चैव भारत॥ पुरा मेरोर्महाराज शृंगं त्रैलोक्यपूजितं॥ ज्योतिष्कं नाम सावित्रं सर्वरत्नविभूषितं॥ अप्रमेयमनाधृष्यं सर्वलोकेषु भारत॥ तत्र देवो गिरितटे हेमधातुविभूषिते॥ पर्यंक इव विभ्राजन्नुपविष्टो बभूव ह॥ शैलराजसुता चास्य नित्यं पार्श्वे स्थिता बभौ॥ तथा देवा महात्मानो वसवश्चामितौजसः॥ तथैव च महात्मानावश्विनौ भिषजां वरौ॥ तथा वैश्रवणो राजा गुह्यकैरभिसंवृतः॥ यक्षाणामीश्वरः श्रीमान्कैलासनिलयः प्रभुः॥ उपासंत महात्मानमुशना च महामुनिः॥ सनत्कुमारप्रमुखास्तथैव च महर्षयः॥ अंगिरःप्रमुखाश्चैव तथा देवर्षयो परे॥ विश्वावसुश्च गंधर्वस्तथा नारदपर्वतौ॥ अप्सरोगणसंघाश्च समाजग्मुरनेकशः॥ ववौ सुखः शिवो वायुर्नानागंधवहः शुचिः॥ सर्वर्तुकुसुमोपेताः पुष्पवंतो द्रुमास्तथा॥ तथा विद्याधराश्चैव सिद्धाश्चै

वतपोधनाः॥ महादेवं पशुपतिं पर्युपासंत भारत॥ भूतानि च महाराज नानारूपधराण्यथ॥ राक्षसाश्च महारौद्राः
पिशाचाश्च महाबलाः॥ बहुरूपधरा हृष्टा नानाप्रहरणोद्यताः॥ देवस्यानुचरास्तत्र तस्थिरे चानलोपमाः॥ न
दी च भगवांस्तत्र देवस्यानुमते स्थितः॥ प्रगृह्य ज्वलितं शूलं दीप्यमानः स्वतेजसा॥ गंगा च सरितां श्रेष्ठा सर्वती
र्थजलोद्भवा॥ पर्युपासत तं देवं रूपिणी कुरुनंदन॥ स एवं भगवांस्तत्र पूज्यमानः सुरर्षिभिः॥ देवैश्च सुमहा
तेजा महादेवो व्यतिष्ठत॥ कस्यचित्त्वथ कालस्य दक्षो नाम प्रजापतिः॥ पूर्वोक्तेन विधानेन यक्ष्यमाणोन्वपद्य
त॥ ततस्तस्य मखं देवाः सर्वे शक्रपुरोगमाः॥ गमनाय समागम्य बुद्धिमापेदिरे तदा॥ ते विमानैर्महात्मानो
ज्वलनार्कसमप्रभैः॥ देवस्यानुमतेगच्छन्गंगाद्वारमिति श्रुतिः॥ प्रस्थिता देवता दृष्ट्वा शैलराजसुता
तदा॥ उवाच वचनं साध्वी देवं पशुपतिं पतिं॥ भगवन्क्व नु यांत्येते देवाः शक्रपुरोगमाः॥ ब्रूहि तत्वेन तत्वज्ञ
संशयो मे महानयं॥ ॥ महेश्वर उवाच॥ ॥ दक्षो नाम महाभागे प्रजानां पतिरुत्तमः॥ हयमेधेन यजते त
त्र यांति दिवौकसः॥ ॥ उमोवाच॥ ॥ यज्ञमेते महादेव किमर्थं नाभिगच्छति॥ केन वा प्रतिषेधेन गमनं
ते न विद्यते॥ ॥ महेश्वर उवाच॥ ॥ सुरैरेव महाभागे सर्वमेतदनुष्ठितं॥ यज्ञेषु सर्वेषु मम न भाग उ

पकल्पितः।।पूर्वोपायोपपन्नेन मार्गेणावरवर्णिनि।।न मे सुराःप्रयछंति भागं यज्ञस्य धर्मतः।। ।।उमोवाच।।
भगवन्सर्वभूतेषु प्रभावाभ्यधिको गुणैः।।अजय्यश्चाप्रधृष्यश्च तेजसा यशसा श्रिया।।अनेन ते महाभाग
प्रतिषेधेन भागतः।।अतीव दुःखमुत्पन्नं वेपथुश्च ममानघ।। ।।भीष्म उवाच।। ।।एवमुक्त्वा तु सा देवी देवं
पशुपतिं पतिं।।तूष्णीभूताभवद्राजन्दह्यमानेन चेतसा।।अथ देव्या मतं ज्ञात्वा हृद्गतं यच्चिकीर्षितं।।
स समाज्ञापयामास तिष्ठत्विति नंदिनं।।ततो योगबलं कृत्वा सर्वयोगेश्वरेश्वरः।।तं यज्ञं सुमहातेजा
भीमैरनुचरैस्तदा।।सहसा घातयामास देवदेवपिनाकधृक्।।केचिन्नादानमुंचंत केचिद्धासांश्च चक्रिरे
।।रुधिरेणापरे राजंस्तत्राग्निं समवाकिरन्।।केचिद्यूपान्समुत्पाट्य बभ्रमुर्विकृताननाः।।आस्यैरन्ये
चाग्रसंस्तत्र तथैव परिचारकान्।।ततः स यज्ञो नृपते वध्यमानः समंततः।।आस्थाय मृगरूपं वै खमेवाभ्य
पतत्तदा।।तं तु यज्ञं तथा रूपं गच्छंतमुपलभ्य सः।।धनुरादाय बाणेन तदान्वसरत प्रभुः।।ततस्तस्य सुरेश
स्य क्रोधाद्भ्रमिततेजसः।।ललाटात्प्रसृतो घोरः स्वेदबिंदुर्बभूव ह।।तस्मिन्पतितमात्रे च स्वेदबिंदौ तथा भु
वि।।प्रादुर्बभूव सुमहानग्निः कालानलोपमः।।तत्र चाजायत तदा पुरुषः पुरुषर्षभ।।ह्रस्वोतिमात्रंच

क्ताक्षो हरिश्मश्रुर्विभीषणाः ॥ ऊर्ध्वकेशातिनोमांगःश्येनोलूकस्तथैव च ॥ करालः कृष्णवर्णश्च रक्तवासा
स्तथैव च ॥ तं यज्ञं सुमहासत्वो दहन्कक्षमिवानलः ॥ व्यचरन्सर्वतो देवान्प्राद्रवन्नृषींस्तथा ॥ देवाश्चाप्यद्रवन्
सर्वे सतोभीता दिशो दश ॥ तेन तस्मिन्विचरता पुरुषेण विशांपते ॥ पृथिवी ह्यचलद्राजन्नतीव भरतर्षभ ॥ हाहाभूतं
जगत्सर्वमुपलक्ष्य तदा प्रभुः ॥ पितामहो महादेवं दर्शयन्प्रत्यभाषत ॥ ॥ब्रह्मोवाच॥ ॥भवतो पि सुराः सर्वे भा
गं दास्यंति वै प्रभो ॥ क्रियतां प्रतिसंहारः सर्वदेवेश्वर त्वया ॥ इमा हि देवताः सर्वा ऋषयश्च परंतप ॥ तव क्रोधान्महा
भागं न शांतिमुपलेभिरे ॥ यश्चैष पुरुषो जातः स्वेदात्ते विबुधोत्तम ॥ ज्वरो नामैष धर्मज्ञ लोकेषु प्रचरिष्यति ॥ एकीभूत
स्य तेजस्य धारने पो तेजसः प्रभो ॥ समर्था सकला पृथ्वी बहुधा सृज्यतामयं ॥ इत्युक्तो ब्रह्मणा देवो भागे चापि प्रकल्पि
ते ॥ भगवंतं तथेत्याह ब्रह्माणममितौजसं ॥ परांच प्रीतिमगमदुत्स्मयंश्च पिनाकधृक् ॥ अवाप च तदा भागं यथोक्तं
ब्रह्मणा भवः ॥ ज्वरं च सर्वधर्मज्ञो बहुधा व्यसृजत्तदा ॥ शांत्यर्थं सर्वभूतानां शृणु तच्चापि पुत्रक ॥ शीर्षाभितापो नागा
नां पर्वतानां शिलाजतु ॥ अपां तु नीलिकां विद्यान्निर्मोकं भुजगेषु च ॥ खोरकः सौरभेयाणामूषरं पृथिवीतले ॥ पशू
नामपि धर्मज्ञ दृष्टिप्रत्यवरोधनं ॥ रंध्रागतमथाश्वानां शिखोद्भेदश्च बर्हिणां ॥ नेत्ररागः कोकिलस्य ज्वरः प्रोक्तो म

हात्मना ॥ अवीतां पित्तभेदश्च सर्वेषामिति नः श्रुतं ॥ शुकानामपि सर्वेषां हिक्किकां प्रोच्यते ज्वरः ॥ शार्दूलेष्वथ धर्मज्ञ श्रमो ज्व
र इहोच्यते ॥ मानुषेषु तु धर्मज्ञ ज्वरो नामैष भारत ॥ मरणे जन्मनि तथा मध्ये चाविशते नरं ॥ एतन्माहेश्वरं तेजो ज्वरो नाम
सुदारुणः ॥ नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः ॥ अनेन हि समाविष्टो वृत्रो धर्मभृतां वरः ॥ व्यजृंभत ततः शक्रस्तस्मै वज्र
मवासृजत् ॥ प्रविश्य वज्रो वृत्रं च दारयामास भारत ॥ दारितश्च स वज्रेण महायोगी महासुरः ॥ जगाम परमं स्थानं विष्णोर
मिततेजसः ॥ विष्णुभक्त्या हि तेनेदं जगद्व्याप्तमभूत्तदा ॥ तस्माच्च निहतो युद्धे विष्णोः स्थानमवाप्तवान् ॥ इत्येष वृत्रमाश्रि
त्य ज्वरस्य महतो मया ॥ विस्तरः कथितः पुत्र किमन्यत्प्रब्रवीमि ते ॥ इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः सुसमाहि इ
तो नरः ॥ विमुक्तरोगः स सुखी मुदायुतो लभेत कामान्स यथा मनीषितान् ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ जनमेजय उवा
च ॥ ॥ प्राचेतसस्य दक्षस्य कथं वैवस्वतेंतरे ॥ विनाशमगमद्ब्रह्मन्हयमेधः प्रजापतेः ॥ दिव्या मन्युकृतं मत्वा क्रुद्धः स
र्वात्मकः प्रभुः ॥ प्रसादात्तस्य दक्षेण स यज्ञः संधितः कथं ॥ एतद्वेदितुमिच्छामि तन्मे ब्रूहि यथातथं ॥ ॥ वैशं ॥ ॥ पुरा हिम
वतः पृष्ठे दक्षो वै यज्ञमाहरत् ॥ गंगाद्वारे शुभे देशे ऋषिसिद्धनिषेविते ॥ गंधर्वाप्सरसाकीर्णे नानाद्रुमलतावृते ॥
ऋषिसंघैः परिवृतं दक्षं धर्मभृतां वरं ॥ पृथिव्यामंतरिक्षे च ये च स्वर्लोकवासिनः ॥ सर्वे प्रांजलयो भूत्वा उपतस्थुः
प्रजापतिं ॥ देवदानवगंधर्वाः पिशाचोरगराक्षसाः ॥ हाहा हूहूश्च गंधर्वौ तुंबुरुर्नारदस्तथा ॥ विश्वावसुर्विश्वसेनो

मो॰ क्षधर्म॰

१२६

गंधर्वाप्सरसस्तथा ॥ आदित्या वसवो रुद्राः साध्याः सहमरुद्गणैः ॥ इंद्रेण सहिताः सर्वे आगता यज्ञभागिनः ॥ ऊष्मपाः
सोमपाश्चैव धूमपा आज्यपास्तथा ॥ ऋषयः पितरश्चैव आगता ब्रह्मणा सह ॥ एते चान्ये च बहवो भूतग्रामाश्चतु
र्विधाः ॥ जरायुजांडजाश्चैव सहसा स्वेदजोद्भिजैः ॥ आहूता मंत्रिताः सर्वे देवाश्च देवाश्च सह पत्निभिः ॥ विराजंते विमा
नस्था दीप्यमाना इवाग्नयः ॥ तान्दृष्ट्वा मन्युनाविष्टो दधीचिर्वाक्यमब्रवीत् ॥ नायं यज्ञो न वै धर्मो यत्र रुद्रो न इज्यते
वधबंधं प्रपन्ना वै किंनु कालस्य पर्ययः ॥ किंनु मोहान्न पश्यंति विनाशं पर्युपस्थितं ॥ उपस्थितं सयं घोरं न बुध्यंति
महाध्वरे ॥ इत्युक्त्वा स महायोगी पश्यति ध्यानचक्षुषा ॥ स पश्यति महादेवं देवीं च वरदां शुभां ॥ नारदं च महात्मा
नं तस्या देव्याः समीपतः ॥ संतोषं परमं लेभे इति निश्चित्य योगवित् ॥ एकमंत्रास्तु ते सर्वे येनेशान निमंत्रितः ॥ तस्मा
द्देशादपक्रम्य दधीचिर्वाक्यमब्रवीत् ॥ अपूज्यपूजनाच्चैव पूज्यानां चाप्यपूजनात् ॥ नृघातकसमं पापं शश्वत्प्रा
प्नोति मानवः ॥ अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ॥ देवतानामृषीणां च मध्ये सत्यं ब्रवीम्यहं ॥ आगतं पशुभर्तारं
स्रष्टारं जगतः पतिं ॥ अध्वरे ह्यग्रभोक्तारं सर्वेषां पश्यत प्रभुं ॥ ॥ दक्ष उवाच ॥ ॥ संति नो बहवो रुद्राः शूलहस्ताः क
पर्दिनः ॥ एकादशस्थानगता नाहं वेद्मि महेश्वरं ॥ ॥ दधीचिरुवाच ॥ ॥ सर्वेषामेव मंत्रोयं येनासौ न निमंत्रितः ॥ य
थाहं शंकरादूर्ध्वं नान्यं पश्यामि देवतं ॥ तथा दक्षस्य विपुलो यज्ञोयं न भविष्यति ॥ दक्ष उवाच ॥ ॥ एतन्मखेशा

१२६

यत्सुवर्णपात्रेह विःसमस्तं विधिमेवपूतं ॥ विष्णोर्नयाम्यप्रतिमप्रभावं प्रभुर्विभुश्चाहवनीय एषः ॥ ॥देव्युवाच॥ ॥ किंनामदानं नियमं तपो वा कुर्यामिह येन पतिर्ममाद्य ॥ लभेत भार्यां भगवानचिंत्योऽद्भुतेति यथाभागमथोत्तीयं ॥ एवंतु वापं भगवान् स्वपत्नीं प्रहृष्टरूपः स्खलितामुवाच ॥ न वेत्सि मां देवि कृशोदरांहि: किं देवि मयुक्तं वचनं मखेशे ॥ अहं विजानामि विशालनेत्रे ध्यानेन हीनान विदंत्यसंतः ॥ तवाद्य सोहं न च सेंद्रदेवा लोकास्त्रयः सर्वत एव मूढाः ॥ मामध्वरेशं शंसितान्नमस्तुवंति रथंतरं साम गाश्चोपगीति ॥ सोऽशाखला व्रिह्मविदो यजंते ममार्थ पर्वः कल्पयंते च भागं ॥ ॥देव्युवाच॥ ॥ सुप्राकृतोऽपि पुरुषः सर्वस्त्रीजनसंसदि ॥ स्तौति निगायते चापि स्वमात्मानं न संशयः ॥ ॥ भगवानुवाच॥ ॥ नात्मानं स्तौमि देवेशि पश्य मितनुमध्यमे ॥ यस्त्वत्स्यामिव रासो हे योगार्थे वन च वर्णिनि ॥ इत्युक्ता भगवान् पत्नीमुमां मायापौरपिप्रियां ॥ सोऽसृजद्भगवान्वक्त्राद्भूतं घोरं प्रहर्षणं ॥ तमुवाचाद्विपमसृंवद स्स्येति महेश्वरः ॥ ततो वक्त्राद्विमुक्तेन सिंहेनैकेन लीलया ॥ देव्या मन्युव्यपोहार्थं ततो दक्षस्य वैक्रतुः ॥ मन्युना च महाहासी मामहाकाली महेश्वरी ॥ आत्मनः सर्वसाक्षित्वे तेन सार्धं सहानुगा ॥ देवस्यानुमतं मत्वा प्रणम्य शिरसा ततः ॥ आत्मनः सदृशशौर्यबलरूपसमन्वितः ॥ स एव भगवान् क्रोधः प्रतिरूपसमन्वितः ॥ अनंतबलवीर्यश्च अनंतबलपौरुषः ॥ वीरभद्र इति ख्यातो देव्या मन्युप्रमार्जकः ॥ सोऽसृजद्रोमकूपेभ्यो रौम्यान्नाम गणेश्वरान् ॥ रुद्रतुल्या गणा रौद्रानुद्र

वीर्यपराक्रमाः ॥ ते निपेतुस्ततस्तूर्णं दक्षयज्ञविहिंसया ॥ भीमरूपा महाकायाः शतशोथ सहस्रशः ॥ ततः किलिकिलाश
ब्दैराकाशं पूरयन्निव ॥ तेन शब्देन महता त्रस्तास्तत्र दिवौकसः ॥ पर्वताश्च व्यशीर्यंत चकंपे च वसुंधरा ॥ मारुताश्चैव घू
र्णंते चक्षुभे वरुणालयः ॥ अग्नयो नैव दीप्यंते नैव दीप्यति भास्करः ॥ ग्रहा नैव प्रकाशंते नक्षत्राणि न चंद्रमाः ॥ ऋष
यो न प्रकाशंते न देवाश्च मानुषाः ॥ एवं तु तिमिरीभूते निर्दहंत्यपमानिताः ॥ प्रहरंत्यपरे घोरा यूपानुत्सादयंति च ॥
प्रमर्दंति तथा चान्ये विमर्दंति तथापरे ॥ आधावंति प्रधावंति वायुवेगा मनोजवाः ॥ चूर्ण्यंते यज्ञपात्राणि दिव्यान्यास
नपानि च ॥ विशीर्णा इव दृश्यंते तारा इव नभस्तले ॥ दिव्यान्नपानभक्ष्याणां राशयः पर्वतोपमाः ॥ क्षीरनद्योथ
दृश्यंते घृतपायसकर्दमाः ॥ दधिमंडोदका दिव्याः खंडशर्करवालुकाः ॥ षड्रसान्निवहंत्येता गुडकुल्या मनोरमाः
॥ उच्चावचानि मांसानि भक्ष्याणि विविधानि च ॥ पानकानि च दिव्यानि लेह्यचोष्याणि यानि च ॥ भुंजते विविधै
र्वक्त्रैर्विलुंपंत्याक्षिपंति च ॥ रुद्रकोपान्महाकायाः कालाग्निसदृशोपमाः ॥ क्षोभयंत्सुरसैन्यानि भीषयंतः सम
ततः ॥ क्रीडंति विविधाकाराश्चिक्षिपुः सुरयोषितः ॥ रुद्रक्रोधात्प्रयत्नेन सर्वदेवैः सुरक्षितं ॥ तं यज्ञमदहच्छीघ्रं
रुद्रकमसि समंततः ॥ चकार भैरवं नादं सर्वभूतभयंकरं ॥ छित्वा शिरो वै यज्ञस्य ननाद च मुमोद च ॥ ततो ब्रह्मादे
यो देवा दक्षश्चैव प्रजापतिः ॥ ऊचुः प्रांजलयः सर्वे कथ्यतां को भवानिति ॥ ॥वीरभद्र उवाच॥ ॥नाहं रुद्रो न वा देवी

१२८

नैव भोक्तुमिहागतः ।। देव्या मन्युकृतं मत्वा क्रुद्धः सर्वात्मकः प्रभुः ।। द्रष्टुं वा नैव विप्रेंद्रा न्नैव कौतूहलेन वा ।। तव यज्ञवि
घातार्थं संप्राप्तं विद्धि मामिह ।। वीरभद्र इति ख्यातो रुद्रकोपाद्विनिस्सृतः ।। भद्रकालीति विख्याता देव्याः कोपाद्विनिः
सृतः ।। प्रेषितौ देवदेवेन यज्ञांतिकमिहागतौ ।। शरणं गच्छ विप्रेंद्र देवदेवमुमापतिं ।। वरं क्रोधोपि देवस्य वरदानं न
चान्यतः ।। वीरभद्रवचः श्रुत्वा दक्षो धर्मभृतां वरः ।। तोषयामास स्तोत्रेण प्रणिपत्य महेश्वरं ।। प्रपद्ये देवमीशानं
शाश्वतं ध्रुवमव्ययं ।। महादेवं महात्मानं विश्वस्य जगतः पतिं ।। दक्षः प्रजापतिरीड्यैस्तैः सुसमाहितैः ।। आ
हूता देवताः सर्वा ऋषयश्च तपोधनाः ।। देवो नाल्पयने तत्र विश्वकर्मा महेश्वरः ।। तत्र क्रुद्धा महादेवी गणास्तत्र व्य
सर्जयत् ।। प्रदीप्ते यज्ञवाटे तु विद्रुतेषु दिशो दिशं ।। तानागणान्समनुप्राप्ते गौरे दीप्ते महात्मनि ।। ज्वलनिर्भिन्नहृद
यैः कूजद्भिः परिचारकैः ।। निखातोत्पाटितैर्यूपैरपविद्धैरितस्ततः ।। उत्पतद्भिः पतद्भिश्च गृध्रैरामिषगृद्धिभिः ।।
पक्षवातविनिर्धूतैः शिवाशतनिनादितैः ।। यक्षगंधर्वसंघैश्च पिशाचोरगराक्षसैः ।। प्राणापानौ संनिरुध्य
ल वक्त्रस्थानेन यत्नतः ।। विचार्य सर्वतो दृष्टिं बहुदृष्टिरमित्रजित् ।। सहसा देवदेवेशो अग्निकुंडात्समुत्थितः ।। बि
भ्रत्सूर्यसहस्रस्य तेजः संवर्तकोपमः ।। स्मितं कृत्वाब्रवीद्वाक्यं ब्रूहि किं करवाणि ते ।। श्राविते च मखस्वाध्याये देवानां
गुरुरूपात्ततः ।। तं श्रुत्वा चांजलिं कृत्वा दक्षो देवं प्रजापतिः ।। भीतशंकितवित्रस्तः सवाष्पवदनेक्षणः ।। यदि प्रस

न्नो भगवान्यदि वाहं भवत्प्रियः॥ यदि वाहमनुग्राह्यो यदि वा वरदो मम॥ यद्दग्धं भक्षितं पीतमशितं यच्च नाशितं॥ चूर्णी
कृतापविद्धं च यज्ञसंभारमीदृशं॥ दीर्घकालेन महता प्रयत्नेन सुसंचितं॥ तन्न मिथ्या भवेन्मह्यं वरमेतमहं वृणे॥ तथा
स्त्वित्याह भगवान्भगनेत्रहरो हरः॥ धर्माध्यक्षो विरूपाक्षस्त्र्यक्षो देवः प्रजापतिः॥ जानुभ्यामवनीं गत्वा दक्षो लब्ध्वा भ
वाद्वरं॥ नाम्नामष्टसहस्रेण स्तुतवान्वृषभध्वजं॥ ॥ युधिष्ठिर उवाच॥ ॥ यैर्नामधेयैः स्तुतवान्दक्षो देवं प्रजा
पतिः॥ वक्तुमर्हसि मे तात श्रोतुं श्रद्धा ममानघ॥ ॥ भीष्म उवाच॥ ॥ श्रूयतां देवदेवस्य नामान्यद्भुतकर्मणः॥
गूढव्रतस्य गुह्यानि प्रकाशानि च भारत॥ नमस्ते देवदेवेश देवारिबलसूदन॥ देवेंद्रबलविष्टंभ देवदानवपू
जित॥ सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय॥ सर्वतःपाणिपादांत सर्वतोक्षिशिरोमुख॥ सर्वतःश्रुतिमल्लोके
सर्वमावृत्य तिष्ठति॥ शंकुकर्ण महाकर्ण कुंभकर्णार्णवालय॥ गजेंद्रकर्ण गोकर्ण पाणिकर्ण नमोस्तु ते॥ शतोदर
शतावर्त्त शतजिह्व नमोस्तु ते॥ गायंति त्वां गायत्रिणोऽर्चयंत्यर्कमर्किणः॥ ब्रह्माणं त्वां शतक्रतुमूर्ध्वं खमि
व येमिरे॥ मूर्त्तौ हि ते महामूर्ते समुद्रांबरसन्निभ॥ सर्वा विदेवता ह्यस्मिन्गावो गोष्ठ इवासते॥ त्वच्छरीरे प
श्यामि सोममग्निं जलेश्वरं॥ आदित्यमथ वै विष्णुं ब्रह्माणं च बृहस्पतिं॥ भगवान्कारणं कार्यं क्रियाकरणमेव
च॥ असतश्च सतश्चैव तथैव प्रभवाव्ययौ॥ नमो भवाय शर्वाय रुद्राय वरदाय च॥ पशूनांपतये नित्यं नमोस्त्वंधकघा

तिने॥ त्रिजटाय त्रिशीर्षाय त्रिशूलवरपाणिने॥ त्र्यंबकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः॥ नमश्चंडाय मुंडाय
अंडापांड्धनाय च॥ दंडिने समेकर्णाय दिडिमुंडाय वै नमः॥ नमो ध्वदं ष्ट्रकेशाय शुल्कोयावतताय च॥
विलोहिताय धूम्राय नीलग्रीवाय वै नमः॥ नमोस्त्वप्रतिरूपाय विरूपाय शिवाय च॥ सूर्याय सूर्यमालाय
सूर्यध्वजपताकिने॥ नमः प्रमथनाथाय वृषस्कंधाय धन्विने॥ शत्रुंदमाय दंडाय पर्णचीरपटाय च॥ नमो
हिरण्यगर्भाय हिरण्यकवचाय च॥ हिरण्यकृतचूडाय हिरण्यपतये नमः॥ नमः स्तुताय स्तुत्याय स्तूयमा
नाय वै नमः॥ सर्वाय सर्वभक्षाय सर्वभूतांतरात्मने॥ नमो होत्रे थमंत्राय शुक्लध्वजपताकिने॥ नमो नाभाय
नाभ्याय नमः कटकटाय च॥ नमोस्तु कृशनासाय कृशांगाय कृशाय च॥ संहृष्टाय विहृष्टाय नमः किल
किलाय च॥ नमोस्तु शयमानाय शयितायोत्थिताय च॥ स्थिताय धावमानाय मुंडाय जटिलाय च॥ नमो
नर्तनशीलाय मुखवादित्रवादिने॥ नाट्योपहारलुब्धाय गीतवादित्रशालिने॥ नमो ज्येष्ठाय श्रेष्ठाय वन
प्रमथनाय च॥ कालनाथाय कल्पाय क्षयायोपक्षयाय च॥ भीमदुंदुभिहासाय भीमव्रतधराय च॥ उग्राय
च नमो नित्यं नमोस्तु दशबाहवे॥ नमः कपालहस्ताय चितिभस्मप्रियाय च॥ विभीषणाय भीष्माय भीमव्र
तधराय च॥ नमो विकृतवक्त्राय खड्गजिह्वाय दंष्ट्रिणे॥ पक्वाममांसलुब्धाय तुंबीवीणाप्रियाय च॥ न

मोरषाय वृक्षाय गोवृषाय वृषाय च ।। कटंकटंयचंडाय नमः पंच पंचाय च ।। नमः सर्ववरिष्ठाय वनायचच दाय
च ।। वनमाल्यगंधवस्त्राय वरातिवरदे नमः ।। नमो रक्तविरक्ताय भावनायाक्षमालिने ।। संभिन्नाय विभिन्ना
य छायायातपनाय च ।। अघोरघोररूपाय घोरघोरतराय च ।। नमः शिवाय शांताय नमः शांततमाय च ।। एकपा
द्बहुनेत्राय एकशीर्षे नमो नमः ।। क्षुद्राय क्षुद्रलुब्धाय संविभागप्रियाय च ।। पंचालाय सितांगाय नमः शम
शमाय च ।। नमश्चंडिकघंटाय घंटायाघंटघंटिने ।। सहस्रध्मातघंटाय घंटामालाप्रियाय च ।। प्राणघंटाय
बंधाय नमः कलकलाय च ।। हूंहूंहुंकारपाराय हूंहूंकारप्रियाय च ।। नमः शमशमे नित्यं गिरिवृक्षालयाय च ।। ग
र्भमांसशृगालाय तारकाय तरीय च ।। नमो यज्ञाय यज्ञिने हुताय प्रहुताय च ।। यज्ञवाहाहदाताय तथायातपन
य च ।। नमः तटाय तट्याय तटानां पतये नमः ।। अन्नदायान्नपतये नमस्त्वन्नभुजे तथा ।। नमः सहस्रशीर्षाय
सहस्रचरणाय च ।। सहस्रोद्यतशूलाय सहस्राभरणाय च ।। नमो बालार्कवर्णाय बालरूपधराय च ।। बालानुचर
गोप्ताय बालक्रीडनकाय च ।। नमो वृद्धाय लुब्धाय क्षुब्धाय क्षोभणाय च ।। तरंगांकितकेशाय मुंजकेशाय वै नमः ।। नमः
षट्कर्मतुष्टाय त्रिकर्मनिरताय च ।। वर्णाश्रमाणां विधिस्य कर्मनिवर्तिने ।। नमो घुष्याय घोषाय नमः कलकला
य च ।। श्वेतपिंगलनेत्राय कृष्णरक्तेक्षणाय च ।। प्राणभग्नाय दंडाय स्फोटनाय कृशाय च ।। धर्मकामार्थमोक्षाण

कथनीयकथाय च ।। सांख्याय सांख्यमुख्याय सांख्ययोगप्रवर्तिने ।। नमो रथ्यविरथ्याय चतुष्पथरथाय च ।। कृष्णा
जिनोत्तरीयाय व्यालयज्ञोपवीतिने ।। ईशान वज्रसंघात हरिकेश नमोस्तु ते ।। त्र्यंबिकांबिकनाथाय व्यक्ताव्यक्त न
मोस्तु ते ।। काम कामद कामघ्न तृप्तातृप्तविचारिणे ।। सर्व सर्वद सर्वघ्न संध्याराग नमोस्तु ते ।। महामेघचय
प्रख्य महाकाल नमोस्तु ते ।। स्थूलकर्णीजटिले वल्कलाजिनधारिणे ।। दीप्तसूर्याग्निजटिले वल्कलाजिनवा
ससे ।। सहस्रसूर्यप्रतिम तपोनित्य नमोस्तु ते ।। उन्मादनशतावर्त गंगातोयार्द्रमूर्द्धज ।। चंद्रावर्त युगावर्त मे
घावर्त नमोस्तु ते ।। त्वमन्नमन्नभोक्ता च अन्नदोन्नभुगेव च ।। अन्नस्रष्टा च पक्ता च पक्वभुक्पवनोनलः ।। जरा
युजांडजाश्चैव स्वेदजाश्च तथोद्भिज्जाः ।। त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः ।। चराचरस्यास्य स्रष्टा त्वं प्रतिहर्त्ता त
थैव च ।। त्वामाहुर्ब्रह्मविदुषो ब्रह्म ब्रह्मविदांवरं ।। मनसः परमा योनिः खं वायुर्ज्योतिषां निधिः ।। ऋक्सामानि
तथोंकारमाहुस्त्वां ब्रह्मवादिनः ।। हायि हायि हुवाहायि हुवाहायि तथासकृत् ।। गायंति त्वां सुरश्रेष्ठ सामगा ब्रह्म
वादिनः ।। यजुर्मयो ऋङ्मयश्च त्वमाहुतिमयस्तथा ।। पठ्यसे स्तुतिभिश्चैव वेदोपनिषदां गणैः ।। ब्राह्मणाः
क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये ।। त्वमेव मेघसंघाश्च विद्युत्स्वनितगर्जिताः ।। संवत्सरस्त्वमृतवो मासो
मासार्द्धमेव च ।। युगा निमेषाः काष्ठास्त्वं नक्षत्राणि ग्रहाः कलाः ।। वृक्षाणां ककुदोसि त्वं गिरीणां शिखराणि च ।।

व्याघ्रो मृगाणां पततां तार्क्ष्योनंतश्च भोगिनां ॥ क्षीरोदोस्युदधीनां च यंत्राणां धनुरेव च ॥ वज्रं प्रहरणानां च व्रतानां स
त्यमेव च ॥ त्वमेव द्वेष इच्छा च रागो मोहः क्षमाक्षमे ॥ व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ ॥ त्वं गदी त्वं
शरी चापि खट्वांगी झर्झरी तथा ॥ छेत्ता भेत्ता प्रहर्ता त्वं नेता मंता पिता मतः ॥ दशलक्षणसंयुक्तो धर्मोर्थः काम
एव च ॥ गंगास्समुद्राः सरितः पल्वलानि सरांसि च ॥ लतावल्ल्यस्तृणौषध्यः पशवो मृगपक्षिणः ॥ द्रव्यकर्मगु
णारंभः कालपुष्पफलप्रदः ॥ आदिश्चांतश्च वेदानां गायत्र्योंकार एव च ॥ हरितो रोहितो नीलः कृष्णो रक्तस्तथारुणः
कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा ॥ सवर्णश्च सुवर्णश्च वर्णकारो ह्यनौपमः ॥ सुवर्णनामा च तथा सुव
र्णप्रिय एव च ॥ त्वमिंद्रश्च यमश्चैव वरुणो धनदोनलः ॥ उपप्लवश्चित्रभानुः स्वर्भानुर्भानुरेव च ॥ होत्रं होता च
होम्यं च हुतं चैव तथा प्रभुः ॥ त्रिसौपर्णं तथा ब्रह्म यजुषां शतरुद्रियं ॥ पवित्रं च पवित्राणां मंगलानां च मंगलं
॥ गिरिको हिंडुको वृक्षो जीवः पुद्गल एव च ॥ प्राणः सत्वं रजश्चैव तमश्चाप्रमदस्तथा ॥ प्राणोपानः समानश्च उ
दानो व्यान एव च ॥ उन्मेषश्च निमेषश्च क्षुतं जृंभितमेव च ॥ लोहितांतगता दृष्टिर्महावक्त्रो महोदरः ॥ शुचीरो
मा हरिश्मश्रुरूर्ध्वकेशश्चलाचलः ॥ गीतवादित्रतत्वज्ञो गीतवादनकप्रियः ॥ मत्स्यो जलचरो जाल्योजलः के

लिकिलः कलिः ॥ अकालश्चातिकालश्च दुष्कालः कालएवच ॥ मृत्युः क्षुरश्च कृत्यश्च पक्षोपक्षक्षयंकरः ॥
मेघकालो महादंष्ट्रः संवर्त्तकबलाहकः ॥ घंटो घंटो घटी घंटी चरुचेली चिली मिली ॥ ब्रह्मकायिकमग्नीनां
दंडी मुंडस्त्रिदंडधृक् ॥ चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्त्तकः ॥ चातुराश्रम्यनेता च चातुर्वर्ण्यकरश्चयः ॥ स
दा चाक्षप्रियो धूर्त्तो गणाध्यक्षो गणाधिपः ॥ रक्तमाल्यांबरधरो गिरिशो गिरिकःप्रियः ॥ शिल्पिकः शिल्पिनां
श्रेष्ठः सर्वशिल्पिप्रवर्त्तकः ॥ भगनेत्रांकुशश्चंडः पूष्णोदंतविनाशनः ॥ स्वाहा स्वधा वषट्कारो नमस्कारो नमो
नमः ॥ गूढव्रतो गुह्यतपास्तारकःस्तारकामयः ॥ धाता विधाता संधाता विधाता धारणो धरः ॥ ब्रह्मा तपश्च
सत्यश्च ब्रह्मचर्यमथार्जवं ॥ भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः ॥ भूर्भुवः स्वरितश्चैव ध्रुवो दांतो महे
श्वरः ॥ दीक्षितोदीक्षितक्षांतो दुर्दांतोदांतनाशनः ॥ चंद्रावर्त्तो युगावर्त्तः संवर्त्तः संप्रवर्त्तकः ॥ कामो विंदुरणु
स्थूलः कर्णिकारस्रजप्रियः ॥ नंदीमुखो भीमुखः सुमुखस्वादुर्मुखोमुखः ॥ चतुर्मुखो वाहुमुखो रणेष्वभिमुख
स्तथा ॥ हिरण्यगर्भःशकुनिर्महोरगपतिर्विराट् ॥ अधर्महा महापार्श्वो दंडधारो गणप्रियः ॥ गोनर्द्दो गो
प्रतारश्च गोवृषेश्वरवाहनः ॥ त्रैलोक्यगोप्ता गोविंदो गोप्ता गोमार्ग एव च ॥ श्रेष्ठः स्थिरश्च स्थाणुश्च निष्कं

पःकं पञ्च च ॥ दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ॥ दुर्द्धर्षो दुष्प्रकंपश्च दुर्विषो दुर्जयो जयः ॥ शशः शशांक
शमनः ॥ शीतोष्णक्षुत्तृज्जराधिधृक् ॥ आधयो व्याधयश्चैव व्याधिहा व्याधिरेव च ॥ मम यज्ञमृगव्याधो व्याधी
नामागमो गमः ॥ शिखंडी पुंडरीकाक्षः पुंडरीकवनालयः ॥ दंडधारो त्र्यंबकश्चंडउग्रदंष्ट्रोंडनाशनः ॥ विषाग्रपा
त्सुरश्रेष्ठः सोमपास्त्वं मरुत्पतिः ॥ अमृतपास्त्वं जगन्नाथ देवदेवगणेश्वरः ॥ विषाग्रपा मृत्युपाश्च क्षीरपाः
सोमपास्तथा ॥ मधुश्च्युतानामग्रपास्त्वमेव तुषिताद्यपा ॥ हिरण्यरेताः पुरुषस्त्वमेव त्वं स्त्री पुमांस्त्वं च न
पुंसकं च ॥ बालो युवा स्थविरो जीर्णदंष्ट्रस्त्वं नागेंद्र शक्रस्त्वं विश्वकृत्स्वा ॥ विश्वकृद्विश्वकृतां वरेण्यस्त्वं वि
श्वबाहो विश्वरूपस्तेजस्वी विश्वतोमुखः ॥ चंद्रादित्यौ चक्षुषी ते हृदयं च पितामहः ॥ महोदधिः सरस्वती वागब
लमनलोनिलः ॥ अहोरात्रं निमेषोन्मेषकर्म न च ब्रह्मा न च गोविंदः पौराणा ऋषयो न ते ॥ माहात्म्यं वेदितुं श
क्ता यथातथ्येन ते शिवा यामूर्त्तयः सुसूक्ष्मास्ते न मह्यं यांति दर्शनं ॥ ताहि मां सततं रक्ष पिता पुत्रमिवौर
सं ॥ रक्ष मां रक्षणीयोहं तवानघ नमोस्तु ते ॥ भक्तानुकंपी भगवान्भक्तश्चाहं सदा त्वयि ॥ यः सहस्राण्यनेका
नि पुंसामावृत्य दुर्दृशः ॥ तिष्ठत्येकः समुद्रांते स मे गोप्तास्तु नित्यशः ॥ यं विनिद्रा जितश्वासाः सत्वस्थाः संयते

ड्डियाः॥ ज्योतिः पश्यंति युंजानास्तस्मै योगात्मने नमः॥ जटिले दंडिने नित्यं लंबोदरशरीरिणे॥ कमंडलुनिषंगा
य तस्मै ब्रह्मात्मने नमः॥ यस्य केशेषु जीमूता नद्यः सर्वांगसंधिषु॥ कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः॥
संभक्ष्य सर्वभूतानि युगांते पर्युपस्थिते॥ यः शेते जलमध्यस्थस्तं प्रपद्येंबुशायिनं॥ प्रविश्य वदनं राहोर्यः सो
मं पिबते निशि॥ ग्रसत्यर्कं स्वस्वर्भानुर्भूत्वा मांसोग्निरस्तु॥ ये चानुपतिता गर्भा यथा भागानुपासते॥ नमस्तेभ्यः
स्वधा स्वाहा प्राप्नुवंतु मुदंतु ते॥ येंगुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनां॥ रक्षंतु ते हि मां नित्यं नित्यं चाप्याय
यंतु मां॥ ये न नोदंति देहस्था देहिनो रोदयंति च॥ हर्षयंति न हृष्यंति नमस्तेभ्यस्तु नित्यशः॥ ये नदीषु स
मुद्रेषु पर्वतेषु गुहासु च॥ वृक्षमूलेषु गोष्ठेषु कांतारे गहनेषु च॥ चतुष्पथेषु रथ्यासु चत्वरेषु तटेषु च॥ ह
स्त्यश्वरथशालासु जीर्णोद्यानालयेषु च॥ येषु पंचसु भूतेषु दिशासु विदिशासु च॥ चंद्रार्कयोर्मध्यगता
ये च चंद्रार्करश्मिषु॥ रसातलगता ये च ये च तस्मै परं गताः॥ नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यस्तु नित्यशः॥ ये
षां न विद्यते संख्या प्रमाणो रूपमेव च॥ असंख्येयगुणा रुद्रा नमः॥ सर्वभूतकरो यस्मात्सर्वभूतपतिर्हरः॥ स
र्वभूतांतरात्मा च तेन त्वं न निमंत्रितः॥ त्वमेव हीज्यसे यस्माद्यज्ञैर्विविधदक्षिणैः॥ त्वमेव कर्त्ता सर्वस्य तेन त्वं

न निमंत्रितः ॥ अथवा मायया देवसूक्ष्मया तव मोहितः ॥१२ तस्मात्कारणाद्वापि तेन त्वं न निमंत्रितः ॥ प्रसीद मम भद्रं ते
भगवा भवगतस्य मे ॥ त्वयि मे हृदयं देव त्वयि बुद्धिर्मतिस्त्वयि ॥ स्तुत्वैवं स महादेवं विरराम प्रजापतिः ॥ भगवा
नपि सुप्रीतः पुनर्दक्षमभाषत ॥ परितुष्टोस्मि ते दक्ष स्तवेनानेन सुव्रत ॥ वहुनात्र किमुक्तेन मत्समीपे भविष्य
सि ॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ प्रजापते मत्प्रसादात्फलभागी भविष्यसि ॥ अथैनमब्रवीद्वा
क्यं लोकस्याधिपतिर्भवः ॥ आश्वासनकरं वाक्यं वाक्यविद्वाक्यसंमितं ॥ दक्षदक्ष न कर्त्तव्यो मन्युर्विघ्नमिमं
प्रति ॥ अहं यज्ञहनस्तुभ्यं दृष्टमेतत्सुनातने ॥ भूयश्च ते वरं द ‾ तत्त्वं गृहीष्व सुव्रत ॥ प्रसन्नवदनो भूत्वा त
दिहैकमनाः शृणु ॥ वेदात्षडंगादुधृत्य सांख्ययोगाच्च मुक्तितः ॥ तपः सुतप्तं विपुलं दुश्चरं देवदानवैः ॥ अ
पूर्वं सर्वतोभद्रं विश्वतोमुखमव्ययं ॥ अब्दैर्दशार्द्धसंयुक्तं गूढमप्राज्ञनिंदितं ॥ वर्णाश्रमकृतैर्धर्मैर्विपरी
तं क्वचित्समं ॥ गतांतैरध्यवसितमत्याश्रममिदं व्रतं ॥ मया पाशुपतं दक्ष शुभमुत्पादितं पुरा ॥ तस्य ची
र्णस्य तत्सम्यक्फलं भवति पुष्कलं ॥ तच्चास्तु ते महाभाग त्यज्यतां मानसो ज्वरः ॥१२ एवमुक्त्वा महादेवस्स
पत्नीकः सहानुगः ॥ अदर्शनमनुप्राप्तो दक्षस्यामितविक्रमः ॥ दक्षप्रोक्तं स्तवमिमं कीर्त्तयेद्यः शृणोति

गा॥ नाशुभं प्राप्नुयात्किंचिद्दीर्घमायुरवाप्नुयात्॥ यथा सर्वेषु देवेषु वरिष्ठो भगवांछिवः॥ तथा स्तवो वरि
ष्ठोयं स्तवानां ब्रह्मसंमितः॥ यशो राज्यसुखैश्वर्यकामार्थधनकांक्षिभिः॥ श्रोतव्यो भक्तिमास्थाय विद्याका
मैश्च यत्नतः॥ व्याधितो दुःखितो दीनश्चौरग्रस्तो भयार्दितः॥ राजकार्याभियुक्तो वा मुच्यते महतो भयात्॥
अनेनैव तु देहेन गणानां समतां व्रजेत्॥ तेजसा यशसा चैव युक्तो भवति निर्मलः॥ न राक्षसा पिशाचा वा
न भूता न विनायकाः॥ विघ्नं कुर्युर्गृहे तस्य यत्र यं पठ्यते स्तवः॥ शृणुयाच्चैव या नारी तद्भक्ता ब्रह्मचारिणी
॥ पितृपक्षे मातृपक्षे पूज्या भवति देववत्॥ शृणुयाद्यः स्तवं कृत्स्नं कीर्त्तयेद्वा समाहितः॥ तस्य सर्वाणि क
र्माणि सिद्धिं गच्छंत्यभीक्ष्णशः॥ मनसा चिंतितं यच्च यच्च वाचानुकीर्त्तितं॥ सर्वं संपद्यते तस्य स्तवस्यास्या
नुकीर्त्तनात्॥ देवस्य च सगुहस्य देव्या नंदीश्वरस्य च॥ बलिं सुविहितं कृत्वा दमेन नियमेन च॥ ततस्तु यु
क्तो गृह्णीयान्नामान्याशु यथाक्रमं॥ ईप्सितं लभते सोर्थान्भोगान्कामांश्च मानवः॥ मृतश्च स्वर्गमा
प्नोति तिर्यक्षु च न जायते॥ इत्याह भगवान्व्यासः पराशरसुतः प्रभुः॥ ॥शांतौ मोक्षधर्मे॥ ॥युधिष्ठिरः॥
॥ अध्यात्मं नाम यदिदं पुरुषस्येह विद्यते॥ यदध्यात्मं यतश्चैव तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥

सर्वज्ञानंपरंबुध्वायन्मांत्वमनुपृछसि।।तदाख्यास्यामितेतात तस्यव्याख्यामिमांशृणु।।पृथिवीवायुराकाश
मापोज्योतिश्चपंचमं।।महाभूतानिभूतानांसर्वेषांप्रभवाप्ययौ।।सतेषांगुणसंहारःशरीरंभरतर्षभ।।सत
तंहिप्रलीयंतेगुणास्तेप्रभवंतिच।।ततःसृष्टानिभूतानितानियांतिपुनःपुनः।।महाभूतानिभूतेभ्यऊर्मयः
सागरेयथा।।प्रसार्यचेहगात्राणिकूर्मःसंहरतेयथा।।तद्वद्भूतानिभूतानामलीयांसंस्यवीयसां।।आका
शात्खलुयोघोषःसंघातस्तुमहीगुणः।।वायोःप्राणोरसस्त्वद्भ्योरूपंतेजसउच्यते।।इत्येतन्मयमेवैतत्सर्वं
स्थावरजंगमं।।प्रलयेचतमभ्येतितस्मादुद्दिश्यतेपुनः।।महाभूतानिपंचैवसर्वभूतेषुभूतकृत्।।विषया
न्कल्पयामासयस्मिन्यदनुपश्यति।।शब्दःश्रोत्रंतथाखानित्रयमाकाशयोनिजं।।रसःस्नेहश्चजिह्वा
चअपामेतेगुणाःस्मृताः।।रूपंचक्षुर्विपाकश्चत्रिविधंज्योतिरुच्यते।।घ्रेयंघ्राणंशरीरंचएतेभूमिगुणाः
स्मृताः।।प्राणस्पर्शश्चचेष्टाचवायोरेतेगुणास्मृताः।।इतिसर्वगुणाराजन्व्याख्याताःपांचभौतिकाः।।सत्वं
रजस्तमःकालःकर्मबुद्धिश्चभारत।।मनःषष्ठानिचैतेषुईश्वरःसमकल्पयत्।।यदूर्ध्वंपादतलयोरवा
ङ्मूर्ध्नश्चपश्यसि।।एतस्मिन्नेवकृत्स्नेयंवर्त्ततेबुद्धिरंतरे।।इंद्रियाणिनरेपंचषष्ठंतुमनउच्यते।।सप्त

मं बुद्धिमेवाहुः क्षेत्रतः पुनरष्टमः॥ इंद्रियाणि च कर्त्ता च विचेतव्यानि भागशः॥ तमः सत्वं रजश्चैव तेपि भावास्तदा
श्रयाः॥ चक्षुरालोचनायैव संज्ञायं कुरुते मनः॥ बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते॥ तमः सत्वं रजश्चेति का
लः कर्म च भारत॥ गुणैर्नेनीयते बुद्धि बुद्धिरेवेंद्रियाणि च॥ मनःषष्ठानि सर्वाणि बुध्यभावे कुतो गुणाः॥ येन प
श्यति तच्चक्षुः शृण्वती श्रोत्रमुच्यते॥ जिघ्रती भवति घ्राणं रसती रसना रसान्॥ स्पर्शनं स्पृशती स्पर्शान् बु
द्धिर्विक्रियते सकृत्॥ यदा प्रार्थयते किंचित्तदा भवति सा मनः॥ अधिष्ठानानि बुध्या हि पृथगेतानि पंचधा॥ इं
द्रियाणीति तानि द्दि न्याहुस्तेष्वदुष्टे दुष्यति॥ पुरुषे तिष्ठती बुद्धिस्त्रिषु भावेषु वर्त्तते॥ कदाचिल्लभते प्रीतिं क
दाचिदपि शोचति॥ न सुखेन न दुःखेन कदाचिदपि वर्त्तते॥ स्वयं भावात्मिका भावांस्त्रीनेतान्परिवर्त्तते॥ स चि
तां सागरो भर्त्ता यथा वेलामिवोर्मिमान्॥ इति भाववगता बुद्धिर्भावे मनसि वर्त्तते॥ प्रवर्त्तमानं तु रजस्तद्भावे
नानुवर्त्तति॥ प्रहर्षः प्रीतिरानंदः सुखं संशांतचित्तता॥ कथंचिदुपपद्यंते पुरुषे सात्विका गुणाः॥ परिदाहः
स्तथा शोकः संतापोतृप्तिरक्षमा॥ लिंगानि रजसस्तानि दृश्यंते हेत्वहेतुभिः॥ अविद्यारागमोहौ च प्रमा
दस्तब्धता भयं असमृद्धिस्तथा दैन्यं प्रमोहः स्वप्नतंद्रिता॥ कथंचिदुपवर्त्तंते विविधास्तामसा गुणाः॥ त

त्रयत्प्रीतिसंयुक्तं कायेमनसिवाभवेत्।। वर्त्ततेसात्विकोभाव इत्युपेक्षेत तत्तथा।। अथयद्दुःखसंयुक्तमप्रीति
करमात्मनः।। प्रवृत्तंरजइत्येवतत्तदसंरभ्य चिंतयेत्।। अथयन्मोहसंयुक्तं कायेमनसि वाभवेत्।। अप्रतर्क्य
मविज्ञेयं तमस्तदुपधारयेत्।। इतिबुद्धिगतीःसर्वाः व्याख्याता यावतीरिह एतद्बुध्वा भवेद्बुद्धः किमन्यद्बुद्धल
क्षणं।। सत्वक्षेत्रज्ञयोरेतदंतरंविद्धिसूक्ष्मयोः।। सृजतेत्रगुणानेक एको नसृजतेगुणान्।। पृथग्भूतौ प्रकृ
त्यातुसंप्रयुक्तौ चसर्वदा।। यथामत्स्योद्भिरन्यःस्यात्संप्रयुक्तोभवेत्तथा।। नगुणाविदुरात्मानं सगुणान्वेदस
र्वतः।। परिद्रष्टागुणानांतुसंस्रष्टामन्यतेयथा।। आश्रयोनास्तिसत्वस्य गुणसर्गण चेतना।। सत्वमस्यसृजन्त्यन्येगु
णान्वानकदाचन।। सृजतेहिगुणान्सत्वं क्षेत्रज्ञःपरिपश्यति।। संप्रयोगस्तयोरेषसत्वक्षेत्रज्ञयोर्ध्रुवः।। इंद्रियैस्तु
प्रदीपार्थं क्रियतेबुद्धिरंतरा।। निश्चक्षुर्भिरजानद्भिरिंद्रियाणिप्रदीपवत्।। एवंस्वभावमेवैतद्बुध्वा विहरेन्नरः।। अ
शोचन्नप्रहृष्यंश्च सवैविगतमत्सरः।। स्वभावसिद्धमेवैतद्यदिमान्सृजतेगुणान्।। ऊर्णनाभिर्यथासूत्रं विज्ञे
यास्तंतुवद्गुणाः।। प्रध्वस्ता ननिवर्त्तंतेप्रवृत्तिर्नोपलभ्यते।। एवमेकेव्यवस्यंति निवृत्तिरिति चापरे।। इतीदंहृदयग्रंथिं
बुद्धिचिंतामयंहृढं।। विमुच्यसुखमासीत विशोकश्छिन्नसंशयः।। ताम्येयुःप्रच्युताःपृथ्वीमोहपूर्णान्नदींनराः।। यथा

गाधंस्मविद्वांसो बुद्धियोगमयं तथा॥ नैवताम्यंति विद्वांसः प्लवंतः पारमंभसः॥ अध्यात्मविदुषो धीरा ज्ञानं तु परमं
प्लवः॥ न भवति विदुषो महद्भयं यदविदुषां सुमहद्भयं भवेत्॥ न हि गतिरधिकास्ति कस्यचित्सुकृदुपदृशं यती
हतुल्यतां॥ यत्करोति बहुदोषमेकृतं तत्स्वव्युदूषयतिप्यस्तु गाहतं॥ नाप्रियं तदुभयं कनोत्यसौ यत्त्व दूषयति यत्क
शो रोति च॥ ॥शांतौमोक्षधर्मे॥ ॥युधिष्ठिरउवाच॥ ॥कादुःखाच्च मृत्योश्चत्रसंते प्राणिनःसदा॥ उभयं नो यथा
न स्यात्तन्मे ब्रूहि पितामह॥ ॥भीष्मउवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं नारदस्य च संवादं समं
गस्य च भारत॥ ॥नारदउवाच॥ ॥उरसेव प्रणमसे बाहुभ्यां तरसीव च॥ संप्रहृष्टमना नित्यं विशोक इव लक्ष्य
स. से॥ उद्वेगं न हि ते किंचित्सुसूक्ष्ममपि लक्ष्यसे॥ नित्यतृ स इव स्वस्थो बालवच्च विचेष्टसे॥ ॥समंगउवाच॥ ॥भू
तं भव्यं भविष्यं च सर्वमेतत्तु मानद॥ तेषां तत्वानि जानामि ततो न विमना ह्यहं॥ उपक्रमानहं वेद पुनरेव फलो
दयात्॥ लोके फलानि चित्राणि ततो न विमना ह्यहं॥ अगाधाश्चाप्रतिष्ठाश्च गतिमंतश्च नारद॥ अंधाजडाजीवं
ति पश्यास्मानपि जीवतः॥ विहितेनैव जीवंति अरोगांगा दिवौकसः॥ बलवंतोबलाश्चैव तस्मादस्मान्सभाज
य॥ सहस्रिणोपि जीवंति जीवंति शतिनस्तथा॥ शोकेन चान्ये जीवंति पश्यास्मानपि जीवतः॥ यदा न शोचेन हि किं
नु नः स्याद्धर्मेण वा नारद कर्मणा वा॥ कृतांतवश्यानि यदा सुखानि दुःखानि वा यन्न विधर्षयंति॥ यस्मेप्राज्ञाःवे

थयंते मनुष्याः प्रज्ञामूलं हींद्रियाणां प्रसादः॥मुह्यंति शोचंति तथेंद्रियाणि प्रज्ञालाभो नास्ति मूढेंद्रियस्य॥मूढ
स्य दर्पः स पुनर्मोह एव मूढस्य नायं परोस्ति लोकः॥न ह्येव दुःखानि सदा भवंति सुखस्य वा नित्यलोभा एव॥तावात्म
कं संपरिवर्तमानं न मादृशः संज्वरं जातु कुर्यात्॥इष्टान्भोगान्नानुरुध्येत्सुखं वा न चिंतयेदुःखमभ्यागतं वा॥स
माहितो न स्पृहयेत्परेषां नानागतं वाभिनंदेच्च लाभं॥न चापि हृष्येद्विपुलेर्थलाभे तथार्थनाशे च न वै विषीदेत्॥न
बांधवा न च वित्तं न कौल्यं न च श्रुतं न च मंत्रा न वीर्यं॥दुःखात्त्रातुं सर्व एवोत्सहंते परत्र शीले न तु यांति शांतिं॥नास्ति
बुद्धिरयुक्तस्य नायोगाद्विंदते सुखं॥धृतिश्च दुःखत्यागश्च सुसयं तु सुखं नृप॥प्रियं हि हर्षजननं हर्षउत्सेकवर्द्ध
नं॥उत्सेको नरकायैव तस्मात्तान्संत्यजाम्यहं॥एतांछोकभयोत्सेकान्मोहान्नात्र सुखदुःखयोः॥पश्यामि साक्षिवल्लो
के देहस्यास्य विचेष्टनात्॥अर्थकामौ परित्यज्य विशोको विगतज्वरः॥तृष्णामोहौ तु संत्यज्य चरामि पृथिवीमि
मां॥न च मृत्युर्न चाधर्मो न लोभो न कुतश्चन॥पीतामृतस्येवात्यंतमिह चामुत्र चाभयं॥एतद्ब्रह्मन्विजानामि म
हत्कृत्वा तपोव्ययं॥तेन नारद संप्राप्तो न मां शोकः प्रबाधते॥ ॥शांतौ मोक्षधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥अ
तत्वज्ञस्य शास्त्राणां सततं संशयात्मनः॥अकृतव्यवसायस्य श्रेयो ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥

गुरुपूजा च सततं वृद्धानां पर्युपासनं॥ एवएंचैव शास्त्राणां कृत्स्नं श्रेयउच्यते॥ अत्राप्युदाहरंतीम मितिहासं पुरातनं॥
गालवस्य च संवादं देवर्षेर्नारदस्य च॥ वीतमोहक्लमं विप्रं ज्ञानतृप्तं जितेंद्रियं॥ श्रेयस्कामं यतात्मानं नारदं गाल
वो ब्रवीत्॥ यैः केश्चित्संमतो लोके गुणैस्तु पुरुषो मुने॥ भवत्यनपगान्सर्वांस्तान्गुणांल्लक्षयामहे॥ भवानेवं विधोऽ
स्माकं संशयं छेत्तुमर्हति॥ अमूढश्चिरमूढानां लोकतत्वमजानतां॥ ज्ञाने ह्येवं प्रवृत्तिः स्यात्कार्याणाम विशेषतः॥ य
त्कार्यं न व्यवस्यामस्तद्भवान्वक्तुमर्हति॥ भगवन्नाश्रमाः सर्वे पृथगाचारदर्शिनाः॥ इदं श्रेय इदं श्रेय इति सर्वे प्र
बोधिताः॥ तांस्तु विप्रस्थितान्दृष्ट्वा शास्त्रैः शास्त्राभिनंदितः॥ स्वशास्त्रैः परितुष्टांश्च श्रेयो नोपलभामहे॥ शास्त्रं
यदि भवेदेकं श्रेयो व्यक्तं भवेत्तदा॥ शास्त्रैश्च बहुभिःस्तय श्रेयो गुह्यं प्रवेशितं॥ एतस्मात्कारणाच्छ्रेयः कलिलं प्र
तिभाति मे॥ ब्रवीतु भगवांस्तन्मे उपसन्नोस्म्यधीहि भोः॥ ॥नारदः॥ ॥आश्रमास्तात चत्वारो यथा संकल्पिताः
पृथक्॥ तान्सर्वाननुपश्य त्वं समाश्रित्यतिगालवं॥ तेषां तेषां तथा हि त्वमाश्रमाणां ततस्ततः॥ नानारूपंगुणोद्देशं
पश्य विप्रस्थितं पृथक्॥ नयंति चैव ते सम्यगभिप्रेतमसंशयं॥ अनुपश्यंस्तथा सम्यगाश्रमाणां परांगतिं॥ यत्तु
निःश्रेयसं सम्यकृतथैवासंशयात्मकं॥ अनुग्रहं च मित्राणां च निग्रहं॥ संग्रहं च त्रिवर्गस्य श्रेय आहुर्मनीषिणः॥
निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता॥ सद्भिश्च समुदाचारः श्रेय एतदसंशयं॥ मार्दवं सर्व भूतेषु व्यवहा

रेषु चार्जवं ॥ वाक्चैव मधुरा प्रोक्ता श्रेय एतदसंशयं ॥ दैवतेभ्यः पितृभ्यश्च संविभागोतिथिष्वपि ॥ असंत्यागश्च भृ
त्यानां श्रेय एतदसंशयं ॥ सत्यस्य वचनं श्रेयः सत्यज्ञानं तु दुष्करं ॥ यद्भूतहितमत्यंतमेतत्सत्यं ब्रवीम्यहं ॥ अहंकार
स्य च त्यागः प्रमादस्य च निग्रहः ॥ संतोषश्चैकचर्या च कूटस्थं श्रेय उच्यते ॥ धर्मेण वेदाध्ययनं वेदांगानां तथैव च ॥
ज्ञानार्थानां च जिज्ञासा श्रेय एतदसंशयं ॥ शब्दरूपरसस्पर्शान्सह गंधेन केवलान् ॥ नात्यर्थमुपसेवेत श्रेयसो
र्थी कथंचन ॥ नक्तंचर्यां दिवास्वप्नमालस्यं पैशुनं मदं ॥ अतियोगमयोगं च श्रेयसोर्थी परित्यजेत ॥ आत्मोत्कर्षं न
मार्गेत परेषां परनिंदया ॥ स्वगुणैरेव मार्गेत विप्रकर्षं पृथग्जनात् ॥ निर्गुणास्त्वेव भूयिष्ठमात्मसंभाविता नराः ॥
॥ दोषैरन्यान्गुणवतः क्षिपंत्यात्मगुणक्षयात् ॥ अनुच्यमानास्तु पुनस्ते मन्यंते महाजनात् ॥ गुणवत्तरमात्मानं स्वे
न मानेन दर्पिताः ॥ अब्रुवन्कस्यचिन्निंदामात्मपूजामवर्णयन् ॥ विपश्चिद्गुणसंपन्नः प्राप्नोत्येव महद्यशः ॥ अब्रु
वन्वाति सुरभिर्गंधः सुमनसांसुचिः ॥ तथैवाव्याहरन्भाति विमलो भानुरंबरे ॥ एवमादीनि चान्यानि परित्यक्तानि मे
धया ॥ ज्वलंति यशसा लोके यानि न व्याहरंति च ॥ न लोके दीप्यते मूर्खः केवलात्मप्रसंसया ॥ अपि चापिहितः श्वभ्रे
कृतविद्यः प्रकाशते ॥ असदुच्चैरपि प्रोक्तः शब्दः समुपशाम्यति ॥ दीप्यते त्वेव लोकेषु शनैरपि सुभाषितं ॥ मूढानामव
लिप्तानामसारं भाषितं बहु ॥ दर्शयंत्यंतरात्मानमग्निरूपमिवांशुमान् ॥ एतस्मात्कारणात्प्रज्ञां मृगयंते पृथग्विधां ॥

प्रज्ञालाभो हि भूतानामुत्तमः प्रतिभाति मे॥ नापृष्टः कस्यचिद्ब्रूयान्नाप्यन्यायेन पृच्छतः॥ ज्ञानवानपि मेधावी जड
वत्समुपाविशेत्॥ ततो वासं परीक्षेत धर्मनित्येषु साधुषु॥ मनुष्येषु वदान्येषु स्वधर्मनिरतेषु वा॥ चतुर्णां य
त्र वर्णानां धर्मव्यतिकरो भवेत्॥ न तत्र वासं कुर्वीत श्रेयोर्थी वै कथंचन॥ निरारंभोप्ययमिह यथालब्धोपजीवन॥
पुण्यं पुण्येषु विमलं पापं पापेषु चाप्नुयात्॥ अपामग्नेस्तथेंदोश्च स्पर्शं वेदयते यथा॥ तथा पश्यामहे स्पर्शमु
भयोः पुण्यपापयोः॥ अपश्यंतो नु विषयं भुंजते विघसाशिनः॥ भुंजानाश्चास्य विषयान् विषयान्विद्धि कर्मणां॥
यत्रागमयमानानामसत्कारेण पृच्छति॥ प्रब्रूयाद्ब्राह्मणो धर्मं त्यजेत्तं देशमात्मवान्॥ शिष्योपाध्यायिकावृत्तिर्यत्र स्या
त्सुसमाहिता॥ यथावच्छास्त्रसंपन्ना कस्तं देशं परित्यजेत्॥ आकाशस्था ध्रुवं यत्र दोषं ब्रूयुर्विपश्चितां॥ आत्मपूजा
भिकामो वै को वसेत्तत्र पंडितः॥ यत्र संलोडिता लुब्धैः प्रायशो धर्मसेतवः॥ प्रदीप्तमिव चैलांतं कस्तं देशं न संत्यजेत्॥
यत्र धर्ममनाशंकाश्चरेयुर्वीतमत्सराः॥ चरेत्तत्र वसेच्चैव पुण्यशीलेषु साधुषु॥ धर्ममर्थनिमित्तं च चरेयुर्यत्र मा धु
नवाः॥ न ताननुवसेज्जातु ते हि पापकृतो जनाः॥ कर्मणा यत्र पापेन वर्तते जीवितेप्सवः॥ व्यवधावेत्ततस्तूर्णं ससर्पा
च्छरणादिव॥ येन खट्वासमारूढः कर्मणानुशयी भवेत्॥ आदितस्तन्न कर्तव्यमिच्छता भवमात्मनः॥ यत्र रा
जा च राजश्च पुरुषाः प्रत्यनंतराः॥ कुटुंबिनामग्रभुजस्त्यजेत्तद्देशमात्मवान्॥ श्रोत्रियास्त्वग्रभोक्तारो धर्मनित्याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सनातनाः॥ याजनाध्यापने युक्ता यत्र तद्ब्रह्म आवसेत्॥ स्वाहास्वधावषट्कारा यत्र सम्यगनुष्ठिताः॥ अजस्रं वेव वर्त्तंतेव
सेत्तत्राविचारयन्॥ अशुचीन्यत्र पश्येत ब्राह्मणान्वृत्तिकर्षितान्॥ त्यजेत्तद्ग्राममासन्नमुपसृष्टमिवामिषं॥ प्रीय
माणा नरा यत्र प्रयच्छेयुरयाचिताः॥ स्वस्थचित्तो वसेत्तत्र कृतकृत्यमिवात्मवान्॥ दंडो यत्राविनीतेषु सत्कारः सुकृता
त्मसु॥ चरेत्तत्र वसेद्वैव पुण्यशीलेषु साधुषु॥ उपसृष्टेषु दांतेषु दूराचारेष्वसाधुषु॥ अविनीतेषु लुब्धेषु सुमहद्दंड
धारणं॥ यत्र राजा धर्मनित्यो राज्यं धर्मेण पालयेत्॥ अपास्य कामान्कामेशो वसेत्तत्राविचारयन्॥ तथाशीला हि
राजानः सर्वान्विषयवासिनः॥ श्रेयसा योजयंत्याशु श्रेयसि प्रत्युपस्थिते॥ पृष्टस्तेन मया तात श्रेय एतदुदाहृतं॥
नहि शक्यं प्रधानेन श्रेयः संख्यातुमात्मनः॥ एवं प्रवर्त्तमानस्य वृत्तिं प्रणिहितात्मनः॥ तपसैवेह बहुलं श्रेयो व्यक्तं ऽ
भविष्यति॥ ॥ शांतौ मोक्षधर्मे॥ ॥ युधिष्ठिर उवाच॥ ॥ कथं नु युक्तः पृथिवीं चरेदस्मद्विधो नृपः॥ नित्यं कैश्च गु
णैर्युक्तः संगपाशाद्विमुच्यते॥ ॥ भीष्म उवाच॥ ॥ अत्र ते वर्त्तयिष्यामि इतिहासं पुरातनं॥ अरिष्टनेमिना प्रोक्तं सग
रायानुपृच्छते॥ ॥ सगर उवाच॥ ॥ किं श्रेयः परमं ब्रह्मन्कृत्वेह सुखमश्नुते॥ कथं न शोचेन्न क्षुभ्येदेतदिच्छामि
वेदितुं॥ ॥ भीष्म उवाच॥ ॥ एवमुक्तस्तदा तार्क्ष्यः सर्वशास्त्रविशारदः॥ विबुद्ध्य संपदं चाग्र्यां सद्वाक्यमिदमब्रवीत्॥
सुखं मोक्षसुखं लोके न च लोकोवगच्छति॥ प्रसक्तः पुत्रपशुषु धनधान्यसमाकुलः॥ सक्तबुद्धिरशांतात्मा न स शक्यं

तच्छिक्षितुं ॥ स्नेहपाशसितो मूढो न स मोक्षाय कल्पते ॥ स्नेहजान्यहते पाशा वक्ष्यामि शृणु तान्मम ॥ सकर्णि
केन शिरसा नुन्नाक्याः श्रोतुं दिजाभता ॥ संप्राप्य पुत्रान् कालेन यौवनस्थान्निवेश्य च ॥ समर्थाञ्जीवने ज्ञात्वा मुक्तश्चर
यथासुखं ॥ भार्यां पुत्रवतीं वृद्धां लालितां पुत्रवत्सलां ॥ सालगप्रज हि कालेन पनार्थमनुदृश्य च ॥ सापत्यो निरप
त्यो वा मुक्तश्चर यथासुखं ॥ इंद्रियैरिंद्रियार्थेस्त्वमनुभूय यथाविधि ॥ हृतकौतूहलस्तेषु मुक्तश्चर यथासुखं ॥ उ
पपसो बलब्धेषु लाभेषु च समो भव ॥ एष तावत्समासेन तव संकीर्तितो मया ॥ मोक्षार्थो विस्तरेणाथ यस्तयो वक्ष्या
मि तच्छृणु ॥ मुक्ता वीतभया लोके चरंति सुखिनो नराः ॥ सक्तभावा विनश्यंति तिन नास्त्यत्र न संशयः ॥ आहारसं
चयाश्चैव तथा कीटपिपीलिकाः ॥ असक्ताः सुखिनो लोके सक्ताश्चैव विनाशिनः ॥ स्वजनेन च ते चिंता कर्त्तव्या
मोहबुद्धिना ॥ इमे मया विनाभूता भविष्यंति कथं त्विति ॥ स्वयमुत्पद्यते जंतुः स्वयमेव विवर्द्धते ॥ सुखदुःखे तथा
मृत्युं स्वयमेवाधिगच्छति ॥ भोजनाच्छादने चैव मात्रा पित्रा च संग्रहं ॥ स्वकृतेनाधिगच्छंति लोके नास्त्यकृतं पुरा ॥
धात्रा विहितभक्ष्याणि सर्वभूतानि मेदिनी ॥ लोके विपरिधावंति रक्षिता निस्वकर्मभिः ॥ स्वयं मृत्पिंडभूतस्य परतं
त्रस्य सर्वदा ॥ को हेतुः स्वजनं पोष्टुं रक्षितुं वा दृढात्मनः ॥ स्वजने हि यदा मृत्युर्हंत्येव तव पश्यतः ॥ कृते पि यत्ने महति त
च बोद्धव्यमात्मना ॥ जीवंतमपि चैवैनं भरणे रक्षणे तथा ॥ असमाप्ते परित्यज्य पश्चादपि मरिष्यसि ॥ यदा

मृतश्च स्वजनं न शास्त्यस्ति कदाचन ।। सुखितं दुःखितं वापि न नु बोद्धव्य मात्मना ।। मृते वा त्वयि जीवे वा यदा भोक्ष्यति वै जन
नः ।। स्वकृतं न बुबुध्वैवं कर्त्तव्यं हितमात्मनः ।। एवं विज्ञानं लोकेस्मिन्कः कस्येत्यभि निश्चितः ।। मोक्षे निवेशयामा
नो मन्यश्चाप्युपधारय ।। क्षुत्पिपासादयो भावा जिता यस्येह देहिनः ।। क्रोधो लोभस्तथा मोहः सत्ववान्मुक्त एव
सः ।। द्यूते पाने तथा स्त्रीषु मृगयायां च यो नरः ।। न प्रमाद्यति संमोहात्सततं मुक्त एव सः ।। दिवसे दिवसे नाम रात्रौ प
मान्‌ सदा ।। भोक्तव्यमिति यः खिन्नो दोषबुद्धिः स उच्यते ।। आत्मभावं तथा स्त्रीषु सक्तमेवं पुनः पुनः ।। यः पश्यति
सदा युक्तो यथावन्मुक्त एव सः ।। संभवं च विनाशं च भूतानां चेष्टितं तथा ।। यस्तत्वतो विजानाति लोकेस्मिन्मुक्त
एव सः ।। प्रस्थं वाहसहस्रेषु वस्त्रार्द्धं चैव कोटिषु ।। प्रासादे मंचकं स्थानं यः पश्यति स मुच्यते ।। मृत्युना भ्या
हतं लोकं व्याधिभिश्चोपपीडितं ।। अवृत्तिकर्षितं चैव यः पश्यति स मुच्यते ।। यः पश्यति स संतुष्टो न पश्यंश्च विह
न्यते ।। यश्चाप्यल्पेन संतुष्टो लोकेस्मिन्मुक्त एव सः ।। अग्नीषोमाविदं सर्वमिति पश्यन्नु पश्यति न च संस्पृश्य
ते भावैरद्भुतैर्मुक्त एव सः ।। पर्यंकशय्याभूमिश्च समाने यस्य देहिनः ।। शालयश्च कदन्नं च यस्य स्यान्मुक्त ए
व सः ।। क्षौमं च कुशचीरं च कौशेयं वल्कलानि च ।। आविकं चर्म च समं यस्य स्यान्मुक्त एव सः ।। पंचभूतसमु
द्भूतं लोकं यश्चानुपश्यति ।। तथा च वर्त्तते दृष्ट्वा लोकेस्मिन्मुक्त एव सः ।। सुखदुःखे समे यस्य लाभालाभौ जया

जयौ॥ इछाद्वेषौभयोद्वेगौ सर्वथामुक्त एव सः॥ रक्तमूत्रपुरीषाणां दोषाणां संचयास्तथा॥ शरीरं दोषबहुलं दृष्ट्वा चै
व विमुच्यते॥ वल्लीपलितसंयोगकार्श्यंवैवर्ण्यमेव च॥ कुब्जभावं च जरया यः पश्यति स मुच्यते॥ पुंस्त्वोपघातं काले
न दर्शनोपरमं तथा॥ बाधिर्यं प्राणमंदत्वं यः पश्यति स मुच्यते॥ गतान्ऋषींस्तथा देवानसुरांश्च तथागतान्॥ लोका
दस्मात्परं लोकं यः पश्यति स मुच्यते॥ प्रभावैरचितास्तैस्तैः पार्थिवेंद्राः सहस्रशः॥ ये गताः पृथिवींसत्यक्त्वा इति ज्ञा
त्वा विमुच्यते॥ अर्थांश्च दुर्लभांल्लोके क्लेशांश्च सुलभांस्तथा॥ दुःखं चैव कुटुंबार्थे यः पश्यति स मुच्यते॥ अपत्यानां च
वैगुण्यं जनं विगुणमेव च॥ पश्यन्नृपथिष्ठशोलोके को मोक्षं नास्ति पूजयेत्॥ शास्त्राल्लोकाच्च यो बुद्धः सर्वं पश्य
ति मानवः॥ असारमिव मानुष्यं सर्वथा मुक्त एव सः॥ एतच्छ्रुत्वा मम वचो भवांश्चरतु मुक्तवत्॥ गार्हस्थ्ये यदि वा मो
क्षे कृता बुद्धिरविक्लवा॥ तत्तस्य वचनं श्रुत्वा सम्यक् स पृथिवीपतिः॥ मोक्षजैश्च गुणैर्युक्तः पालयामास च प्रजाः
॥ ॥ शांतौ मोक्षधर्मे॥ ॥ युधिष्ठिर उवाच॥ ॥ तिष्ठते मे सदा तात कौतूहलमिदं हृदि॥ तदहं श्रोतुमिच्छामि त्व
त्तः कुरुपितामह॥ कथं देवर्षिरुशनाः सदा काव्यो महामतिः॥ असुराणां प्रियकरः सुराणामप्रिये रतः॥ वर्द्ध
यामास तेजश्च किमर्थममितौजसः॥ नित्यं वैरनिबद्धाश्च दानवाः सुरसत्तमैः॥ कथं चाप्युशना प्राप शुक्रत्व
ममरद्युतिः॥ ऋद्धिं च स कथं प्राप्तः सर्वमेतद्ब्रवीहि मे॥ न याति च स तेजस्वी मध्येन नभसः कथं॥ एतदिच्छामि वि

स्रोतुं निखिलेन पितामह।। ।।भीष्म उवाच।। ।।श्रृणु राजन्नवहितः सर्वमेतद्यथातथं।।यथामति यथा चैतच्छ्रुतपूर्वं म
यानघ।।एष भार्गवदायादो मुनिर्मान्यो दृढव्रतः।।सुराणां विप्रियकरो निमित्ते कारणात्मके।।इंद्रोथ धनदो राजा
यक्षरक्षोधिपः सदा।।प्रभविष्णुश्च कोशस्य जगतश्च तथा प्रभुः।।तस्यात्मानमथाविश्य योगसिद्धो महामुनिः।।
रुध्वा धनपतिं देवं योगेन हृतवान्वसु।।हृते धने ततः शर्म न लेभे धनदस्तथा।।आपन्नमन्युः संविग्नः सोभ्य
गात्सुरसत्तमं।।निवेदयामास तदा शिवायामिततेजसे।।देवश्रेष्ठाय रुद्राय सौम्याय बहुरूपिणे।।योगात्मकेनो
शना रुध्वा मम हृतं वसु।।योगेनात्मगतं कृत्वा निःसृतश्च महातपाः।।एतच्छ्रुत्वा ततः क्रुद्धो महायोगी महेश्वरः।।
संरक्तनयनो राजन्शूलमादाय तस्थिवान्।।क्वासौ क्वासाविति प्राह गृहीत्वा परमायुधं।।उशना दूरतस्त
स्य वेत्ता ज्ञात्वा चिकीर्षितं।।स महायोगिनो बुध्वा तं रोषं वै महात्मनः।।गतिमागमनं वेत्ति स्थानं वेत्ति ततः प्रभुः।।
संचिंत्योग्रेण तपसा महात्मानं महेश्वरं।।उशना योगसिद्धात्मा शूलाग्रे प्रत्यदृश्यत।।विज्ञातरूपः स तदा तपः
सिद्धेन धन्विना।।ज्ञात्वा शूलं च देवेशः पाणिना समनामयत्।।आनतेनाथ शूलेन पाणिनामिततेजसा।।पि
नाकमिति चोवाच शूलमुग्रायुधः प्रभुः।।पाणिमध्यगतं दृष्ट्वा भार्गवं तमुमापतिः।।आस्यं विवृत्य ककुदी प्रा

पिनाशक्षिपघ्नेः॥ स तु प्रविष्ट उशना कोष्ठं माहेश्वरं प्रभुः॥ व्यचरच्चापि तत्रासौ महात्मा भृगुनंदनः॥ ॥युधि-
ष्ठिर उवाच॥ ॥किमर्थं व्यचरद्राजन्नुशना तस्य धीमतः॥ जठरे देवदेवस्य किं चाकार्षीन्महाद्युतिः॥ ॥भीष्म
उवाच॥ ॥पुरा सोतर्जलगतः स्थाणुभूतो महाव्रतः॥ वर्षाणामभवद्राजन्प्रयुतान्यर्बुदानि च॥ उदतिष्ठत्तप-
स्तप्त्वा दुश्चरं च महाह्रदात्॥ ततो देवातिदेवस्तं ब्रह्मा वैसमस्तर्पत॥ तपोवृद्धिमपृच्छच्च कुशलं चैवमव्ययः॥ त-
पः सुचीर्णमिति च प्रोवाच वृषभध्वजः॥ तत्संयोगेन वृद्धिं चाप्यपश्यत्रसे तु शंकरः॥ महामतिरचिंत्यात्मा सत्यधर्म-
रतः सदा॥ स तेनाढ्यो महायोगी तपसा च धनेन च॥ व्यराजत महाराज त्रिषु लोकेषु वीर्यवान्॥ ततः पिनाकी यो-
गात्मा ध्यानयोगं समाविशत्॥ उशना तु समुद्विग्नो निलिल्ये जठरे ततः॥ तुष्टाव च महायोगी देवं तत्रस्थ एव च॥
निःसारं कांक्षमाणः स तेन स्म प्रतिहन्यते॥ उशना तु तथोवाच जठरस्थो महामुनिः॥ प्रसादं मे कुरुष्वेति पुनः पुन-
रिंदम॥ तमुवाच महादेवो गच्छ शिश्नेन मोक्षणं॥ इति सर्वाणि स्रोतांसि रुध्वा त्रिदशपुंगवः॥ अपश्यमान-
स्तद्वारं सर्वतः पिहितो मुनिः॥ पर्यक्रामद्दह्यमानाऽतस्त्रे तश्चै तेजसा॥ स वै निष्क्रम्य शिश्नेन शुक्रत्वमभिपेदि-
वान्॥ कार्येपातेन नभसो नागच्छत समध्यमः॥ विनिष्क्रांतं तु तं दृष्ट्वा ज्वलंतमिव तेजसा॥ भवो रोषसमावि

ष्ठु शूलोद्यतकरः स्थितः ॥ अवारयत तं देवी क्रुद्धं पशुपतिं पतिं ॥ पुत्रत्वमगमद्देव्या वारिते शंकरे वसः ॥ ॥ देव्युवाच ॥ ॥ हिंसनीयस्त्वया नैव मम पुत्रत्वमागतः ॥ न हि देवादरात्कश्चिन्निःसृतो नाशमर्छति ॥ ततः प्रीतो भवो देव्याः प्रहसंश्चेदमब्रवीत् ॥ गच्छत्वेष यथाकाममिति राजन्पुनः पुनः ॥ ततः प्रणम्य वरदं देवं देवीमुमां तथा ॥ उशनाप्राप तद्धीमान्गतिमिष्टां महामुनिः ॥ एतत्ते कथितं तात भार्गवस्य महात्मनः ॥ चरितं भरतश्रेष्ठ यन्मां त्वं परिपृच्छसि ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उ० ॥ ॥ अतः परं महाबाहो यच्छ्रेयस्तद्ब्रवीहि मे ॥ न तृप्याम्यमृतस्येव वचसस्ते पितामह ॥ किं कर्म पुरुषः कृत्वा शुभं पुरुषसत्तम ॥ श्रेयः परमवाप्नोति प्रेत्य चेह च तद्वद ॥ ॥ भीष्म उवाच ॥ ॥ अत्र ते वर्त्तयिष्यामि यथापूर्वं महायशाः ॥ पराशरं महात्मानं पप्रच्छ जनको नृपः ॥ किं श्रेयः सर्वभूतानामस्मिन्लोके परत्र च ॥ यद्भवेत्प्रतिपत्तव्यं तद्भवान्प्रब्रवीतु मे ॥ ततः स तपसा युक्तः सर्वधर्मविधानवित् ॥ नृपायानुग्रहमना मुनिर्वाक्यमथाब्रवीत् ॥ ॥ पराशर उवाच ॥ ॥ धर्म एव कृतः श्रेयानिह लोके परत्र च ॥ तस्माद्धि परमं नास्ति यथा प्राहुर्मनीषिणः ॥ प्रतिपद्य नरो धर्मं स्वर्गलोके महीयते ॥ धर्मात्मकः कर्मविधिर्देहिनां नृपसत्तम ॥ तस्मिन्नाश्रमिणः संतः स्वकर्माणीह कुर्वते ॥ चतुर्विधा हि लोकेऽस्मिन्या

त्या तात विधीयते ॥ मर्त्या यत्रावतिष्ठंते सा कर्मभात्र वर्तते ॥ सुकृतासुकृतं कर्म निषेव्य विविधैः क्रमैः ॥ दशार्द्ध
विभक्तानां कृतानां बहुधा पतति ॥ सौवर्णं राजतं चापि यथा भांडं निषिच्यते ॥ तथा निषिच्यते जंतुः पूर्वकर्मवशानु
गः ॥ नाबीजाज्जायते किंचिन्नाकृत्वा सुखमेधते ॥ सुकृतैर्विंदते सौख्यं प्राप्य देहक्षयं नरः ॥ दैवं तात न पश्या
मि नास्ति दैवस्य साधनं ॥ स्वभावतो हि संसिद्धा देवगंधर्वदानवाः ॥ आत्मजाति कृतं कर्म न स्मरंति सदा जनाः ॥ ति
वेतस्य फलं प्राप्तो कर्म चापि चतुर्विधं ॥ लोकयात्राश्रयश्चैव शब्दो वेदाश्रयः कृतः ॥ शांत्यर्थं मनसा तात नैतद्वृद्धा
नुशासनं ॥ चक्षुषा मनसा वाचा कर्मणा च चतुर्विधं ॥ कुरुते यादृशं कर्म तादृशं प्रतिपद्यते ॥ निरंतरं च मिश्रं च लभ
ते कर्म पार्थिव ॥ कल्याणं यदि वा पापं न तु नाशोऽस्य विद्यते ॥ कदाचित्सुकृतं तात कूटस्थमिव तिष्ठति ॥ मज्जमानस्य
संसारे यावद्दुःखाद्विमुच्यते ॥ ततो दुःखक्षयं कृत्वा सुकृतं कर्म सेवते ॥ सुकृतक्षयाद्दुष्कृतश्च तद्विद्धि मनुजाधिप ॥
दमक्षमा धृतिस्तेजः संतोषः सत्यवादिता ॥ ह्रीरहिंसाव्यसनिता दाक्ष्यं चेति सुखावहाः ॥ दुःष्कृते सुकृते चापि न जं
तुर्नियतो भवेत् ॥ नित्यं मनःसमाधाने प्रयतेत विचक्षणः ॥ नायं परस्य सुकृतं दुष्कृतं चापि सेवते ॥ करोति
यादृशं कर्म तादृशं प्रतिपद्यते ॥ सुखदुःखे समाधाय पुमानन्येन गच्छति ॥ अन्येनैव जनः सर्वः संगतो यस्य

पार्थिव॥ परेषां यदसूयेत तन्न कुर्याज्जनेश्वर॥ योह्यसूयुस्तथायुक्तः सोवहासं नियच्छति॥ भीरूर्न्नाजन्यो ब्राह्मणः
सर्वभक्ष्यो वैश्योनीहावान्हीनवर्णोलसश्च॥ विद्वांश्चाशीलो वृत्तहीनः कुलीनः सत्याद्विभ्रष्टो ब्राह्मणस्स्त्री च दु
ष्टा॥ रागी युक्तः पचमानोत्महेतोर्मूर्खो वक्तान्नृपहीनं च राष्ट्रं॥ एते सर्वे शोच्यतां यांति राजन्यश्चायुक्तः स्नेहहीनः
प्रजासु॥ ॥ शांतौ मोक्षधर्मे॥ ॥ पराशर उवाच॥ ॥ मनोरथरथं प्राप्य इंद्रियार्थहयं नरः॥ रश्मिभिर्ज्ञानसंभू
तैर्यो गच्छति स बुद्धिमान्॥ सेवाश्रितेन मनसा वृत्तिहीनस्य शस्यते॥ द्विजातिहस्तान्निर्वृत्यान्नतु तुल्यात्परस्प
रात्॥ आयुर्न सुलभं लब्ध्वा नापकर्षेद्विशांपते॥ उत्कर्षार्थं प्रयतते नरः पुण्येन कर्मणा॥ वर्णेभ्यो हि परिभ्रष्टो
न वै संमानमर्हति॥ न तु यः सत्क्रियां प्राप्य राजसं कर्म सेवते॥ वर्णोत्कर्षमवाप्नोति नरः पुण्येन कर्मणा॥ दुष्क
रं तमलब्ध्वा हि हन्यात्पापेन कर्मणा॥ अज्ञानाद्धि कृतं पापं तपसैवाभिनिर्नुदेत्॥ पापं हि कर्म फलति पापमेव
स्वयं कृतं॥ तस्मात्पापं न सेवेत कर्म दुःखफलोदयं॥ पापानुबंधं यत्कर्म यद्यपि स्यान्महाफलं॥ तन्न सेवेत
मेधावी शुचिः कुशलिनं यथा॥ किं कष्टमनुपश्यामि फलं पापस्य कर्मणः॥ प्रत्यापन्नस्य हि ततो नात्मा तावद्वि
रोचते॥ प्रत्यापत्तिश्च यस्येह बालिशस्य न जायते॥ तस्यापि सुमहांस्तापः प्रस्थितस्योपजायते॥ विरक्त

शोध्यते वस्त्रं न तु कृच्छ्रेपसंहितं ।। प्रयत्नेन मनुष्येंद्र पापमेवं निबोध मे ।। स्वयं कृत्वा तु यः पापं शुभमेवानुति
ष्ठति ।। प्रायश्चित्तं नरः कर्तुमुभयं सोऽश्नुते पृथक् ।। अज्ञानात्तु कृतां हिंसामहिंसा व्यपकर्षति ।। ब्राह्मणाः शास्त्र
निर्देशादित्याहुर्ब्रह्मवादिनः ।। तथा कामकृतं नास्य विहिंसैवानुकर्षति ।। इत्याहुर्ब्रह्मशास्त्रज्ञा ब्राह्मणा वेदपारगाः ।।
अहं तु तावत्पश्यामि कर्म यद्वर्त्तते कृतं ।। गुणयुक्तं प्रकाशं वा पापेनानुपसंहितं ।। यथा सूक्ष्माणि कर्माणि फ
लंतीह यथातथं ।। बुद्धियुक्तानि तानीह कृतानि मनसा सह ।। भगवत्यल्पफलं कर्म सेवितं नित्यमुल्बणं ।।
अबुद्धिपूर्वं धर्मज्ञ कृतमुग्रेण कर्मणा ।। कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा ।। नाचरेत्तानि धर्मात्मा श्रु
त्वा चापि न कुत्सयेत् ।। संचिंत्य मनसा राजन् विदित्वा शक्यमात्मनः ।। करोति यः शुभं कर्म स वै भद्राणि पश्य
ति ।। नवे कपाले सलिलं संन्यस्तं हीयते यथा ।। नवेतरे तथाभावं प्राप्नोति सुखभावितं ।। समानि चैव यानी
ह तानि पुण्यतमान्यपि ।। राज्ञा जेतव्याः शत्रवश्चोन्नताश्च सम्यक्कर्तव्यं पालनं च प्रजानां ।। अग्निश्चेष्टव्यो बहुभि
श्चापि यज्ञैर्मध्ये वा वनमाश्रित्य स्थेयं ।। दमान्वितः पुरुषो धर्मशीलो भूतानि चात्मानमिवानुपश्येत् ।। ग
रीयसः पूजयेदात्मशक्त्या सत्येन शीलेन सुखं नरेंद्र ।। ।। शांतौ मोक्षधर्मे ।। ।। पराशरः ।। ।। कः कस्य चोप

कुरुते कश्चकस्मै प्रयच्छति॥ प्राणी करोत्ययं कर्म सर्वमात्मार्थमात्मना॥ गौरवेण परित्यक्तं निःस्नेहं परिवर्जयेत्॥ सो
दर्यं भ्रातरमपि किमुतान्यं पृथग्जनं॥ विशिष्टस्य विशिष्टाच्च तुल्यौ दानप्रतिग्रहौ॥ तयोः पुण्यतरं दानं तद्द्विजस्य प्रय
च्छतः॥ न्यायागतं धनं वर्णैर्न्यायेनैव विवर्द्धितं॥ संरक्ष्यं यत्नमास्थाय धर्मार्थमिति निश्चयः॥ न धर्मार्थी नृशंसेन क
र्मणा धनमर्जयेत्॥ शक्तितः सर्वकार्याणि कुर्यान्नर्द्धिमनुस्मरेत्॥ अपो हि प्रयतः शीतास्तापिता ज्वलनेन वा॥ श
क्तितोतिथये दत्वा क्षुधार्तायाश्नुते फलं॥ रंतिदेवेन लोकेष्टा सिद्धिः प्राप्ता महात्मना॥ फलपत्रैरथो मूलैर्मुनीनर्
चितवानसौ॥ तैरेव फलपत्रैश्च स माठरमतोषयत्॥ तस्माल्लेभे परं स्थानं शैब्योपि पृथिवीपतिः॥ देवतातिथि
भृत्येभ्यः पितृभ्यश्चात्मनस्तथा॥ ऋणवाञ्जायते मर्त्यस्तस्मादनृणतां व्रजेत्॥ स्वाध्यायेन महर्षिभ्यो देवेभ्यो य
ज्ञकर्मणा॥ पितृभ्यः श्राद्धदानेन नृणामभ्यर्चनेन च॥ वाचः शेषावहार्येण पालनेनात्मनोपि च॥ यथावद्भृत्यवर्ग
स्य चिकीर्षेत्कर्म आदितः॥ प्रयत्नेन च संसिद्धा धनैरपि विवर्जिताः॥ सम्यग्घुत्वा हुतवहं मुनयः सिद्धिमागताः
॥ विश्वामित्रस्य पुत्रत्वमृचीकतनयोगमत्॥ ऋग्भिः स्तुत्वा महाबाहो देवान्वै यज्ञभागिनः॥ गतः शुक्रत्वमुश
नादेवदेवप्रसादनात्॥ देवीं स्तुत्वा तु गगने मोदते यशसावृतः॥ असितो देवलश्चैव तथा नारदपर्वतौ॥ काक्षी

वाऽजामदग्निश्च रामस्तोऽयस्तथा स्मवाऽः॥ वसिष्ठो जमदग्निश्च विश्वामित्रो त्रिनेव च॥ भरद्वाजो हरिश्मश्रुः कुं
डधारश्च तथैव च॥ एते महर्षयस्तुत्वा विष्णुभक्तिः समाहिताः॥ लेभिरे तपसा सिद्धिं प्रसादात्तस्य धीमतः॥ अन
र्हाश्चार्हतो प्राप्ताः संतस्तुत्वा तमेव हि॥ तनुवृद्धिमिहान्विच्छेत्कर्म कृत्वा जुगुप्सितं॥ येऽधाधर्मे पातेस्तस्या येधर्मे
णाधिपास्तुतान् भधर्मं वै शाश्वतं लोके न जह्याद्धन कांक्षया॥ आहिताग्निर्हि धर्मात्मा यःस पुण्यकृदुत्तमः॥ वे
दाहिताग्निस्तु सर्वे राजेंद्र स्थितास्त्रिषु प्रभो॥ स चाप्यग्न्याहितो विप्रः क्रिया यस्य न हीयते॥ श्रेयो ह्यनाहि
ताग्निस्त्वमग्निहोत्रं न निष्क्रियं॥ अग्निरात्मा च माता च पिता जनयिता तथा॥ गुरुश्च नरशार्दूल परिचार्यो
यथातथं॥ मानं त्यक्त्वा यो नरो वृद्धसेवी विद्वान् क्लीबः पश्यति प्रीतियोगात्॥ दाक्ष्येण हीनो धैर्यमायुक्तो
न दांतो लोकेस्मिन्नैव प्रज्यते सद्भिरार्यैः॥ ॥शांतो मोक्षधर्मेः॥ ॥पराशर उवाच॥ ॥वृत्तिः सकाशाद्वर्णेभ्यः
स्त्रीभ्यो हीनस्य शोभना॥ प्रीत्योपनीता निर्दिष्टा धर्मसिष्टान्कुरुते सदा॥ वृत्तिश्चेन्नास्ति शूद्रस्य पितृपैता
महीं प्रवा॥ न वृत्तिं परतो मार्गेत् शुश्रूषां तु प्रयोजयेत॥ सद्भिस्तु सह संसर्गः शोभते धर्मदर्शिभिः॥ नित्यं
सर्वास्ववस्थासु नासद्भिरिति मे मतिः॥ यथोदयगिरौ द्रव्यं संनिकर्षेण दीप्यते॥ तथा सत्सन्निकर्षेण हीनव

ऐर्गिपिद्दीप्यते ॥ यादृशेन हि वर्णेन भाव्यते शुक्लसंबरं ॥ तादृशं कुरुते रूपमेतदेवमवैहि मे ॥ तस्माद्रूपोषु रज्येथा
मा दोषेषु कदाचन ॥ अनित्यमिह मर्त्यानां जीवितं हि चलाचलं ॥ सुखे वा यदि वा दुःखे वर्त्तमानो वि चक्षणः ॥ यश्चि
शोऽशुभान्येव स भद्राणीह पश्यति ॥ धर्मादपेतं यत्कर्म यद्यपि स्यान्महाफलं ॥ न तत्सेवेत मेधावी न तद्धितमिहो
च्यते ॥ ये हत्वा गोसहस्राणि नृपो दद्यादरक्षिता ॥ स शब्दमात्रेवफलभाक् राजा भवति तस्करः ॥ स्वयंत्तनसृज
त्वामे पातारं लोकसंहृतं ॥ धातास्रजत्पुरामेकं लोकानां धामरक्षितं ॥ तमर्चयित्वा वैश्यस्तु कुर्याद्दस्य महीक्षितारा ॥ रक्षि
तव्यं तु राजन्यैरुपयोज्यं द्विजातिभिः ॥ अजिह्मैन शठक्रोधेहव्यकव्यप्रयोक्तृभिः ॥ शूद्रैर्निर्माजनं कार्यमेवं धर्मो न
नश्यति ॥ अप्रनष्टे ततो धर्मे भवंति सुखिताः प्रजाः ॥ सुखेन तासां राजेंद्र मोदंते दिवि देवताः ॥ तस्माद्यो रक्षति नृपः स धर्मे
र्मेचोति पूज्यते ॥ अधीते चापि यो विप्रो वैश्यो यश्चार्जने रतः ॥ यश्च शुश्रूषते शूद्रः सततं नियतेंद्रियः ॥ अतोन्यथा म
नुष्येंद्र स्वधर्मात्परिहीयते ॥ प्राणसंतापनिर्दिष्टाः काकिन्योपि महाफलाः ॥ न्यायेनोपार्जिता दत्ताः किमुतान्याः स
हस्रशः ॥ संस्कृत्य हि द्विजातिभ्यो ददाति नराधिप ॥ यादृशं तादृशं नित्यमश्नाति फलमूर्जितं ॥ अभिगम्य तु यद्द
त्तमाहुरभिष्टुतं ॥ याचितेन तु यद्दत्तं तमाहुर्मध्यमं बुधाः ॥ अवज्ञया दीयते यत्तथैवाश्रद्धयापि वा तदाहुरधमं दानं

मुनयः सत्यवादिनः ।। अतिक्रमेन्मदन्मानो विविधेन नयः सदा ।। तथाप्रयत्नं कुर्वीत यथा मुच्येत तत्संशयात् ।। दमने शोभते वि
प्रः क्षत्रियो विजयेन तु ।। धनेन वैश्यः शूद्रस्तु नित्यं दास्येण शोभते ।। ।। शांतौ मोक्षधर्मे ।। ।। पराशर उवाच ।। ।। प्रतिग्रह
गता विप्रे क्षत्रिये युधिनिर्जिताः ।। वैश्ये न्यायार्जिताश्चैव शूद्रे शुश्रूषयार्जिताः ।। स्वल्पाप्यर्थाः प्रशस्यंते धर्मस्यार्थे महाफलाः ।।
नित्यं त्रयाणां वर्णानां शुश्रूषुः शूद्र उच्यते ।। क्षत्रधर्मा वैश्यधर्मा नावृत्तिः पतति द्विजः ।। शूद्रधर्मा यदा तु स्यात्तदा पतति वै
द्विजः ।। वाणिज्यं पाशुपाल्यं च तथा शिल्पोपजीवनं ।। शूद्रस्यापि विधीयदा वृत्तिर्न जायते ।। रंगावतरणं चैव तथा रूपोप
जीवनं ।। मद्यमांसोपजीव्यं च विक्रियं लोहचर्मणोः ।। अपूर्वेण न कर्तव्यं कर्म लोके विगर्हितं ।। कृतपूर्वे तु त्यजतो महा
न्धर्म इति श्रुतिः ।। संसिद्धः पुरुषो लोके यदाचरति पापकं ।। मदेनाभिप्लुतमनास्तच्च न ग्राह्यमुच्यते ।। श्रूयंते हि पुराणेषु
प्रजा धिग्दंडशासिनः ।। दांता धर्मप्रधानाश्च न्यायधर्मानुवर्तिकाः ।। धर्म एव सदा नृणामिह प्रशस्यते ।। धर्मवृद्धा गु
णानेव सेवंते हि नरा भुवि ।। तं धर्ममसुरास्तात नामृष्यंत जनाधिप ।। विवर्धमानाः क्रमशस्तत्र तेन्वाविशन्प्रजाः ।। तासां द
र्पः समभवद्यज्ञानो धर्मनाशनः ।। दर्पात्मनां ततः पश्चात्क्रोधस्तासामजायत ।। ततः क्रोधाभिभूतानां वृत्तं लज्जास
मन्वितं ।। ह्रीश्चैवाप्यनशद्राजंस्ततो मोहो व्यजायत ।। ततो मोहपरीतास्ता नापश्यंत यथा पुरा ।। परस्परावमर्देन वर्ध
यंत्यो यथासुखं ।। ताः प्राप्य स धिग्दंडो न कारणमतोऽभवत् ।। ततोऽभ्यगच्छन्देवांश्च ब्राह्मणांश्चावमन्य ह ।। एतस्मिन्नेव का

ल्लतुदेवादेववरंशिवं॥आगछद्धरणंधीरबहुरूपगुणाधिकं॥तेनस्मतेगगानगाःसपुराःपतिताःक्षितौ॥त्रिस्त्रोप्येकेनवाणेनदे
वाप्याशिततेजसा॥तेषामधिपतिस्त्वासीद्दंभोभीमपराक्रमः॥देवतानांभयकरःसहतःशूलपाणिना॥तस्मिहतेसस्वंभावं
प्रत्यपद्यंतमानवाः॥प्रादुर्घ्यंतचवेदाश्चशास्त्राणिचयथापुरा॥ततोभिषिच्यराज्येनदेवानांदिविवासवं॥सप्तर्षयश्चान्वयुं
जन्नराणांदंडधारणे॥सप्तऋषीणामथोर्द्धंचविपृथुर्नामपार्थिवः॥राजानःक्षत्रियाश्चैवमंडलेषुपृथक्पृथक्॥महाकु
लेषुयेजाताःवृद्धाःपूर्वतराश्चये॥तेषामप्यासुरोभावोहृदयान्नापसर्पति॥तस्मात्तेनैवभावेनसानुषंगेणपार्थिवाः॥आ
सुराण्येवकर्माणिन्यसेवन्भीमविक्रमाः॥प्रत्यतिष्ठंश्चतेष्वेवतान्येवस्थापयंत्यपि॥भजंतेतानिचाद्यापियेबालिशतमान
राः॥तस्मादहंब्रवीमित्वांराजन्संचिंत्यशास्त्रतः॥संसिद्धधिगमंकुर्यात्कर्महिंसात्मकंत्यजेत्॥नसंकरेणद्रविणंप्रचि
न्वीयाद्विचक्षणः॥धर्मार्थंन्यायमुत्सृज्यनतत्कल्याणमुच्यते॥सत्वमेवंविधोदांतःक्षत्रियःप्रियबांधवः॥प्रजाभृत्यांश्च
पुत्रांश्चस्वधर्मेणानुपालय॥इष्टानिष्टसमायोगोवैरंसौहार्दमेवच॥अथजातिसहस्राणिबहूनिपरिवर्त्तति॥तस्माद्गुणे
षुरज्येथामादोषेषुकथंचन॥निर्गुणोपिहिदुर्बुद्धिरात्मनःसोतिरिच्यते॥मानुषेषुमहाराजधर्माधर्मौप्रवर्त्ततः॥न
तथान्येषुभूतेषुमानुषरहितेष्विह॥धर्मशीलोनरोविद्वानीहकोनीहकोपिवा॥आत्मभूतःसदालोकेचरेद्भूतान्यहिं
सया॥यदाव्यपेतहृल्लेखंमनोभवतितस्यवै॥नानृतंचैवभवतितदाकल्याणमर्छति॥ ॥शांतौमोक्षधर्मेषुपंचाशत्तमो

तासु॥ ॥पराशर उवाच॥ ॥एष धर्मविधिस्तात गृहस्थस्य प्रकीर्त्तितः॥ तपोविधिं तु वक्ष्यामि तन्मे निगदतः शृणु॥ प्रायेण च गृहस्थस्य ममत्वं नाम जायते॥ संगागतं नरश्रेष्ठ भावै राजसतामसैः॥ गृहाण्याश्रित्य गावश्च क्षेत्राणि च धनानि च दाराः पुत्राश्च भृत्याश्च भवंतीह नरस्य वै॥ एवं तस्य प्रवृत्तस्य नित्यमेवानुपश्यतः॥ रागद्वेषौ विवर्द्धेते ह्यनित्यत्वमपश्यतः॥ रागद्वेषाभिभूतं च नरं द्रव्यवशानुगं॥ मोहजाता रतिर्नाम समुपैति नराधिप॥ कृतार्थं भोगिनं मत्वा सर्वो रतिपरायणः॥ लाभं ग्राम्यसुखादन्यं रतितो नानुपश्यति॥ ततो लोभाभिभूतात्मा संगाद्वर्धयते जनं॥ पुष्ट्यर्थं चैव तस्येह जनस्यार्थं चिकीर्षति॥ स जानन्नपि चाकार्यमर्थार्थं सेवते नरः॥ बालस्नेहपरीतात्मा तत्क्षयाच्चानुतप्यते॥ ततो मानेन संपन्नो रक्षन्नात्मपराजयं॥ करोति येन भोगी स्यामिति तस्माद्विनश्यति॥ तपो हि बुद्धियुक्तानां शाश्वतं ब्रह्मवादिनां॥ अन्विच्छतां शुभं कर्म नराणां त्यजतां सुखं॥ स्नेहायतननाशाच्च धननाशाच्च पार्थिव॥ आधिव्याधिप्रतापाच्च निर्वेदमुपगच्छति॥ निर्वेदादात्मसंबोधः संबोधाच्छास्त्रदर्शनं॥ शास्त्रार्थदर्शनाद्राजंस्तप एवानुपश्यति॥ दुर्लभो हि मनुष्येंद्र नरः प्रत्यवमर्शवान्॥ यो वै प्रियसुखे क्षीणे तपः कर्तुं व्यवस्यति॥ तपः सर्वगतं तात हीनस्यापि विधीयते॥ जितेंद्रियस्य दांतस्य स्वर्गमार्गप्रवर्तकं॥ प्रजापतिः प्रजाः पूर्वमसृजत्तपसा विभुः॥ क्वचित्क्वचिद्व्रतपरो व्रतान्यास्थाय पार्थिव॥ आदित्या वसवो रुद्रास्तथैवाग्न्यश्विमारुताः॥ विश्वेदेवास्तथा साध्याः पितरोऽथ मरुद्गणाः॥ यक्षरा

क्षसगंधर्वाः सिद्धाश्चान्ये दिवौकसः ।। संसिद्धास्तपसा तात ये चान्ये स्वर्गवासिनः ।। ये चादौ ब्राह्मणाः सृष्टाः ब्रह्मणा
तपसा पुरा ।। ते भावयंतः पृथिवीं विचरंति दिवं तथा ।। मर्त्यलोके च राजानो ये चान्ये गृहमेधिनः ।। महाकुलेषु दृश्यं
ते तत्सर्वं तपसः फलं ।। कौशिकानी च वस्त्राणि शुभान्याभरणानि च ।। वाहनासनयानानि तत्सर्वं तपसः फलं ।।
मनोनुकूलाः प्रमदा रूपवत्यः सहस्रशः ।। वासः प्रासादपृष्टे च तत्सर्वं तपसः फलं ।। शयनानि च मुख्यानि भोज्या
नि विविधानि च ।। अभिप्रेतानि सर्वाणि भवंति शुभकर्मिणां ।। नाप्राप्यं तपसः किंचित्त्रैलोक्ये पि परंतप ।। उपभो
गपरित्यागः फलान्यकृतकर्मिणां ।। सुखितो दुःखितो वापि नरो लोभं परित्यजेत् ।। अवेक्ष्य मनसा शास्त्रं बुध्या च नृ
पसत्तम ।। असंतोषो सुखायैव लोभादिंद्रियसंभ्रमः ।। ततोस्य नश्यति प्रज्ञा विद्येवाभ्यासवर्जिता ।। नष्टप्रज्ञो
यदा तु स्यात्तदान्यायं न पश्यति ।। तस्मात्सुखक्षये प्राप्ते पुमानुग्रं पश्चरेत् ।। यदिष्टं तत्सुखं प्राहुर्द्वेष्यं दुःखमिहे
ष्यते ।। कृताकृतस्य तपसः फलं पश्य स्वयादृशं ।। नित्यं भद्राणि पश्यंति विषयांश्चोपभुंजते ।। प्राकाश्यं चैव ग
छंति कृत्वा निष्कल्मषं तपः ।। अप्रियाण्यवमानांश्च दुःखं बहुविधात्मकं ।। फलार्थी सत्पथस्त्यक्तः प्राप्नोति विष
यात्मकं ।। धर्मे तपसि दाने च विचिकित्सा चास्य जायते ।। स कृत्वा पापकान्येवं निरयं प्रतिपद्यते ।। सुखे तु वर्त्तमानो
वै दुःखे वापि नरोत्तम ।। स्ववृत्ताद्यो न चलते शास्त्रचक्षुः स मानवः ।। इषुप्रपातमात्रं हि स्पर्शयोगे रतिः स्मृता ।।

रसने दर्शने घ्राणे श्रवणे च विशां पते ।। ततोस्य जायते तीव्रा वेदना तत्र स्यास्तुनः ।। अबुधा न प्रशंसंति मोक्षं सुखमनुत्तमं ।।
ततः फलार्थं सर्वस्य भवंति ज्यायते गुणाः ।। धर्मवृत्त्या च सततं कामार्थाभ्यां न हीयते ।। अप्रयत्नागताः सेव्या गृहस्थैर्विषयाः
सदा ।। प्रयत्नेनोपगम्यश्च स्वधर्म इति मे मतिः ।। मानिनां कुलजातानां नित्यं शास्त्रार्थचक्षुषां ।। क्रियाधर्मविमुक्तानामशक्त्या
संवृतात्मनां ।। क्रियमाणं यदा कर्म नाशं गच्छति मानुषं ।। तेषां नान्यदृते लोके तपसः कर्म विद्यते ।। सर्वात्मना तु कुर्वीत गृह
स्थः कर्मनिश्चयं ।। दाक्ष्येण हव्यकव्यार्थं स्वधर्मं विचरन्नृप ।। यथा नदीनदाः सर्वे सागरे यांति संस्थितिं ।। एवमाश्रमि
णः सर्वे गृहस्थे यांति संस्थितिं ।। ।। शांतौ मोक्षधर्मे ।। ।।जनक उवाच ।। ।।वर्णो विशेषवर्णानां महर्षे केन जायते ।।
एतदिच्छाम्यहं ज्ञातुं तद्ब्रूहि वदतां वर ।। यदेतज्जायतेऽपत्यं स एवायमिति श्रुतिः ।। कथं ब्राह्मतो जातेः विशेषग्रहणं ग
तः ।। ।। पराशरः ।। ।। एवमेतन्महाराज येन जातः स एव सः ।। तपसस्त्वपकर्षेण जातिग्रहणतां गतः ।। सुक्षेत्राच्च सुबी
जाच्च पुण्यो भवति संभवः ।। अतोन्यतरतो हीनादवरो नाम जायते ।। वक्त्राद्भुजाभ्यामुरुभ्यां पद्भ्यां चैवाथ जज्ञिरे ।। सृजतः
प्रजापतेर्लोकानिति धर्मविदो विदुः ।। मुखजा ब्राह्मणास्तात बाहुजाः क्षत्रियाः स्मृताः ।। ऊरुजा धनिनो राजन् पादजाः
परिचारकाः ।। चतुर्णामेव वर्णानामागमः पुरुषर्षभ ।। अतोन्ये त्वतिरिक्ता ये ते वै संकरजाः स्मृताः ।। क्षत्रजातिरथांबष्ठा उग्रा
वैदेहकास्तथा ।। श्वपाकाः पुल्कसाः स्तेना निषादाः सूतमागधाः ।। आयोगाः कारणा व्रात्याश्चांडालाश्च नराधिप ।। एते च

तुर्भ्यो वर्णेभ्यो जायंते वै परस्परात्॥ ॥जनक उवाच॥ ॥ब्रह्मणैकेन जातानां नानात्वं गोत्रतः कथं॥ बहूनीह हि लोके वै गोत्राणि मुनि
सत्तम॥ यत्र तत्र कथं जाताः स्वयोनिं मुनयो गताः॥ शूद्रयोनौ समुत्पन्ना वियोनौ च तथा परे॥ ॥पराशर उ॰॥ ॥राजन्नैतद्भवेद्ग्राह्यमप
कृष्टेन जन्मना॥ महात्मनां समुत्पत्तिस्तपसा भावितात्मनां॥ उत्पाद्य पुत्रान्मुनयो नृपते यत्र तत्र ह॥ स्वेनैव तपसा तेषामृषित्वं
विदधुः पुनः॥ पितामहश्च मे पूर्वमृष्यशृंगश्च काश्यपः॥ वटुस्ताण्ड्यः कृपश्चैव काक्षीवत्कमठादयः॥ यवक्रीतश्च नृपते द्रोणो
श्च वदतां वरः॥ आयुर्मतंगो दत्तश्च द्रुमदो मात्स्य एव च॥ एते स्वां प्रकृतिं प्राप्ता वैदेह तपसोश्रयात्॥ प्रतिष्ठिता वेदविदो दमेन तप
सैव हि॥ मूलगोत्राणि चत्वारि समुत्पन्नानि पार्थिव॥ अंगिराः काश्यपश्चैव वसिष्ठो भृगुरेव च॥ कर्मतोन्यानि गोत्राणि
समुत्पन्नानि पार्थिव॥ नामधेयानि तपसा तानि च ग्रहणं सतां॥ ॥जनकः॥ ॥विशेषधर्मान्वर्णानां प्रब्रूहि भगवन्मम॥ ततः सामा
न्यधर्मांश्च सर्वत्र कुशलो ह्यसि॥ पराशर उ॥ ॥प्रतिग्रहो याजनं च तथैवाध्यापनं नृप॥ विशेषधर्मो विप्राणां रक्षा क्षत्रस्य
शोभना॥ कृषिश्च पाशुपाल्यं च वाणिज्यं च विशामपि॥ द्विजानां परिचर्या च शूद्रकर्म नराधिप॥ विशेषधर्मा नृपते वर्णानां प
रिकीर्तिताः॥ धर्मान्साधारणांस्तात विस्तरेण शृणुष्व मे॥ आनृशंस्यमहिंसा चाप्रमादः संविभागिता॥ श्राद्धकर्मातिथे
यं च सत्यमक्रोध एव च॥ स्वेषु दारेषु संतोषः शौचं नित्यानसूयता॥ आत्मज्ञानं तितिक्षा च धर्माः साधारणा नृप॥ ब्राह्मणाः
क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः॥ अत्र तेषामधीकारो धर्मेषु द्विपदां वर॥ विकर्मावस्थिता वर्णाः पतंते नृपते त्रयः॥

उत्तमं ति यथा संतमाश्रितास्ते हि स्वकर्मसु ॥ न चापि श्रद्धा पततीति निश्चयो न चापि संस्कारमिहार्हतीति वा ॥ श्रुतिप्रवृत्तं न च धर्ममाप्नु
तेन चास्य धर्मे प्रतिषेधनं कृतं ॥ वेदे हि कं शूद्रमुदाहरंति द्विजा महाराज श्रुतोपपन्नाः ॥ अहं हि पश्यामि नरेंद्र देवं विश्वस्य
विष्णुं जगतः प्रधानं ॥ सतां वृत्तमधिष्ठाय निहीनानुजिहीर्षवः ॥ मंत्रवर्जं न दुष्यंति कुर्वाणाः पौष्टिकीः क्रियाः ॥ यथा यथा हि सद्वृत्त
मालंबंतीतरे जनाः ॥ तथा तथा सुखं प्राप्य प्रेत्य चेह च मोदते ॥ ॥ जनकः ॥ ॥ किं कर्म दूषयत्येनमथो जातिर्महामुने ॥ संदेहो मे स
मुत्पन्नस्तन्मे व्याख्यातुमर्हसि ॥ ॥ पराशरः ॥ ॥ असंशयं महाराज उभयं दोषकारकं ॥ कर्म चैव हि जातिश्च विशेषं तु नि
शामय ॥ जात्या च कर्मणा चैव दुष्टं कर्म निषेवते ॥ जात्या दुष्टश्च यः पापं न करोति स पूरुषः ॥ जात्या प्रधानं पुरुषं कुर्वाणं कर्म
धिक्कृतं ॥ कर्म तद्दूषयत्येनं तस्मात्कर्म न शोभनं ॥ ॥ जनकः ॥ ॥ कानि कर्माणि धर्म्याणि लोकेस्मिन्द्विजसत्तम ॥ न हिंसंतीह
भूतानि क्रियमाणानि सर्वदा ॥ ॥ पराशरः ॥ ॥ शृणु मेत्र महाराज यन्मां त्वं परिपृच्छसि ॥ यानि कर्माण्यहिंस्राणि नरं त्रायंति
सर्वदा ॥ संन्यस्याग्नीनुदासीनाः पश्यंति विगतज्वराः ॥ नैःश्रेयसं कर्मपथं समारुह्य यथाक्रमं ॥ प्रश्रिता विनयोपेता दमनित्याः
सुसंशिताः ॥ प्रयांति स्थानमजरं सर्वकर्मविवर्जिताः ॥ सर्वे वर्णा धर्मकार्याणि सम्यक्कृत्वा राजन्सत्यवाक्यानि चोक्त्वा ॥ त्य
क्त्वा कर्म दारुणं जीवलोके यांति स्वर्गं नात्र कार्यो विचारः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ पराशर उवाच ॥ ॥ पिता सखायो गुरवः स्त्रिय
श्च न निर्गुणा नाम भवंति लोके ॥ ॥ अनन्यभक्ताः प्रियवादिनश्च हिताश्च वश्याश्च तथैव राजन् ॥ पिता परं दैवतं मानवानां मातुर्वि

शिष्टं पिततरं वदंति॥ ज्ञानस्वल्पाभं पनमेव वदंति जितेंद्रियार्थाः परमाप्नुवंति॥२८॥ आजिपे यत्र शानाग्निसंस्तरे नृपास
ञो पातमनाप्यद्यते॥ यथा तिल्लोकान मनैः सुदुर्लभानिषेवते स्वर्गफलं यथासुखं॥ भ्रांतं भीतं च भग्नशस्त्रं रुदंतं
पराङ्मुखं परिबर्हैश्च हीनं॥ अनुद्यतं रोगिणं याचमानं न वै हिंस्याद्बालवृद्धौ च राजन्॥ परिबर्हैः सुसंयुक्तमुद्यतं तुल्य
तांग तं॥ अतिवर्तेत नृपतिं संग्रामे क्षत्रियात्मजं॥ तुल्यादिह वधः श्रेयान्विशिष्टाच्चेति निश्चयः॥ निहीनात्कातरा
च्चैव नृपपागर्हितो वधः॥ पापात्पापसमाचारान्निहीनाच्च नराधिप॥ पापएव वधः प्रोक्तो नरकायेति निश्चयः॥
न कश्चित्त्रातिवै राजन्दिष्टांतवशमागतं॥ सावशेषायुषं वापि कश्चिन्नैवापकर्षति॥ स्निग्धैश्च क्रियमाणानि कर्मा
णीह निवर्त्तयेत्॥ हिंसात्मकानि सर्वाणि नायुरस्ति परायुषा॥ गृहस्थानां तु सर्वेषां विनाशमभिकांक्षतां॥ निधनं
शोभनं तात पुलिनेषु क्रियावतां॥ आयुषि क्षयमापन्ने पंचत्वमुपगच्छति॥ तथाह्यकारणाद्भवति कारणैरुपपादि
तं॥ तथा शरीरं भवति देहाद्येनोपपादितं॥ अध्वानं गतकश्चायं प्राप्तश्चायं गृहाद्गृहं॥ द्वितीयं कारणं तत्र नान्यत्कि
चन विद्यते॥ तद्देहं देहिनां युक्तं मोक्षभूतेषु वर्त्तते॥ शिरास्नाय्वस्थिसंघातं बीभत्सामेध्यसंकुलं॥ भूतानामिंद्रिया
णां च गुणानां च समागमं॥ त्वंगं तं देहमित्याहुर्विद्वांसोध्यात्मचिंतकाः॥ गुणैरपि परिक्षीणं शरीरं मर्त्यतां गतं॥

शानी शिला परित्यक्तं निष्कष्टगतचेतने ॥ प्रकृतेः प्रकृतिं सापन्नैस्ततो मग्नो निमज्जति ॥ भावितं कर्मयोगेन जायते यत्र तत्र ह ॥ इदं शरीरं वैदेह म्रियते यत्र यत्र ह ॥ तत्स्वभावोपरो दृष्टो विसर्गः कर्मणस्तथा ॥ न जायते तु नृपते कंचित्कालमयं पुनः ॥ परिभ्रमति भूतात्मा द्यामिवांबुघनो महान् ॥ स पुनर्जायते राजन्प्राप्येहायतनं नृप ॥ मनसः परमो ह्यात्मा इंद्रियेभ्यः परं मनः ॥ द्विविधानां च भूतानां जंगमाः परमा नृप ॥ जंगमानामपि तथा द्विपदाः परमा मताः ॥ द्विपदानामपि तथा द्विजा वै परमाः स्मृताः ॥ द्विजानामपि राजेंद्र प्रज्ञावंतः परा मताः ॥ प्राज्ञानामात्मसंबुद्धाः संबुद्धानाममानिनः ॥ जातमन्वेति मरणं नृणामिति विनिश्चयः ॥ अंतवंति हि कर्माणि सेवंते गुणतः प्रजाः ॥ आपन्ने तूत्तरां काष्ठां सूर्ये यो निधनं व्रजेत् ॥ नक्षत्रे च मुहूर्ते च पुण्ये राजन्स पुण्यकृत् ॥ अयोजयित्वा क्लेशेन जनं प्लाव्य च दुष्कृतं ॥ मृत्युनाप्राकृतेनेह कर्म कृत्वात्मशक्तितः ॥ विषमुद्बंधनं दाहो दस्युहस्तात्तथा वधः ॥ दंष्ट्रिभ्यश्च पशुभ्यश्च प्राकृतो वध उच्यते ॥ न चैभिः पुण्यकर्माणो युज्यंते नाभिसंधिजैः ॥ एवंविधैश्च बहुभिरपरैः प्राकृतैरपि ॥ ऊर्ध्वं भित्वा प्रतिष्ठंते प्राणाः पुण्यवतां नृप ॥ मध्यतो मध्यपुण्यानामधो दुष्कृतकर्मणां ॥ एकः शत्रुर्न द्वितीयोस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् ॥ येनावृतः कुरुते संप्रयुक्तो घोराणि कर्माणि सुदारुणानि ॥ प्रबोधनार्थं श्रुतिधर्मयुक्तं वृद्धानुपास्यं च भवेत यस्य ॥ प्रयत्नसाध्यो हि स राजपुत्र प्रज्ञाशरेणोन्मथितः परैति ॥ अधीत्य वेदांस्तपसा ब्रह्मचारी यज्ञांछक्त्या संनिसृज्येह पंच ॥ वनं गच्छेत्पुरुषो धर्मकामः श्रेयश्छित्वा स्थापयित्वा स्ववंशं ॥ उपभोगैरपि त्यक्तं नात्मानं सादयेन्नरः ॥

चंडालेत्वेपि मानुष्यं सर्वथा तात शोभने ।। इयं हि योनिः प्रथमा यां प्राप्य जगतीपते ।। आत्मा वै शक्यते त्रातुं कर्मभिः शुभ
लक्षणैः ।। कथं विप्रणश्येम योनितोस्या इति प्रभो ।। कुर्वंति धर्मं मनुजाः श्रुतिप्रामाण्यदर्शनात् ।। यो दुर्लभतरं प्राप्य
मानुष्यं द्विषते नरः ।। धर्मविमंता कामात्मा भवेत्स खलु वंच्यते ।। यस्तु प्रीतिपुरोगेण चक्षुषा तात पश्यति ।। दीपोपमा
निभूतानि यावदर्थार्थपश्यति ।। सांत्वेनान्नप्रदानेन प्रियवादेन चाप्युत ।। सममदुःखसुखो भूत्वा स परत्र महीयते ।। दा
नंत्यागः शोभना मूर्त्तिरद्भ्यो भूप्लाव्यं तपसा वै शरीरं ।। सरस्वतीनैमिषपुष्करेषु ये चाप्यन्ये पुण्यदेशाः पृथिव्यां ।।
गृहेषु येषामसवः पतंति तेषामथो निर्हरणं प्रशस्तं ।। यानेन वै प्रापणं चाश्मशाने शौचेन नूनं विधिना चैव दाहः ।। इष्टिः
पुष्टिर्यजनं याजनं च दानं पुण्यानां कर्मणां च प्रयोगः ।। शक्त्या पित्र्यं यच्च किंचित्प्रशस्तं सर्वाण्यात्मार्थे मानवो यः करो
ति ।। धर्मशास्त्राणि वेदाश्च षडंगानि नराधिप ।। श्रेयसोर्थे विधीयंते नरस्याक्लिष्टकर्मणः ।। ।। भीष्म उवाच ।। ।।
एतद्वै सर्वमाख्यातं मुनिना सुमहात्मना ।। विदेहराजाय पुरा श्रेयसोर्थे नराधिप ।। ।। शांतौ मोक्षधर्मे ।। ।। भीष्म
उवाच ।। ।। पुनरेव तु पप्रच्छ जनको मिथिलाधिपः ।। पराशरं महात्मानं धर्मे परमनिश्चय ।। ।। जनक उवाच ।। ।।
किं श्रेयः का गतिर्ब्रह्मन्किं कृतं न विनश्यति ।। क्व गतो न निवर्तेत तन्मे ब्रूहि पितामह ।। ।। पराशर उवाच ।। ।। असंगः श्रे
यसो मूलं ज्ञानं ज्ञानगतिः परा ।। चीर्णं तपो न प्रणश्येद्बीजं क्षेत्रे न नश्यति ।। छित्त्वाधर्ममयं पाशं यदा धर्मेभिरज्यते ।।

दत्वा भयं कृतं दानं तदा सिद्धिमवाप्नुते ॥ यो ददाति सहस्राणि गवामश्वशतानि च ॥ अभयं सर्वभूतेभ्यस्तद्दानमतिव
र्तते ॥ वसन्न विषयमध्येपि न वसत्येव बुद्धिमान् ॥ संवसत्येव दुर्बुद्धिरसत्सु विषयेष्वपि ॥ नाधर्मः श्लिष्यते प्राज्ञं पयः
पुष्करपर्णवत् ॥ अप्राज्ञमधिकं पापं श्लिष्यते जंतुकाष्ठवत् ॥ नाधर्मः कारणापेक्षी कर्त्तारमभिमुंचति ॥ कर्त्ता खलु यथा
कालं ततः समभिपद्यते ॥ न भिद्यंते कृतात्मान आत्मप्रत्ययदर्शिनः ॥ बुद्धिकर्मेंद्रियाणां हि प्रमत्तो यो न बुध्यते ॥ शुभाशु
भेष्वसक्तात्मा प्राप्नोति सुमहद्भयं ॥ वीतरागो जितक्रोधः सम्यग्भवति यः सदा ॥ विषये वर्त्तमानोपि न स पापेन युज्यते ॥ म
र्यादायां धर्मसेतुर्निबद्धो नैव सीदति ॥ पुष्कलोत्तरवासक्तः स्फीतो भवति संचयः ॥ यथा भानुगतं तेजो मणिः शुद्धः समा
धिना ॥ आदत्ते राजशार्दूल तथा योगः प्रवर्तते ॥ यथा तिलानामिह पुष्पसंश्रयात्पृथग्याति गुणोतिसौम्यतां ॥ तथा नरा
णांतु विभाविभावितात्मनां यथाश्रये सत्वगुणः प्रवर्तते ॥ जहाति दारांश्च जहाति संपदः पदं च यानं विविधाश्च सत्क्रि
याः ॥ त्रिविष्टपे जातमतिर्यदा नरस्तदास्य बुद्धिर्विषयेषु भिद्यते ॥ प्रसक्तबुद्धिर्विषयेषु यो नरो न बुध्यते ह्यात्महि
तं कदाचन ॥ सर्वभावानुगतेन चेतसा नृपामिषेणेव झषो विकृष्यते ॥ संघातवान्मर्त्यलोकः परस्परमपाश्रितः ॥ कदलीगर्भनिः
सारो नौरिवाप्सु निमज्जति ॥ न धर्मकालः पुरुषस्य निश्चितो न चापि मृत्युः पुरुषं प्रतीक्षते ॥ सदा हि धर्मस्य क्रियैव शोभ
ना यदा नरो मृत्युमुखेपि वर्त्तते ॥ यथांधः स्वगृहे युक्तो ह्यभ्यासादेव गच्छति ॥ तथा युक्तेन मनसा प्राज्ञो गच्छति तां गतिं ॥ म

रणं जन्मनियोक्तं जन्म वै मरणाश्रितं ।। अविद्वान्मोक्षधर्मेषु बद्धो भ्रमति चक्रवत् ।। बुद्धिमार्गप्रयातस्य सुखं त्विह परत्र च
।। विस्तराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः ।। परार्थं विस्तराः सर्वे त्यागमात्महितं विदुः ।। यथा मृणालोऽनुगतमाशु
मुंचति कर्दमं ।। तथात्मा पुरुषस्येह मनसा परिमुच्यते ।। मनः प्रणयतेऽत्मानं स एनमभियुंजति ।। युक्तो यदा स भवति त
दा तं पश्यते परं ।। परार्थे वर्त्तमानस्तु स्वकार्यं नाभिमन्यते ।। इंद्रियार्थेषु संसक्तः स्वकार्यात्परिमुच्यते ।। अधस्तिर्यग्गतिं चै
व स्वर्गे चैव परां गतिं ।। प्राप्नोति सुकृतैरात्मा प्राज्ञस्येहेतरस्य च ।। मृन्मये भाजने पक्वे यथा वै नश्यति द्रवः ।। तथा शरीरं त
पसा तप्तं विषयमश्नुते ।। विषयानश्नुते यस्तु न स भोक्ष्यत्यसंशयं ।। यस्तु भोगांस्त्यजेदात्मा स वै भोक्तुं व्यवस्यति ।। नी
हारेण हि संवीतः शिश्नोदरपरायणः ।। जात्यंध इव पंथानमावृतात्मा न बुध्यते ।। वणिग्यथा समुद्राद्वै यथार्थं लभते धनं ।। य
तथा मर्त्यार्णवे जंतोः कर्मविज्ञानतो गतिः ।। अहोरात्रमयो लोके जरारूपेण संचरन् ।। मृत्युर्ग्रसति भूतानि पवनं पन्नगो
यथा ।। स्वयं कृतानि कर्माणि जातो [illegible]तुः प्रपद्यते ।। नाकृतं लभते कश्चित्किंचिदत्र प्रियाप्रियं ।। शयानं यातमासीनं प्र
वृत्तं विषयेषु च ।। शुभाशुभानि कर्माणि प्रपद्यंते नरं सदा ।। न ह्यन्यत्तीरमासाद्य पुनस्तर्तुं व्यवस्यति ।। दुर्लभो दृश्यते
ह्यस्य विनिपातो महार्णवे ।। यथा भाराव सक्ता हि नौर्महांभसि तंतुना ।। तथा मनोऽभियोगाद्वै शरीरं प्रचकीर्षति ।। यथा
समुद्रमभितः संस्यूताः सरितोऽपराः ।। तथा प्रकृतिर्योगादति संस्पृहते सदा ।। स्नेहपाशैर्बहुविधैरासक्तमनसो न

नाः ॥ दुष्कृतिस्या विषीदंति जले ले सैकतवेश्मवत् ॥ शारीरगृहसंज्ञस्य शौचतीर्थस्य देहिनः ॥ बुद्धिमार्गप्रयातस्य सुखं त्वि
ह परत्र च ॥ विस्तराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः ॥ परार्थं विस्तराः सर्वे त्यागमात्महितं विदुः ॥ संकल्पजो मित्र
वर्गो ज्ञातयः कारणात्मकाः ॥ भार्यापुत्रश्च दासश्च स्वमर्थमनुयुंजते ॥ न माता न पिता किंचित्कस्यचित्प्रतिपद्यते ॥ दानप
थ्योदनो जंतुः स्वकर्मफलमश्नुते ॥ माता पुत्रः पिता भ्राता भार्या मित्रजनस्तथा ॥ अष्टापदपदस्थाने दक्षसूत्रेन लक्ष्यते ॥
सर्वाणि कर्माणि पुराकृतानि शुभाशुभान्यात्मनो यांति जंतोः ॥ उपस्थितं कर्मफलं विदित्वा बुद्धिं तथा चोदयतेंतरात्मा
॥ व्यवसायं समाश्रित्य सहायान्योऽधिगच्छति ॥ न तस्य कश्चिदारंभः कदाचिदवसीदति ॥ अद्वैधमनसं युक्तं शूरं धीरं वि
पश्चितं ॥ न श्रीः संत्यजते नित्यमादित्यमिव रश्मयः ॥ आस्तिक्यव्यवसायाभ्यामुपायाद्विस्मयाद्धियः ॥ यमारभतेऽनिंद्यात्मा न सोऽर्थः
परिसीदति ॥ सर्वैः स्वानि शुभाशुभानि नियतं कर्माणि जंतुः स्वयं गर्भात्संप्रतिपद्यते तदुभयं यत्तेन पूर्वं कृतं ॥ मृत्युश्चापरिहारवा
न्समगतिः कालेन विच्छेदिना दारोश्चूर्णमिवाश्मसारविहितं कर्मांतिकं प्रापयेत् ॥ स्वरूपतामात्मकृतं च विस्तरं कुलान्वयं द्र
व्यसमृद्धिसंचयं ॥ नरो हि सर्वो लभते यथाकृतं शुभाशुभेनात्मकृतेन कर्मणा ॥ ॥ भीष्म उवाच ॥ ॥ इत्युक्तो जनको राजन्नय
याथातथ्यं मनीषिणा ॥ श्रुत्वा धर्मविदं श्रेष्ठः परां मुदमवाप ह ॥ ॥ शांतो मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सत्यं दमं क्षमां प्र
ज्ञां प्रशंसंति पितामह ॥ विद्वांसो मनुजा लोके कथमेतन्मतं तव ॥ ॥ भीष्म उवाच ॥ ॥ अत्र ते वर्तयिष्यामि इतिहासं पुरातनं ॥ सा

मोक्ष०

१५०

ध्यानामिव संवादं हंसस्य च युधिष्ठिर ॥ हंसो भूत्वाथ सोवर्णस्त्वजो नित्यः प्रजापतिः ॥ स वै पर्येति लोकांस्त्री तथा साध्यानुपाग
मत् ॥ ॥ साध्या ऊचुः ॥ ॥ शकुने वयं स्म देवा वै साध्यास्त्वामनुयुंक्ष्महे ॥ पृच्छामस्त्वां मोक्षधर्मं भवांश्च किल मोक्षवित् ॥ श्रु
तोपासि नः पंडितो धीरवादी साधुशब्दश्चरते ते पतत्रिन् ॥ किं मन्यसे श्रेष्ठतमं द्विज त्वं कस्मिन्मनस्ते रमते महात्मन् ॥ तन्नः
कार्यं पक्षिवर प्रशाधि यत्कार्याणां मन्यसे श्रेष्ठमेकं ॥ यत्कृत्वा वै पुरुषः सर्वबंधैर्विमुच्यते विहगेंद्रेह शीघ्रं ॥ ॥ हंस उवा
च ॥ ॥ इदं कार्यममृताशाः शृणोमि तपो दमः सत्यमात्माभिगुप्तिः ॥ ग्रंथीन्विमुच्य हृदयस्य सर्वान्प्रियाप्रिये स्वं वशमा
नयीत ॥ नारुंतुदः स्यान्न नृशंसवादी न हीनतः परमभ्याददीत ॥ ययास्य वाचा पर उद्विजेत न तां वदेदुषतीं पापलोक्यं ॥
वाक्सायका वदनान्निःपतंति यैराहतः शोचति रात्र्यहानि ॥ परस्य नामर्मसु ते पतंति तान्पंडितो नावसृजेत्परेषु ॥ पर
श्चेदेनमतिवादबाणैर्भृशं विध्येच्छम एवेह कार्यः ॥ संरोष्यमाणः प्रतिहृष्यते यः स आदत्ते सुकृतं वै परस्य ॥ क्षेपाय
मानमभिषंगव्यलीकं निगृह्णाति ज्वलितं यश्च मन्युं ॥ अदुष्टचेता मुदितोऽनसूयुः स आदत्ते स आदत्ते सुकृतं वै परेषां
॥ आक्रुश्यमानो न वदामि किंचित्क्षमाम्यहं ताड्यमानश्च नित्यं ॥ श्रेष्ठं ह्येतद्यत्क्षमामाहुरार्याः सत्यं तथैवार्जवमानृशं
नि स्यं ॥ वेदस्योपनिषत्सत्यं सत्यस्योपनिषद्दमः ॥ दमस्योपनिषन्मोक्ष एतत्सर्वानुशासनं ॥ वाचो वेगं मनसः क्रोधवेगं विधित्सावे
गमुदरोपस्थवेगं ॥ एतान्वेगान्यो विषहेदुदीर्णांस्तं मन्येहं ब्राह्मणं वै मुनिं च ॥ अक्रोधनः क्रुध्यतां वै विशिष्टस्तथा तितिक्षुर १५०

तितिक्षोर्विशिष्टः॥ अमानुषान्मानुषा वै विशिष्टस्तथाज्ञानाज्ज्ञानविदो विशिष्टः॥ आक्रुश्यमानो नाक्रुश्येन्मन्युरेनं तिति
क्षतः॥ आक्रोहतो न प्रतिहंति धैर्यात्॥ पापं च यो नेच्छति तस्य हंतुस्तस्येह देवाः स्पृहयंति नित्यं॥ पापीयसः क्षमेतैव श्रेयसः
सदृशस्य च॥ विमानितो हतोक्रुष्ट एवं सिद्धिं गमिष्यति॥ सदाहमार्यान्निभृतोप्युपासे न मे विधित्सोत्सहते न रोषः॥ न चाप्य
हं लिप्समानः परैमि न चैव किंचिद्विषमेण यामि॥ नाहं शप्तः प्रतिशपामि किंचिद्दमं द्वारं ह्यमृतस्येह वेद्मि॥ गुह्यं ब्रह्म त
दिदं वो ब्रवीमि न मानुषाच्छ्रेष्ठतरं हि किंचित्॥ निर्मुच्यमानः पापेभ्यो घनेभ्य इव चंद्रमाः॥ विरजाः कालमाकांक्षन् धीरो
धैर्येण सिध्यति॥ यः सर्वेषां भवति ह्यर्चनीय उत्सेचने स्तंभ इवाभिजातः॥ यस्मै वाचं सुप्रशस्तां वदंति स वै देवान्गच्छति संय
तात्मा॥ न तथा वक्तुमिच्छंति कल्याणान्पुरुषे गुणान्॥ यथैषां वक्तुमिच्छंति नैर्गुण्यमनुयुंजकाः॥ यस्य वाङ्मनसी गुप्ते सम्य
प्रणिहिते सदा॥ वेदास्तपश्च त्यागश्च स इदं सर्वमाप्नुयात्॥ आक्रोशनविमानाभ्यां नाबुधानर्हयेद्बुधः॥ तस्मान्न गर्हयेदन्यं
त न चात्मानं विहिंसयेत्॥ अमृतस्येव संतृप्येदवमानस्य पंडितः॥ सुखं ह्यवमतः शेते योवमंता स नश्यति॥ यत्क्रोधनो यजति यज्ज
द्ददाति यद्वा तपस्तप्यति यज्जुहोति॥ वैवस्वतस्तद्धरतेस्य सर्वं मोघः श्रमो भवति हि क्रोधनस्य॥ चत्वारि यस्य द्वाराणि सु
गुप्तान्यमरसत्तमाः॥ उपस्थमुदरं हस्तौ वाक्चतुर्थी स धर्मवित्॥ सत्यं दमं ह्यार्जवमानृशंस्यं धृतिं तितिक्षामभिसेवमानः॥
स्वाध्यायनित्योस्पृहयन्परेषामेकांतशील्यूर्ध्वगतिर्भवेत्सः॥ सर्वांश्चैताननुचरेन्वत्सवच्चतुरः स्तनान्॥ न पावनतमं किंचित्स
त्यादध्यगमं क्वचित्॥ आचक्षेहं मनुष्येभ्यो देवेभ्यः प्रतिसंचरन्॥ सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव॥ यादृशैः सन्नि

वसति यादृशांश्चोपसेवते॥ यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः॥ यदि संतं सेवति यद्यसंतं तपस्विनं यदि वा स्तेनमेवा
वासो यथा रंगवशं प्रयाति तथा स तेषां वशमभ्युपैति॥ सदा देवाः साधुभिः संवदंते न मानुषं विषयं यांति द्रष्टुं॥ नेंदुः समः
स्यादसमो हि वायुरुच्चावचं विषयं यः स वेद॥ अदुष्टं वर्त्तमाने तु हृदयांतरपूरुषे॥ तेनैव देवाः प्रीयंते सतां मार्गस्थितेन वै॥
शिश्नोदरे ये निरताः सदैव स्तेना नरा वाक्परुषाश्च नित्यं॥ अपेतदोषानपि तान्विदित्वा दूराद्देवाः संपरिवर्जयंति॥ न वै देवा
हीनसत्वेन तोष्याः सर्वाशिना दुष्कृतकर्मणा वा॥ सत्यव्रता ये तु नराः कृतज्ञा धर्मे रतास्तैः सह संभजंते॥ अव्याहृतं व्याहृताच्छ्रे
यआहुः सत्यं वदेद्व्याहृतं तद्द्वितीयं॥ धर्मं वदेद्व्याहृतं तत्तृतीयं प्रियं वदेद्व्याहृतं तच्चतुर्थं॥ ॥साध्या ऊचुः॥ ॥केनायमा
वृतो लोकः केन वा न प्रकाशते॥ केन त्यजति मित्राणि संगात्स्वर्गं न गच्छति॥ ॥हंस उवाच॥ ॥अज्ञानेनावृतो लोको मात्सर्या
न्न प्रकाशते॥ लोभात्त्यजति मित्राणि संगात्स्वर्गं न गच्छति॥ ॥साध्या ऊचुः॥ ॥कः स्विदेको नमते ब्राह्मणानां कः स्विदेको ब
हुभिर्जोषमास्ते॥ प्राज्ञ एको बलवान्दुर्बलोपि प्राज्ञ एषां कलहं नानुपैति॥ ॥साध्या ऊचुः॥ ॥किं ब्राह्मणानां देवत्वं
किंच साधुत्वमुच्यते॥ असाधुत्वं च किमेषां किमेषां मानुषं मतं॥ हंस उवाच॥ ॥स्वाध्याय एषां देवत्वं व्रतं साधुत्वमु
च्यते॥ असाधुत्वं परीवादो मृत्युर्मानुष्यमुच्यते॥ ॥श्रीभीष्म उवाच॥ ॥संवाद इत्ययं श्रेष्ठः साध्यानां परिकीर्तितः॥ क्षे
त्रं वै कर्मणां योनिः सद्भावः सत्यमुच्यते॥ ॥शांतौ मोक्षधर्मे॥ ॥युधिष्ठिर उवाच॥ ॥सांख्ये योगे च मे तात वि

शेषं वक्तुमर्हसि ॥ तव धर्मज्ञ सर्वं हि विदितं कुरुसत्तम ॥ ॥भीष्म उवाच॥ ॥सांख्याः सांख्यं प्रशंसंति योगा योगं द्विजातयः ॥
वदंति कारणं श्रेष्ठं स्वपक्षोद्भावनाय वै ॥ अनीश्वरः कथं मुच्येदित्येवं शत्रुकर्शनं ॥ वदंति कारणं श्रेष्ठं योगाः सम्य
ङ्मनीषिणः ॥ वदंति कारणं चेदं सांख्याः सम्यद्विजातयः ॥ विज्ञायेह गतीः सर्वा विरक्तो विषयेषु यः ॥ ऊर्ध्वं स देहात्सुव्यक्तं वि
मुच्येदिति नान्यथा ॥ एतदाहुर्महाप्राज्ञाः सांख्यं वै मोक्षदर्शनं ॥ स्वपक्षे कारणं ग्राह्यं समर्थं वचनं हितं ॥ शिष्टानां हि
मतं ग्राह्यं त्वद्विधैः शिष्टसंमतैः ॥ प्रत्यक्षहेतवो योगाः सांख्याः शास्त्रविनिश्चयाः ॥ उभे चैते मते तत्त्वे मम तात युधिष्ठिर ॥
उभे चैते मते ज्ञाने अनुष्ठिते यथाशास्त्रं नयेतां परमां गतिं ॥ तुल्यं शौचं तयोर्युक्तं दया भूतेषु चानघ ॥ व्रतानां धारणं तुल्यं
दर्शनं न समं तयोः ॥ ॥युधिष्ठिर उवाच॥ ॥यदि तुल्यं व्रतं शौचं दया चात्र पितामह ॥ न तुल्यं दर्शनं कस्मात्तन्मे ब्रूहि पिता
मह ॥ ॥भीष्म उवाच॥ ॥रागं मोहं तथा स्नेहं कामं क्रोधं च केवलं ॥ योगा छित्वा ततो दोषान्पंचैतान्प्राप्नुवंति तत् ॥
यथैवानिमिषाः स्थूलं जालं छित्वा पुनर्जलं ॥ प्राप्नुवंति तथा योगास्तत्पदं वीतकल्मषाः ॥ तथैव वागुरां छित्वा बलवंतो
यथा मृगाः ॥ प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबंधनैः ॥ लोभजाति तथा राजन्बंधनानि बलान्विताः ॥ छित्वा योगाः प
रं मार्गं गच्छंति विमलं शिवं ॥ अबलाश्च मृगा राजन्वागुरासु तथापरे ॥ विनश्यंति न संदेहस्तद्वद्योगबलादृते ॥
बलहीनाश्च कौंतेय यथा जालगता झषाः ॥ वधं गच्छंति राजेंद्र योगास्तद्वत्सुदुर्बलाः ॥ यथा च शकुनाः सूक्ष्मं प्राप्य जा

लमरिंदम॥ तद्वत्सक्ता विपद्यते मुच्यंते च बलान्विताः॥ कर्मजैर्बंधनैर्बद्धास्तद्वद्योगाः परंतप॥ अबलाश्चैव विनश्यंति मुच्यं-
ते च बलान्विताः॥ अल्पकश्च यथा राजन्वह्निः शाम्यति दुर्बलः॥ आक्रांत इंधनैः स्थूलैस्तद्वद्योगो बलः प्रभो॥ स एव च य-
दा राजन्वह्निर्जातबलः पुनः॥ समीरणगतः क्षिप्रं दहेत्कृत्स्नं महीमपि॥ तद्वज्जातबलो योगी दीप्ततेजा महाबलः॥ अं-
तकाल इवादित्यः कृत्स्नं संशोषयेज्जगत्॥ दुर्बलश्च यथा राजन्स्रोतसा ह्रियते नरः॥ बलहीनस्तथा योगो विषयैर्ह्रि-
यते वशः॥ तदेव च महास्रोतो विष्टंभयति वारणः॥ तद्वद्योगबलं लब्ध्वा व्यूहते विषयान्बहून्॥ विशंति चावशाः पार्थ योगा-
द्योगबलान्विताः॥ प्रजापतीनृषीन्देवान्महाभूतानि चेश्वराः॥ न यमो नांतकः क्रुद्धो न मृत्युर्भीमविक्रमः॥ ईशते नृपते स-
र्वे योगस्यामिततेजसः॥ आत्मनां च सहस्राणि बहूनि भरतर्षभ॥ योगः कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्॥ प्राप्नुयाद्वि-
षयान्कश्चित्पुनश्चोग्रं तपश्चरेत्॥ संक्षिपेच्च पुनस्तात सूर्यस्तेजोगुणानिव॥ बलस्थस्य हि योगस्य बंधनेशस्य पार्थि-
व॥ विमोक्षे प्रभविष्णुत्वमुपपन्नमसंशयं॥ बलानि योगप्राप्तानि मयैतानि विशांपते॥ निदर्शनार्थं सूक्ष्माणि वक्ष्यामि
च पुनस्तव॥ निदर्शनानि सूक्ष्माणि शृणु मे भरतर्षभ॥ अप्रमत्तो यथा धन्वी लक्ष्यं हंति समाहितः॥ युक्तः सम्यक्तथा योगी
मोक्षं प्राप्नोत्यसंशयं॥ स्नेहपूर्णे यथा पात्रे मन आधाय निश्चलं॥ पुरुषो युक्त आरोहेत्सोपानं युक्तमानसः॥ युक्तस्तथाय-
मात्मानं योगः पार्थिव निश्चलं॥ करोत्यमलमात्मानं भास्करोपमदर्शनं॥ यथा च नावं कौंतेय कर्णधारः समाहितः॥

महार्णवगतां शीघ्रं नयेत्पार्थिवसत्तम ॥ तद्वदात्मसमाधानं युक्त्वा योगेन तत्त्ववित् ॥ दुर्गमं स्थानमाप्नोति हित्वा देह
मिमं नृप ॥ सारथि यथा युक्त्वा सदश्वान्सुसमहितः ॥ देशमिष्टं नयत्याशु धन्विनं पुरुषर्षभं ॥ तथैव नृपते योगी धार
णासु समाहितः ॥ प्राप्नोत्याशु परं स्थानं लक्षंमुक्त इवाशुगः ॥ आवेश्यात्मनि चात्मानं योगी तिष्ठति योचलः ॥ पापं हंति
पुनीतानां पदमाप्नोति सोजरं ॥ नाभ्यां कंठे च शीर्षे च हृदि वक्षसि पार्श्वयोः ॥ दर्शने श्रवणे चापि घ्राणे चामितविक्रम ॥
स्थानेष्वेतेषु यो योगी महाव्रतसमाहितः ॥ आत्मना सूक्ष्ममात्मानं युंक्ते सम्यग्विशां पते ॥ स शीघ्रमचलप्रख्य कर्म द
ग्ध्वा शुभाशुभं ॥ उत्तमं योगमास्थाय यदीच्छति विमुच्यते ॥ ॥ युधिष्ठिर उवाच ॥ ॥ आहारान्कीदृशान्कृत्वा कानि जि
त्वा च भारत ॥ योगी बलमवाप्नोति तद्भवान्वक्तुमर्हति ॥ भीष्म उवाच ॥ ॥ कणानां भक्षणे युक्तः पिण्याकस्य च भारत ॥
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥ भुंजानो यावकं रूक्षं दीर्घकालमरिंदम ॥ एकाहारो विशुद्धात्मा योगी बल
मवाप्नुयात् ॥ पक्षान्मासानृतूंश्चैत्रान्संवत्सरानहस्तथा ॥ अपः पीत्वा पयोमिश्रा योगी० ॥ अखंडमपि वा मांसं स
ततं मनुजेश्वर ॥ उपोष्य सम्यक् शुद्धात्मा योगी० ॥ कामं जित्वा तथा शीतोष्णे वर्षमेव च ॥ भयं शोकं तथा श्वासं पौरुषान्वि
षयांस्तथा ॥ अरतिं दुर्जयां चैव घोरां तृष्णां च पार्थिव ॥ स्पर्शं निद्रां तथा तंद्रीं दुर्जयां नृपसत्तम ॥ दीपयंति महात्मानः
सूक्ष्ममात्मानमात्मना ॥ वीतरागाम महाप्रज्ञा ध्यानाध्ययनसंपदा ॥ दुर्गस्त्वेष महापंथा ब्राह्मणानां विपश्चितं ॥

यःकश्चिद्दुर्जतिह्यस्मिन्रक्षेमेपाभरतर्षभा यथाकश्चिद्वनंघोरंबहुसर्पसरीसृपं॥ श्वभ्रवंतोयहीनाश्चदुर्गमंबहुकं
टकं॥ अभक्तमटवीप्रायंदावदग्धमहीरुहं॥ पंथानंतस्कराकीर्णंक्षेमेणाभिपतेद्युवा॥ योगमार्गंतथासाद्ययःकश्चिद्दु
र्जतेद्विजः॥ क्षेमेणोपरमेन्मार्गाद्बहुदोषोहिसस्मृतः॥ सुस्थेयंक्षुरधारासुनिशितासुमहीपते॥ धारणासुतुयोगस्यदुः
स्थेयमकृतात्मभिः॥ विपन्नाधारणास्तातनयंतिनशुभांगतिं॥ नेतृहीनायथानावःपुरुषानर्णवेनृप॥ यस्तुतिष्ठति
कौंतेयधारणासुयथाविधि॥ मरणंजन्मदुःखंचसुखंचसविमुंचति॥ नानाशास्त्रेषुनिष्पन्नंयोगेष्विदमुदाहृतं॥ परं
योगस्ययत्कृत्यंनिश्चितंतद्द्विजातिषु॥ परंहितद्ब्रह्ममयमहात्मन्ब्रह्माणमीशंवरदंचविष्णुं॥ भवंचधर्मंचषडाननं
चषड्ब्रह्मपुत्रांश्चमहानुभावान्॥ तमश्चकष्टंसुमहद्रजश्चसत्वंचशुद्धंप्रकृतिंपरांच॥ सिद्धिंचदेवींवरुणस्य
पत्नींतेजश्चकृत्स्नंसुमहच्चधैर्यं॥ ताराधिपंवैविमलंसतारंविश्वांश्चदेवानुरगान्पितॄंश्च॥ शैलांश्चकृत्स्नानु
दधींश्चघोरान्नदीश्चसर्वाःसवनान्घनांश्च॥ नागान्नगान्यक्षगणान्दिशश्चगंधर्वसंघान्पुरुषान्स्त्रियश्च॥ प
रस्परंप्राप्यमहान्महात्माविशेतयोगीनचिराद्विमुक्तः॥ कथाचयेयंनृपतेप्रसक्तादेवेमहावीर्यमतौशुभेयं॥ यो
गीससर्वानभिभूयमर्त्यान्नारायणात्माकुरुतेमहात्मा॥ ॥शांतौमोक्षधर्मे॥ ॥युधिष्ठिरः॥ ॥सम्यक्त्वयायं
नृपतेवर्णितःशिष्टसंमतः॥ योगमार्गोयथान्यायंशिष्यायेहहितैषिणा॥ सांख्येत्विदानींकार्त्स्न्येनविधिंप्रब्रूहि

पद्यते ॥ त्रिषु लोकेषु यज्ज्ञानं सर्वं तद्विदितं हि ते ॥ ॥भीष्म उवाच ॥ ॥ शृणु मे त्वमिदं सूक्ष्मं सांख्यानां विदितात्मनां ॥ विहि
तं यतिभिः सर्वैः कपिलादिभिरीश्वरैः ॥ यस्मिन्न विभ्रमाः केचिद्दृश्यंते मनुजर्षभ ॥ गुणाश्च यस्मिन्बहवो दोषहानिश्च
केवला ॥ ज्ञानेन परिसंख्याय सदोषान्विषयान्नृप ॥ मानुषान्दुर्जयान्कृत्स्नान्पैशाचान्विषयांस्तथा ॥ राक्षसान्वि
षयाञ्ज्ञात्वा यक्षाणां विषयांस्तथा ॥ विषयानौरगाञ्ज्ञात्वा गांधर्वविषयांस्तथा ॥ पितृणां विषयाञ्ज्ञात्वा तिर्यक्षु च
रतान्नृप ॥ सुपर्णविषयाञ्ज्ञात्वा मरुतां विषयांस्तथा ॥ राजर्षिविषयाञ्ज्ञात्वा ब्रह्मर्षिविषयांस्तथा ॥ आसुरान्विष
याञ्ज्ञात्वा वैश्वदेवांस्तथैव च ॥ देवर्षिविषयाञ्ज्ञात्वा योगानामपि चेश्वरान् ॥ प्रजापतीन्ब्रह्मणो विषयांस्तथा ॥ आ
युषश्च परं कालं लोके विज्ञाय तत्वतः ॥ सुखस्य च परं तत्वं विज्ञाय वदतां वर ॥ प्राप्ते काले च यद्दुःखं पततं विषयैषि
णां ॥ तिर्यक्षु पततां दुःखं पततां नरके च यत् ॥ स्वर्गस्य च गुणान्कृत्स्नान्दोषान्सर्वांश्च भारत ॥ वेदवादे ये पि दोषा गु
णा ये चापि वैदिकाः ॥ ज्ञानयोगे च ये दोषा गुणा योगे च ये नृप ॥ सांख्यज्ञाने च ये दोषाः तथैव च गुणा नृप ॥ सत्वं दशगुणं
ज्ञात्वा रजो नवगुणं तथा ॥ तमश्चाष्टगुणं ज्ञात्वा बुद्धिं सप्तगुणं तथा ॥ षड्गुणं च मनो ज्ञात्वा नभः पंचगुणं तथा ॥ बुद्धिं च
तुर्गुणं ज्ञात्वा तमश्च त्रिगुणं तथा ॥ द्विगुणं च रजो ज्ञात्वा सत्वमेकगुणं पुनः ॥ मार्गं विज्ञाय तत्वेन प्रलये प्रेक्षणं त
था ॥ ज्ञानविज्ञानसंपन्नाः कारणैर्भाविताः शुभाः ॥ प्राप्नुवंति शुभं मोक्षं सूक्ष्मा इव नभः परं ॥ रूपेण दृष्टिं संयुक्तां घ्रा

णं गंधगुणेन च ॥ शब्दे सक्तं तथा श्रोत्रं जिह्वां रसगुणेषु च ॥ तनुस्पर्शे तथासक्तां वायुं नभसि चाश्रितं ॥ मोहं तमसि संयु
क्तं लोभमर्थेषु संश्रितं ॥ विष्णुक्रांते बले शक्रं कोष्ठे सक्तं तथानलं ॥ अप्सु देवीं समासक्ता मापस्तेजसि संश्रिताः ॥ तेजो
वायौ तु संसक्तं वायुर्नभसि चाश्रितः ॥ नभो महति संयुक्तं महद्बुद्धौ च संश्रितं ॥ बुद्धिं तमसि संसक्तां तमो रजसि संश्रि
ताः ॥ रजः सत्वे तथासक्तं सत्वं सक्तं तथात्मनि ॥ सक्तमात्मानमीशेप देवे नारायणे तथा ॥ देवं मोक्षे च संसक्तं मोक्षं
सक्तं तु न क्वचित् ॥ ज्ञात्वा सत्वगुणं देहं वृते षोडशभिर्गुणैः ॥ स्वभावं चेतनां चैव ज्ञात्वा देहसमाश्रिते ॥ मध्यस्थमेक
मात्मानं पापं यस्मिन्न विद्यते ॥ द्वितीयं कर्मवित्ताय नृपते विषयैषिणां ॥ इंद्रियाणींद्रियार्थांश्च सर्वमात्मनि संश्रि
तान् ॥ दुर्लभत्वं च मोक्षस्य विज्ञाय श्रुतिपूर्वकं ॥ प्राणापानौ समानौ च व्यानोदानौ च तत्वतः ॥ अधश्चैवानिलं ज्ञात्वा
प्रवहं चानिलं पुनः ॥ सप्त वातांस्तथा ज्ञात्वा सप्तधा विहितं पुनः ॥ प्रजापतीनृषींश्चैव मार्गांश्चैव बहूंश्च तान् ॥ सप्त
र्षींश्च बहून्ज्ञात्वा राजर्षींश्च परंतपां ॥ सुरर्षीन्महतश्चान्यान्ब्रह्मर्षींस्सूर्यसंनिभान् ॥ ऐश्वर्याच्च्यावितान्दृष्ट्वा का
लेन महतो नृप ॥ महतां भूतसंघानां श्रुत्वा नाशं च पार्थिव ॥ गतिं चाप्यशुभां ज्ञात्वा नृपते पापकर्मिणां ॥ वैतरण्यां
च यद्दुःखं पतितानां यमक्षये ॥ योनीषु च विचित्रासु संसारानशुभांस्तथा ॥ जठरे चाशुभे वासं शोणितोदकभाजने ॥

श्लेष्मामूत्रपुरीषे च तीव्रगंधसमन्विते॥ शुक्रशोणितसंघाते मज्जास्नायुपरिग्रहे॥ शिराशतसमाकीर्णे नवद्वारपुरेऽ
चौ॥ विज्ञाय हितमात्मानं योगांश्च विविधान्नृप॥ तामसानां च जंतूनां रमणीयां हतात्मनां॥ सात्विकानां च जंतूनां कुत्सितं
भरतर्षभ॥ गर्हितं महतामर्थे सांख्यानां विहितात्मनां॥ उपप्लवांस्तथा घोरान्शशिनस्तेजसस्तथा॥ ताराणां पतनं दृ
ष्ट्वा नक्षत्राणां च पर्ययं॥ द्वंद्वानां विप्रयोगं च विज्ञाय कृपणं नृप॥ अन्योन्यभक्षणं दृष्ट्वा भूतानामपि चासवं॥ बाल्ये मोहं
च विज्ञाय क्षयं देहस्य चाशुभं॥ रागमोहे च संप्राप्ते क्वचित्सत्वं समाश्रितं॥ सहस्रेषु नरः कश्चिन्मोक्षबुद्धिं समाश्रि
तः॥ दुर्लभत्वं च मोक्षस्य विज्ञाय श्रुतिपूर्वकं॥ बहुमानमलब्धेषु लब्धे मध्यस्थतां पुनः॥ विषयाणां च दौरात्म्यं वि
ज्ञाय नृपते पुनः॥ गतासूनां च कौंतेय देहान्दृष्ट्वा तथाशुभान्॥ वासं कुलेषु जंतूनां दुःखं विज्ञाय भारत॥ ब्रह्मघ्नानां
गतिं ज्ञात्वा पतितानां सुदारुणां॥ सुरापाने च सक्तानां ब्राह्मणानां दुरात्मनां॥ गुरुदारप्रसक्तानां गतिं विज्ञाय चाशु
भां॥ जननीषु च वर्त्तंते ये न सम्यग्युधिष्ठिर॥ सदेवकेषु लोकेषु येन वर्त्तंति मानवाः॥ तेन विज्ञानेन विज्ञाय गतिं चाशुभ
कर्मणां॥ तिर्यग्योनिगतानां च विज्ञाय गतयः पृथक्॥ वेदवादांस्तथा चित्रानृतूनां पर्ययांस्तथा॥ क्षयं संवत्सराणां च मा
सानां च क्षयं तथा॥ पक्षक्षयं तथा दृष्ट्वा दिवसानां च संक्षयं॥ क्षयं वृद्धिं च चंद्रस्य दृष्ट्वा प्रत्यक्षतस्तथा॥ वृद्धिं दृष्ट्वा समु
द्राणां क्षयं तेषां तथा पुनः॥ क्षयं धनानां दृष्ट्वा च पुनर्वृद्धिं तथैव च॥ संयोगानां क्षयं दृष्ट्वा युगानां च विशेषतः॥ क्षयं च

दृष्ट्वा शैलानां क्षयं च सरितां तथा ।। वर्णानां च क्षयं दृष्ट्वा क्षयांतं च पुनः पुनः ।। जनामृत्युस्तथा जन्म दृष्ट्वा दुःखानि चैव ह ।। दे
हदोषांस्तथा ज्ञात्वा तेषां दुःखं च तत्वतः ।। देहविक्लवतां चैव सम्यग्विज्ञाय तत्वतः ।। आत्मदोषांश्च विज्ञाय सर्वानात्मनि सं
स्थितान् ।। स्वदेहादुःस्थितान्गंधांस्तथा विज्ञाय चाशुभान् ।। ।।युधिष्ठिरः।। ।।कान्स्वगात्रोद्भवान्दोषान्पश्यस्यमि
तविक्रम ।। एतन्मे संशयं कृत्स्नं वक्तुमर्हसि तत्वतः ।। ।।भीष्म उवाच ।। ।।पंच दोषान्प्रभो देहे प्रवदंति मनीषिणः ।।
मार्गज्ञाः कपिलाः सांख्याः शृणु तानरिसूदन ।। कामक्रोधौ भयं निद्रां पंचमः श्वास उच्यते ।। एते दोषाः शरीरेषु दृश्य
न्ते सर्वदेहिनां ।। छिंदंति क्षमया क्रोधं कामं संकल्पवर्जनात् ।। सत्वसंसेवनान्निद्रामप्रमादाद्भयं तथा ।। छिंदंति पं
चमं श्वासमल्पाहारतया नृप ।। गुणान्गुणशतैर्ज्ञात्वा दोषान्दोषशतैरपि ।। हेतून्हेतुशतैश्चित्रैश्चित्रान्विज्ञाय तत्व
तः ।। अपां फेनोपमं लोकं विष्णोर्मायाशतैर्वृतं ।। चित्रभित्तिप्रकाशं नलसारमनर्थकं ।। तमः श्वभ्रनिभं दृष्ट्वा वर्ष
बुद्बुदसंनिभं ।। नाशप्रायं सुखाद्धीनं नाशोंततमिहावशं ।। रजस्तमसि संमग्नं पंके द्विपमिवावशं ।। सांख्या राजन्म
हाप्रज्ञास्त्यक्त्वा स्नेहं प्रजाकृतं ।। ज्ञानयोगेन सांख्येन व्यापिना महता नृप ।। राजसानशुभान्गंधांस्तामसांश्च
तथाविधान् ।। पुण्यांश्च सात्विकान्गंधान्स्पर्शजान्देहसंश्रितान् ।। छित्वाशु ज्ञानशस्त्रेण तपोदंडेन भारत ।। ततो
दुःखोदकं घोरं चिंताशोकमहाहृदं ।। व्याधिमृत्युमहाग्राहं महाभयमहोरगं ।। तमःकूर्मं रजोमीनं प्रज्ञयासंस्तव

सुत॥स्नेहपंकं जरादुर्गं स्नानद्वीपमरिंदम॥ कर्मागाधं सत्यतीरं स्थितव्रतमरिंदम॥ हिंसाशीघ्रमहावेगं नानारससमाकरं॥ नानाप्रीतिमहारत्नं दुःखज्वरसमीरणं॥ शोकतृष्णामहावर्त्तं तीक्ष्णव्याधिमहागजं॥ अस्थिसंघातसंघट्टं श्लेष्मफेनमरिंदम॥ दानमुक्ताकरं घोरं शोणितह्रदविद्रुमं॥ हसितोत्क्रुष्टनिर्घोषं नानाज्ञानसुदुस्तरं॥ रोदनाश्रुमलक्षारं संगत्यागपरायणं॥ पुनराजन्मलोकौघपुत्रबांधवपत्तनं॥ अहिंसासत्यमर्यादं प्राणत्यागमहोर्मिणं॥ वेदांतगमनद्वीपं सर्वभूतदयोदधिं मोक्षदुर्लभविषयं वडवांमुखसागरं॥ तरंति परस्पतयः सिद्धा ज्ञानयानेन भारत॥ तीर्त्वा च दुस्तरं जन्म विशंति विमलं नभः॥ ततःस्तान्सुकृतीन्सम्यग्व्यस्तयो वहति रश्मिभिः॥ पद्मतंतुवदाविश्य प्रवहं विषयान्नृप॥ तत्र तान्प्रवहो वायुः प्रतिगृह्णाति भारत॥ वीतरागान्यतीन्सिद्धान्वीर्ययुक्तांस्तपोधनान्॥ सूक्ष्मः सुशीतः सुगंधी च सुस्पर्शश्च भारत॥ सप्तानां मरुतां श्रेष्ठो लोकान्गच्छति यः शुभान्॥ स तान्वहति कौंतेय नभसः परमां गतिं॥ नभो वहति लोकेश रजसः परमां गतिं॥ रजो वहति राजेंद्र सत्वस्य परमां गतिं॥ सत्वं वहति शुद्धात्मन्परं नारायणं प्रभुं॥ प्रभुर्वहति शुद्धात्मा परमात्मानमात्मना॥ परमात्मानमासाद्य तद्भूता यतनामलाः॥ अमृतत्वाय कल्पंते न निवर्त्तंति वा विभो॥ परमा सा गतिः पार्थ निर्द्वंद्वानां महात्मनां॥ सत्यार्जवरतानां वै सर्वभूतदयावतां॥ ॥युधिष्ठिरः॥ ॥स्थानमुत्तममासाद्य भगवंतं स्थिरव्रताः॥ आजन्ममरणं वा ते स्मरंत्युत न वानघ॥ यदत्र तथ्यं तन्मे त्वं यथाव

हक्तुमर्हसि॥ त्वदृतेपुरुषंनान्यंप्रष्टुमर्हामिकौरव॥ मोक्षदोषोमहानेषप्राप्यसिद्धिगतानृषीन्॥ यदितश्चैवविज्ञाते
वर्त्ततेयतयःपरे॥ प्रवृत्तिलक्षणंधर्मंपश्यामिपरमंनृप॥ मग्नस्यहिपरंज्ञानंकिंतुदुःखतरंभवेत्॥ ॥भीष्मउवाच॥
यथान्यायंत्वयाताताप्रश्नःपृष्टःसुसंकटः॥ बुधानामपिसंमोहःप्रश्नेस्मिन्भरतर्षभ॥ अत्रापितत्वंपरमंशृणुसम्य
ङ्मयेरितं॥ बुद्धिश्चपरमायत्रकापिलानांमहात्मनां॥ इंद्रियाण्यवबुध्यंतेस्वदेहेदेहिनांनृप॥ कारणान्यात्मनिस्तानि
सूक्ष्मःपश्यतितैस्तुसः॥ आत्मनाविप्रहीणानिकाष्ठकुड्यसमानितु॥ विनश्यंतिनसंदेहःफेनाइवमहार्णवे॥ इंद्रि
यैःसहसुप्तस्यदेहिनःशत्रुतापन॥ सूक्ष्मश्चरतिसर्वत्रनभसीवसमीरणः॥ सपश्यतियथान्यायंस्पर्शान्स्पृ
शतिवाविभो॥ बुध्यमानोयथापूर्वमखिलेनेहभारत॥ इंद्रियाणिहिसर्वाणिस्वेस्वेस्थानेयथाविधि॥ अनीशत्वात्प्र
लीयंतेसर्पाहतविषाइव॥ इंद्रियाणांतुसर्वेषांस्वस्थानेष्वेवसर्वशः॥ आक्रम्यगतयःसूक्ष्माश्चरंत्यात्मानसंश
यः॥ सत्वस्यचगुणान्कृत्स्नान्रजसश्चगुणान्पुनः॥ गुणांश्चतमसःसर्वान्गुणान्बुद्धेश्चभारत॥ गुणांश्चमनस
श्चापिनभसश्चगुणांश्चसः॥ गुणान्वायोश्चधर्मात्मंस्तेजसोश्चगुणान्पुनः॥ अपांगुणांस्तथापार्थपार्थिवां
श्चगुणानपि॥ सर्वाण्येवगुणैर्व्याप्यक्षेत्रेषुयुधिष्ठिर॥ आत्माचयातिक्षेत्रज्ञंकर्मणाचशुभाशुभे॥ शिष्याइ
वमहात्मानमिंद्रियाणिचतंप्रभो॥ प्रकृतिंचाप्यतिक्रम्यगच्छत्यात्मानमव्ययं॥ परंनारायणात्मानंनिर्द्वंद्वंप्रकृतेः

परं ॥ विमुक्तः पुण्यपापेभ्यः प्रविष्टस्तमनामयं ॥ परमात्मानमगुणं न निवर्त्तति भारत ॥ शिष्टस्तत्र मनस्तात इंद्रिया
णि च भारत ॥ आगच्छंति यथा कालं गुरोः संदेशकारिणः ॥ शक्यं चाल्पेन कालेन शांतिं प्राप्तुं गुणार्थिना ॥ एवमुक्तेन
कौंतेय युक्तज्ञानेन मोक्षिणा ॥ सांख्या राजन्महाप्राज्ञा गच्छंति परमां गतिं ॥ ज्ञानेनानेन कौंतेय तुल्यं ज्ञानं न विद्यते ॥
अत्र ते संशयो माभूत्तु ज्ञानं सांख्यं परं मतं ॥ अक्षरं ध्रुवमेवोक्तं पूर्णं ब्रह्म सनातनं ॥ अनादिमध्यनिधनं निर्द्वंद्वं क
र्तृ शाश्वतं ॥ कूटस्थं चैव नित्यं च यद्वदंति मनीषिणः ॥ यतः सर्वाः प्रवर्त्तंते सर्गप्रलयविक्रियाः ॥ यच्च शंसंति शास्त्रेषु
वदंति परमर्षयः ॥ सर्वे विप्राश्च देवाश्च तथा शमविदो जनाः ॥ ब्रह्मण्यं परमं देवमनंतं परमच्युतं ॥ प्रार्थयंतश्च तं
विप्रा वदंति मुंपाबुद्धयः ॥ सम्यग्युक्तास्तथा योगाः सांख्याश्चामितदर्शनाः ॥ अमूर्त्तेस्तस्य कौंतेय सांख्यमूर्त्तिरि
ति श्रुतिः ॥ अभिज्ञानानि तस्याहुर्मतिं हि भरतर्षभ ॥ द्विविधानीह भूतानि पृथिव्यां पृथिवीपते ॥ जंगमागमसंज्ञानि
जंगमं तु विशिष्यते ॥ ज्ञानं महद्यद्धि महत्सु राजन्वेदेषु सांख्येषु तथैव योगे ॥ यच्चापि दृष्टं विविधं पुराणे सांख्याग
तं तन्निखिलं नरेंद्र ॥ यच्चातिहासेषु महत्सु दृष्टं यच्चार्थशास्त्रे नृप शिष्टजुष्टे ॥ ज्ञानं च लोके यदिहास्ति किंचित्सां
ख्यागतं तच्च महन्महात्मन् ॥ शमश्च दृष्टः परमं बलं च ज्ञानं च सूक्ष्मं च यथावदुक्तं ॥ तपांसि सूक्ष्माणि सुखा
नि चैव सांख्ये यथावद्विहितानि राजन् ॥ विपर्यये तस्य हि पार्थ देवा गच्छंति सांख्याः सततं सुखेन ॥ तांश्चानुसं

मो॰ध॰
१५७

चार्यततः कृतार्थाः पतंति विप्रेषु यतेषु नृप यः ॥ हित्वा च देहं प्रविशंति देवं दिवौकसो द्यामिव पार्थसांख्याः ॥ अतोधिकं ते
भिरता महर्षे सांख्ये द्विजाः पार्थिवशिष्टजुष्टे ॥ तेषां न तिर्यग्गमनं हि दृष्टं नार्वाग्गतिः पापकृताधिवासः ॥ न चाप्रधाना
अपि ते द्विजातयो ये ज्ञानमेतं नृपते नुरक्ताः ॥ सांख्यं विशालं परमं पुराणं महार्णवं विमलमुदारकांतं ॥ कृत्स्नं च सां
ख्यं नृपते महात्मा नारायणो धारयते प्रमेयं ॥ एतन्मयोक्तं नरदेव तत्वं नारायणो विश्वमिदं पुराणं ॥ स सर्गकाले च
करोति सर्गं संहारकाले च तदत्ति भूयः ॥ संहृत्य सर्वं निजदेहसंस्थं कृत्वाप्सु शेते जगदंतरात्मा ॥ ॥ शांतौ मोक्षधर्मे ॥
युधिष्ठिर उवाच ॥ ॥ किं तदक्षरमित्युक्तं यस्मान्नावर्तते पुनः ॥ किं च तत्क्षरमित्युक्तं यस्मादावर्त्तते पुनः ॥ अक्षरक्ष
रयोर्व्यक्तिं इच्छाम्यरिनिषूदन ॥ उपलब्धुं महाबाहो तत्वेन कुरुनंदन ॥ त्वं हि ज्ञानं विप्रैरुच्यसे वेदपारगैः ॥ ऋषिभि निधि
श्च महाभागैर्यतिभिश्च महात्मभिः ॥ शेषमल्पं दिनानां ते दक्षिणायनभास्करे ॥ आवृत्ते भगवत्यर्के गंतासि परमां ग
तिं ॥ त्वयि प्रतिगते श्रेयः कुतः श्रोष्यामहे वयं ॥ कुरुवंशप्रदीपस्त्वं ज्ञानदीपेन दीप्यसे ॥ तदेतच्छ्रोतुमिच्छामि त्वत्तः कुरु
कुलोद्वह ॥ न तृप्यामीह राजेंद्र शृण्वन्नमृतमीदृशं ॥ ॥ भीष्म उवाच ॥ ॥ अत्र ते वर्त्तयिष्यामि इतिहासं पुरातनं ॥ वसि
ष्ठस्य च संवादं करालजनकस्य च ॥ वसिष्ठं श्रेष्ठमासीनमृषीणां भास्करद्युतिं ॥ पप्रच्छ जनको राजा ज्ञानं नैश्रेयसं
परं ॥ परमध्यात्मकुशलमध्यात्मगतिनिश्चयं ॥ मैत्रावरुणमासीनमभिवाद्य कृतांजलिः ॥ स्वक्षरं प्रश्रितं वाक्यं १५७

मधुरं वाप्यनुल्बणं ।। पप्रछर्षिवरं राजा करालजनकः पुरा ।। भगवंछ्रोतुमिछामि परं ब्रह्मसनातनं ।। यस्मान्नपुरावृत्तिमा
प्नुवंति मनीषिणः ।। यच्च तत्क्षरमित्युक्तं यत्रेदं क्षरते जगत् ।। यच्चाक्षरमिति प्रोक्तं शिवं क्षेममनामयं ।। ।।वसिष्ठ उवाच ।।
श्रूयतां पृथिवीपाल क्षरतीदं यथा जगत् ।। यन्न क्षरति पूर्वेण यावत्कालेन चाप्यथ ।। युगं द्वादशसाहस्रं कल्पं विद्धि चतुर्यु
गं ।। दशकल्पशतावृत्तमहस्तद्ब्राह्ममुच्यते ।। रात्रिश्चैतावती राजन्यस्यांते प्रतिबुध्यते ।। सृजत्यनंतकर्माणं महांतं भूत
मग्रजं ।। मूर्त्तिमंतममूर्त्तात्मा विश्वं शंभुः स्वयंभुवः ।। अणिमा लघिमा प्राप्तिरीशानं ज्योतिरव्ययं ।। सर्वतः पाणिपादां
तं सर्वतोक्षिशिरोमुखं ।। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।। हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतः ।। महा
निति च योगेषु विरिंचिरिति चाप्यजः ।। सांख्ये च पठ्यते शास्त्रे नामभिर्बहुधात्मकः ।। विचित्ररूपो विश्वात्मा एकाक्ष
र इति स्मृतः ।। वृतं नैकात्मकं येन कृत्स्नं त्रैलोक्यमात्मना ।। तथैव बहुरूपत्वा विश्वरूप इति श्रुतः ।। एष वै विक्रियापन्नः
सृजत्यात्मानमात्मना ।। अहंकारं महातेजाः प्रजापतिमहंकृतं ।। अव्यक्ताव्यक्तमापन्नं विद्यासर्गं वदंतितं ।। महां
तं चाप्यहंकारमविद्यासर्गमेव च ।। अविधिं च विधिं चैव समुत्पन्नौ तथैकतः ।। विद्याविद्येति विख्याते श्रुतिशास्त्रा
र्थचिंतकैः ।। भूतसर्गमहंकारात्तृतीयं विद्धि पार्थिव ।। अहंकारेषु सर्वेषु चतुर्थं विद्धि वैकृतं ।। वायुर्ज्योतिरथाकाशमा
पोथ पृथिवी तथा ।। शब्दः स्पर्शश्च रूपं च रसो गंधस्तथैव च ।। एवं युगपदुत्पन्नं दशवर्गमसंशयं ।। पंचमं विद्धि रा

मो॰ध॰
१५८

जेंद्र भौतिकंसर्गमर्थवत्॥ श्रोत्रं त्वचक्षुषी जिह्वा घ्राणमेव च पंचमं॥ वाक्च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च॥ बुद्धींद्रि
याणि चैतानि तथा कर्मेंद्रियाणि च॥ संभूतानीह युगपन्मनसा सह पार्थिव॥ एषा तत्त्व चतुर्विंशा सर्वाकृतिषु वर्त्तते॥
यां ज्ञात्वा नाभिशोचंति ब्राह्मणास्तत्त्वदर्शिनः॥ एतद्देहं समाख्यातं त्रैलोक्ये सर्वदेहिषु॥ वेदितव्यं नरश्रेष्ठ सदेवन
रदानवे॥ सयक्षभूतगंधर्वे सकिंनरमहोरगे॥ सचारणपिशाचे वै सदेवर्षिनिशाचरे॥ सदंशकीटमशके स
पूतिकृमिमूषिके॥ शुनि श्वपाके वैणेये सचंडाले सपुल्कसे॥ हस्त्यश्वखरशार्दूले सवृक्षे गवि चैव ह॥ यच्च
मूर्तिमयं किंचित्सर्वत्रैतन्निदर्शनं॥ जले भुवि तथाकाशे नान्यत्रेति विनिश्चयः॥ स्थानं देहवतामासीदित्येवम
नुशुश्रुम॥ कृत्स्नमेतावतस्तात क्षरते व्यक्तसंज्ञितं॥ अहन्यहनि भूतात्मा ततः क्षर इति स्मृतः॥ एतदक्षरमि
त्युक्तं क्षरतीदं यथा जगत्॥ जगन्मोहात्मकं प्राहुरव्यक्ताव्यक्तसंज्ञकं॥ महांश्चैवाग्रजो नित्यमेतत्क्षरनिदर्शनं॥
कथितं महाराज यन्मां त्वं परिपृच्छसि॥ पंचविंशतिमो विष्णुर्निस्तत्त्वस्तत्त्वसंज्ञितः॥ तत्त्वसंश्रयणादेतत्तत्त्वमाहुर्म
नीषिणः॥ यन्मर्त्यमसृजद्व्यक्तं तत्तन्मूर्त्यधितिष्ठति॥ चतुर्विंशतिमो व्यक्तो ह्यमूर्तः पं(सं)चविंशकः॥ स एव हृ
दि सर्वासु मूर्तिष्वातिष्ठते त्मवान्॥ केवलश्चेतनानित्यः सर्वमूर्तिरमूर्तिमान्॥ सर्गप्रलयधर्मिण्यासस

१५८

प्रलयात्मकः ॥ गोचरे वर्त्तते नित्यं निर्गुणो गुणसंज्ञितं ॥ एवमेवं महात्मान सर्गप्रलयकोविदः ॥ विकुर्वाणः प्रकृतिमा
नभिमन्यत्यबुद्धिमान् ॥ तमसत्वरजोयुक्तस्तासु तास्विह योनिषु ॥ लीयंते प्रतिबुद्धत्वादबुद्धजनसेवनात् ॥ सह
नाशं विनाशित्वान्नान्योहमिति मन्यते ॥ योहं सोहमिति ह्युक्त्वा गुणानेवानुवर्त्तते ॥ तमसा तामसान्भावान्विविधान्प्र
तिपद्यते ॥ रजसा राजसांश्चैव सात्विकांस्तु सत्वसंश्रयात् ॥ शुक्ललोहितकृष्णानि रूपाण्येतानि त्रीणि तु ॥ सर्वाण्ये
तानि रूपाणि यानीह प्राकृतानि वै ॥ तामसा निरयं यांति राजसा मानुषानथ ॥ सात्विका देवलोकाय गच्छंति सुखभा
गिनः ॥ निष्कैवल्येन पापेन तिर्यग्योनिमवाप्नुयात् ॥ पुण्यपापेन मानुष्यं पुण्येनैकेन देवताः ॥ एवमव्यक्तविषयं
क्षरमाहुर्मनीषिणः ॥ पंचविंशतिमो योयं ज्ञानादेव प्रवर्त्तते ॥ ॥ शांतौ मोक्षधर्मे ॥ वसिष्ठः ॥ ॥ एवमप्रतिबुद्ध
त्वादबुद्धमनुवर्त्तते ॥ देहाद्देहसहस्राणि तथा समभिपद्यते ॥ तिर्यग्योनिसहस्रेषु कदाचिद्देवतास्वपि ॥ उप
पद्यति संयोगाद्गुणैः सह गुणक्षयात् ॥ मानुषत्वाद्दिवं यांति दिवो मानुष्यमेव च ॥ मानुष्यान्निरयस्थानमानंत्यं
प्रतिपद्यते ॥ कोषकारो यथात्मानं कीटः समनुरुंधति ॥ सूत्रतंतुगुणैर्नित्यं तथायमगुणो गुणैः ॥ द्वंद्वमेति च
निर्द्वंद्वस्तासु तास्विह योनिषु ॥ शीर्षरोगेक्षिरोगे च दंतशूले गलग्रहे ॥ जलोदरे तृषारोगे ज्वरगंडे विशूर वि

के॥ चित्रेकुलेग्निदाघेच सन्निधायस्मान्ययोरपि॥ यानि चान्यानि दृष्टानि प्राकृतानि शरीरिषु॥ उत्पद्यंते विचित्राणि तान्ये
षाप्यभिमन्यते॥ तिर्यग्योनिसहस्रेषु कर्माविद्धेव तास्वपि॥ अभिमन्यत्यभीमाना तेष्वेव सुकृतान्यपि॥ शुक्लवासा
श्च दूर्वासा भूशायी नित्यमधस्तथा॥ मंडूकशायी च तथा वीरासनगतस्तथा॥ वीरधारणमाकाशे शयनं स्थानमेव
च॥ इष्टकाप्रस्तरे चैव कंटकप्रस्तरे तथा॥ भस्मप्रस्तरशायी च भूमिशय्यातलेषु च॥ वीरधारणमाकाशे वीरस्था
नांबुपंके च शयनं फलकेषु च॥ विविधासु च शय्यासु फलगृध्याचितस्तथा॥ मुंजमेखलनग्नत्वं क्षौमकृष्णाजि
नानि च॥ शाणीवालपरीधानो व्याघ्रचर्मपरिच्छदः॥ सिंहचर्मपरीधानः पट्टवासास्तथैव च॥ फलकपरिधा
नश्च तथा कंटकवस्त्रधृक्॥ कीटकावसनश्चैव चीरवासास्तथैव च॥ वस्त्राणि चान्यानि बहून्यभ्यस्य बुद्धिमान्॥
भोजनानि विचित्राणि रत्नानि विविधानि च॥ एकरात्रं तनाशित्वमेककालिकभोजनं॥ चतुर्थाष्टमकालश्च षष्ठ
कालिक एव च॥ षड्रात्रभोजनश्चैव तथैवाष्टाहभोजनः॥ सप्तरात्रदशाहान्नो द्वादशाहिकभोजनः॥ मासोपवा
सी मूलाशी फलाहारस्तथैव च॥ वायुभक्षोंबुपिण्याकदधिगोमयभोजनः॥ गोमूत्रभोजनश्चैव शाकपुष्पादए
व च॥ शैवालभोजनश्चैव तथाचामेन वर्तयन्॥ वर्तयन् शीर्णपर्णैश्च प्रकीर्णफलभोजनः॥ विविधानि च लब्धा १५९

णि सेवते स्निद्धिक्रौक्षया ।। वांङ्मयाणि विविधवल्लिंगानि विविधानि च ।। चातुराश्रम्यपंथानमाश्रयत्यपथानपि ।। उपा
श्रसानथ परान्पाषंडान्विविधानपि ।। विविक्ताश्च शिलाप्रकायातथा प्रस्रवणानि च ।। पुलिनानि विविक्तानि विवि
क्तानि वनानि च ।। दिवस्थानानि पुण्यानि विविक्तानि सनांसि च ।। विविक्ताश्चापि शैलानां गुहागृह निभोपमाः ।। विवि
क्तानि वजप्यानि व्रतानि विविधानि च ।। नियमाश्चिविधांश्चापि विविधानि तपांसि च ।। यज्ञांश्च विविधाकारान् विधीं
श्च विविधांस्तथा ।। वाणिक्पथं द्विजक्षत्रं वैश्यशूद्रांस्तथैव च ।। दानं च विविधाकारं दीनांधकृपणादिषु ।। अति
मन्यस्य संवेधात्तथैव त्रिविधान्गुणान् ।। सत्वं रजस्तमश्चैव धर्मार्थौ काम एव च ।। प्रकृत्यात्मानमेवात्मा स्वप्रवि
भजत्युत ।। स्वधाकारवषट्कारौ स्वाहाकारनमस्क्रिया ।। याजनाध्यापनं दानं तथैवाहुः प्रतिग्रहं ।। यजनाध्य
यनं चैव यच्चान्यदपि किंचन ।। जन्ममृत्युविवादे च तथा विशसनेपि च ।। शुभाशुभमयं सर्वमेतदाहुः प्रतिग्रहं ।।
प्रकृतिः कुरुते देवीमवं प्रलयमेव च ।। दिवसांते गुणानेतान्नभ्येत्यैकोवतिष्ठते ।। रश्मिजालमिवादित्यस्तत्तत्का
ले नियच्छति ।। एवमेषा सकृत्सर्वं क्रीडार्थमभिमन्यते ।। आत्मन्तपगुणानेतान् विविधान् हृदयप्रियान् ।। एव
मेतां विकुर्वाणः सर्गप्रलयधर्मिणी ।। क्रियाक्रियापथे रक्तस्त्रिगुणस्त्रिगुणाधिपः ।। क्रियांक्रियापथोपेतस्तथा

तदिति मन्यते ॥ प्रकृत्या सर्वमेवेदं जगदंधीकृतं विभो ॥ रजसा तमसा चैव व्याप्तं सर्वमनेकधा ॥ एवं द्वंद्वान्यथैतानि समाव
र्तंति नित्यशः ॥ ममैवैतानि जायंते धावंते मामिमामिति ॥ निस्तर्तव्यान्यथैतानि सर्वाणीति नराधिप ॥ मन्यंते यत्त्वबुद्धत्वा
तथैव सुकृतान्यपि भोक्तव्यानि मयैतानि देवलोकगतेन वै ॥ इह चैनेनोक्ष्यामि शुभाशुभफलोदयं ॥ सुकृतमेवं तु कर्त
व्यं सकलं कृत्वा सुखं मम ॥ यावदंतं च मे सौख्यं जात्यां जात्यां भविष्यति ॥ भविष्यति च मे दुःखं कृतेनेहाप्यनंतकं ॥ मह
दुःखं हि मानुष्यं निरये चापि मज्जनं ॥ निरयाच्चापि मानुष्यं कालेनैष्याम्यहं पुनः ॥ मनुष्यत्वाच्च देवत्वं देवत्वात्पौरु
षं पुनः ॥ मनुष्यत्वाच्च निरयं पर्यायेणोपगच्छति ॥ य एवं वेत्ति नित्यं वै निरात्मात्मगुणैर्वृतः ॥ तेन देवमनुष्येषु निरये
वोपपद्यते ॥ ममत्वेनाहृतो नित्यं तत्रैव परिवर्तति ॥ सर्गकोटिसहस्राणि मरणांतासु मूर्तिषु ॥ य एवं कुरुते कर्म शु
भाशुभफलात्मकं ॥ स एवं फलमाप्नोति त्रिषु लोकेषु मूर्तिषु ॥ प्रकृतिः कुरुते कर्म शुभाशुभफलात्मकं ॥ प्रकृतिश्च
तदश्नाति त्रिषु लोकेषु कामगा ॥ तिर्यग्योनिमनुष्यत्वे देवलोके तथैव च ॥ त्रीणि स्थानानि चैतानि जानीयात्प्राकृतानि
ह ॥ अलिंगां प्रकृतिं त्वाहुर्लिंगैरनुमिमीमहे ॥ तथैव पौरुषं लिंगमनुमानाद्धि मन्यते ॥ स लिंगांतरमासाद्य प्राकृतं
लिंगमव्रणं ॥ व्रणद्वाराण्यधिष्ठाय कर्माण्यात्मनि मन्यते ॥ श्रोत्रादीनि तु सर्वाणि पंचकर्मेंद्रियाण्यथ ॥ वागादीनि

प्रवर्त्तते गुणोपि हगुणैः सह ॥ अहमेतानि वै सर्व्वं मन्येतानीन्द्रियाणि च ॥ निरिंद्रियो हि मन्येत ब्रणवानस्मि निर्व्रणः ॥ अलिं
गो लिंगमात्मानमकालः कालमात्मनः ॥ अत्यत्वं सत्वमात्मानं मतत्वं तत्वमात्मनः ॥ अमृत्युर्मृत्युमात्मानमचरश्चरमा
त्मनः ॥ अक्षेत्रः क्षेत्रमात्मानमसर्गः सर्गमात्मनः ॥ अतपास्तप मात्मानमगतिर्गतिमात्मनः ॥ अभवो भवमात्मानमभयो
भयमात्मनः ॥ अक्षरः क्षरमात्मानमबुद्धिस्त्वभिमन्यते ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ वशिष्ठ उवाच ॥ ॥ एवमप्रतिबुद्ध
त्वादबुद्धजनसेवनात् ॥ सर्गकोटिसहस्राणि पतनांतानि गच्छति ॥ धाम्नां धामसहस्राणि मरणांतानि गच्छति ॥ तिर्यग्यो
निमनुष्यस्य देवलोके तथैव च ॥ चंद्रमा इव कृत्स्नानां पुनस्तत्र सहस्रशः ॥ नीयते प्रतिबुद्धत्वादेवमेष ह्यबुद्धिमान् ॥ क
ला पंचदशी योनिस्तद्धामप्रतिबुध्यते ॥ नित्यमेतद्विजानीम सोमं वै षोडशीं कलां ॥ कलायां जायतेजस्रं पुनः पुनर
बुद्धिमान् ॥ धाम तस्योपयुंजंति भूय एव प्रजायते ॥ षोडशी तु कला सूक्ष्मा स सोम उपधार्यतां ॥ न तूपयुज्यते देवैर्देवा
नुपयुनक्ति सा ॥ एतामक्षपयित्वा हि जायंते नृपसत्तम ॥ सो ह्यस्य प्रकृतिर्हृष्टा यान्मोक्ष उपधार्यतां ॥ तदेवं षोडशक
लं देहमव्यक्तसंज्ञकं ॥ ममायमिति मन्वानस्तत्रैव परिवर्त्तते ॥ पंचविंशो महानात्मा तस्यैवाप्रतिबोधनात् ॥ विमल
स्य विशुद्धस्य शुद्धाशुद्धनिषेवणात् ॥ अशुद्ध एव शुद्धात्मा तादृग्भवति पार्थिव ॥ अबुद्धसेवनाच्चापि बुद्धोप्यबुद्धतां व्र
जेत् ॥ तथैवाप्रतिबुद्धोपि विज्ञेयो नृपसत्तम ॥ प्रकृतेस्त्रिगुणायास्तु सेवनात्त्रिगुणो भवेत् ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥

मोक्ष०
१६१

॥ ॥जनक उवाच॥ १॥ अक्षरक्षरयोरेष द्वयोः संबंध इष्यते॥ स्त्रीपुंसोर्वापि भगवन् संबंधस्तद्वदुच्यते॥ ऋते तु पुरुषं ने
ह स्त्री गर्भं धारयत्युत॥ ऋते स्त्रियं न पुरुषो रूपं निर्वर्तयेत्तथा॥ अन्योन्यस्याभिसंबंधादन्योन्यगुणसंश्रयात्॥ एवमेवा
भिसंबंधौ नित्यं प्रकृतिपूरुषौ॥ पश्यामि भगवंस्तस्मान्मोक्षधर्मो न विद्यते॥ अथ वानंतरकृतं किंचिदेव निवर्त्तनं॥ त
न्ममाचक्ष्व तत्त्वेन प्रत्यक्षो ह्यसि सर्वदा॥ मोक्षकामा वयं चापि कांक्षामो यदनामयं॥ अदेहमजरं नित्यमतींद्रियमनी
श्वरं॥ ॥वसिष्ठ उवाच॥ ॥यदेतदुक्तं भवता वेदशास्त्रनिदर्शनं॥ एवमेतद्यथा चैतन्न गृह्णाति तथा भवान्॥ धार्य
ते हि त्वया ग्रंथ उभयोर्वेदशास्त्रयोः॥ न च ग्रंथस्य तत्त्वज्ञो यथावत्त्वं नरेश्वर॥ यो हि वेदे च शास्त्रे च ग्रंथधारणतत्परः॥
न च ग्रंथार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा॥ भारं सं वहते तस्य ग्रंथस्यार्थं न वेत्ति यः॥ यस्तु ग्रंथार्थतत्त्वज्ञो नास्य ग्रंथाग
मो वृथा॥ ग्रंथस्यार्थस्य पृष्टः संस्तादृशो वक्तुमर्हति॥ यथा तत्त्वाभिगमनादर्थं तस्य स विंदति॥ न यः संसत्सु कथयेद्ग्रं
थार्थं स्थूलबुद्धिमान्॥ स कथं मंदविज्ञानो ग्रंथं वक्ष्यति निर्णयात्॥ निर्णयं चापि छिद्रात्मा न तं वक्ष्यति तत्त्वतः॥ सोप
हासात्मतामेति यस्माच्चैवात्मवानपि॥ तस्मात्त्वं शृणु राजेंद्र यथैतदनुदृश्यते॥ याथातथ्येन सांख्येषु योगेषु च महा
त्मसु॥ यदेव योगाः पश्यंति सांख्यैस्तदनुगम्यते॥ एकं सांख्यं च योगं च यः पश्यति स बुद्धिमान्॥ त्वङ्मांसं रुधिरं मेदः
पित्तं मज्जास्थि स्नायु च॥ एतदैंद्रियकं तात यद्भवानिदमाह मां॥ द्रव्याद्द्रव्यस्य निर्वृत्तिरिंद्रियादिंद्रियं तथा॥ देहाद्देह

१६१

नवाप्नोति बीजाद्बीजं तथैव च ॥ निरिंद्रियस्य बीजस्य निर्द्रव्यस्याप्यदेहिनः ॥ कथं गुणा भविष्यंति निर्गुणत्वान्महात्मनः ॥ गुणा गुणेषु जायंते तत्रैव निविशंति च ॥ एवं गुणाः प्रकृतितो जायंते निविशंति च ॥ त्वङ्मांसरुधिरं मेदः पित्तं मज्जास्थिस्नायु च ॥ अष्टैतान्यथ शुक्रेण जानीहि प्राकृतानि वै ॥ पुमांश्चैवापुमांश्चैव त्रैलिंग्यं प्राकृतं स्मृतं ॥ न वा पुमान्पुमांश्चैव स लिंगीत्यभिधीयते ॥ अलिंगा प्रकृतिर्लिंगैरुपलभ्यति सात्मजैः ॥ यथा पुष्पफलैर्नित्यमृतवो मूर्त्तयस्तथा ॥ एवमप्यनुमानेन ह्यलिंगमुपलभ्यते ॥ पंचविंशतिमस्तात लिंगेषु नियतात्मकः ॥ अनादिनिधनोनंतः सर्वदर्शी निरामयः ॥ केवलं त्वभिमानित्वाद्गुणेष्वगुण उच्यते ॥ गुणा गुणवतः संति निर्गुणस्य कुतो गुणाः ॥ तस्मादेवं विजानंति ये जना गुणदर्शिनः ॥ यदा त्वेष गुणानेतान्प्राकृतान्नभिमन्यते ॥ तदा सगुणहान्येनं परमेवानुपश्यति ॥ यत्तद्बुद्धेः परं प्राहुः सांख्या योगाश्च सर्वज्ञाः ॥ बुध्यमानं महाप्राज्ञमबुद्धपरिवर्जनात् ॥ अप्रबुद्धमथाव्यक्तमगुणं प्राहुरीश्वरं ॥ निर्गुणं चेश्वरं नित्यमधिष्ठातारमेव च ॥ प्रकृतेश्च गुणानां च पंचविंशतिकं बुधाः ॥ सांख्ययोगे च कुशला बुध्यंते परमैषिणः ॥ यदा प्रबुद्धा ह्यव्यक्तमवस्थाजन्मभीरवः ॥ बुध्यमानं प्रबुध्यंति गमयंति समं तदा ॥ एतन्निदर्शनं सम्यगसम्यगनिदर्शनं ॥ बुध्यमानाप्रबुद्धानां पृथक्पृथगरिंदम ॥ परस्परेणैतदुक्तं क्षराक्षरनिदर्शनं ॥ एकत्वमक्षरं प्राहुर्नानात्वं क्षरमुच्यते ॥ पंचविंशतिनिष्ठोयं यदा सम्यक्प्रवर्त्तते ॥ एकत्वं दर्शनं चास्य नानात्वं चाप्यदर्शनं ॥ तत्त्वनिस्तत्त्वयोरेतत्पृथगेव निदर्शनं ॥

पंचविंशातिसर्गं तु तत्वमाहुर्मनीषिणः ॥ निस्तत्वं पंचविंशस्य परमाहुर्निदर्शनं ॥ सर्गस्य वर्गमाचारं तत्वं तत्वात्सनातनं ॥
॥ शांतौ मोक्षधर्मे ॥ ॥ जनक उवाच ॥ नानात्वैकत्वमित्युक्तं त्वयैतदृषिसत्तम ॥ पश्याम्येतद्धि संदिग्धमेतयोर्वै निदर्श-
नं ॥ तथा बुद्धप्रबुद्धाभ्यां बुध्यमानस्य चानघ ॥ स्थूलबुद्ध्या न पश्यामि तत्वमेतन्न संशयः ॥ अक्षरक्षरयोरुक्तं त्वया यदपि
कारणं ॥ तदप्यस्थिरबुद्धित्वात्प्रनष्टमिव मेनघ ॥ तदेतच्छ्रोतुमिच्छामि नानात्वैकत्वदर्शनं ॥ बुद्धं चाप्रतिबुद्धं च बुध्यमानं च
तत्वतः ॥ विद्याविद्ये च भगवन्नक्षरं क्षरमेव च ॥ सांख्ययोगं च कार्त्स्न्येन पृथक्चैवापृथक्च ह ॥ ॥ वसिष्ठ उवाच ॥ ॥ हंत ते संप्र-
वक्ष्यामि यदेतदनुपृच्छसि ॥ योगकृत्यं महाराज पृथगेव शृणुष्व मे ॥ योगकृत्यं तु योगानां ध्यानमेव परं बलं ॥ तच्चापि
द्विविधं ध्यानमाहुर्विद्याविदो जनाः ॥ एकाग्रता च मनसः प्राणायामस्तथैव च ॥ प्राणायामस्तु सगुणो निर्गुणो मनसस्त-
था ॥ मूत्रोत्सर्गे पुरीषे च भोजने च नराधिप ॥ त्रिकालं नाभियुंजीत शेषं युंजीत तत्परः ॥ इंद्रियाणींद्रियार्थेभ्यो निवर्त्य म-
नसा मुनिः ॥ दशद्वादशभिर्वापि चतुर्विंशात्परं ततः ॥ संचोदनाभिर्मतिमानात्मानं चोदयेदथ ॥ तिष्ठंतमजरं तं तु य-
त्तदुक्तं मनीषिभिः ॥ तैश्चात्मा सततं ज्ञेय इत्येवमनुशुश्रुम ॥ द्रव्यं ह्यहीनमनसो नान्यथेति विनिश्चयः ॥ विमुक्तः सर्वे-
भ्यो लघ्वाहारो जितेंद्रियः ॥ पूर्वरात्रे पररात्रे धारयीत मनोत्मनि ॥ स्थिरीकृत्येंद्रियग्रामं मनसा मिथिलेश्वर ॥ मनो
बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः ॥ स्थाणुवच्चाप्यकंपः स्याद्गिरिवच्चापि निश्चलः ॥ बुधा विधिविधानज्ञास्तदा यु-

तं प्रचक्षते ॥ न शृणोति न चाघ्राति न रस्यति न पश्यति ॥ न च स्पर्शं विजानाति न संकल्पयते मनः ॥ न चाभिमन्यते किंचिन्न
च बुध्यति काष्ठवत् ॥ तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः ॥ निवातेय यथा दीप्यन्दीपस्तद्वत्प्रकाशते ॥ निर्लिंगविचल
श्चोर्ध्वं नातिर्यग्गतिमाप्नुयात् ॥ तदा तमनुपश्येत यस्मिन्दृष्टे न कथ्यते ॥ हृदयस्थोंतरात्मेति ज्ञेयो ज्ञस्तात मद्विधैः ॥ वि
धूम इव सप्तार्चिरादित्य इव रश्मिवान् ॥ वैद्युतोग्निरिवाकाशे दृश्यतेत्मानमात्मनि ॥ यं पश्यति महात्मानो धृतिमंतो मनी
षिणः ॥ ब्राह्मणा ब्रह्मयोनिस्था ह्ययोनिममृतात्मकं ॥ तदेवाहुरणुभ्यो तन्महद्भ्यो महत्तरं ॥ तत्तत्वं सर्वभूते ध्रुवं तिष्ठ
न्नदृते ॥ बुद्धिद्रव्येण दृश्येत मनोदीपेन लोककृत् ॥ महतस्तमसस्तात दूरे तिष्ठन्नतामसः ॥ स तमोनुद इत्युक्तः सर्वज्ञै
र्वेदपारगैः ॥ विमलोमलस्तश्च निर्लिंगो लिंगसंज्ञितः ॥ योग एष हि योगानां किमन्यद्योगलक्षणं ॥ एवं पश्यन्प्रपश्य
ति आत्मानमजरं परं ॥ योगदर्शनमेतावदुक्तं ते तत्वतो मया ॥ सांख्यज्ञानं प्रवक्ष्यामि परिसंख्यानदर्शनं ॥ अव्यक्तमा
हु प्रकृतिं परां प्रकृतिवादिनः ॥ तस्मान्महत्समुत्पन्नं द्वितीयं राजसत्तम ॥ अहंकारस्तु महतस्तृतीयमिति नः श्रुतं ॥ पंच
भूतान्यहंकारादाहुः सांख्यात्मदर्शिभिः ॥ एताः प्रकृतयस्त्वष्टौ विकाराश्चापि षोडश ॥ पंच चैव विशेषा वै तथा पंचेंद्रियाणि
च ॥ एतावदेव तत्वानां सांख्यमाहुर्मनीषिणः ॥ सांख्ये विधिविधानज्ञा नित्यं सांख्यपथे रताः ॥ यस्माद्यदभिजायेत तत्तत्तत्रै

मोक्ष० य

१८३

वप्रलीयंते॥ लीयंते प्रतिलोमानि सृज्यंते चांतरात्मना॥ अनुलोमेन जायंते प्रतिलोमतः॥ गुणा गुणेषु सततं सागरस्यो
र्मयो यथा॥ सर्गप्रलय एतावान्प्रकृतेर्नृपसत्तम॥ एकत्वं प्रलये चास्य बहुत्वं च यदासृजत्॥ एवमेव च राजेंद्र विज्ञेयं
ज्ञानकोविदैः॥ अधिष्ठातारमव्यक्तमस्याप्येतन्निदर्शनं॥ एकत्वं च बहुत्वं च प्रकृतेरनुतत्ववां॥ एकत्वं प्रलये चास्य ब
हुत्वं च प्रवर्त्तनात्॥ बहुधात्मा प्रकुर्वीत प्रकृतिं प्रसवात्मिकां॥ तच्च क्षेत्रं महानात्मा पंचविंशोधितिष्ठति॥ अधिष्ठा
तेति राजेंद्र प्रोच्यते यतिसत्तमैः॥ अधिष्ठानादधिष्ठानादधिष्ठाता क्षेत्राणामिति नः श्रुतं॥ क्षेत्रं जानाति चाव्यक्तं क्षेत्रज्ञ इ
ति चोच्यते॥ अव्यक्तिके प्रविशाते पुरुषश्चेति कथ्यते॥ अन्यदेव च क्षेत्रं स्यादन्यः क्षेत्रज्ञ उच्यते॥ क्षेत्रमव्यक्तमित्युक्तं
तथा सत्वं तथेश्वरं॥ अनीश्वरमतत्वं च तत्वं तत्पंचविंशकं॥ सांख्यदर्शनमेतावत्परिसंख्यानुदर्शनं॥ सांख्याः प्रकुर्व
ते चैव प्रकृतित्वं प्रचक्षते॥ तत्वानि च चतुर्विंशत्परिसंख्याय तत्वतः॥ सांख्याः सह प्रकृत्या तु निस्तत्वः पंचविंशकः॥ पंचविं
शो प्रकृत्यात्मा बुध्यमान इति स्मृतः॥ यदा तु बुध्यतेत्मानं तदा भवति केवलः॥ सम्यग्दर्शनमेतावद्भाषितं तव तत्व
तः॥ एवमेतद्धि जानंतः सम्यता प्रतियांत्युत॥ सम्यङ्निदर्शनं नाम प्रत्यक्षं प्रकृतेस्तथा॥ गुणतत्वाद्यथैतानि निर्गुणोन्य
स्तथा भवेत्॥ न त्वेवं वर्तमानस्य मावृत्तिर्विद्यते पुनः॥ विद्यतेक्षरभावत्वादपरंपरमव्ययं॥ पश्येरंन्नेकमतयो

२

१८

न सम्यक्तेषु दर्शनं ॥ ते व्यक्तं प्रतिपद्यंते पुनःपुनररिंदम ॥ सर्वमेतद्विजानंतो न सर्वस्य प्रबोधनात् ॥ व्यक्तीभूतात
भविष्यंति व्यक्तस्यैव वशवर्त्तिनः ॥ सर्वमव्यक्तमित्युक्तमसर्वः पंचविंशकः ॥ य एनमभिजानंति न भयं तेषु विद्यते ॥
॥ ॥ शांतौ मोक्षधर्मेषु वसिष्ठकरालजनकसंवादे ॥ ॥ वसिष्ठ उवाच ॥ ॥ सांख्यदर्शनमेतावदुक्तं ते नृपसत्त
म ॥ विद्याविद्ये त्विदानीं मे त्वं निबोधानुपूर्वशः ॥ अविद्यामाहुरव्यक्तं सर्गप्रलयधर्मिणं ॥ सर्गप्रलयनिर्मुक्तां
विद्यां वै पंचविंशकः ॥ परस्परस्य विद्यात्वं निबोधानुपूर्वशः ॥ यथोक्तमृषिभिस्तात सांख्यस्याभिनिदर्शनं ॥
कर्मेंद्रियाणां सर्वेषां विद्या बुद्धींद्रियं स्मृतं ॥ बुद्धींद्रियाणि च तथा विशेष इति नःश्रुतं ॥ विशेषाणां मनस्तेषां वि
द्यामाहुर्मनीषिणः ॥ मनसः पंचभूतानि विद्या इत्यभिचक्षते ॥ अहंकारस्तु भूतानां पंचानां नात्र संशयः ॥ अ
हंकारस्य च तथा बुद्धिर्विद्या नरेश्वर ॥ विद्या प्रकृतिरव्यक्तं तत्वानां परमेश्वरी ॥ विद्या ज्ञेया नरश्रेष्ठ विधि
श्च परमः स्मृतः ॥ अव्यक्तस्य परं प्राहुर्विद्यां वै पंचविंशकं ॥ सर्वस्य सर्वमित्युक्तं ज्ञेयं ज्ञानस्य पार्थिव ॥ ज्ञा
नमव्यक्तमित्युक्तं ज्ञेयो वै पंचविंशकः ॥ तथैव ज्ञानमव्यक्तं विज्ञाता पंचविंशकः ॥ विद्याविद्यार्थतत्वेन मयो
क्तो विशेषतः ॥ अक्षरं च क्षरं चैव यदुक्तं तन्निबोध मे ॥ उभावेतौ क्षराउक्ताउभावेतावनक्षरौ ॥ कार

एवं तु प्रवक्ष्याम्नि याथातथ्यं तु जानतः ॥ अनादिनिधनावेतौ उभावेवैश्वरौ मतौ ॥ तत्वसंज्ञावुभावेतौ प्रोच्ये
ते ज्ञानचिंतकैः ॥ सर्गप्रलयधर्मत्वादव्यक्तं प्राहुरक्षरं ॥ तदेतद्गुणसर्गाय विकुर्वाणं पुनः पुनः ॥ गुणानां म
हदादीनामुत्सत्तिश्च परस्परं ॥ अधिष्ठानात्क्षेत्रमाहुरेतत्तत्वं च विंशकं ॥ यदा तु गुणजालं तदव्यक्तात्मनि
संक्षिपेत् ॥ तदा सह गुणैस्तैस्तु पंचविंशो विलीयते ॥ गुणा गुणेषु लीयंते तदैक्यप्रकृतिर्भवेत् ॥ क्षेत्रज्ञो
पि यदा तात तत्क्षेत्रे संप्रलीयते ॥ तदाक्षरत्वं प्रकृतिर्गछते गुणसंज्ञिता ॥ निर्गुणत्वं च वैदेह गुणेषु प्रतिव
र्तनात् ॥ एवमेव च क्षेत्रज्ञः क्षेत्रज्ञानपरीक्षये ॥ प्रकृत्या निर्गुणस्त्वेक इत्येवमनुशुश्रुम ॥ क्षरो भवत्येष
यदा तद्गुणवतीमथ ॥ प्रकृतिं त्वभिजानाति निर्गुणं तथात्मनः ॥ तदा विशुद्धो भवति प्रकृतेः परिवर्जनात् ॥
अन्योहमन्येयमिति यदा बुध्यति बुद्धिमान् ॥ तदैष तत्वतामेति न चापि मिश्रितां व्रजेत् ॥ प्रकृत्या चैव राजें
द्र मिश्रोह्यन्यश्च दृश्यते ॥ यदा तद्गुणजालं तत्प्राकृतं वै जुगुप्सते ॥ पश्यते च परं पश्यं तदा पश्यन्न संसृ
जेत् ॥ किं मया कृतमेवाद्योहं कालमिमंजनं ॥ मत्स्यो जालं ह्यविज्ञानादनुवर्तितवानिह ॥ अहमेव हि संमो
हान्मोहादन्यज्जनाज्जनं ॥ मत्स्यो यथोदकज्ञानादनुवर्तितवानहं ॥ मत्स्योन्यत्वं यथाज्ञानादुदकान्नाभि

मन्यते ॥ आत्मानं तद्दज्ञानादन्यं त्वंचेद्वेत्स्यहं ॥ ममास्त्वधिगुद्धस्य योहं ममनमिमं पुनः ॥ अनुवर्तितवा
न्मोहादन्यमन्यजनाजनं ॥ अयमत्र भवेद्वंधुरनेन सहमेक्षमं ॥ साम्यमेकत्वमायातो यादृशस्त्वादृशस्त्वं
हं ॥ तुल्यतामिह पश्यामि सदृशोहमनेनवै ॥ अयंहि विमलो व्यक्तमहमीदृशकस्तथा ॥ योहमज्ञानसंमो
हादज्ञयासंप्रवृत्तवान् ॥ ससंशयाहं निःसंगः स्थितः कालमिमं त्वहं ॥ अनयाहं वशीभूतः कालमेतमबुद्धवा
न् ॥ उच्चमध्यमनीचानां तामहं कथं सावसेतु ॥ समानयानयाचेह सहवासमहं कथं ॥ ग ग्राम्यबुद्धिसावस्था
दार्यैदानीं स्थिरोभव ॥ सहवासेन यास्यामि कालितद्धि वंचनात् ॥ वंचितोस्म्यनया यद्धि निर्विकारोविकार
या ॥ न चायमपराधोस्यो ह्यपराधो ह्ययं मम ॥ योहमत्राभवं सक्तः पराङ्मुखमुपास्थितः ॥ ततोस्मि
बहुरूपायास्थितो मूर्तिषु मूर्तिमान् ॥ अमूर्तिश्चापि मूर्तात्मा भ्रमत्वेन प्रपंचितः ॥ प्राकृतेन ममत्वेन ता
सुतादिष्विह योनिषु ॥ निर्ममस्य समत्वेनु किंकृतं तासु च ॥ योनीषु वर्तमानेन नप्रसंगेन चेतसा ॥ न ममा
त्वया कोयमहं कायकृतात्मया ॥ आत्मानं बहुधा ध्यात्वा येयं भूयो पुनस्त्विमां ॥ इदानीमप्रबुद्धोस्मि निर्म
मो निरहंकृतः ॥ ममत्वमनया नित्यमहं कायकृतात्मकं ॥ अपेत्याहमिमां हित्वा संश्रयिष्ये निरामयं ॥

मो॰क्ष॰

१६५

अनेनसाम्यंयास्यामिनानयाहमचेतसा।। क्षमेममसमस्तहानेकनैकत्वमनयासह।। एवंपरमसंबोधात्पंचविंशो
नुबुद्धवान्।। अक्षरत्वंनियच्छेतत्यक्त्वाक्षरमनामयं।। अव्यक्तंव्यक्तधर्माणंसगुणंनिर्गुणंतथा।। निर्गुणं
प्रथमंदृष्ट्वातादृग्भवतिमैथिल।। अक्षरक्षरयोरेतदुक्तंतवनिदर्शनं। मयेहज्ञानसंपन्नंयथाश्रुतिनि
दर्शनात्।। निःसंदिग्धंचसूक्ष्मंचविबुद्धंविमलंयथा।। प्रवक्ष्यामितुतेभूयस्तन्निबोधयथाश्रुतं।। सांख्ययोगौम
याप्रोक्तौशास्त्रद्वयनिदर्शनात्।। यदेवशास्त्रंसांख्योक्तंयोगदर्शनमेवतत्।। प्रबोधनकरंज्ञानंसांख्याना
मवनीपते।। विस्पष्टंप्रोच्यतेतत्रशिष्याणांहितकाम्यया।। बृहच्चैवमिदंशास्त्रमित्याहुर्विदुषाजनाः।। अस्मिं
श्चशास्त्रेयोगानांपुनर्वेदोपुरःसराः।। पंचविंशात्परंतत्वंपठ्यतेननराधिप।। सांख्यानांतुपरंतत्वंयथावद
नुवर्णितं।। बुद्धमप्रतिबुद्धत्वाद्बुध्यमानंचतत्वतः।। बुध्यमानंचबुद्धंचप्राहुर्योगनिदर्शनं।। ।। शांतौमोक्षध
र्मो।। वसिष्ठउवाच।। ।। अथबुद्धमथोबुद्धमिमंगुणविधिंशृणु। आत्मानंबहुधाकृत्वानान्येतत्वेतिच
पश्यते।। एतदेवंविकुर्वाणोबुध्यमानोनबुध्यते।। गुणान्धारयतेह्येषसृजत्याक्षिपतेतदा।। अजस्रंत्विहक्री
डार्थंविकरोतिजनाधिप।। अव्यक्तबोधनाच्चैवबुध्यमानंवदन्त्यपि।। नत्वेषबुध्यतेव्यक्तंसगुणंतातनिर्गु

१६५

त

पं॥ कदाचित्वेवखल्वेतदाहुरप्रतिबुद्धकं॥ बुध्यते यदि वाव्यक्तमेतद्वै पंचविंशकं॥ बुध्यमानेभवत्येवसंगात्म
क इति श्रुतिः॥ अनेनाप्रतिबुद्धेतिवदंतिव्यक्तमच्युतं॥ अव्यक्तबोधनाच्चापि बुध्यमानं वदंत्युत॥ पंचविंशंम
हात्मानं न चासावपि बुध्यते॥ षड्विंशं विमलं बुद्धमप्रमेयं सनातनं॥ सततं पंचविंशं च चतुर्विंशं च बुध्यते॥ दृश्या
दृश्ये ह्यनुगतं स्वभावेन महाद्युते॥ अव्यक्तमचतद्ब्रह्मबुध्यते तात केवलं॥ केवलं पंचविंशं च चतुर्विंशं न पश्य
ति॥ बुध्यमानो यदात्मानमन्योहमिति मन्यते॥ तदाप्रकृतिमानेष भवत्यव्यक्तलोचनः॥ बुध्यते च परां बुद्धिं वि
शुद्धाममलां यदा॥ षड्विंशो राजशार्दूल तदा बुद्धत्वमाव्रजेत्॥ ततस्त्यजति सोव्यक्तं सर्गप्रलयधर्मि वै॥
निर्गुणः प्रकृतिं वेद गुणयुक्तामचेतनो॥ ततः केवलधर्मासौ भवत्यव्यक्तदर्शनात्॥ केवलेन समागम्य विमु
क्तोत्मानमाप्नुयात्॥ एतत्तु तत्त्वमित्याहुर्निस्तत्त्वमजरामरं॥ तत्त्वसंश्रयणादेतत्तत्त्ववन्न च मानद॥ पंचविं
शति तत्वानां प्रवदंति मनीषिणः॥ न चैष तत्त्ववांस्तात निस्तत्त्वषबुद्धिमान्॥ एष मुंचति तत्त्वं हि क्षिप्रं बुद्ध
स्य लक्षणं॥ षड्विंशोहमिति प्राज्ञो गृह्यमाणोजरामरः॥ केवलेन बलेनैव समतां यात्यसंशयं॥ ष
ड्विंशेन प्रबुद्धेन बुध्यमानोप्यबुद्धिमान्॥ राजन्नानात्वमित्युक्तं सांख्यश्रुतिनिदर्शनात्॥ चेतनेन स

मेतस्य पंचविंशतिकस्य ह।। एकत्वेवै भवेदस्य यदा बुध्यान बुध्यते।। बुध्यमानो प्रबुद्धेन समतां याति मैथि
ल।। संगधर्मा भवत्येष निःसंगात्मा नराधिप।। निःसंगात्मानमासाद्य षड्विंशकमजं विभुं।। विभु
स्त्यजति चाव्यक्तं यदा त्वेतद्धि बुध्यते।। चतुर्विंशमसारं च षड्विंशस्य प्रबोधनात्।। एष ह्यप्रतिबुद्धश्च बुध्य
मानश्च तेनघ।। प्रोक्तो बुद्धश्च तत्वेन यथा श्रुतिनिदर्शना।। नानात्वैकत्वमेतावद्द्रष्टव्यं शास्त्रदर्शनात्।। मश
कोदुंबरे यद्वदन्यत्वं तद्वदेतयोः।। मत्स्योदके यथा तद्वदन्यत्वमुपलभ्यते।। एवमेवावगंतव्यं नानात्वैकत्व
मेतयोः।। एतद्विमोक्ष इत्युक्तमव्यक्ता ज्ञानसंहितं।। पंचविंशतिकस्याशु यो यं देहेषु वर्त्तते।। एष मोक्षयितव्ये
ति प्राहुरव्यक्तगोचरात्।। सो यमेव विमुंचेत नान्यथेति विनिश्चयः।। परश्च परधर्मा च भवत्येष समेत्य
वै।। विशुद्धधर्मा शुद्धेन बुद्धेन च स बुद्धिमान्।। विमुक्तधर्मा मुक्तेन समेत्य भरतर्षभ।। वियोगधर्मिणा चैव
विमुक्तात्मा भवत्यथ।। विमोक्षिणा विमोक्षश्च समेत्येह तथा भवेत्।। शुचिकर्मा शुचिश्चैव भवत्यमितदी
प्तिमान्।। विमलात्मा च भवति समेत्य विमलात्मना।। केवलात्मा तथा चैव केवलेन समेत्य वै।। स्वतंत्रश्च
स्वतंत्रेण स्वतंत्रत्वमवाप्नुते।। एतावदेतत्कथितं मया ते तथ्यं महाराज यथार्थतत्वं।। अमत्सरत्वं परि

ष्टहस्याचार्यंसनातनंब्रह्मविशुद्धमाद्यं।।नवेदनिष्ठस्यजनस्यराजन्प्रदेयमेतत्परंत्वयाभवेत्।।विधित्समानायनिबोध
कारणंप्रबोधहेतोःप्रणतस्यशासनात्।।नदेयमेतच्चतथानृतात्मनेशठायक्लीबायनजिह्मबुद्धये।।नपंडित
ज्ञानपरोपतापिनेदेयंस्तुदेयंचनिबोधयादृशे।।श्रद्धान्वितायाथगुणान्वितायपरापवादाद्विरतायनित्यं।।वि
शुद्धयोगायबुधायनित्यंक्रियाचतेवक्षमिणेहिताय।।विविक्तशीलायविधिप्रियायविवादहीनायबहुश्रुताय।।
विजानतेचैवनचाहितक्षमेदमेचशक्तायशमेवदेयं।।एतैर्गुणैर्हीनतमेनदेयमेतत्परंब्रह्मविशुद्धमाहुः।।नश्रे
यसायोक्ष्यतितादृशेकृतंधर्मप्रवक्तारमपात्रदानं।।पृथ्वीमिमांयद्यपिरत्नपूर्णांदद्यान्नदेयंत्विदमव्रताय।।जि
तेंद्रियायैतदसंशयंतेभवेत्प्रदेयंपरमंनरेंद्र।।करालमातेभयमस्तुकिंचिदेतच्छ्रुतंब्रह्मपरंत्वयाद्य।।यथावदु
क्तंपरमंपवित्रमशोकमत्यंतमनादिमध्यं।।अगाधजन्मामरणंचराजन्निरामयंवीतभयंशिवंच।।समी
क्ष्यमोहंत्यजचाद्यसर्वंज्ञानस्यतत्त्वार्थमिदंविदित्वा।।अवाप्यमेतद्धिमयासनातनाद्धिरण्यगर्भाद्धिततोनराधि
चेत प।।प्रसाद्ययत्नेनतमुग्रसंसनातनंब्रह्मयथाद्यवैत्वया।।पृष्टस्त्वयाचास्मियथानरेंद्रयथामयेदंत्वयिचोक्तम
द्य।।तथावाप्तंब्रह्मणोमेनरेंद्रमहाज्ञानंमोक्षविदांपरायणं।। ।।भीष्म उवाच।। ।।एतदुक्तंपरंब्रह्मयस्मान्नावर्त

तेपुनः॥ पंचविंशो महाराज परमर्षिनिदर्शनात्॥ पुनरावृत्तिमाप्नोति परंज्ञानमवाप्य च॥ नावबुध्यति तत्त्वेन बु
ध्यमानेजरामरं॥ एतन्निःश्रेयसकरं ज्ञानंते परमं मया॥ कथितं तत्त्वतस्तात श्रुत्वा देवर्षितो नृप॥ हिरण्यग
र्भाद्दृषिणा वसिष्ठेन महात्मना॥ वसिष्ठादृषिशार्दूलान्नारदोवासनिदं॥ नारदाद्विदितं मह्यमेतद्ब्रह्म सना
तनं॥ मा शुचः कौरवेंद्र त्वं श्रुत्वैतत्परमं पदं॥ येन क्षराक्षरे वित्ते भयं तस्य न विद्यते॥ विद्यते तु भयं तस्य यो नै
तद्वेत्ति पार्थिव॥ अविज्ञानाच्च मूढात्मा पुनःपुनरुपाद्रवत्॥ प्रेत्य जातिसहस्राणि मरणांतान्युपाश्नुते॥ देव
लोकं तथा तिर्यङ्मानुष्यमपि चाश्नुते॥ यदि शुध्यति कालेन तस्मादज्ञानसागरात्॥ यस्मादगाधादव्यक्तादुत्ती
र्णस्त्वं सनातनात्॥ तस्मात्त्वं विरजाश्चैव वयवित्तमस्कश्च पार्थिव॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्म उवाच॥ ॥
मृगयां विचरन्कश्चिद्विजने जनकात्मजः॥ वने ददर्श विप्रेंद्रमृषिं वंशधरं भृगोः॥ ॥उपासीनमुपासीनः प्रण
म्य शिरसा मुनिं॥ पश्चादनुमतस्तेन पप्रच्छ वसुमानिनं॥ भगवान्किमिदं श्रेयः प्रेत्य चापीह वा भवेत्॥ पुरुषस्या
ध्रुवे देहे कामस्य वशवर्तिनः॥ स सत्कृत्य परिपृष्टः सन् सुमहात्मा महातपाः॥ निजगाद ततस्तस्मै श्रेयस्करमिदं
वचः॥ ॥ऋषिरुवाच॥ ॥मनसोऽप्रतिकूलानि प्रेत्य चेह च वांछसि॥ भूतानां प्रतिकूलेभ्यो निवर्तस्व जितेंद्रियः॥

धर्मः सतां हितः पुंसां धर्मश्चैवाश्रयः सतां ॥ धर्माल्लोकास्त्रयस्तात प्रवृत्ताः सचराचराः ॥ स्वादुकामुककामानां वै
तृष्ण्यं किं न गच्छति ॥ मधु पश्यसि दुर्बुद्धे प्रपातं नानुपश्यसि ॥ यथात्ताने परिचयः कर्त्तव्यस्तत्फलार्थिना ॥ तथाध
र्मपरिचयः कर्त्तव्यस्तत्फलार्थिना ॥ असता धर्मकामेन विशुद्धं कर्म दुष्करं ॥ सतानु धर्मकामेन सुकरं कर्म दुष्करं ॥
वने ग्राम्यसुखाचारो यथा ग्राम्यस्तथैव सः ॥ यामेव वनसुखाचारो यथा वनचरास्तथा ॥ मनोवाक्कायिके धर्मे कुरुष्व
श्रां समाहितः ॥ निवृत्तौ वा प्रवृत्तौ वा संप्रधायगुणागुणान् ॥ नित्येच बहुदातव्यं साधुभ्यश्चानुसूयता ॥ यार्थितं व्रतशौचा
भ्यां सत्कृतं देशकालयोः ॥ शुभेन विधिना लब्धमर्हाय प्रतिपादयेत् ॥ क्रोधमुत्सृज्य दद्याच्च नानुतप्येन्न कीर्त्तयेत् ॥
अनृशंसः शुचिर्दान्तः सत्यवानार्जवे स्थितः ॥ योनिकर्मविशुद्धश्च पात्रं स्याद्वेदविद्द्विजः ॥ सत्कृता चैकपत्नी च जाया या
योनिरिहेष्यते ॥ ऋग्यजुःसामगो विद्वान् षट्कर्मी पात्रमुच्यते ॥ स एव धर्मः सोऽधर्मः तं तं प्रतिनरं भवेत् ॥ पात्रक
दे र्मविशेषेण देशकालाववेक्ष्य च ॥ लीलयाल्पं यथा गात्रात्प्रमृज्यात्तु रजः पुमान् ॥ बहुयत्नेन च महत् पापनिर्हरणं
तथा ॥ विरक्तस्य यथा सम्यग्वित्तं भवति भेषजं ॥ तथा निहृतिदोषस्य प्रेत्य धर्मः सुखावहः ॥ मानसं सर्वभूतेषु वर्त्तते वै
शुभाशुभे ॥ अशुभेभ्यः सदाक्षिप्य शुभेष्वेवावतारयेत् ॥ सर्वं सर्वेण सर्वत्र क्रियमाणं च पूजयेत् ॥ स्वधर्मे यच्च राग

स्ते कामं धर्मे सधीयतां ॥ अधृतात्म इष्टतो ति छ दुर्बुद्धि बुद्धिमान्भव ॥ अप्रशांतः प्रशाम्य त्वमप्राज्ञः प्राज्ञवच्चर ॥ ते
ज सांप्रत कृते प्राप्तुमुपायः सह चारिणा इह च प्रेत्य च श्रेयस्तस्य मूलं धृतिपुना ॥ राजर्षिरधृतिः स्वर्गात्पतितो हि म
हाभिषः ॥ ययातिः क्षीणपुण्योपि धृत्या लोकानवाप्तवान् ॥ तपस्विनां धर्मवतां विदुषां चोपसेवनात् ॥ प्राप्स्य
से विपुलां बुद्धिं तथा श्रेयोभिपत्स्यसे ॥ ॥ भीष्म उवाच ॥ ॥ स तु स्वभावसंपन्नस्तत्श्रुत्वा मुनिभाषितं ॥ विनि
वर्त्य मनः कामान्धर्मे बुद्धिं चकार ह ॥ ॥ शांतोमि स धर्मे ॥ ॥ युधिष्ठिरः ॥ ॥ धर्माधर्मविमुक्तं यद्विमुक्तं सर्वसंश्राया
त् ॥ जन्ममृत्युविमुक्तं च विमुक्तं पुण्यपापयोः ॥ यच्छिवं नित्यमुभयं नित्यमक्षरमव्ययं ॥ शुचि नित्यमनायासं तद्भवान्व
क्तुमर्हति ॥ ॥ भीष्म उवाच ॥ ॥ अत्र ते वर्तयिष्यामि इतिहासं पुरातनं ॥ याज्ञवल्क्यस्य संवादं जनकस्य च भारत ॥ या
ज्ञवल्क्यमृषिश्रेष्ठं दैवरातिर्महायशाः ॥ पप्रच्छ जनको राजा प्रश्नं प्रश्नविदां वरः ॥ ॥ जनक उवाच ॥ ॥ कतीन्द्रिया
णि विप्रर्षे कति प्रकृतयः स्मृताः ॥ किमव्यक्तं परं ब्रह्म तस्माच्च परतस्तु किं ॥ प्रभवं चाप्ययं चैव कालसंख्यां तथैव च ॥
वक्तुमर्हसि विप्रेंद्र त्वदनुग्रहकांक्षिणः ॥ अज्ञानात्परिपृच्छामि त्वं हि ज्ञानमयो निधिः ॥ तदहं श्रोतुमिच्छामि सर्वमेतदसंश
यं ॥ याज्ञवल्क्य उवाच ॥ ॥ श्रूयतां सौनीपाल यदेतदनुपृच्छसि ॥ योगानां परमं ज्ञानं सांख्यानां च विशेषतः ॥ न तवाविदि
तं किंचिन्मां तु जिज्ञासते भवान् ॥ पृष्टेन चापि वक्तव्य एष धर्मः सनातनः ॥ अष्टौ प्रकृतयः प्रोक्ता विकाराश्चापि षोडश ॥ तत्र

तु प्रकृतीरष्टौ प्राहुरध्यात्मचिंतकाः ॥ अव्यक्तं च महांतं च तथाहंकार एव च ॥ पृथिवी वायुराकाशमापो ज्योतिश्च पंच
मं ॥ एताः प्रकृतश्चाष्टौ विकारानपि मे शृणु ॥ श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणं च पंचमं ॥ शब्दः स्पर्शश्च रूपं च
रसो गंधस्तथैव च ॥ वाक् च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ॥ एते विशेषा राजेंद्र महाभूतेषु पंचसु ॥ बुद्धींद्रियाण्य
थैतानि सविशेषाणि मैथिल ॥ मनः षोडशकं प्राहुरध्यात्मगतिचिंतकाः ॥ त्वं चैवान्ये च विद्वांसस्तत्वबुद्धिविशारदाः ॥ अ
व्यक्ताच्च महानात्मा समुत्पद्यति पार्थिव ॥ प्रथमं सर्गमित्येतदाहुः प्राधानिकं बुधाः ॥ महतश्चाप्यहंकार उत्पन्नो हि नराधि
प ॥ द्वितीयं सर्गमित्याहुरेतद्बुद्ध्यात्मकं स्मृतं ॥ अहंकाराच्च संभूतं मनो भूतगुणात्मकं ॥ तृतीयः सर्ग इत्येष अहंकारि
क उच्यते ॥ मनसस्तु समुद्भूता महाभूता नराधिप ॥ चतुर्थं सर्गमित्येतन्मानसं विद्धि मे मतं ॥ शब्दस्पर्शश्च रूपं च
रसो गंधस्तथैव च ॥ पंचमं सर्गमित्याहुर्भौतिकं भूतचिंतकाः ॥ श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणं च पंचमं ॥ सर्गं तु षष्ठमि
त्याहुर्बहुचिंतात्मकं स्मृतं ॥ अधः श्रोत्रेंद्रियग्राममुत्पद्यति नराधिप ॥ सप्तमं सर्गमित्याहुरेतदैंद्रियकं स्मृतं ॥ ऊर्ध्व
श्रोतस्तथा तिर्यगुत्पद्यति नराधिप ॥ अष्टमं सर्गमित्याहुरेतदार्जवकं स्मृतं ॥ तिर्यक्स्रोतस्त्वधःश्रोत उत्पद्यति नराधि
प ॥ नवमं सर्गमित्याहुरेतदार्जवकं बुधाः ॥ एतानि नव सर्गाणि तत्वानि च नराधिप ॥ चतुर्विंशतिरुक्तानि यथाश्रुति निद
र्शनात् ॥ अत ऊर्ध्वं महाराज गुणस्यैतस्य तत्वतः ॥ महात्मभिरनुप्रोक्तां कालसंख्यां निबोध मे ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥

याज्ञवल्क्य उवाच॥ ॥अव्यक्तस्य नरश्रेष्ट कालसंख्यां निबोध मे॥पंचकल्पसहस्राणि द्विगुणान्यहरुच्यते॥रात्रिरेताव
ती चास्य प्रतिबुद्धो नराधिप॥सृजत्योषधिमेवाग्रे जीवनं सर्वदेहिनां॥ततो ब्रह्माणमसृजद्धिरण्यांडसमुद्भवं॥सा मूर्तिः
सर्वभूतानामित्येवमनुशुश्रुम॥संवत्सरमुषित्वांडे निष्क्रम्य च महामुनिः॥संदधे स महीं कृत्स्नां दिवमर्धं प्रजापतिः॥
द्यावापृथिव्योरित्येष राजन्वेदेषु पठ्यते॥तयोः शकलयोर्मध्यमाकाशमकरोत्प्रभुः॥एतस्यापि संख्यानं वेदवेदां
ग पारगैः॥दशकल्पसहस्राणि पादोनान्यहरुच्यते॥रात्रिमेतावती चास्य प्राहुरध्यात्मचिंतकाः॥सृजत्यहंकारमृषि
र्भूतं दिव्यात्मकं तथा॥चतुरश्चापरान्पुत्रान्देहात्पूर्वं महानृषिः॥ते वै पितॄणां पितरः श्रूयंते राजसत्तम॥देवाः पि
तॄणां च सुता देवैर्लोकाः समावृताः चराचरा नरश्रेष्ठ इत्येवमनुशुश्रुम॥परमेष्ठी त्वहंकारः सृजन्भूतानि पंच
नि धा॥पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं॥एतस्यापि शामाहुस्तृतीयामिह कुर्वतः॥पंचकल्पसहस्राणि ताव
देवाहरुच्यते॥शब्दः स्पर्शश्च रूपं च रसो गंधस्तथैव च॥एते विशेषा राजेंद्र महाभूतेषु पंचसु॥यैराविष्टानि भूतानि
अहन्यहनि पार्थिव॥अन्योन्यं स्पृहयंते ते अन्योन्यस्य हिते रताः॥अन्योन्यमतिवर्त्तंते अन्योन्यस्पर्द्धिनस्तथा॥ते
वध्यमाना ह्यन्योन्यं गुणैर्हारिभिरव्ययैः॥इहैव परिवर्त्तंते तिर्यग्योनिप्रवेशिनः॥त्रीणि कल्पसहस्राणि एतेषामहरु
च्यते॥रात्रिरेतावती चैव मानसश्च नराधिप॥मनश्चरति राजेंद्र चरितं सर्वमिंद्रियैः॥न चेंद्रियाणि पश्यंति मन ए

णानु पश्यति ॥ चक्षुः पश्यति रूपाणि मनसा तु न चक्षुषा मनसि व्याकुले चक्षुः पश्यन्नपि न पश्यति ॥ तथेंद्रियाणि सर्वा
णि पश्यंतीत्यभिचक्षते ॥ न चेंद्रियाणि पश्यंति मन एवात्र पश्यति ॥ मनस्युपरते राजन्निंद्रियोपरमो भवेत् ॥ तदिंद्रि
येषु परमं मनस्युपरमं भवेत् ॥ एवं मनःप्रधानानींद्रियाणि प्रभवयेत् ॥ इंद्रियाणां तु सर्वेषामीश्वरं मन उच्यते ॥ ए
तद्विशंतिख्यातानि सर्वाणीह महायशाः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ तत्वानां सर्गसंख्या च कालसं
ख्यातथैव च ॥ मया प्रोक्तानुपूर्वेण संहारमपि मे शृणु ॥ यथा संहरते जंतून् ससर्ज च पुनः पुनः अनादिनिधनो ब्रह्मा नि
त्यश्चाक्षर एव च ॥ अहःक्षयमथो बुद्ध्वा निशि स्वप्नमनास्तथा ॥ चोदयामास भगवानव्यक्तोहंकृतं नरं ॥ ततः शतसह
स्रांशुरव्यक्तेनाभिचोदितः ॥ कृत्वा द्वादशधात्मानमादित्यो ज्वलदग्निवत् ॥ चतुर्विधं महीपाल निर्दहत्याशु तेजसा ॥ ज
रायुजांडजस्वेदजोद्भिज्जं च नराधिप ॥ एतदुन्मेषमात्रेण विन संस्थाणुजंगमं ॥ कूर्मपृष्ठसमा भूमिर्भवत्यथ समं
ततः ॥ जगद्दग्ध्वामितबलः केवलं जगतीं ततः ॥ अंभसा बलिना क्षिप्रमापूरयति सर्वशः ॥ ततः कालाग्निमासाद्य
तदंभो याति संक्षयं ॥ विनष्टेंभसि राजेंद्र जाज्वल्यत्यनलो महान् ॥ तमप्रमेयोतिबलं ज्वलमानं विभावसुं ॥ ऊष्माणं सर्व
भूतानां सप्तार्चिषमथांजसा ॥ भक्षयामास भगवान्वायुरष्टात्मको बली ॥ विचरन्नमितप्राणस्तिर्यगूर्ध्वमधस्त
था ॥ तमप्रतिबलं भीममाकाशं ग्रसतेत्मना ॥ आकाशमप्यभिनदन्मनो ग्रसति चाधिकं ॥ मनो ग्रसति भूतात्मा

मोक्ष॰ सोहंकारःप्रजापतिः॥ अहंकारो महानात्मा भूतभव्यभविष्यवित्॥ तमप्यनुपमात्मानं विश्वशंभुः प्रजापतिः॥ अणि
१८० मा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः॥ सर्वतःपाणिपादांतःसर्वतोक्षिशिरोमुखः॥ सर्वतःश्रुतिमल्लोके सर्वमावृत्य
तिष्ठति हृदये सर्वभूतानां पर्वणोंगुष्ठमात्रतः॥ अथ ग्रसत्यनंतो हि महात्मा विश्वमीश्वरः॥ ततःसमभवत्सर्वमक्षयाव्य
यमव्रणं॥ भूतभव्यभविष्याणां स्रष्टारमनघं तथा॥ एषोप्ययस्ते राजेंद्र यथावत्समुदाहृतः॥ अध्यात्ममधिभूतं च
अधिदैवं च श्रूयतां॥ ॥शांतौ मोक्षधर्मे॥ ॥यज्ञवल्क्य उवाच॥ ॥पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्वदर्शिनः॥ गं
तव्यमधिभूतं च विष्णुस्तत्राधिदैवतं॥ पायुरध्यात्ममित्याहुर्यथातत्वार्थदर्शिनः॥ विसर्गमधिभूतं च मित्रस्तत्राधिदै
वतं॥ उपस्थोध्यात्ममित्याहुर्यथायोगप्रदर्शिनः॥ अधिभूतं तथानंदो दैवतं च प्रजापतिः॥ हस्तावध्यात्ममित्याहु
र्यथाश्रुतिनिदर्शिनः॥ कर्तव्यमधिभूतं च इंद्रस्तत्राधिदैवतं॥ वागध्यात्ममिति प्राहुर्यथाश्रुतिनिदर्शिनः॥ वक्तव्य
मधिभूतं तु वह्निस्तत्राधिदैवतं॥ चक्षुरध्यात्ममित्याहुर्यथाश्रुतिनिदर्शिनः॥ रूपमत्राधिभूतं च सूर्यश्चाप्यधिदैवतं॥
श्रोत्रमध्यात्ममित्याहुर्यथाश्रुतिनिदर्शिनः॥ शब्दमत्राधिभूतं तु दिशश्चात्राधिदैवतं॥ जिह्वामध्यात्ममित्याहुर्य॰
॥ रसएवाधिभूतं तु आपस्तत्राधिदैवतं॥ घ्राणमध्यात्ममित्याहुर्य॰॥ गंधएवाधिभूतं तु पृथिवी चाधिदैवतं॥ त्वग
ध्यात्ममिति प्राहुस्तत्वबुद्धिविशारदाः॥ स्पर्शमेवाधिभूतं तु पवनश्चाधिदैवतं॥ मनोध्यात्ममिति प्राहुर्यथाशास्त्रवि १८०

शारदाः॥ मंतव्यमिति स्मृतं तच्चंद्रमाश्चाधिदेवतं॥ अहंकारकमध्यात्ममाहुस्तत्वनिदर्शिनः॥ च्चाभिमानोधिभूतं तु बुद्धि
श्चात्राधिदेवतं॥ बुद्धिरध्यात्ममित्याहुर्यथावदभिदर्शिनः॥ बोद्धव्यमधिभूतं तु क्षेत्रज्ञोत्राधिदेवतं॥ एषा ते व्यक्तितो राज
न्विभूतिरनुदर्शिता॥ आदौ मध्ये तथा चांते यथातत्वेन तत्ववित्॥ प्रकृतिर्गुणान्विकुरुते स्वच्छंदेनात्मकाम्यया॥ क्री
डार्थं तु महाराज शतशोथ सहस्रशः॥ यथा दीपसहस्राणि दीपान्मर्त्याः प्रकुर्वते॥ प्रकृतिस्तथा विकुरुते पुरुषस्य गुणा
न्बहून्॥ सत्वमानंद उद्रेकः प्रीतिः प्राकाश्यमेव च॥ सुखं शुद्धित्वमारोग्यं संतोषः श्रद्दधानता॥ अकार्पण्यमसंरंभः
क्षमा धृतिरहिंसम॥ सत्यमानृण्यमार्दवं ह्रीचापलं॥ शौचमार्जवमाचारमलौल्यं हृद्यसंभवः॥ इष्टानिष्टवियोगा
नां कृतानामविकत्थनं॥ दानेन चानुग्रहणमस्पृहत्वं परार्थता॥ सर्वभूतदया चैव सत्वस्यैते गुणाः स्मृताः॥ रजोगुणानां सं
घानां रूपमैश्वर्यविग्रहे॥ अत्याशित्वमकारुण्यं सुखदुःखोपसेवनं॥ परापवादेषु रति विवादानां च सेवनं॥ अहंकार
मसत्कारश्चिंता वैरोपसेवनं॥ परितापोभिहरणं ह्रीनाशोनार्जवं तथा॥ भेदः पारुषता चैव कामक्रोधौ मदस्तथा॥
दर्पो द्वेषोतिवादश्च एते प्रोक्ता रजोगुणाः॥ तामसानां तु संघातं प्रवक्ष्याम्युपधार्यतां॥ मोहोप्रकाशस्तामिस्रमंधतामिस्र
संज्ञितं॥ मरणं चांधतामिस्रं तामिस्रं क्रोध उच्यते॥ तमसो लक्षणानीह भक्षणान्यतिरोचनं॥ भोजनानामपर्याप्ति
स्तथा पेयेष्वतृप्तता॥ गंधवासो विहारेषु शयनेष्वासनेषु च॥ दिवास्वप्नेतिवादे च प्रमादेषु च वै रतिः॥ नृत्यवादित्र

मोक्ष० गीतानां श्रुतानाञ्च बहुधानता॥ हिंषाध मविशेषाणामेते वै तामसा गुणाः॥ ॥शांतौ मोक्षधर्मे॥ ॥याज्ञवल्क्य उवाच॥ ॥
एते प्रधानस्य गुणास्त्रयः पुरुषसत्तम॥ कृत्स्नस्य चैव जगतस्तिष्ठंत्यनपगाः सदा॥ अव्यक्तरूपो भगवाञ्छतधा च स
१७१ हस्रधा॥ शतधा सहस्रधा चैव तथा शतसहस्रधा॥ कोटिशश्च करोत्येष प्रत्यगात्मनमात्मना॥ सात्विकस्योत्तमं स्था
नं राजसस्येह मध्यमं॥ तामसस्याधमं स्थानं प्राहुरध्यात्मचिंतकाः॥ केवलेनेह पुण्येन गतिमूर्ध्वामवाप्नुयात्॥
पुण्यपापेन मानुष्यमधर्मेणाप्यधोगतिं॥ द्वंद्वमेषां त्रयाणां तु संनिपातं च तद्वतः॥ सत्वस्य रजसश्चैव तमसश्च शृ
णुष्व तत्॥ सत्वस्य तु रजो दृष्टं रजसश्च तमस्तथा॥ तमसश्च तथा सत्वं सत्वस्याव्यक्तमेव च॥ अव्यक्तः सत्वसंयुक्तो दे
वलोकमवाप्नुयात्॥ रजःसत्वसमायुक्तो मनुष्येषूपपद्यते॥ रजस्तमोभ्यां संयुक्तस्तिर्यग्योनिषु जायते॥ राजसै
सत्वे स्तामसैर्युक्तो मानुष्यमाप्नुयात्॥ पुण्यपापवियुक्तानां स्थानमाहुर्महात्मनां॥ शाश्वतं चाव्ययं चैवमक्षयं चामृतं च
तत्॥ ज्ञानिनां संभवं श्रेष्ठं स्थानमव्रणमच्युतं॥ अतींद्रियमबीजं च जन्ममृत्युतमोनुदं॥ अव्यक्तस्थं परं यत्तत्पृ
ष्टस्तेहं नराधिप॥ स एष प्रकृतिस्थो हि तस्थुरित्यभिधीयते॥ अचेतना चैव मता प्रकृतिश्चापि पार्थिव॥ एतेनाधि
ष्ठिता चैव सृजते संहरत्यपि॥ ॥जनक उवाच॥ ॥अनादिनिधनावेतावुभावेव महामते॥ अमूर्तिमंतावचलावप्रकं
प्यौ गुणागुणौ॥ अग्राह्यावृषिशार्दूल कथमेको ह्यचेतनः॥ चेतनावांस्तथा चैकः क्षेत्रज्ञ इति भाषितः॥ त्वं हि विप्रें १७१

द कालेन न मोक्षधर्ममुपास्तते॥ साकल्ये मोक्षधर्मस्य श्रोतुमिच्छामि तत्त्वतः॥ चस्तित्वं केवलत्वं च विनाभावं तथै
वच॥ देवतानि च मे ब्रूहि देहं यान्त्याश्रितानि वै॥ तथैवोत्क्रमितः स्थानं देहिनो वै विपद्यतः॥ कालेन यद्धि प्राप्नोति
स्थानं तद्ब्रवीहि मे॥ सांख्यज्ञानं च तत्त्वेन पृथग्योगं तथैव च॥ अरिष्टानि च तत्त्वानि वक्तुमर्हसि सत्तम॥ विदितं सर्व
मेतत्ते पाणावामलकं यथा॥ ॥शांतो मोक्षधर्मे॥ ॥याज्ञवल्क्य उवाच॥ ॥न शक्यो निर्गुणस्तात गुणी कर्तुं वि
शां पते॥ गुणवांश्चाप्यगुणवान्यथा तत्त्वं निबोध मे॥ गुणैर्हि गुणवानेव निर्गुणश्चागुणस्तथा॥ प्राहुरेवं महात्मा
नो मुनयस्तत्त्वदर्शिनः॥ गुणस्वभावस्त्वव्यक्तो गुणांश्चैवातिवर्तते॥ उपयुंक्ते च तानेव स चैवाज्ञः स्वभावतः॥ अव्यक्तस्तु
न जानीते पुरुषाज्ञः स्वभावतः॥ न मत्तः परमोस्तीति नित्यमेवाभिमन्यते॥ अनेन कारणेनैतदव्यक्तं स्यादचेतनं॥
नित्यत्वाच्चाक्षरत्वाच्च क्षरत्वान्न तदन्यथा॥ यदाज्ञानेन कुर्वीत गुणसर्गं पुनः पुनः॥ यदात्मानं न जानीते तदाव्या
पीन मुच्यते॥ कर्तृत्वाच्चापि सर्गाणां सर्गधर्मी तथोच्यते॥ गुणानां प्रसवत्वाच्च प्रलयत्वाच्च तथैव च॥ उपेक्षत्वा
दनन्यत्वादभिमानाच्च केवलं॥ मन्यंते यतयः सिद्धा अध्यात्मज्ञा गतज्वराः॥ अनित्यं नित्यमव्यक्तं व्यक्तमेतद्धि शु
श्रुम॥ अव्यक्तैकत्वमित्याहुर्नानात्वं पुरुषस्तथा॥ सर्वभूतदयावंतः केवलं ज्ञानमास्थिताः॥ अन्यः स पुरुषोव्यक्तस्त्व
ध्रुवो ध्रुवसंज्ञकः॥ यथा मुंजइषीकाणां तथैवैतद्धि जायते॥ अन्यश्च मशकं विंद्यादन्यच्चोदुंबरं तथा॥ न चोदुंब

नसंयोगेर्मशकस्तत्र लिप्यते॥अन्य एव तथा मत्स्यतदन्यदुदकं स्मृतं॥न चोदकस्य स्पर्शेन मत्स्यो लिप्यति सर्वशः॥अ
न्योह्यग्निरुषाप्यन्या नित्यमेव मवेहि भोः॥न चोपलिप्यते सोग्निरुषासंस्पर्शनेन वै॥पुष्करं त्वन्य देवात्र तथान्यदु
दकं स्मृतं॥न चोदकस्य स्पर्शेन लिप्यते तत्र पुष्करं॥एतेषां सह संवासं निवासं चैव नित्यशः॥याथातथ्येन पश्यंति
न नित्यं प्राकृता जनाः॥येत्वन्यथैव पश्यंति न सम्यक्तेषु दर्शनं॥ते व्यक्तं निरयं घोरं प्रविशंति पुनः पुनः॥सांख्य द
र्शनमेतत्ते परिसंख्यानमुत्तमं॥एवं हि परिसंख्याय सांख्याः केवलतां गताः॥ये त्वन्ये तत्वकुशलास्तेषामेतन्नि
तः दर्शनं॥अ पंरं प्रवक्ष्यामि योगानामपि दर्शनं॥ ॥शांतो मोक्षधर्मे॥ ॥याज्ञवल्क्य उवाच॥ ॥सांख्यज्ञानं मया
प्रोक्तं योगज्ञानं निबोध मे॥यथाश्रुतं यथादृष्टं तत्वेन नृपसत्तम॥नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलं॥
तावुभावेकचर्यौ तुवुभावनिधनौ स्मृतौ॥पृथक्पृथक्तु पश्यंति येल्पबुद्धिरता नराः॥वयं तु राजन्नत्र पश्याम ए
कमेव तु निश्चयं॥यदेव योगाः पश्यंति तत्सांख्यैरपि दृश्यते॥एवं सांख्यं च योगं च यः पश्यति स तत्ववित्॥रुद्र
प्रधानानपरान्विद्धि योगानरिंदम॥तेनैव चाथ देहेन विचरंति दिशो दश॥यावद्धि प्रलयस्तात सूक्ष्मेणाष्टगुणे
न ह॥योगेन लोकान्विचरन्सुखं संन्यस्य चानघ॥वेदेषु चाष्टगुणितं योगमाहुर्मनीषिणः॥सूक्ष्ममष्टगुणं प्रा
हुर्नेतरं नृपसत्तम॥द्विगुणं योगकृत्यं तु योगानां प्राहुरुत्तमं॥सगुणं निर्गुणं चैव यथाशास्त्रनिदर्शनं॥धा

रणे चैव मनसः प्राणायामस्तु पार्थिव एकाग्रता च मनसः प्राणायामास्तथैव च ॥ प्राणायामो हि सगुणो निर्गुणं धारयेन्मनः ॥ यद्यद्दृश्यति मुंचन्वै प्राणान्मैथिलसत्तम ॥ वाताधिक्यं भवत्येव तस्मात्तन्नसमाचरेत् ॥ निशायाः प्रथमे यामे चोदना द्वादश स्मृताः ॥ मध्ये स्वप्नात्परे यामे द्वादशैव तु चोदनाः ॥ तदेवमुपशांतेन दांतेनैकांतशीलिना ॥ आत्मारामेण बुद्धेन योक्तव्योत्मा न संशयः ॥ पंचानामिंद्रियाणां तु दोषानाक्षिप्य पंचधा ॥ शब्दं रूपं तथा स्पर्शं रसं गंधं तथैव च ॥ प्रतिभामपवर्गं च प्रतिसंहृत्य मैथिल ॥ इंद्रियग्राममखिलं मनस्यभिनिवेश्य ह ॥ मनस्तथैवाहंकारे प्रतिष्ठाप्य नराधिप ॥ अहंकारं तथा बुद्धौ बुद्धिं च प्रकृतावपि ॥ एवं हि परिसंख्याय ततो ध्यायंति केवलं ॥ विरजस्कमलं नित्यमनंतं शुद्धमव्रणं ॥ तस्थुषं पुरुषं नित्यमभेद्यमजरामरं ॥ शाश्वतं चाव्ययं चैव ईशानं ब्रह्म चाव्ययं ॥ युक्तस्य तु महाराज लक्षणान्युपधारय ॥ लक्षणं तु प्रसादस्य यथा तृप्तः सुखं स्वपेत् ॥ निर्वाते तु यथा दीपो ज्वलेत्स्नेहसमन्वितः ॥ निश्चलोर्ध्वशिखस्तद्वद्युक्तमाहुर्मनीषिणः ॥ पाषाण इव मेघोत्थैर्यथा बिंदुभिराहतः ॥ नालं चालयितुं शक्यस्तथा युक्तस्य लक्षणं ॥ शंखदुंदुभिनिर्घोषैर्विविधैर्गीतवादितैः ॥ क्रियमाणैर्न कंपेत युक्तस्यैतन्निदर्शनं ॥ तैलपात्रं यथा पूर्णं कराभ्यां गृह्य पूरुषः ॥ सोपानमारुहेद्भीतस्तर्ज्यमानोसिपाणिभिः ॥ संयतात्मा भयात्तेषां न पात्राद्बिंदुमुत्सृजेत् ॥ तथैवोत्तरमागम्य एकाग्रमनसस्तथा ॥ स्थिरत्वादिंद्रियाणां तु निश्चलत्वात्त

येव च ॥ एवं युक्तस्य तु मुनिर्ल्लक्षणानुपलयेत् ॥ स्वयुक्तः पश्यते ब्रह्म यत्तत्परममव्ययं ॥ महतस्तमसो मध्ये स्थितं
ज्वलनसंनिभं ॥ एतेन केवलं याति त्यक्त्वा देहमसाक्षिकं ॥ कालेन महता राजन् श्रुतिरेषा समीरिता ॥ एतद्धियो
गयोगानां किमन्यद्योगलक्षणं ॥ विज्ञाय तद्धि मन्यंते कृतकृत्या मनीषिणः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ याज्ञवल्क्य
उवाच ॥ ॥ तथैवोत्क्रममाणं तु शृणुष्वावहितो नृप ॥ पद्भ्यामुत्क्रममाणस्य वैष्णवं स्थानमुत्तमं ॥ जंघाभ्यां तु वसून्
देवानाप्नुयादिति नः श्रुतं ॥ जानुभ्यां च महाभागान्साध्यान्देवानवाप्नुयात् ॥ पायुनोत्क्रममाणस्य मैत्रं स्था
नमवाप्नुयात् ॥ पृथिवीं जघनेनाथ ऊरुभ्यां प्रजापतिं ॥ पार्श्वाभ्यां मरुतो देवान्नासाभ्यामिंदुमेव च ॥ बाहुभ्यामिं
द्रमेवाहुरुरसा रुद्रमेव च ॥ ग्रीवायां च मुनिश्रेष्ठं नरमाप्नोत्यनुत्तमं ॥ विश्वेदेवान्मुखेनाथ दिशः श्रोत्रेण चाप्नुया
त् ॥ घ्राणेन गंधवहनं नेत्राभ्यामग्निमेव च ॥ भ्रूभ्यां चैवाश्विनौ देवौ ललाटेन पितॄनथ ॥ ब्रह्माणमाप्नोति विभुं
मूर्ध्ना देवाग्रजं तथा ॥ एतान्युत्क्रमणस्थानान्युक्तानि मिथिलेश्वर ॥ अरिष्टानि प्रवक्ष्यामि विहितानि मनीषिभिः ॥
संवत्सरवियोगस्य संभवंति शरीरिणः ॥ योरुंधतीं न पश्येत दृष्टपूर्वां कदाचन ॥ तथैव ध्रुवमित्याहुः पूर्णेंदुं दीपमे
व च ॥ खंडाभासे दक्षिणतस्ते पि संवत्सरायुषः ॥ परचक्षुषि चात्मानं ये न पश्यंति पार्थिव ॥ आत्मच्छायाकृतीभूतं
ते पि संवत्सरायुषः ॥ अतिद्युतिरतिप्रज्ञा अप्रज्ञा चाद्युतिस्तथा ॥ प्रकृतेर्विक्रियापत्तिः षण्मासान्मृत्युलक्षणं ॥ दुर्ण

नाभिर्यथा चक्रं छिद्रं सोमं प्रपश्यति ॥ तथैव च सहस्रांशुं सप्तरात्रेण मृत्युभाक् ॥ शवगंधमुपाघ्राय सुरभिं प्राप्य यो
नरः ॥ देवतायतनस्थस्तु सप्तरात्रेण मृत्युभाक् ॥ कर्णनासावनमनं दंतदृष्टिविरागता ॥ संज्ञालोपो निरूष्मितं
सद्योमृत्युनिदर्शनं ॥ अकस्माच्च स्रवेद्यं वद्यस्य वाममक्षि नराधिप ॥ मूर्द्धतश्चोत्पतेद्धूमः सद्योमृत्युनिदर्शनं ॥
एतावंति त्वरिष्टानि विदित्वा मानवोत्मवान् ॥ निशि चाहनि चात्मानं योजयेत्परमात्मनि ॥ प्रतीक्षमाणस्तत्कालं
यत्कालं प्रेतता भवेत् ॥ अथास्य नेष्टं मरणं स्थातुमिच्छेदिमां क्रियां ॥ सर्वगंधान्रसांश्चैव धारयीत नराधिप ॥
तथा हि मृत्युं जयति तत्परेणांतरात्मना ॥ ससांख्यधारणं चैव विदितात्मा नरर्षभ ॥ जयेच्च मृत्युं योगेन तत्परेणांत
रात्मना ॥ गच्छेत्प्राप्याक्षयं कृत्स्नमजन्म शिवमव्ययं ॥ शाश्वतं स्थानमचलं दुष्प्रापमकृतात्मभिः ॥ ॥ इति मोक्षधर्मे ॥ ॥ म
याज्ञवल्क्य उवाच ॥ ॥ अव्यक्तस्थं परं यत्तत्पृष्टस्तेहं नराधिप ॥ परं गुह्यमिमं प्रश्नं शृणुष्वावहितो नृप ॥ यथार्षेणेह
विधिना चरतावनतेन ह ॥ मयादित्यादवाप्तानि यजूंषि मिथिलाधिप ॥ महता तपसा देवस्तपिष्ठः सेवितो मया ॥ प्री
रागे तेन चाहं विभुना सूर्येणोक्तस्तदानघ ॥ वरं वृणीष्व विप्रर्षे यदिष्टं ते सुदुर्लभं ॥ तत्ते दास्यामि प्रीतात्मा मत्प्रसादो हि दुर्लभः ॥
ततः प्रणम्य शिरसा मयोक्तस्तपतां वरः ॥ यजूंषि नोपयुक्तानि क्षिप्रमिच्छामि वेदितुं ॥ ततो मां भगवानाह वितरिष्यामि ते द्वि
ज ॥ सरस्वतीह वाग्भूता शरीरे ते प्रवेक्ष्यति ॥ ततो मामाह भगवानास्यं त्वं विवृतं कुरु ॥ विवृतं च ततो मेस्यं प्रविष्टा च सरस्व

मोक्ष०

१८४

ती॥ ततो विदह्यमानोहं प्रविष्टोंभस्तदानघ। अविज्ञानादमर्षाच्च भास्करस्य महात्मनः॥ ततो विदह्यमानं मामुवा
ती च भगवान्रविः॥ मुहूर्तं सह्यतां दाहस्ततः शी भविष्यसि॥ शीतीकृतं च मां दृष्ट्वा भगवानाह भास्करः॥ प्रतिष्ठास्य
ति ते वेदः सखिलः सोत्तरो द्विज॥ कृत्स्नं च शतपथं चैव प्रणेष्यसि द्विजर्षभ॥ तस्यांते चापुनर्भावे बुद्धिस्तव भविष्यति
प्राप्स्यसे च यदिष्टं तत्सांख्ययोगेप्सितं पदं॥ एतावदुक्त्वा भगवानस्तमेवाभ्यवर्तत॥ ततोनुव्याहृतं श्रुत्वा गते दे
वे विभावसौ॥ गृहमागत्य संहृष्टोचिंतयं वै सरस्वतीं॥ ततः प्रवृत्तातिशुभा स्वरव्यंजनभूषिता॥ ॐकारमादितः कृ
त्वा मम देवी सरस्वती॥ ततोहमर्घ्यं विधिवत्सरस्वत्यै न्यवेदयं॥ तपतां च वरिष्ठाय निषण्णस्तत्परायणः॥ ततः शतपथं
कृत्स्नं सरहस्यं ससंग्रहं॥ चक्रे सपरिशेषं च हर्षेण परमेण ह॥ कृत्वा चाध्ययनं तेषां शिष्याणां शतमुत्तमं॥ विप्रि
यार्थं सशिष्यस्य मातुलस्य महात्मनः॥ मिषतो देवलस्यापि ततोर्द्धं हृतवानहं॥ स्ववेददक्षिणायाथ विमर्दे मा
तुलेन ह॥ सुमंतुनाथ पैलेन तथा जैमिनिना च वै॥ पित्रा ते मुनिभिश्चैव ततोहमनुमानितः॥ दश पंच च प्राप्तानि य
जूंष्यर्कान्मयानघ॥ तथैव रोमहर्षेण पुराणमवधारितं॥ बीजमेतत्पुरस्कृत्य देवीं चैव सरस्वती॥ सूर्यस्य चा
नुभावेन प्रवृत्तोहं नराधिप॥ कर्तुं शतपथं वेदमपूर्वं च कृतं मया॥ यथाभिलषितं मार्गं तथा तच्चोपपादितं॥ शि
ष्याणामखिलं कृत्स्नमनुज्ञातं ससंग्रहं॥ सर्वे च शिष्याः शुचयो गताः परमहर्षिताः॥ शाखाः पंचदशेमास्तु विद्या

१८५

भास्कन देशिताः ॥ प्रतिष्ठाप्य यथाकामं वेद्यं तदनुचिंतयेत् ॥ किमब्राह्मणएयमृतं किंच वेद्यमनुत्तमं ॥ चिंतयंतत्र चा
गत्य गंधर्वो मामपृच्छत ॥ विश्वावसुस्ततो राजन् वेदांतज्ञानकोविदः ॥ चर्विंशं ततो पृष्ठप्रश्नान्वेदद पार्थिव ॥ पंच
विंशतिसंप्रश्नं पप्रच्छान्वीक्षिकीं तदा ॥ विश्वाविश्वं तथाश्वं च मित्रं वरुणमेव च ॥ ज्ञानं ज्ञेयं तथोज्ञो ज्ञः कस्तपा अ
तपास्तथा ॥ सूर्यादः सूर्य इति च विद्याविद्ये तथैव च ॥ वेदावेद्यं तथा राजन्नचलं चलमेव च ॥ अपूर्वमक्षयं क्ष
य्यमेतत्प्रश्नमनुत्तमं ॥ अथोक्तश्च महाराज राजा गंधर्वसत्तमः ॥ पृष्टवाननुपूर्वेण प्रश्नमर्थविदुत्तमं ॥ मुहूर्तं मृ
ष्यतां तावद्यावदेवं विचिंतयेत् ॥ बाढमित्येव कृत्वा च तूष्णीं गंधर्व आस्थितः ॥ ततोनुचिंतयमहं भूयो देवीं सरस्व
तीं ॥ मनसा स च मे प्रश्नो दध्नो घृतमिवोद्धृतं ॥ तत्रोपनिषदं चैव परिशेषं च पार्थिव ॥ मथ्नामि मनसा तात दृष्ट्वा
चान्वीक्षिकीं परां ॥ चतुर्थी राजशार्दूल विद्यैषा सांपरायिका ॥ उदीरिता मया तुभ्यं पंचविंशादधिष्ठितं ॥ अथो
क्तस्तु मया राजन् राजा विश्वावसुस्तदा ॥ श्रूयतां यद्भवानस्मान् प्रश्नं संपृष्टवानिह ॥ विश्वाविश्वेति यदिदं गंध
र्वैद्वानुपृछति ॥ विश्वाव्यक्तं परं विद्या भूतभव्यभयंकरं ॥ त्रिगुणं गुणकर्तृत्वाद्विश्वोन्यो निष्कलस्तथा ॥ अ
श्वस्तथैव मिथुनमेवमेवानुदृश्यते ॥ अव्यक्तं प्रकृतिं प्राहुः पुरुषेति च निर्गुणं ॥ तथैव मित्रं पुरुषं वानु पं

मोक्ष०
१८५

प्रकृतिंतथा ।। ज्ञानंतुप्रकृतिंविप्राहुर्ज्ञेयंनिष्कलमेवच ।। अज्ञश्चयतःपुरुषस्तस्मान्निष्कल उच्यते ।। सकलपाश्वत
पाशोक्तः कोसौपुरुषउच्यते ।। तपःप्रकृतिरित्याहुरतपानिष्कलःस्मृतः ।। तथैवावेद्यमव्यक्तं वेद्यःपुरुषउच्यते ।।
चलाचलमितिप्रोक्तं त्वयातदपिमेशृणु ।। चलांप्रकृतिंप्राहुःकारणंक्षयसर्गयोः ।। आक्षेपसर्गयोःकर्त्ता निश्च
लःपुरुषःस्मृतः ।। तथैववेद्यमव्यक्तमवेद्यःपुरुषस्तथा ।। अज्ञावुभौध्रुवौचैव अक्षयौचाप्युभावपि ।। अजौ
नित्यावुभौप्राहुरध्यात्मगतिनिश्चयात् ।। अक्षयत्वात्प्रजननेअजमत्राहुरव्ययं ।। अक्षयंपुरुषंप्राहुःक्षयोह्य
स्यनविद्यते ।। गुणक्षयत्वात्प्रकृतिःकर्तृत्वादक्षयंबुधाः ।। एषातेन्वीक्षिकीविद्याचतुर्थीसांपरायिकी ।। विद्योपे
तंधनंकृत्वाकर्मणांनित्यकर्मणि ।। एकांतदर्शनावेदाःसर्वेविश्वावसोस्मृताः ।। जायंतेचम्रियंतेचयस्मिन्नेतेयतश्च्यु
ताः ।। वेदार्थंयेनजानंतिवेद्यंगंधर्वसत्तम ।। सांगोपांगानपियदियश्चवेदानधीयते ।। वेदवेद्यंनजानीतेवेदभार
वहोहिसः ।। येघृतार्थीखरीक्षीरंमथेद्गंधर्वसत्तम ।। विष्टांतत्रानुपश्येतनमंडंनचवैघृतं ।। तथावेद्यमवेद्यंच
वेदविद्योनविंदति ।। सकेवलंमूढमतिर्ज्ञानभारवहःस्मृतः ।। द्रष्टव्यौनित्यमेवैतौतत्परेणांतरात्मना ।। यथा
स्यजन्मनिधनेनस्यवेतांपुनःपुनः ।। अजस्रंजन्मनिधनंचिंतयित्वात्रयीमिमां ।। परित्यज्यक्षयमिहअक्षयंधर्म   १८५

त्मा स्थितः॥ यदा तु पश्यतेत्यंतं महन्यहनि काश्यप॥ तथा स केवलीतः षड्विंशमनुपश्यति॥ अन्यश्च शाश्वतो व्यक्त
स्तथान्य पंचविंशकः॥ तस्य द्वावनुपश्येतां तमेकमिति साधवः॥ तेनैतन्नाभिनंदंति पंचविंशकमच्युतं॥ जन्ममृत्यु
भयोद्वेगाः सांख्याश्च परमेषिणः॥ ॥विश्वावसुरुवाच॥ ॥पंचविंशं यदेतत्ते प्रोक्तं ब्राह्मणसत्तम॥ तथा तन्न तथा
वेति तद्भवान्वक्तुमर्हसि॥ जैगीषव्यस्यासितस्य देवलस्य यथाश्रुतं॥ पराशरस्य विप्रर्षेर्वार्षगण्यस्य धीमतः॥
भृगोः पंचशिखस्यास्य कपिलस्य शुकस्य च॥ गौतमस्यार्ष्टिषेणस्य गार्ग्यस्य च महात्मनः॥ नारदस्यासुरेश्चै
व पुलस्त्यस्य च धीमतः॥ सनत्कुमारस्य ततः शुक्रस्य च महात्मनः॥ कश्यपस्य पितुश्चैव पूर्वमेव मया श्रु
तं॥ तदनंतरं रुद्रस्य विश्वरूपस्य धीमतः॥ देवतेभ्यः पितृभ्यश्च दैतेयेभ्यस्ततस्ततः॥ प्राप्तमेतन्मया कृत्स्नं वे
द्यं नित्यं वदंत्युत॥ तस्मात्तद्वै भवद्बुध्या श्रोतुमिच्छामि ब्राह्मण॥ भवान्प्रबर्हः शास्त्राणां प्रगल्भश्चातिबुद्धिमान्॥
न तवाविदितं किंचिद्भवाञ्छ्रुतिनिधिः स्मृतः॥ कथ्यते देवलोके च पितृलोके च ब्राह्मण॥ ब्रह्मलोकगताश्चैव क
थयंति महर्षयः॥ मतिश्च तपतां शश्वदादित्यस्तव भाषिता॥ सांख्यज्ञानं त्वया ब्रह्मन्नवाप्तं कृत्स्नमेव च॥ तथै
व योगशास्त्रं च याज्ञवल्क्य विशेषतः॥ निःसंदिग्धं प्रबुद्धस्त्वं बुध्यमानश्चराचरं॥ श्रोतुमिच्छामि तज्ज्ञानं घृ

तमंउमङ्स्यंयथा।। ।।याज्ञवल्क्यः।। ।।कृत्स्नधारिणमेवत्वां मन्ये गंधर्वसत्तम।। जिज्ञाससे च मां राजंस्तन्निबोध
यथाश्रुतं।। अबुध्यमानां प्रकृतिं बुध्यते पंचविंशकः।। न तु बुध्यति गंधर्व प्रकृतिः पंचविंशकं।। अनेन प्रतिबोधेन प्रधा
नं प्रवदंति तत्।। सांख्ययोगाश्च तत्त्वज्ञा यथाश्रुतिनिदर्शनात्।। पश्यंस्तथैव चापश्यन् पश्यत्यन्यः सदानघ।। षड्
विंशं पंचविंशं च चतुर्विंशं च पश्यति।। न तु पश्यति पश्यंस्तु यश्चैनमनुपश्यति।। पंचविंशोभिमन्येत नान्योस्ति
परमो मम।। न चतुर्विंशको ग्राह्यो मनुजैर्ज्ञानदर्शिभिः।। मत्स्यश्चोदकमन्वेति प्रवर्तेत प्रवर्तनात्।। यथैव बुध्यते
मत्स्यस्तथैषोप्यनुबुध्यते।। सस्नेहः सहवासाच्च साभिमानाच्च नित्यशः।। स निमज्जति कालस्य यदैकत्वं न बुध्य
ते।। उन्मज्जति हि कालस्य ममत्वेनाभिसंवृतः।। यदा तु मन्यतेन्योहमन्य एष इति द्विज।। तदा केवलीभूतः षड्विं
शमनुपश्यति।। अन्यश्च राजन्नवरस्तथान्यः पंचविंशकः।। तत्स्थानाच्चानुपश्यंति एक एवेति साधवः।। तेनै
तन्नाभिनंदंति पंचविंशकमच्युतं।। जन्ममृत्युभयाद्भीता योगाः सांख्याश्च काश्यप।। षड्विंशमनुपश्यंतः शुच
यस्तत्परायणाः।। यदा स केवलीभूतः षड्विंशमनुपश्यति।। तदा स सर्वविद्विद्वान्न पुनर्जन्म विंदति।। एवमप्र
तिबुद्धश्च बुध्यमानश्च तेनघ।। बुद्धश्चोक्तो यथातत्त्वं मया श्रुतिनिदर्शनात्।। पश्यापश्यं यो न पश्येत् क्षेम्यं तत्त्वं च

च काश्यप॥ केवलां केवलं चाद्यं पंचविंशं प्रपंचयत्॥ ॥ विश्वावसुरुवाच॥ ॥ तथ्यं शुभं चैतदुक्तं त्वया विप्रोस
म्यक्क्षेम्यं दैवताद्यं यथावत्॥ स्वस्त्यक्षयं भवतश्चास्तु नित्यं बुध्यं सदा बुद्धियुक्तं नमस्ते॥ ॥ याज्ञवल्क्यः॥
एवमुक्त्वा संप्रयातो दिवं सं विभ्राजन्वै श्रीमता दर्शनेन॥ हृष्टश्च तुष्ट्या परया भिनंद्य प्रदक्षिणं मम कृत्वा महात्मा॥ ब्रह्मादी
नां खेचराणां क्षितौ च ये चाधस्तात्संवसंते नरेंद्र॥ तत्रैव तद्दर्शनं दर्शयन्वै सम्यक्क्षेम्यं ये पथं संश्रिता वै॥ सांख्याः सर्वे सां
ख्यधर्मे रताश्च तद्वद्योगा योगधर्मे रताश्च॥ ये चाप्यन्ये मोक्षकामा मनुष्यास्तेषामेतद्दर्शनं ज्ञानदृष्टं॥ ज्ञानान्मोक्षो जाय
ते राजसिंह नास्त्यज्ञानादेवमाहुर्नरेंद्र॥ तस्माज्ज्ञानं तत्त्वतोन्वेषितव्यं येनात्मानं मोक्षयेज्जन्ममृत्योः॥ प्राप्य ज्ञानं ब्राह्मणा
त्क्षत्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णं॥ श्रद्धातव्यं श्रद्दधानेन नित्यं न श्रद्धिनं जन्ममृत्यू विशेतां॥ सर्वे वर्णा ब्राह्मणा
ब्रह्मजाश्च सर्वे नित्यं व्याहरंते च ब्रह्म॥ तत्त्वं शास्त्रं ब्रह्मबुध्या ब्रवीमि सर्वं विश्वं ब्रह्म चैतत्समस्तं॥ ब्रह्मास्यतो ब्राह्मणाः संप्र
सूता बाहुभ्यां वै क्षत्रियाः संप्रसूताः॥ नाभ्यां वैश्याः पादतश्चापि शूद्राः सर्वे वर्णा नान्यथा वेदितव्याः॥ अज्ञानेतः कर्मयोनिं भ
जंते तां तां राजंस्ते यथा यांत्यभावं॥ तथा वर्णा ज्ञानहीनाः पतंते घोरादज्ञानात्प्राकृतं योनिजालं॥ तस्माज्ज्ञानं सर्वतो मार्गि
तव्यं सर्वत्रस्थं चैतदुक्तं मया ते॥ तत्स्थो ब्रह्मा तस्थिवांश्चापरो यस्तस्मै नित्यं मोक्षमाहुर्नरेंद्र॥ यत्ते पृष्टं तन्मया चोपदि
ष्टं याथातथ्यं तद्विशोको भवस्व॥ राजन्गच्छस्वैतदर्थस्य पारं सम्यक्प्रोक्तं स्वस्ति तेत्वस्तु नित्यं॥ ॥ भीष्म उवाच॥ ॥

सएवमनुज्ञातस्तत्र याज्ञवल्क्येन धीमता ।। प्रीतिमानभवद्राजा मिथिलाधिपतिस्तदा ।। गते मुनिवरे तस्मिन्कृते चापि प्रद
क्षिणं दैवरातिर्नरपतिरासीनस्तत्र मोक्षवित् ।। गोकोटिं स्पर्शयामास हिरण्यं तु तथैव च ।। रत्नांजलिमथैकं च ब्राह्मणेभ्यो
ददौ तदा ।। विदेहराज्यं च तदा प्रतिष्ठाप्य सुतस्य वै ।। यतिधर्ममुपाश्रित्य अवसन्मिथिलाधिप ।। सांख्यज्ञानमधीयानो यो
गशास्त्रं च कृत्स्नशः ।। धर्माधर्मं च राजेंद्र प्राकृतं परिगर्ह्य च ।। अनंत इति कृत्वा स नित्यं केवलमेव च ।। धर्माधर्मे पुण्य
पापे सत्यासत्ये तथैव च ।। जन्ममृत्यू च राजेंद्र प्राकृतं तदचिंतयत् ।। व्यक्ताव्यक्तस्य कर्मेदमिति नित्यं नराधिप ।। पश्यंति यो
गाः सांख्याश्च स्वशास्त्रकृतलक्षणाः ।। इष्टानिष्टविमुक्तं हि तस्थौ ब्रह्म परात्परं ।। नित्यं तमाहुर्विद्वांसः शुचिं तस्माच्छु
चिर्भव ।। दीयते यच्च लभते दत्तं यच्चानुमन्यते ।। ददाति च नरश्रेष्ठ प्रतिगृह्णाति यच्च ह ।। ददात्यव्यक्तमेवैतत्प्रतिगृह्णाति
यच्च वै ।। आत्मा ह्येवात्मनो ह्येकः कोन्यस्तस्मात्परो भवेत् ।। एवं मन्यस्व सततमन्यथा मा विचिंतय ।। यस्याव्यक्तं न विदि
तं सगुणं निर्गुणं पुनः ।। तेन तीर्थानि यज्ञाश्च सेवितव्या विपश्चिता ।। न स्वाध्यायैस्तपोभिर्वा यज्ञैर्वा कुरुनंदन ।। लभते
व्यक्तिकं स्थानं ज्ञात्वाव्यक्तं महीपते ।। तथैव महतः स्थानमाहंकारिकमेव च ।। अहंकारात्परं चापि स्थानानि समवाप्नुया
त् ।। ये त्वव्यक्तात्परं नित्यं जानते शास्त्रतत्पराः ।। जन्ममृत्युविमुक्तं च विमुक्तं सदसच्च यत् ।। एतन्मयाप्तं जनकात्पुरस्तात्तेना
पि चाप्तं नृप याज्ञवल्क्यात् ।। ज्ञानेविशिष्टं न तथा हि यज्ञा ज्ञानेनदुर्गं तरते न यज्ञैः ।। दुर्गं जन्म निधनं चापि राजन्न भौति

कं स्थानं विदो वदंति॥ यज्ञैस्तपोभिर्नियमैर्व्रतैश्च दिवं समासाद्य पतंति भूमौ॥ तस्मादुपास्स्व परमं महच्छुचिः शिवं विमोक्षं
विमलं पवित्रं॥ क्षेत्रं ज्ञात्वा पार्थिवं ज्ञानयज्ञमुपास्स्व वै तत्वमृषिर्भविष्यसि॥ उपनिषदमुपाकरोत्तथासौ जनकान्नृप
स्य पुराहि याज्ञवल्क्यः॥ यदुपगणित शाश्वताव्ययं तच्छुभममृतत्वमशोकमृच्छति॥ ॥ शांतौ मोक्षधर्मे॥ ॥युधिष्ठि
रउवाच॥ ॥ऐश्वर्यं वा महत्प्राप्य धनं वा भरतर्षभ॥ दीर्घमायुरवाप्याथ कथं मृत्युमतिक्रमेत्॥ तपसा वा सुमहता क
र्मणा वा श्रुतेन वा॥ रसायनप्रयोगैर्वा कैर्नाप्नोति जरांतकौ॥ ॥भीष्म उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरात
नं॥ भिक्षोः पंचशिखस्येह संवादं जनकस्य च॥ वैदेहो जनको राजा महर्षिं वेदवित्तमं॥ पर्यपृच्छत्पंचशिखं छिन्नधर्मा
र्थसंशयं॥ केन वृत्तेन भगवन्नतिक्रामेज्जरांतकौ॥ तपसा वाथ वा बुध्या कर्मणा वा श्रुतेन वा॥ एवमुक्तः स वैदेहं प्रत्युवाच परोक्षवित्
निवृत्तिर्न परोरस्ति नानिवृत्तिः कथंचन॥ नह्यहानि निवर्तंते न मासा न पुनः क्षपाः॥ सोयं प्रपद्यते ध्वानं चिरायध्रुवमध्रु
वः॥ सर्वभूतसमुच्छेदः स्रोतसेवोह्यते सदा॥ उह्यमानं निमज्जंतमप्लवे कालसागरे॥ जरामृत्युमहाग्राहे न किंचिद
भिपद्यते॥ नैवास्य कश्चिद्भवति नासौ भवति कस्यचित्॥ पथि संगतमेवेदं दारैरन्यैश्च बंधुभिः॥ नायमत्यंतसंवासो
लब्धपूर्वो हि केनचित्॥ क्षिप्यंते तेन तेनैव निष्ठनंतः पुनः पुनः॥ कालेन जातापाता हि वायुनेवाभ्रसंचयाः॥ जरामृत्यू हि भू
तानां खादितारौ वृकाविव॥ बलीनां दुर्बलानां च ह्रस्वानां महतामपि॥ एवं भूतेषु भूतात्मा नित्यभूतो ध्रुवेषु च॥ के

थं हि हृष्येऽज्ञाते भ्रमते भुवनसंप्लवे।। कुतोहमागतः कोस्मि क्व गमिष्यामि कस्य वा।। कस्मिन्स्थितः क्व भविता कस्मात्किम
नुशोचसि।। दृष्ट्वा स्वर्गस्य कोन्योस्ति तथैव नरकस्य वा।। आगमांस्त्वनतिक्रम्य दद्याच्चैव यजेत च।। ।।शांतौ मोक्षधर्मे।।
।। ।।युधिष्ठिर उवाच।। ।।अपरित्यज्य गार्हस्थ्यं कुरुराजर्षिसत्तम।। कः प्राप्तं विनयाद्बुध्या मोक्षतत्वं वदस्व मे।। संन्यस्यते
यथात्मायं व्यक्तस्यात्मा यथा च यत्।। परं मोक्षस्य यच्चापि तन्मे ब्रूहि पितामह।। ।।भीष्म उवाच।। ।।अत्राप्युदाहरं
तीममितिहासं पुरातनं।। जनकस्य च संवादं सुलभायाश्च भारत।। संन्यासफलिकः कश्चिद्बभूव नृपतिः पुरा।। मैथि
लो जनको नाम धर्मध्वज इति श्रुतः।। स वेदे मोक्षशास्त्रे च स्वे च शास्त्रे कृतश्रमः।। इंद्रियाणि समाधाय शशास वसु
धामिमां।। तस्य वेदविदः प्राज्ञाः श्रुत्वा तां साधुवृत्ततां।। लोके पुंस्पृहयंत्यन्ये पुरुषाः पुरुषेश्वर।। अथ धर्मयुगे तस्मिन्यो
गधर्ममनुष्ठिता।। महीमनुचचारैका सुलभा नाम भिक्षुकी।। तयाजगदिदं कृत्स्नमटंत्या मिथिलेश्वर।। तंतत्र श्रु त्र
ते मोक्षे कथ्यमानस्त्रिदंडिभिः।। सा तिसूक्ष्माकथां श्रुत्वा तथ्यं नेति ससंशया।। दर्शने जातसंकल्पा जनकस्य बभूव ह।।
तत्र सा विप्रहायाथ पूर्वरूपं हि योगतः।। अबिभ्रदनवद्यांगी रूपमन्यदनुत्तमं।। चक्षुर्निमेषमात्रेण लघ्वस्त्रगतिगा
मिनी।। विदेहानां पुरीं सुभ्रूर्जगाम कमलेक्षणा।। सा प्राप्य मिथिलां रम्यां प्रभूतजनसंकुलां।। भैक्षचर्यापदेशेन ददर्श
मिथिलेश्वरं।। राजा तस्याः परं दृष्ट्वा सौकुमार्यं वपुस्तदा।। केयं कस्य कुतो वेति बभूवागतविस्मयः।। ततोस्याः स्वाग

तं कृतातिथ्यां दिश्य च वचनासनं ॥ पूजितां पादशौचेन वरान्नेनाप्यतर्पयत् ॥ अथ भुक्तवती प्रीता राजानं मंत्रिभिर्वृतं ॥ सर्वभा
ष्यविदां मध्ये चोदयामास भिक्षुकी ॥ सुलभा त्वस्य धर्मेषु मुक्तो नेति ससंशया ॥ सत्वं सत्वेन योगज्ञा प्रविवेश महीपते ॥
नेत्राभ्यां नेत्रयोरस्य रश्मीन् संयम्य रश्मिभिः ॥ सा स्म संचोदयिष्यंती योगबंधैर्बबंध ह ॥ जनकस्तु स्मयन्राजा भा
वमस्या विशेषयन् ॥ प्रतिजग्राह भावेन भावमस्या नृपोत्तम ॥ तदेकस्मिन्नधिष्ठाने संवादः श्रूयतामयं ॥ छत्रादि
षु विमुक्तस्य मुक्तायाश्च त्रिदंडके ॥ ॥ जनक उवाच ॥ ॥ भगवत्याः क्व चर्येयं कृता क्व च गमिष्यसि ॥ कस्य च त्वं कुतो वे
पप्रच्छैनां महीपतिः ॥ श्रुते वयसि जातौ च सद्भावो नाधिगम्यते ॥ एष्वर्थेषूत्तरं तस्मात्सवेद्यं मत्समागमे ॥ छत्रादिषु विशेषे
षु मुक्तं मां विद्धि तत्वतः ॥ स त्वां मंतुमिच्छामि मानार्हासि मतासि मे ॥ यस्माच्चैतन्मया प्राप्तं ज्ञानं वैशेषिकं पुरा ॥ यस्य ना
न्यः प्रवक्तास्ति मोक्षं तमपि मे शृणु ॥ पाराशर सगोत्रस्य वृद्धस्य सुमहात्मनः ॥ भिक्षोः पंचशिखस्याहं शिष्यः परमसं
मतः ॥ सांख्यज्ञाने च योगे च महीपालविधौ तथा ॥ त्रिविधे धर्ममोक्षेस्मिन्गताध्वा छिन्नसंशयः ॥ स यथा शास्त्रदृष्टेन
मार्गेणेह परिव्रजन् ॥ वार्षिकांश्चतुरो मासान् पुरा मयि सुखोषितः ॥ तेनाहं सांख्यमुख्येन सुदृष्टार्थेन तत्वतः ॥ श्रावि
तस्त्रिविधं मोक्षं न च राज्याद्विचालितः ॥ सोहं तामखिलां वृत्तिं त्रिविधां मोक्षसंहितां ॥ मुक्तरागश्चराम्येकः पदे परमके
स्थितः ॥ वैराग्यं पुनरेतस्य मोक्षस्य परमो विधिः ॥ ज्ञानादेव च वैराग्यं जायते येन मुच्यते ॥ ज्ञानेन कुरुते यत्नं यत्नेन

प्राप्यते महत्॥ महद्द्वंद्वप्रमोक्षाय सा सिद्धिर्या वयोतिगा॥ सेयं परमिका बुद्धिः प्राप्ता निर्द्वंद्वता मया॥ इहैव गतमोहेन चरता
मुक्तसंगिना॥ यथा क्षेत्रं मृदुर्भूतमंभिनाप्लावितं यथा॥ जनयत्यंकुरं कर्म नृणां तद्वत्पुनर्भवं॥ यथा चोत्तापितं बीजं कपाले
यत्रतत्र च॥ प्राप्याप्यंकुरहेतुत्वमबीजत्वान्न जायते॥ तद्वद्भगवतानेन शिखाप्रोक्तेन भिक्षुना॥ ज्ञानं कृतमबीजं मे विषयेषु
न जायते॥ नाभिरज्यति कस्मिंश्चिन्नानार्थेन परिग्रहे॥ नाभिरज्यति चैतेषु व्यर्थत्वाद्रागदोषयोः॥ यश्च मे दक्षिणं बाहुं चंदने
न समुक्षयेत्॥ सव्यं वास्यापि यस्तक्षेत्समावेतावुभौ मम॥ सुखी सोहमवाप्तार्थः समलोष्ठाश्मकांचनः॥ मुक्तसंगः स्थि
तो राज्ये विशिष्टोन्यैस्त्रिदंडिभिः॥ मोक्षे हि त्रिविधा निष्ठा दृष्टान्यैर्मोक्षवित्तमैः॥ ज्ञानं लोकोत्तरं यच्च सर्वत्यागश्च कर्मणां॥
ज्ञाननिष्ठां वदंत्येके मोक्षशास्त्रविदो जनाः॥ कर्मनिष्ठां तथैवान्ये यतयः सूक्ष्मदर्शिनः॥ प्रहायोभयमप्येवं ज्ञानं कर्म च
केवलं॥ तृतीयेयं समाख्याता निष्ठा तेन महात्मना॥ यमे च नियमे चैव कामद्वेषे परिग्रहे॥ माने दंभे तथा स्नेहे सदृशास्ते कु
टुंबिभिः॥ त्रिदंडादिषु यद्यस्ति मोक्षो ज्ञानेन कस्यचित्॥ छत्रादिषु कथं न स्यात्तुल्यहेतौ परिग्रहे॥ येन येन हि यस्यार्थः का
रणेनेह कर्मणि॥ तत्तदालंबते द्रव्यं स्वे स्वे परिग्रहे॥ दोषदर्शी तु गार्हस्थ्ये यो व्रजत्याश्रमांतरं॥ उत्सृजन्सपरि
गृह्णंश्च सोपि संगान्न मुच्यते॥ आधिपत्ये तथा तुल्ये निग्रहानुग्रहात्मके॥ राजर्षिभिक्षुकास्तुल्या मुच्यंते केन हेतु
ना॥ अथ सत्याधिपत्येपि ज्ञानेनैवेह केवलं॥ मुच्यंते सर्वपापेभ्यो देहे परमके स्थिताः॥ काषायधारणं मौंड्यं त्रिवि

ष्क्वंकमंडुलं॥ लिंगान्युसथ्यत्तानि नमोक्षायेति मे मतिः॥ यदि सत्स्यपि लिंगेस्मिन् ज्ञानमेवात्र कारणं॥ निर्मोक्षायेह
दुःखस्य लिंगमात्रं निरर्थकं॥ अथवा दुःखशैथिल्यं वीक्ष्य लिंगे कृता मतिः॥ किं तदेवार्थसामान्यं छत्रादिषु न लक्ष्यते
॥ आकिंचन्येन मोक्षोस्ति किंचन्ये नास्ति बंधनं॥ किंचन्ये चेतरे चैव जंतुर्ज्ञानेन मुच्यते॥ आकिंचन्येन मोक्षोस्ति तस्मा
द्धर्मार्थकामेषु तथा राज्यपरिग्रहे॥ बंधनायतनेष्वेषु विध्यबंधे पदे स्थिते॥ राज्यैश्वर्यमयः पाशः स्नेहायतनबंधनः॥
मोक्षाश्मनिशितेनेह छिन्नस्त्यागासिना मया॥ सोहमेवं गतो मुक्तो जातास्थस्त्वयि भिक्षुके॥ अयथार्था हि ते वर्णा व
क्ष्यामि श्रृणु तन्मम॥ सौकुमार्यं तथा रूपं वपुरग्र्यं तथा वयः॥ तवैतानि समस्तानि नियमश्चेति संशयः॥ यच्चाप्यननुरू
पं ते लिंगस्यास्य विचेष्टितं॥ मुक्तोयं स्यान्नवेति स्याद्धर्षितो मत्परिग्रहः॥ न च कामसमायुक्तेयुक्तेप्यस्ति त्रिदंडकं॥
ननक्ष्यं ते त्वयचिदं न मुक्तस्यास्ति गोपना॥ मत्पक्षसंश्रयाच्चायं श्रृणु यस्ते व्यतिक्रमः॥ आश्रयंत्याः स्वभावेन मम
पूर्वपरिग्रहं॥ प्रवेशस्ते कृतः केन मम राष्ट्रे पुरेपि च॥ कस्या वा संनिकर्षात्त्वं प्रविष्टा हृदयं मम॥ वर्णप्रवरमुख्या
सि ब्राह्मणी क्षत्रियस्त्वहं॥ नावयोरेकयोगोस्ति मा कृथा वर्णसंकरं॥ वर्तसे मोक्षधर्मेण त्वं गार्हस्थ्ये हमाश्रमे॥
अयं चापि सुकष्टस्ते द्वितीयोश्रमसंकरः॥ सगोत्रां वासगोत्रां वा न वेद त्वां न वेत्सि मां॥ सगोत्रमाविशंत्यास्ते तृतीयो
गोत्रसंकरः॥ अथ जीवति ते भर्ता प्रोषितोप्यथ वा क्वचित्॥ अगम्या परभार्येति चतुर्थो धर्मसंकरः॥ सा त्वमेतान्य

मोक्ष०
१८०

न्यकार्याणि कार्यापेक्षाव्यवस्यति ॥ अविज्ञानेन वा युक्ता मिथ्याज्ञानेन वा पुनः ॥ अथवापि स्वतंत्रासि स्वदोषेणोह कर्हिचि
त् ॥ यदि किंचित्कृतं तेस्ति सर्वं कृतमनर्थकं ॥ इदमन्यत्तृतीयं ते भावस्पर्शविघातकं ॥ दुष्टयालक्ष्यते लिंगं विवृतं वेत्याऽ
प्रकाशितं ॥ न मय्येवाभिसंधिस्ते जयेषिण्या जये कृतः ॥ येयं मत्परिषत्कृत्स्नौ ग्रसितामपि ॥ तथाहि ततश्च त्वं दृष्टिं स्वां प्र — जेतमि
ति मुंचसि ॥ मत्पक्षप्रतिघाताय स्वपक्षोद्भावनाय च ॥ सा स्वेनामर्षजेन त्वमृद्धिमोहेन मोहिता ॥ भूयः सृजति योगास्त्रं
विषामृतमिवैकतः ॥ इछतोर्द्वयोर्लाभः स्त्रीपुंसोरमृतोपमः ॥ अलाभश्चाप्यरक्तस्य सोपि दोषो विषोपमः ॥ मा स्प्राक्षीः
साधु जानीष्व स्वशास्त्रमनुपालय ॥ कृतेयं हि विजिज्ञासा मुक्तो नेति त्वया मम ॥ एतत्सर्वं प्रतिच्छन्नं मयि नार्हसि गूहि
तं ॥ सा यदि त्वं स्वकार्येण यद्यन्यस्य महीपतेः ॥ तत्त्वं प्रच्छन्नप्रतिच्छन्ना मयि नार्हसि गूहितं ॥ न राज्ञा नेमृषा गच्छेन्न हि
जातिं कथंचन ॥ न स्त्रियं स्त्रीगुणोपेतां हन्युर्ह्येते मृषागताः ॥ राज्ञां बलमैश्वर्यं ब्रह्म ब्रह्मविदां बलं ॥ रूपयौवनसौ
भाग्यं स्त्रीणां बलमनुत्तमं ॥ अत एते बलैरेव बलिनः स्वार्थमिछता ॥ आर्जवेनाभिगंतव्या विनाशाय ह्यनार्जवं ॥ सा
त्वं जातिं श्रुतं वृत्तं भावं प्रकृतिमात्मनः ॥ कृत्यमागमने चैव वक्तुमर्हसि तत्त्वतः ॥ ॥ भीष्म उवाच ॥ ॥ इत्येतैरसुखैर्वाक्यै
रयुक्तैरसमंजसैः ॥ प्रत्यादिष्टा नरेंद्रेण सुलभा न व्यकंपत ॥ उक्तवाक्ये तु नृपतौ सुलभा चारुदर्शना ॥ ततश्चारुतरं
वाक्यं प्रचक्रामाथ भाषितं ॥ ॥ सुलभोवाच ॥ ॥ नवभिर्नवभिश्चैव दोषैर्वाग्बुद्धिदूषणैः ॥ अपेतमुपपन्नार्थम

१८०

ष्टादशगुणान्विते ॥ सौक्ष्मं सांख्यं क्रमोचोभौ निर्णयःस प्रयोजनः॥ पंचैतान्यर्थजातानि वाक्यमित्युच्यते नृप॥
एषामेकैकशोर्थानां सौक्ष्मादीनां सुलक्षणं॥ शृणु संसार्यमाणानां पदार्थपदशो वाक्यतः॥ ज्ञानं ज्ञेयेषु भिन्नेषु य
दाभेदेन वर्तते॥ यत्राधिवासिनी बुद्धिस्तत्सौक्ष्ममिति वर्त्तते॥ दोषाणां च गुणानां च प्रमाणं प्रविभागतः॥ कंचिदर्थम
भिप्रेत्य सासाख्येत्युपधार्यतां॥ इदं पूर्वमिदं पश्चाद्वक्तव्यं यद्विवक्षितं॥ क्रमयोगं तमप्याहुर्वाक्यं वाक्यविदो जनाः
॥ धर्मकामार्थमोक्षेषु प्रतिज्ञाय विशेषतः॥ इदं तदिति वाक्यांते प्रोच्यते स विनिर्णयः॥ इच्छाद्वेषभवैर्दुःखैः प्रकर्षो
यत्र जायते॥ तत्र या नृपते वृत्तिस्तत्प्रयोजनमिष्यते॥ तान्येतानि यथोक्तानि सौक्ष्म्यादीनि जनाधिप॥ एकार्थसमवेता
नि वाक्यं मम निशामय॥ उपेतार्थमभिन्नार्थं न्यायवृत्तं न चाधिकं॥ नाश्लक्ष्णं न च संदिग्धं वक्ष्यामि परमं ततः॥ न
गुर्वक्षरसंयुक्तं पराङ्मुखसुखं न च॥ नामृतं न त्रिवर्गेण विरुद्धं नाप्यसंस्कृतं॥ न न्यूनं कष्टशब्दं वा विक्रमाभिहि
तं न च॥ न शेषमनुकल्पेन निष्कारणमहेतुकं॥ कामक्रोधाद्भयाल्लोभाद्दैन्याच्चानर्थकात्तथा॥ ह्रीतोनुक्रोश
तो मानान वक्ष्यामि कथंचन॥ वक्ता श्रोता च वाक्यं च यदात्वविकलं नृप॥ सममेति विवक्षायां तथा सोर्थः प्रका
शते॥ वक्तव्ये तु यदा वक्ता श्रोतारमवमन्यते॥ स्वार्थमाह परार्थं च तदा वाक्यं न रोहति॥ अथ यः स्वार्थमुत्सृज्य

मोक्ष०

१८१

परार्थं प्राह मानवः॥ विशंका जायंते तस्मिन्वाक्यं तदपि दोषवत्॥ यस्तु वक्ता द्वयोरर्थमविरुद्धं प्रभाषते॥ श्रोतुश्चै
वात्मनश्चैव स वक्ता नेतरो नृप॥ तर्थद१वदिदं वाक्यमुपेतं वाक्यसंपदा। अविक्षिप्रमना राजन्नेकाग्रः श्रोतुमर्हसि
कासि कस्य कुतो वेति त्वयाहमसि चोदिता॥ तत्रोत्तरमिदं वाक्यं राजन्नेकमनाः शृणु॥ यथा जंतु च काष्टं च वसंच
श्चोदबिंदवः॥ संश्लिष्टानि तथा राजन् प्राणिनामिह संभवः॥ शब्दस्पर्शौ रसो रूपगंधः पंचेंद्रियाणि च॥ पृथ
गात्मानमात्मानं संश्लिष्टा जतुकाष्टवत्॥ न चैषां चोदना काश्चिदस्तीत्येष निश्चयः॥ एकैकस्येह विज्ञानं नास्त्या
त्मनि तथा परे॥ न वेद चक्षुश्चक्षुस्त्वं श्रोत्रं नात्मनि वर्तते॥ तथैव व्यभिचारेण न वर्तंते परस्परं॥ संश्लिष्टं च न जा
नंति यथा पड्व पांसवः॥ बाह्यानन्यानपेक्षंते गुणास्तानपि मे शृणु॥ रूपं चक्षुः प्रकाशश्च दर्शने हेतवस्त्रयः॥ य
थैवात्र तथान्येषु ज्ञानज्ञेयेषु हेतवः॥ ज्ञानज्ञेयांतरे तस्मिन्मनो नाम परो गुणः॥ विचारयति येनायं निश्चये सा
ध्वसाधुनी॥ द्वादशस्त्वपरस्तत्र बुद्धिर्नाम गुणः स्मृतः॥ येन संशाय पूर्वेषु बोद्धव्येषु व्यवस्यति॥ अथ द्वादश
के तस्मिन्सत्वं नाम परो गुणः॥ महासत्वोल्पसत्वो वा जंतुर्येनानुमीयते॥ अहंकर्तेति चाप्यन्यो गुणस्तत्र चतु
र्दशः॥ ममायमिति येनायं मन्यते न ममेति च॥ अथ पंचदशो राजन्गुणस्तत्रापरः स्मृतः॥ पृथकालासमू

१८१

हस्य सामग्र्यं तदिहोच्यते ॥ गुणाल्लिवा परस्तत्र संघात इव षोडश ॥ प्रकृतिर्व्यक्तिरित्येतौ गुणौ यस्मिन्समाश्रितौ ॥ सु
खासुखे जरामृत्यू लाभालाभौ प्रियाप्रिये ॥ इति चैकोनविंशोयं द्वंद्वयोग इति स्मृतः ॥ ऊर्ध्वं चैकोनविंशात्या कालो ना
म परो गुणः ॥ इतीमं विद्धि विंशत्या भूतानां प्रभवाप्ययं ॥ विंशकश्चैव संघातो महाभूतानि पंच च ॥ सदसद्भावयो
गौ तु गुणावन्यौ प्रकाशकौ ॥ इत्येवं विंशकश्चैव गुणाः सप्त च ये स्मृताः ॥ विधिः शुक्रं बलं चेति त्रय एते गुणाः परे ॥ विं
शतिर्दश चैवं हि गुणाः संख्यानतः स्मृताः ॥ समग्रा यत्र वर्त्तंते तच्छरीरमिति स्मृतं ॥ अव्यक्तां प्रकृतिं तासां कला
नां कश्चिदिच्छति ॥ व्यक्तं चासां तथा चान्यः स्थूलदर्शी प्रपश्यति ॥ अव्यक्तं यदि वा व्यक्तं द्वयीमथ चतुष्टयीं ॥ प्रकृ
तिं सर्वभूतानां पश्यंत्यध्यात्मचिंतकाः ॥ येयं प्रकृतिरव्यक्ता कलाभिर्व्यक्तितां गता ॥ अहं च त्वं च राजेंद्र ये चाप्यन्ये श
रीरिणः ॥ बिंदुन्यासादयोवस्थाः शुक्रशोणितसंभवाः ॥ यासामेव निपातेन कललं नाम जायते ॥ कललाद्बुद्बुदो
त्पत्तिः पेशी च बुद्बुदात्स्मृता ॥ पेश्यास्त्वंगानि निर्वृत्तिर्नखरोमाणि चांगतः ॥ संपूर्णे नवमे मासि जंतोर्जातस्य मैथि
ल ॥ जायते नामरूपत्वं स्त्री पुमान्वेति लिंगतः ॥ जातमात्रं तु तद्रूपं दृष्ट्वा ताम्रनखांगुलिः ॥ कौमाररूपमापन्नं
रूपं नोपलभ्यते ॥ कौमाराद्यौवनं चापि स्थाविर्यं चापि यौवनात् ॥ अनेन क्रमयोगेन पूर्वं पूर्वं न लभ्यते ॥ क

लानां रश्मीनां प्रतिभेदक्षणोद्भवो॥ वर्त्तंते सर्वभूतेषु सौक्ष्म्यात्तु न विभाव्यते॥ न चैषामत्ययो राजंल्लक्ष्यते प्रभवो
न च॥ अवस्थायामवस्थायां दीपस्येवार्चिषो गतिः॥ तस्याप्येवं प्रभावस्य सदश्वस्येव धावतः॥ अजस्रं सर्वलोकस्य
कः कुतो वा न वा कुतः॥ कस्यैवं कस्य वा नैवं कुतो वेदं न वा कुतः॥ संबंधः कोऽस्ति भूतानां स्वैरप्यवयवैरिह॥ यथा दित्या
न्मणेश्चापि वीरुद्भ्यश्चैव पावकः॥ जायंत्येवं समुदयात्कलानामपि जंतवः॥ आत्मन्येवात्मनात्मानं यथा त्वमनुप
श्यसि॥ एवमेवात्मनात्मानमन्यस्मिन्किं न पश्यसि॥ यद्यात्मनि परस्मिंश्च समतामध्यवस्यसि॥ अथ मां
कासि कस्येति किमर्थमनुपृच्छसि॥ इदं मे स्यादिदं नेति द्वंद्वैर्मुक्तस्य मैथिल॥ कासि कस्य कुतो वेति वचनैः किं
प्रयोजनं॥ रिपौ मित्रेऽथ मध्यस्थे विजये संधिविग्रहे॥ कृतवान्यो महीपालः किं तस्मिन्मुक्तिलक्षणं॥ त्रिवर्गे
सप्तधा व्यक्तं यो न वेदेह कर्मसु॥ संगवान्यस्त्रिवर्गे च किं तस्मिन्मुक्तिलक्षणं॥ प्रियं चाप्रिये वापि दुर्बले बल
वत्यपि॥ यस्य नास्ति समं चक्षुः किं तस्मिन्मुक्तिलक्षणं॥ तदयुक्तस्य ते मोक्षे योऽभिमानो भवेन्नृप॥ सुहृद्भिः
संनिवार्यस्ते विचित्रस्येव भेषजैः॥ तानि तानि तु संचिंत्य संगस्थानान्यरिंदम॥ आत्मनात्मनि मां पश्येत्किमन्य
न्मुक्तिलक्षणं॥ इमान्यन्यानि सूक्ष्माणि मोक्षमाश्रित्य कानिचित्॥ चतुरंगप्रवृत्तानि संगस्थानानि मे शृणु॥

प इमां पृथिवीं कृत्स्नामेकछत्रां प्रशास्ति हा ॥ एक एव स वै राजा पुनरध्यावसत्युता ॥ तपुरे चैकमेवास्य गृहं यद्यधिति
ष्ठति ॥ गृहे शयनमप्येकं निशायां यत्र लीयते ॥ शय्यार्द्धं तस्य वाप्यत्र स्त्री पूर्वमधितिष्ठति ॥ तदनेन प्रसंगेन फले
नेवह युज्यते एवमेवोपभोगेषु भोजनाछादनेषु च ॥ गुणेषु परिमियेषु निग्रहानुग्रहं प्रति ॥ परतंत्रः सदा राजास
ल्पसोपि प्रसज्जते ॥ संधिविग्रहयोगेच कुतो राज्ञः स्वतंत्रता ॥ यदाह्याज्ञापयत्यन्यांस्तत्रास्योक्ता स्वतंत्रता ॥ अवऽ
शः कार्यते तत्रतस्मिंस्तस्मिंक्षणे स्थिताः ॥ स्वप्तुकामो न लभते स्वप्तुं कार्यार्थिभिर्जनैः ॥ शयने चाप्यनुज्ञातः
सुप्तउत्थाप्यते वशाः ॥ स्नाह्यालभमे पिब प्राशजुहुध्यग्नीन्यजेत्यपि ॥ ब्रवीति शृणु चापीति विवशाः कार्यते परैः ॥ अभ
िगम्याभिगम्यैवं याचंते सततं नराः ॥ न चाप्युत्सहते दातुं वित्तरक्षी महाजनात् ॥ दाने कोशक्षयो प्यस्य वैर
चास्याप्रयछतः ॥ क्षणेनास्योपवर्त्तंते दोषा वैराग्यकारकाः ॥ प्राज्ञांछूरांस्तथैवाढ्यानेकस्थानेपि शंकते ॥ भ
यमप्यभये राज्ञो येश्च नित्यमुपासते ॥ तयाचैते प्रदुष्यंति राजन्ये कीर्तिता मया ॥ तथैवास्य भयं तेभ्यो जायते
पश्य यादृशं ॥ सर्वः स्वे स्वे गृहे राजा सर्वः स्वे स्वे गृहे गृही ॥ निग्रहानुग्रहान्कुर्वंस्तुल्यो जनक राजभिः ॥ पुत्रदा
रास्तथैवात्मा कोशो मित्राणि संचयाः ॥ परैः साधारणाह्येते तैस्तैरेवास्य हेतुभिः ॥ हतो देशः पुरं दग्धं प्रधानः कुंजरो मृतः ॥

लोकसाधारणेष्वेषु मिथ्याज्ञानेन तप्यते॥ अमुक्तो मानसैर्दुःखैरिच्छाद्वेषभयोद्भवैः॥ शिरोरोगादिभिर्योगैस्तथैवाभिनिपीडितः॥ द्वंद्वैस्तैस्तैरुपहतः सर्वतः प्रतिशंकितः॥ बहुप्रत्यर्थिकं राज्यमुपास्ते गणयन्निशाः॥ तदल्पसुखमत्यर्थं बहुदुःखमसारवत्॥ तृणाग्निज्वलनप्रख्यं फेनबुद्बुदसंनिभं॥ को राज्यमभिपद्येत प्राप्य चोपशमं लभेत्॥ ममेदमिति यच्चेदं पुरं राष्ट्रं च मन्यसे॥ बलं कोशममात्यांश्च कस्यैतानि न वा नृप॥ मित्रामात्यं पुरं राष्ट्रं दंडः कोशो महीपतिः॥ सप्तांगस्यास्य राज्यस्य त्रिदंडस्येव तिष्ठतः॥ अन्योन्यगुणयुक्तस्य कः केन गुणतोऽधिकः॥ तेषु तेषु हि कालेषु तत्तदंगं विशिष्यते॥ येन यत्सिध्यते कार्यं तत्प्राधान्याय कल्पते॥ सप्तांगश्चैव संघातस्त्रयश्चान्ये नृपोत्तम॥ संभूय दशवर्गोयं भुंक्ते राज्यं हि राज्यवत्॥ यश्च राजा महोत्साहः क्षत्रधर्मरतो भवेत्॥ संतुष्येद्दशभागेन ततस्त्वन्यो दशावरैः॥ नास्त्यसाधारणो राजा नास्ति राज्यमराजकं॥ राज्ये सति कुतो धर्मो धर्मे सति कुतः परं॥ योऽप्यत्र परमो धर्मः पवित्रं राज्यराजयोः॥ पृथिवी दक्षिणा यस्य सोऽश्वमेधेन शुध्यते॥ सोहमेतानि कर्माणि राजन्दुःखानि मैथिल॥ समर्थो शतशो वक्तुमथवापि सहस्रशः॥ स्वदेहेनापि संयोगो मम कुतः परपरिग्रहे॥ न मामेवंविधायुक्तामीदृशीं वक्तुमर्हसि॥ ननु नाम त्वया मोक्षः कृत्स्नः पंचशिखाच्छ्रुतः॥ सोपायः सोपनिषदः सोपासंगः सनिश्चयः॥ तस्य ते मुक्त

संगस्यपाशानास्क्तप्रतिष्ठति।।छत्रादिषुविशेषेषुपुनःसंगःकथंनृप।।श्रुतंतेनश्रुतंमन्येमपावापिश्रुतंश्रुतं।।अथवाश्रु
तसंकाशंश्रुतमन्यच्छ्रुतंत्वया।।अथापीमासुसंज्ञासुलौकिकीषुप्रतिष्ठसे।।अभिसंगावरोधाभ्यांबद्धस्त्वंप्राकृतोयथा।।स
त्त्वेनानुप्रवेशोहियोयंत्वयिकृतोमया।।किंतवापकृतंतत्रयदिमुक्तोसिपार्थिव।।नियमोह्येषवर्णेषुयतीनांवन्यवासिनां।।शून्य
मावेशयंत्याचमयाकिंकस्यदूषितं।।नपाणिभ्यांनबाहुभ्यांपादोरुभ्यांनचानघ।।नगात्रावयवैरन्यैस्स्पृशामित्वांनराधिप।।
कुलेमहतिजातेनह्रीमतादीर्घदर्शिना।।नैतत्सदसिवक्तव्यंसद्वासद्वामिथःकृतं।।ब्राह्मणागुरवश्चेमेतथामान्यागुरूत्तमाः।।त्वंचा
थगुरुरप्येषामेवमन्योन्यगौरवं।।तदेवमनुसंदृश्यवाच्यावाच्यंपरीक्षता।।स्त्रीपुंसोःसमवायोयंत्वयावाच्योनसंसदि।।यथापु
ष्करपर्णस्थंजलंतत्पर्णमस्पृशत्।।तिष्ठत्यस्पृशतीतद्वत्त्वयिवत्स्यामिमैथिल।।यदिवाप्यस्पृशंत्यामेस्पर्शंजानासिकंच
न।।ज्ञानंकृतमबीजंतेकथंतेनेहभिक्षुणा।।सगार्हस्थ्याच्च्युतश्चत्वंमोक्षंचानाप्यदुर्विदं।।उभयोरंतरालेवैवर्तसेमोक्षवाति
कः।।नहिमुक्तस्यमुक्तेनज्ञस्यैकत्वपृथक्त्वयोः।।भावाभावसमायोगेजायतेवर्णसंकरः।।वर्णाश्रमाःपृथक्त्वेनदृष्टायस्याप
थक्तिनः।।नान्यदन्यदितिज्ञात्वाज्ञातानान्यत्रवर्तते।।पाणौकुंडंतथाकुंडेपयःपयसिमक्षिका।।आश्रिताश्रययोगेनपृथक्त्वे
नाश्रिताश्रिताः।।नतुकुंडेपयोभावःपयश्चापिनमक्षिका।।स्वयमेवाप्नुवंत्येतेभावान्नतुपराश्रयंपृथक्त्वादाश्रमाणांववर्णा
न्यत्वेतथैवच।।परस्परपृथक्त्वाच्चकथंतेवर्णसंकरः।।नास्मिवर्णोत्तमाजात्यानवैश्यानावरातथातवराजन्सवर्णास्मिशुद्ध

यो मिर विश्रुता ॥ प्रधानो नाम राजर्षिर्व्यक्तं ते श्रोत्रमागतः ॥ कुले तस्य समुत्पन्नां सुलभां नाम विद्धि मां ॥ द्रोणश्च शतशृंगश्च वक्र
द्वारश्च पर्वतः ॥ मम सत्रेषु पूर्वेषां चिता मघवता सह ॥ साहं तस्मिन्कुले जाता भर्त्तर्य्यसति मद्विधे ॥ विनीता मोक्षधर्मेषु चराम्येका
मुनिव्रतं ॥ नास्मि सत्रपतिछन्ना न परस्वामहारिणी ॥ न धर्मसंकरकरी स्वधर्मेस्मिन्दृढव्रता ॥ नस्थिरा स्वप्रतिज्ञायां नासमीक्ष्य
प्रवादिनी ॥ नासमीक्ष्यागता चेह त्वत्सकाशं जनाधिप ॥ मोक्षे ते भावितां बुद्धिं कुत्वाहं कुशलैषिणी ॥ तव मोक्षस्य चाप्यस्य जिज्ञा
सार्थमिहागता ॥ न वर्गस्था ब्रवीम्येतत्स्वपक्षपरपक्षयोः ॥ मुक्तो व्यायश्चते यश्च शांतो यश्च न शाम्यति ॥ यथा शून्ये पुरागारे भिक्षु
रेकां निशास्वसेत् ॥ तथाहं त्वच्छरीरेस्मिन्निमां वत्स्यामि शर्वरी ॥ साहमासनदानेन वागातिथ्येन चार्चिता ॥ सुप्ता सुशरण प्रीता
श्वो गमिष्यामि मैथिल ॥ ॥ भीष्म उवाच ॥ ॥ इत्येतानि स वाक्यानि हेतुमत्यर्थवंति च ॥ श्रुत्वा नाधिजगौ राजा किंचिदन्यदतः परं
॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथं निर्वेदमापन्नः शुको वैय्यासकिः पुरा ॥ एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ॥
अव्यक्तव्यक्ततत्वानां निश्चयं बुद्धिनिश्चयं ॥ वक्तुमर्हसि कौरव्य देवस्याजस्य याकृतिः ॥ ॥ भीष्म उवाच ॥ ॥ प्राकृतेन सुवृत्तेन च
रंतमकुतोभयं ॥ अध्याप्य कृत्स्नं स्वाध्यायमन्वशाद्वै पिता सुतं ॥ ॥ व्यास उवाच ॥ ॥ धर्मं पुत्र निषेवस्व सुतीक्ष्णौ च हिमातपौ ॥ क्षु हि
त्पिपासे च वायुं च जय नित्यं जितेंद्रियः ॥ सत्यमार्जवमक्रोधमनसूयां दमं तपः ॥ अहिंसां चानृशंस्यं च विधिवत्परिपालय ॥ सं
त्ये तिष्ठ रतो धर्मे हित्वा सर्वमनार्जवं ॥ देवतानिचशेषेण यात्रां प्राणस्य संलिह ॥ फेनमात्रोपमे देहे जीवे शकुनिवत्स्थिते ॥ अ

निद्रे प्रियसंवासे कथं स्वपिषि पुत्रक ॥ अप्रमत्तेषु जाग्रत्सु नित्ययुक्तेषु शत्रुषु ॥ अंतरं लिप्समानेषु बालस्त्वं नावबुध्यसे ॥ अहः
सु गम्यमानेषु क्षीयमाणे तथायुषि ॥ जीविते लिख्यमाने च किमुत्थाय न धावसि ॥ ऐहलौकिकमीहंते मांसशोणितवर्द्धनं ॥
पारलौकिककार्येषु प्रसुप्ता भृशनास्तिकाः ॥ धर्माय येऽभ्यसूयंति बुद्धिमोहान्विता नराः ॥ अपथा गच्छतां तेषामनुयाताति पीड्य
न ते ॥ ये तु तुष्टाः श्रुतिपराः महात्मानो महाबलाः ॥ धर्म्यं पंथानमारूढास्तानुपास्स्व च पृच्छ वा ॥ उपधार्य मतं तेषां बुद्धानां धर्मद
र्शिनां ॥ नियच्छ परया बुद्ध्या चित्तमुत्पथगामि वै ॥ अद्यकालिकया बुद्ध्या दूरे श्व इति निर्भयाः ॥ सर्वभक्ष्या न पश्यंति कर्मभू
मिमचेतसः ॥ धर्मनिश्रेणिमास्थाय किंचित्किंचित्समारुह ॥ कोशकारवदात्मानं वेष्टयन्नावबुध्यसे ॥ नास्तिकं भिन्नम
र्यादं कूलपातमिवास्थितं ॥ वामतः कुरु विस्रब्धो नरं वेणुमिवोद्धृतं ॥ कामं क्रोधं च मृत्युं च पंचेंद्रियजलां नदीं ॥ नावं धृतिम
यीं कृत्वा जन्मदुर्गाणि संतर ॥ मृत्युनाभ्याहते लोके जरया परिपीडिते ॥ अमोघासु पतंतीषु धर्मयानेन संतर ॥ तिष्ठंतं च
शयानं च मृत्युरन्वेषयद्यदा ॥ निर्वृतिं लभते कस्मादकस्मान्मृत्युनाशितः ॥ संचिन्वानकमेवैनं कामानामवितृप्तकं ॥ वृकी
वोरणमासाद्य मृत्युरादाय गच्छति ॥ क्रमशःसंचितशिखो धर्मबुद्धिमयो महान् ॥ अंधकारे प्रवेष्टव्यो दीपो यत्नेन धार्यतां ॥ सं
पतन्देहजालानि कदाचिदिह मानुषे ॥ ब्राह्मण्यं लभते जंतुस्तत्पुत्र परिपालय ॥ ब्राह्मणस्य तु देहोयं न कामार्थाय जायजायते
॥ इह क्लेशाय तपसे प्रेत्य त्वनुपमं सुखं ॥ ब्राह्मण्यं बहुभिरवाप्यते तपोभिस्तल्लब्ध्वा न रपतिपरेण हेलितव्यं ॥ स्वाध्याये तप

सिदमेचनिसयुक्ताःमोक्षार्थीकुशल्ल परःसदायतश्च॥अव्यक्तांअकृतिरयंकल्लाशाीरःस्त्क्ष्मात्मोक्षपातुदिशोनिमेषरो
मा॥संध्यास्यःसमबल्लशुक्लकृष्णनोवोमांसांगोइवतिवयोहयोनराणां॥तंदृष्ट्वस्ततमत्तमुग्रवेगंगछंतंसततमिहा
नवेक्ष्यमाणो॥वस्तुस्तेयदिनःपरप्रणेतनेयंधर्मेतिमव.तुमनःपरंनिशाम्य॥येचात्रप्रचलितधर्मकामवृत्ताकोशांतःसंत
तमनिष्टसंप्रयोगाः॥क्लिश्यंतःपरिगतवेदनाशनीभावह्वीभिःसुखशर्मकारणाभिः॥राजासदाधर्मपरःशुभाशुभस्यगो
प्तासमीक्ष्यसुकृतिनांदधातिकोकान्॥बहुविधमपिचनंतिप्रविशतिसुखमनुपद्रातंनिरवद्यं॥श्वानोभीषणकायाअयो
मुखानिवसंबलगृध्रकुलपक्षिणांचसंघाः॥नरकदनेरुधिरयात्त्रुवचनंनुदमुपगतंविशंत्यसंतः॥मर्यादानियताःस्व
यंभुवायइहमाःप्रभुक्तिमदशाण्णामनोनुगछतात्॥निवसतिदृढशामसुखंविततविषयविपिनमवशासपापः॥योलु
ब्धःसुभृशंप्रियानृतश्चमनुष्यःसततनिकृतिनेवचनाभिरतिःस्यात्॥उपनिधिभिरसुखकृतसपत्नमनिरयगोष्ठशमसुखम
नुभवतिदुष्कृतकर्मा॥उष्णांवैतरणींमहानदीमवगाह्यासिपत्रवनभिन्नगात्राः॥परशुवनशयोनिपतितावसतिमहा
निरयेस्वशार्तः॥महापदेभिकसयसेनचाप्यवेक्षसेपरं॥चिरस्यमृत्युकारिकामनागतांनवध्यसे॥प्रयतांकिमास्य
राजशासनात्॥कंमतकायदानुणप्रयत्नमाशुवेकुरु॥पुनास्समूलबांधवंप्रभुर्हरन्सदुःखितं॥नवेहजीवितंयमो
नचास्यवानकः॥पुनाविवातिमातुतोयमस्यपःप्रभुःसनः॥पुनैकएवनीयसेकुतुष्पसापयायिके॥पुनासहिकएवतेऽबवा

स्तित

तिमातुर्तेतकः॥ पुत्राच विभ्रमंतिति दिशो महाभयागमं॥ कृतिश्च संनिध्यते पुत्रातवेह पुत्रक॥ तस्मात्कुलस्य गच्छतः सम्याधि
मुतमं कुरु॥ शुभाशुभेषु नाहंते प्रमादकर्म विकुरुते॥ स्मरन्नुराननतप्यसे निघल्लकेलं निधिं॥ पुत्रो शरीरमंतकोपि नति
रोगसारथिः॥ प्रसह्यजीवितक्षये तपो महत्समाचर॥ पुत्राकु कामयंकरा मनुष्यदेहगोचराः॥ अजिइवंति सर्वतो यतस्व
पुण्यशीलिने॥ पुत्रांधकारमेककोनुपपश्यति तपस्स्व वे॥ पुत्राहिरण्मयान्नगान्निरीक्ष्यसे द्रिमूईनि॥ पुत्रासुकुंसंगता
नि तेन्सुहृन्मुखाश्च शत्रवः॥ विचालयंति दर्शनात्तपस्स्व पुत्र यत्परं॥ धनस्य यस्य राजतो भयान्न चास्ति चोरतः॥ मृतं च
यन्न मुंचति समर्जयस्व तद्धनं॥ न तत्र संविभज्यते स्वकर्मभिः परस्परं॥ यदेव यस्य योनतं कृतं तदेव तत्र सोश्नुते॥ परत्र येन जी
व्यते तदेव पुत्र दीयतां॥ धनंयदक्षरं ध्रुवं॥ समर्जयस्व तत्स्वयं॥ न यावदेव पच्यते महाजनस्य पादकं अपक एव पाव
के पुत्रा प्रलीयसे त्वरं॥ न मातृपुत्रबांधवा न संस्तुतः प्रियोजनः॥ अनुव्रजंति कटे व्रजंतमेकपालिनं॥ यदेव कर्म केवलं पुत्रा सं
कृतं शुभाशुभं॥ तदेव पुत्र सार्थिकं भवस्य पुत्र गच्छतः॥ हिरण्यरत्नसंचयाः शुभाशुभेन संचिताः॥ न तस्य देहसंक्षये समं
ति कार्यसाधकाः॥ परत्रगामिकस्यते कृताकृतस्य कर्मणः॥ न साक्षिरात्मनास्समो नृणामिहास्ति कश्चन॥ मनुष्यदेह
शून्यकं भवस्य सुत्रागच्छतः॥ प्रविश्य बुद्धिचक्षुषा प्रदृश्यते हि सर्वशः॥ इहात्मनि सूर्यवायवः शरीरमाश्रितास्त्रयः॥ ति
एव तस्य साक्षिणो भवंति धर्मदर्शिनः॥ अहर्निशो पुत्र सर्वतः स्वशास्तुसंचारिणः॥ प्रकाशगतदद्वृत्तिषु स्वधर्ममेव

पालय॥अनेकपारिपंथिके विरूपरौद्रमक्षिके॥स्वमेवकर्मरक्ष्यतां स्वमेव तत्र गच्छति॥न तत्र संविभज्यते स्वकर्मणा पर
स्परं॥तथा कृतं स्वकर्मजं तदेव भुज्यते फलं॥यथाप्सरोगणा फलं सुखं महर्षिभिः सह॥तथाप्नुवंति कर्मजं विमानका
मगामिनः॥यथेह यत्कृतं शुभं विपाप्मभिः कृतात्मभिः॥तदाप्नुवंति मानवास्तथा विशुद्धयोनयः॥प्रजापतेः सलोकतां बृह
स्पतेः शतक्रतोः॥व्रजंति ते परां गतिं गृहस्थधर्मसेतुभिः॥सहस्रशोप्यनेकशः प्रवक्तुमुत्सहावहे॥अबुद्धिमोहनं पुनः प्रभु
र्विनायपववकृप॥गता त्रिरष्टवर्षतो ध्रुवोसि पंचविंशकः॥कुरुष्व धर्मसंचयं वयो हि तेतिवर्तते॥पुनः करोति सोंतकः प्रमाद
गोमुखां चमूं॥यथागृहीतमुत्थितस्त्वरस्व धर्मपालने॥यथास्त्वमेव पृष्ठतः त्वमग्रतो गमिष्यसि॥तथा गतिं गमिष्यतः कि
मात्मना परेण वा॥यदेकपातिनां सतां भवत्यमुत्र गच्छतां॥भयेषु सांपरायिकं निधत्स्व ते बलं निधिं॥सकूलमूलबांधव
प्रभुर्हरत्यसंगवारः॥नसंति यस्य वारकाः कुरुष्व धर्मसंनिधिं॥इदं निदर्शनं मया तवेह पुत्र सांप्रतं॥स्वदर्शनानुमानतः प्र
वर्णितं कुरुष्व तत्॥ददाति यः स्वकर्मणा ददाति यस्य कस्यचित्॥अबुद्धिमोहजैर्गुणैः स एक एव युज्यते॥श्रुतं समस्तमश्नुते
प्रकुर्वतः शुभाः क्रियाः॥तदेतदर्थदर्शनं कृतज्ञमर्थसंहितं॥निबंधिनी रज्जुरेषा या ग्रामे वसतो रतिः॥छित्त्वैतां सुकृतो यां
ति नैनां छिंदंति दुष्कृतः॥किं ते धनेन किं बंधुभिस्ते किं ते पुत्रैः पुत्रक मरिष्यसि॥आत्मानमन्विच्छ गुहां प्रविष्टं पितामहा
स्ते क्व गताश्च सर्वे॥श्वःकार्यमद्य कुर्वीत पूर्वाण्हे चापराण्हिकं॥नहि प्रतीक्षते मृत्युः कृतमस्य न वा कृतं॥अनुगम्य विनाशां

ते निवर्तंते ह बांधवाः॥ अग्नौ प्रक्षिप्य पुरुषं ज्ञातयः सुहृदस्तथा॥ नास्ति कश्चिन्नु को ज्ञान्न नान्यायमते स्थितान्॥ वामतः
कुरु विश्रब्धं परं श्रेयः पुरं तं द्वितः॥ एवमभ्याहते लोके कालेनोपनिपीडिते॥ सुमहद्धैर्यमालंब्य धर्मं सिवर्त्मना कुरु॥ अथ ये संद
र्शिनोपायं सम्यक्कर्यो वेत्ति मानवः॥ सम्यक्कृत्वधर्मं लोके तत्र परत्र च सुखमश्नुते॥ न देहभेदे मरणं विजानतां न च प्रणाशः स्व
नुपालिते पथि॥ धर्मं हि यो वर्द्धयते स पंडितो य एव धर्माच्च्यवते स मुह्यति॥ प्रयुक्तयोः कर्मपथि स्वकर्मणोः फलं प्रयोक्ता ल
भते यथाकृतं॥ निहीनकर्मा निरयं प्रपद्यते त्रिविष्टपं गच्छति धर्मपारगः॥ सोपानभूतं स्वर्गस्य मानुष्यं प्राप्य दुर्लभं॥ तथात्मा
नं समादध्याद्भ्रश्यते न पुनर्यथा॥ यस्य नोत्क्रामति मतिः स्वर्गमार्गानुसारिणी॥ तमाहुः पुण्यकर्माणमशोच्यं पुत्रबांधवैः॥ य
स्य नोपहता बुद्धिः निश्चयोह्यवलंबते॥ स्वर्गे कृतावकाशस्य नास्ति तस्य महद्भयं॥ तपोवनेषु ये जातास्तत्रैव निधनं ग
ताः॥ तेषामल्पतरो धर्मः कामभोगानजानतां॥ यस्तु भोगान्परित्यज्य शरीरेणातपश्चरेत्॥ नेतेन किंचिन्न प्राप्तं तन्मे
बहुमतं फलं॥ मातापितृसहस्राणि पुत्रदारशतानि च॥ अनागतान्यतीतानि कस्य ते कस्य वा वयं॥ अहमेको न मे कश्चिन्ना
हमन्यस्य कस्यचित्॥ न तं पश्यामि यस्याहं तन्न पश्यामि यो मम॥ न तेषां भवता कार्यं न कार्यं तव तैरपि॥ स्वकृतैस्तानि
यातानि भवांश्चैव गमिष्यति॥ इह लोके हि धनिनां स्वजनः स्वजनायते॥ स्वजनस्तु दरिद्राणां जीवतामपि नश्यति॥ संचिनोत्य
शुभं कर्म कलत्रापेक्षया नरः॥ ततः क्लेशमवाप्नोति परत्रेह तथैव च॥ पश्यंति चित्रकृतं हि जीवलोकं स्वकर्मणा॥ तकुरु

एतथा पुत्रकृत्स्नेयत्समुदाहृतं ॥ तदेतत्सम्प्रहृष्टेयेव कर्म कृत्स्नमिव प्रदृश्यता ॥ शुभान्याचरिता यानि पर्वोल्लोकसमीप्सता ॥ऽ
मासस्तु संज्ञा परिवर्तके न रस्य यामिनारात्रिदिवं धनेन ॥ स्वकर्मनिष्ठा फलसाक्षिकेन भूतानि कालः पचति प्रसह्य ॥ य
नेन किं यन्न ददाति नाश्नुते बलेन किं येन रिपुर्न बाधते श्रुतेन किं येन न धर्ममाचरेत् किमात्मना येन जितेंद्रियो वशी
॥ ॥श्रीभ उवाच॥ ॥इदं द्वैपायनवचो गीतमुक्तं निशम्य तु ॥ शुको गतः परित्यज्य पितरं मोक्षदेशिकं ॥ ॥शौतो मोक्ष
धर्मे॥ ॥युधिष्ठिर उवाच॥ ॥यद्यस्ति दत्तमिष्टं वा तपस्तप्तं तथैव च ॥ गुरूणां चापि शुश्रूषा तन्मे ब्रूहि पितामह ॥ ॥भी
ष्म उवाच॥ ॥आत्मनानर्थयुक्तेन पापेन विशते मनः ॥ सकर्मकलुषं कृत्वा क्लेशे महति धीयते ॥ दुर्भिक्षादेव दुर्भि
क्षं क्लेशात्क्लेशं महाद्भयं ॥ मृतेभ्यः प्रमृता यांति दरिद्राः पापकर्मिणा ॥ उत्सवादुत्सवं यांति स्वर्गात्स्वर्गं सुखात्सुखं ॥ श्रद्द
धानाश्च दांताश्च धनस्थाः शुभकारिणः ॥ व्यालकुंजरदुर्गेषु सर्पचोरभयेषु च ॥ हस्तावापेन गच्छंति नास्तिकाः किमतः
परं ॥ प्रियदेवातिथेयाश्च वदान्याः प्रियसाधवः ॥ क्षेम्यमात्मवतां मार्गमास्थिता हस्तदक्षिणाः ॥ पुलका इव धान्येषु
पुत्तिका इव पक्षिषु ॥ तद्विधास्ते मनुष्येषु येषां धर्मो न कारणं ॥ सुशीघ्रमपि धावंतं विधानमनुधावति ॥ शेते सह स
यानेन येन येन यथा कृतं ॥ पापं तिष्ठति तिष्ठंतं धावंतमनुधावति ॥ करोति कुर्वतः कर्म छायेवानुविधीयते ॥ येन येन य
थायद्यत्पुराकर्मस्तु निश्चितं ॥ तत्तदेवोत्तरं भुङ्क्ते नित्यं विहितमात्मना ॥ समानं कर्म विहितं प विधानपरिरक्षणं ॥

निनि
व

भूतग्राममिमं कालःसमंतादपकर्षति।।अचोद्यमानानि यथा पुष्पाणि च फलानि च।।स्वकालं नानिवर्त्तंते यथाकर्म पु
राकृतं।।समानश्चावमानश्च लाभोलाभक्षयाव्ययो।।प्रवर्त्तंते निधनांताः पदे पदे।।आत्मना विहितं दुःखमात्मना
विहितं सुखं।।गर्भशय्यामुपादाय भुज्यते पूर्वदेहिकं।।बालो युवा च वृद्धश्च यत्करोति शुभाशुभं।।तस्यां तस्यामवस्थायां
भुंक्ते जन्मनि जन्मनि।।यथा धेनुसहस्रेषु वत्सो विंदति मातरं।।तथा पूर्वकृतं कर्म कर्त्तारमनुगच्छति।।मलिनं हि यथा
वस्त्रं पश्चाच्छुध्यति कर्मणा।।उपवासैःप्रतप्तानां दीर्घं सुखमनंतकं।।दीर्घकालेन तपसा सेवितेन महात्मना।।धर्म
निर्धूतपापानां संसिध्यंते मनोरथाः।।शकुनानामिवाकाशे मत्स्यानामिव चोदके।।पदं यथा न दृश्येत ततथा ज्ञानवि
दांगतिः।।अलमन्यैरुपालंभैः कीर्तितैश्च व्यतिक्रमैः।।पेशलं चानुरूपं च कर्त्तव्यं हितमात्मनः।। ।।शांतौ मो
क्षधर्मे।। ।।युधिष्ठिर उवाच।।कथं व्यासस्य धर्मात्मा शुको जज्ञे महातपाः।।सिद्धिं च परमां प्राप्तस्तन्मे ब्रूहि पि
तामह।।कस्यां चोत्पादयामास शुकं व्यासस्तपोधनः।।न ह्यस्य जननीं विद्म जन्म चाग्र्यं महात्मनः।।कथं च बाल
स्य सतः सूक्ष्मज्ञाने गता मतिः।।यथा नान्यस्य लोकेस्मिन् द्वितीयस्येह कस्यचित्।।एतदिच्छाम्यहं श्रोतुं विस्त
रेण महामते।।न हि मे तृप्तिरस्तीह शृण्वतो मृतमुत्तमं।।माहात्म्यमात्मयोगं च विज्ञानं च शुकस्य च।।यथा

दनुपूर्वेण तन्मे ब्रूहि पितामह॥ ॥भीष्म उवाच॥ ॥न हायनैर्न पलितैर्न वित्तैर्न च बंधुभिः॥ ऋषयश्चक्रिरे ध
र्मं योनूचानः स नो महान्॥ तपोमूलमिदं सर्वं यन्मां पृच्छसि पांडव॥ तदिंद्रियाणि संयम्य तपो भवति नान्यथा॥
इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयं॥ संनियम्य तु तान्येव सिद्धिं प्राप्नोति मानवः॥ अश्वमेधसहस्रस्य वाज
पेयशतस्य च॥ योगस्य कलया तात न तुल्यं विद्यते फलं॥ अत्रैव वर्त्तयिष्यामि जन्म योगफलं यथा॥ शुकस्याग्र्यां ग
तिं चैव दुर्विदामकृतात्मभिः॥ मेरुशृंगे किल पुरा कर्णिकारवनायते॥ विजहार महादेवो भीमैर्भूतगणैर्वृतः॥
शैलराजसुता चैव देवी तत्र भवत्सुता॥ तत्र दिव्यं तपस्तेपे कृष्णद्वैपायनस्तदा॥ योगेनात्मानमाविश्य योगधर्म
परायणः॥ धारयन्स तपस्तेपे पुत्रार्थं कुरुसत्तम॥ अग्नेर्भूमेरपां वायोरंतरिक्षस्य वा विभो॥ वीर्येण संमितः पु
त्रो मम भूयादिति स्म ह॥ संकल्पेनाथ योगेन दुःप्रापमकृतात्मभिः॥ वरयामास देवेशमास्थितस्तप उत्तमं॥
अतिष्ठन्मारुताहारः शतं किल समाः प्रभुः॥ आराधयन्महादेवं बहुरूपमुमापतिं॥ तत्र ब्रह्मर्षयश्चैव सर्वे रा ब्र
जर्षयस्तथा॥ लोकपालाश्च लोकेशं साध्याश्च वसुभिः सह॥ आदित्याश्चैव रुद्राश्च दिवाकरनिशाकरौ॥ व
सवो मरुतश्चैव सागराः सरितस्तथा॥ अश्विनौ देवगंधर्वास्तथा नारदपर्वतौ॥ विश्वावसुश्च गंधर्वः सिद्धा

श्रासनरसस्तथा॥अश्विनौ देवगंधर्वास्तत्र रुद्रो महादेवः कर्णिकानमयींशुभां॥धारयानःस्त्रजं भाति ज्योत्स्ना
भिव निशाकरं॥तस्मिन्दिव्ये वने रम्ये देवदेवर्षिसंकुले॥आस्थितः परमं योगं महर्षिः पुत्रार्थमच्युतः॥नचास्यही
यते प्राणो न ग्लानिरुपजायते॥त्र्याणामपि लोकानां तदद्भुतमिवाभवत्॥जटाश्च तेजसा तस्य वैश्वानरशि
खोपमाः॥प्रज्वलंतस्म दृश्यंते युक्तस्यामिततेजसा॥मार्कंडेयो हि भगवानेतदाख्यातवान्मम॥स देवचरि
तानीह कथयामास मे सदा॥एता अद्यापि कृष्णस्य तपसा तेन दीपिताः॥अग्निवर्णजटास्तात प्रकाशंते म
हात्मनेः॥एवंविधेन तपसा तस्य भक्त्या च भारत॥महेश्वरः प्रसंन्नात्मा चकार मनसा गतिं॥उवाच चैवं भ
गवांस्त्र्यंबकः प्रहसन्निव॥एवंविधस्ते तनयो द्वैपायन भविष्यति॥यथा ह्यग्निर्यथा वायुर्यथा भूमिर्यथा
चलं॥यथा च खं तथा शुद्धो भविता ते सुतो महान्॥तद्भावभावी तद्बुद्धिस्तदात्मा तदपाश्रयः॥तेजसावृत्य
लोकांस्त्रीन्यशः प्राप्स्यति ते सुतः॥ ॥शांतौ मोक्षधर्मे॥ ॥श्रीभीष्मउवाच॥ ॥ स लब्ध्वा परमं देवाद्वरं स
त्यवतीसुतः॥अरणीसहितं गृह्य ममंथाग्निं चिकीर्षया॥अथ रूपं परं राजन्बिभ्रतीं स्वेन तेजसा॥
घृताचीं नामाप्सरसमपश्यद्भगवानृषिः॥ऋषिरप्सरसं दृष्ट्वा सहसा काममोहितः॥अभवद्भगवान्

मो॰ ध॰
१८९
सह

यासोरनेतस्मिन्युधिष्ठिर। सा च दृष्ट्वा तदा व्यासं कामसंविग्नमानसं॥ शुकी भूत्वा महाराज घृताचीसमुपागमत्॥
स तामप्सरसं दृष्ट्वा रूपेणान्येन संवृतां॥ शरीरजेनानुगतः सर्वगात्रातिगेन ह॥ स तु धैर्येण महता निगृह्णन् हृच्छ-
यं मुनिः॥ न शशाक नियंतुं तद्व्यासः प्रविसृतं मनः॥ भावित्वाच्चैव भावस्य घृताच्या वपुषा हृतं॥ यत्नान्नियच्छतस्त-
स्य मुनेरग्निचिकीर्षया॥ अरण्यामेव सहसा तस्य शुक्रमवापतत्॥ सोविशंकेन मनसा तथैव द्विजसत्तमः॥ अरणीं ममंथ
ब्रह्मर्षिस्तस्यां जज्ञे शुको नृप॥ शुक्रे निर्मथ्यमानेन शुको जज्ञे महातपाः॥ परमर्षिर्महायोगी अरणीगर्भसंभवः॥ य-
थाध्वरे समिद्धोग्निर्भाति हव्यमुदाहरन्॥ तथारूपः शुको जज्ञे प्रज्वलन्निव तेजसा॥ बिभ्रत्पितुश्च कौरव्य रूपवर्णमनु-
त्तमं॥ बभौ तदा भावितात्मा विधूम इव पावकः॥ तं गंगा सरितां श्रेष्ठा मेरुपृष्ठे जनेश्वर॥ स्वरूपिणी तदाभ्येत्य स्नपयामा-
स वारिणा॥ अंतरिक्षाच्च कौरव्य दंडः कृष्णाजिनं च ह॥ पपात भुवि राजेंद्र शुकस्यार्थे महात्मनः॥ जेगीयंते स्म गंधर्वा ननृ-
तुश्चाप्सरोगणाः॥ देवदुंदुभयश्चैव प्रावाद्यंत महास्वनाः॥ विश्वावसुश्च गंधर्वस्तथा तुंबुरुनारदौ॥ हाहा हूहूश्च गंधर्वौ तुष्टु-
वुः शुकसंभवं॥ तत्र शक्रपुरोगाश्च लोकपालाः समागताः॥ देवा देवर्षयश्चैव तथा ब्रह्मर्षयोपि च॥ दिव्यानि सर्वपुष्पाणि
प्रववर्ष च मारुतः॥ जंगमाजंगमं चैव प्रहृष्टमभवज्जगत्॥ तं महात्मा स्वयं प्रीत्या देव्या सह महाद्युतिः॥ जातमात्रं मुनेः पुत्रं वि-
धिनोपानयत्ततः॥ तस्य देवेश्वरः शक्रो दिव्यमद्भुतदर्शनं॥ ददौ कमंडलुं प्रीत्या देववासांसि चाभिभो॥ हंसाश्च शतपत्राश्च १८९

सानसाश्च सहस्रशः ॥ प्रदक्षिणमवर्त्तंत शुकाश्रमपाश्रमानत ॥ आरणेयस्ततो दिव्यं प्राप्य जन्म महाद्युतिः ॥ तत्रैवोवासमे
धावी व्रतचारी समाहितः ॥ उत्पन्नमात्रं तं देवाः सरहस्याः ससंग्रहाः ॥ उपतस्थुर्महाराज यथास्य पितरे तथा ॥ बृहस्पतिं च वव्रे
स वेदवेदांगभाष्यवित् ॥ उपाध्यायं महाराज धर्ममेवानुचिंतयन् ॥ सोधीत्य निखिलान्वेदान्सरहस्यान्ससंग्रहान् ॥ इ
तिहासं च कात्स्न्येन राजशास्त्राणि चाविभो ॥ गुरवे दक्षिणां दत्वा समावृत्तो महामुनिः ॥ उग्रं तपः समारेभे ब्रह्मचारी समा
हितः ॥ देवतानामृषीणां च बाल्येपि स महातपाः ॥ संमंत्रणीयो मान्यश्च ज्ञानेन तपसा तथा ॥ न त्वस्य रमते बुद्धिराश्रमेषु न
राधिप ॥ त्रिषु गार्हस्थ्यमूलेषु मोक्षधर्मानुदर्शिनः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ स मोक्षमनुचिंत्यैव शुकः पि
तरमभ्यगात् ॥ प्राहाभिवाद्य च गुरुं श्रेयोर्थी विनयान्वितः ॥ मोक्षधर्मेषु कुशलो भगवान्प्रब्रवीतु मे ॥ यथा मे मनसः शां
तिः परमा संभवेत्प्रभो ॥ श्रुत्वा पुत्रस्य तु वचः परमर्षिरुवाच तं ॥ अधीष्व पुत्र मोक्षं वै धर्मांश्च विविधानपि ॥ पितुर्नियोगा
ज्जग्राह शुको धर्मभृतां वरः ॥ योगशास्त्रं च निखिलं कापिलं चैव भारत ॥ स तं ब्राह्म्या श्रिया युक्तं ब्रह्मतुल्यपराक्र
मं ॥ मेने पुत्रं यदा व्यासो मोक्षधर्मविशारदं ॥ उवाच गच्छेति तदा जनकं मिथिलेश्वरं ॥ स ते वक्ष्यति मोक्षार्थं निखिलं
मिथिलेश्वरः ॥ पितुर्नियोगमादाय जगाम मिथिलां नृपं ॥ प्रष्टुं धर्मस्य निष्ठां वै मोक्षस्य च परायणं ॥ उक्तश्च मानुषेण
त्वं यथा गच्छे सविस्मितः ॥ न प्रभावेन गंतव्यमंतरिक्षचरेण वै ॥ आर्जवेनैव गंतव्यं न सुखान्वेषिणा तथा ॥ नान्वेष्टव्या

निशेषास्तु विशेषा हि प्रसंगिनः॥ अहंकार्यो न कर्त्तव्यो यद्येतस्मिन्द्विजर्षभ॥ स्थातव्यं च वशे तस्य स ते वेछति संशयं॥ स धर्मकु
शलो राजा मोक्षशास्त्रविशारदः॥ याज्यो मम स यद्ब्रूयात्तत्कार्यमविशंकया॥ एवमुक्तः स धर्मात्मा जगाम मिथिलां पुनः॥
पद्भ्यां शक्तोंऽतरिक्षेण क्रांतुं पृथ्वीं ससागरां॥ स गिरींश्चाप्यनुतिक्रम्य नदीतीर्थसरांसि च॥ बहुव्यालमृगाकीर्णा अट
वीश्च वनानि च॥ मेरोर्हरेश्च द्वे वर्षे हैमवंतं ततः॥ क्रमेणैव व्यतिक्रम्य भारतं वर्षमासदत्॥ स देशान्विविधान्पश्यंश्ची
नहूणनिषेवितान्॥ आर्यावर्त्तमिमं देशमाजगाम महामुनिः॥ पितुर्वचनमाज्ञाय तमेवार्थं विचिंतयन्॥ अध्वानं सोऽतिचक्रा
म खेचरः खेचरन्निव॥ पत्तनानि च रम्याणि स्फीतानि नगराणि च॥ रत्नानि च विचित्राणि पश्यन्नपि न पश्यति॥ उद्या
नानि च रम्याणि तथैवायतनानि च पुण्यानि चैव रत्नानि सोऽत्यक्रामद्यथाध्वगः॥ सोऽचिरेणैव कालेन विदेहानास
साद ह॥ रक्षितान्धर्मराजेन जनकेन महात्मना॥ तत्र ग्रामान्बहून्पश्यन्बहुन्नरसभोजनात्॥ पल्लीघोषान्समृद्धांश्च
बहुगोकुलसंकुलान्॥ स्फीतांश्च शालियवसैर्हंससारससेवितान्॥ पद्मिनीभिश्च शतशः श्रीमतीभिरलंकृतान्॥
स विदेहानतिक्रम्य समृद्धजनसेवितान्॥ मिथिलोपवनं रम्यमाससाद समृद्धिमत्॥ हस्त्यश्वरथसंकीर्णं नरना
रीसमाकुलं॥ पश्यन्नपश्यन्निव तत्समतिक्रामदच्युतः॥ मनसा तं वहन्भारं तमेवार्थं विचिंतयन्॥ आत्मारामः प्रसं
न्नात्मा मिथिलामाससाद ह॥ तस्या द्वारं समासाद्य द्वारपालैर्निवारितः॥ स्थितो ध्यानपरो युक्तो विदितः प्रविवेश

ह॥ स राजमार्गमासाद्य समृद्धजनसंकुलं॥ पार्थिवक्षयमासाद्य निःशंकः प्रविवेश ह॥ तत्रापि द्वारपालास्तमुग्रवाचा
न्यषेधयत्॥ तथैव च शुकस्तत्र निर्मन्युः समतिष्ठत॥ न चातपाध्वसंतप्तः क्षुत्पिपासाश्रमान्वितः॥ प्रताम्यति ग्लायति
वा नापैति च तथातपात्॥ तेषां तु द्वारपालानामेकः शोकसमन्वितः॥ मध्यंगतमिवादित्यं दृष्ट्वा शुकमवस्थितं॥ पूजयि
त्वा यथान्यायमभिवाद्य कृतांजलिः॥ प्रवेशयत्ततः कक्षां द्वितीयां राजवेश्मनः॥ तत्रासीत शुकस्तात मोक्षमेवानुचिंतय
न्॥ छायायामातपे चैव समदर्शी समद्युतिः॥ तं मुहूर्तादिवागम्य राज्ञो मंत्री कृतांजलिः॥ प्रवेशयत्ततः कक्षां द्वितीयां रा
जवेश्मनः॥ तत्रांतःपुरसंबंधं सुमहच्चैत्ररथोपमं॥ सुविभक्तजलाक्रीडं रम्यं पुष्पितपादपं॥ शुकं प्रावेशयन्मंत्री प्रम
दावनमुत्तमं॥ स तस्यासनमादिश्य निश्चक्राम ततः पुनः॥ तं चानुवेषी शुश्रोण्यास्तरुण्यप्रियदर्शनाः॥ सूक्ष्मरक्तांब
रधरास्तप्तकांचनभूषणाः॥ संलापोल्लापकुशला नृत्यगीतविशारदाः॥ स्मितपूर्वाभिभाषिण्यो रूपेणाप्सरसां समाः
॥ कामोपचारकुशला भावज्ञाः सर्वकोविदाः॥ परं पंचाशतं नार्यो वारमुख्याः समाद्रवन्॥ पाद्यादीनि प्रतिग्राह्य पूजया
यमर्चयन्॥ कालोपपन्नेन तदा स्वाद्वन्नेनाभ्यतर्पयत्॥ तस्य भुक्तवतस्तात तदंतःपुरकाननं॥ सुरम्यं दर्शयामासुरे
केकस्येन भारत॥ क्रीडंत्यश्च हसंत्यश्च गायंत्यश्चापि ताः शुभं॥ उदारसत्वं सत्वज्ञाः स्त्रियः पर्यचरंस्तथा॥ आरणेयस्तु
शुद्धात्मा निःसंदेहस्वकर्मतत्॥ वश्येंद्रियो जितक्रोधो न हृष्यति न कुप्यति॥ तस्मै शय्यासनं दिव्यं देवार्हं रत्नभूषितं॥

स्पर्द्ध्यास्तरणसंकीर्णां ददृशुस्ता परमास्त्रियः।।पादशौचं तु कृत्वैव शुकः संध्यामुपास्य च।।निषसादासने पुण्ये तमेवार्थं विचिंत
यन्।।पूर्वरात्रे तु तत्रासौ भूत्वा ध्यानपरायणः।।मध्यरात्रे यथान्यायं निद्रामाहारयत्प्रभुः।।ततो मुहूर्त्तादुत्थाय कृत्वा शौचं
मनंतरं।।स्त्रीभिः परिवृतो धीमान्ध्यानमेवान्वपद्यत।।अनेन विधिना कार्ष्णिस्तदहःशेषमच्युतः।।तां च रात्रिं नृपकुले
वर्त्तयामास भारत।। ।।शांतौ मोक्षधर्मे।। ।।भीष्म उवाच।। ।।ततः स राजा जनको मंत्रिभिः सह भारत।।पुरः पुरोहितं
कृत्वा सर्वाण्यंतःपुराणि च।।आसनं च पुरस्कृत्य रत्नानि विविधानि च।।शिरसा चार्घ्यमादाय गुरुपुत्रं समभ्यगात्।।स
तदासनमादाय बहुरत्नविभूषितं।।स्पर्द्ध्यास्तरणसंस्तीर्णं सर्वतोभद्रमृद्धिमत्।।पुरोधसा संगृहीतं हस्तेनालभ्य पा
र्थिवः।।प्रददौ गुरुपुत्राय शुकाय परमार्चितं।।तत्रोपविष्टं तं कार्ष्णिं शास्त्रतः प्रत्यपूजयत्।।पाद्यं निवेद्य प्रथमं सार्घ्यं गां
च न्यवेदयत्।।स च तां मंत्रवत्पूजां प्रत्यगृह्णाद्यथाविधि।।प्रतिगृह्य तु तां पूजां जनकाद्द्विजसत्तमः।।गां चैव समनुज्ञाय रा
जानमनुमान्य च।।पर्यपृच्छन्महातेजा राज्ञः कुशलमव्ययं।।अनामयं च राजेंद्र शुकः सानुचरस्य ह।।अनुशिष्टस्तु ते
नासौ निषसाद सहानुगः।।उदारसत्वाभिजनो भूमौ राजा कृतांजलिः।।कुशलं चाव्ययं चैव पृष्ट्वा वैयासकिं नृपः।।किमा
गमनमित्येवं पर्यपृच्छत पार्थिवः।। ।।शुक उवाच।। ।।पित्राहमुक्तो भद्रं ते मोक्षधर्मार्थकोविदः।।विदेहराजो याज्यो मे जनको नाम
विश्रुतः।।तत्र गच्छस्व वै यदिहृदिसंशयः।।प्रवृत्तौ वा निवृत्तौ वा स ते छेत्स्यति संशयं।।सोहं पितुर्नियोगात्त्वामुपप्रष्टुमिहा

गतः॥ तन्मे धर्मभृतांश्रेष्ठ यथावद्वक्तुमर्हसि॥ किं कार्यं ब्राह्मणेनेह मोक्षार्थश्च किमात्मकः॥ कथं च मोक्षः प्राप्तव्यो ज्ञानेन तपसा
थवा॥ ॥जनक उवाच॥ ॥यत्कार्यं ब्राह्मणेनेह जन्मप्रभृति तच्छृणु॥ कृतोपनयनस्तात भवेद्वेदपरायणः॥ तपसा गुरु
वृत्त्या च ब्रह्मचर्येण वा विभो॥ देवतानां पितॄणां चाप्यनृणो ह्यनसूयकः॥ वेदानधीत्य नियतो दक्षिणामपवृज्य च॥ अभ्यनुज्ञा
मथ प्राप्य समावर्तेत वै द्विजः॥ समावृत्तश्च गार्हस्थ्ये स्वदारनिरतो वसेत्॥ अनसूयुर्यथान्यायमाहिताग्निस्तथैव च॥ उत्पा
द्य पुत्रपौत्रं तु वन्याश्रमपदे वसेत्॥ तानेवाग्नीन्यथाशास्त्रमर्चयन्नतिथिप्रियः॥ स वनेग्नीन्यथान्यायमात्मन्यारोप्य ध
र्मवित्॥ निर्द्वंद्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत्॥ ॥श्रीशुक उवाच॥ ॥उत्पन्ने ज्ञानविज्ञाने निर्द्वंद्वे हृदि शाश्वते॥
किमवश्यं निवस्तव्यं माश्रमेषु भवेत् विभो॥ एतद्भवंतं पृच्छामि तद्भवान्वक्तुमर्हसि॥ यथा वेदार्थतत्वेन ब्रूहि मे त्वं जना
धिप॥ ॥जनक उवाच॥ ॥न विना ज्ञाने विज्ञानेन मोक्षस्याधिगमो भवेत्॥ न विना गुरुसंबंधं ज्ञानस्याधिगमः स्मृतः॥ गु
रुः प्लावयिता तस्य ज्ञानं प्लव इहोच्यते॥ विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत्॥ अनुच्छेदाय लोकानामनुच्छेदा
य कर्मणां॥ पूर्वैराचरितो धर्मश्चातुराश्रम्यसंकटः॥ अनेन क्रमयोगेन बहुजातिषु कर्मणां॥ हित्वा शुभाशुभं कर्म
मोक्षो नामेह लभ्यते॥ भावितैः कारणैश्चायं बहुसंसारयोनिषु॥ आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे॥ तमासा
द्य तु मुक्तस्य दृष्टार्थस्य विपश्चितः॥ त्रिष्वाश्रमेषु को न्वर्थो भवेत्परमभीप्सतः॥ राजसांस्तामसांश्चैव नित्यं दोषान्विवर्ज

येत्॥ सात्विकं मार्गमास्थाय पश्येदात्मानमात्मना॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ संपश्यन्नोपलिप्येत जलेवा
रिचरो यथा॥ पक्षिवत्प्लवणादूर्ध्वममुत्रानंत्यमश्नुते॥ विहाय देहान्निर्मुक्तो निर्द्वंद्वः प्रशमं गतः॥ अत्र गाथा पुरा गीता
शृणु राजन्ययातिना॥ धार्यंते या द्विजैस्तात मोक्षशास्त्रविशारदैः॥ ज्योतिरात्मनि नान्यत्र सर्वजंतुषु तत्समं॥ स्वयं च श
क्यते द्रष्टुं सुसमाहितचेतसा॥ न बिभेति परो यस्मान्न बिभेति पराच्च यः॥ यश्च नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा॥ यदा भा
वं न कुरुते सर्वभूतेषु पापकं॥ कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा॥ संयोज्य मनसात्मानमीर्ष्यामुत्सृज्य मोहिनीं॥
त्यक्त्वा कामं च मोहं च तदा ब्रह्मत्वमश्नुते॥ यदा श्रव्ये च दृश्ये च सर्वभूतेषु चाप्ययं॥ समो भवति निर्द्वंद्वो ब्रह्म संपद्य
ते तदा॥ यदा स्तुतिं च निंदां च समत्वेनैव पश्यति॥ कांचनं चायसं चैव सुखदुःखे तथैव च॥ शीतमुष्णं तथैवार्थमनर्थं प्रिय
मप्रियं॥ जीवितं मरणं चैव ब्रह्म संपद्यते तदा॥ प्रसार्येह यथांगानि कूर्मः संहरते पुनः॥ तथेंद्रियाणि मनसा संयंत
व्यानि भिक्षुणा॥ तमःपरिगतं वेश्म यथा दीपेन दृश्यते॥ तथा बुद्धिप्रदीपेन शक्य आत्मा निरीक्षितुं॥ एतत्सर्वं च प
श्यामि त्वयि बुद्धिमतां वर॥ यच्चान्यदपि वेत्तव्यं तत्त्वतो वेद तद्भवान्॥ ब्रह्मर्षे विदितश्चासि विषयांतमुपागतः॥ गुरो
स्तव प्रसादेन तवैवोपशिक्षया॥ तस्यैव च प्रसादेन प्रादुर्भूत महामुने॥ ज्ञानं दिव्यममापीदं तेनासि विदितो मम॥

अधिकंतवविज्ञानमधिकाचगतिस्तव॥अधिकंतवचैश्वर्यंतच्चत्वंनान्यथावबुध्यसे॥बाल्याद्वासंशयाद्वापिभयाद्वाप्यविमोक्षजात्॥उत्पन्नेचापिविज्ञानेनाधिगच्छसितांगतिं॥व्यवसायेनशुद्धेनमद्विधैश्छिन्नसंशयः॥विमुच्यहृदयग्रंथीनासादयतितांगतिं॥भवांश्चोत्पन्नविज्ञानःस्थिरबुद्धिरलोलुपः॥व्यवसायादृतेब्रह्मन्नासादयतितत्परं॥नास्तितेसुखदुःखेषुविशेषोनास्तिलोलुप॥नौत्सुक्यंनृत्यगीतेषुनरागउपजायते॥नबंधुष्वनुबंधस्तेनभयेष्वस्तितेभयं॥पश्यामित्वांमहाभागतुल्यलोष्टाश्मकांचनं॥अहंवामनुपश्यामियेवाप्यन्येमनीषिणः॥आस्थितंपरमंमार्गमक्षयंतमनामयं॥यत्फलंब्राह्मणस्येहमोक्षार्थश्चयदात्मकः॥तस्मिन्वैवर्तसेब्रह्मन्किमन्यत्परिपृच्छसि॥ ॥शांतौमोक्षधर्मे॥ ॥भीष्मउवाच॥ ॥एतच्छ्रुत्वातुवचनंकृतात्माकृतनिश्चयः॥आत्मनात्मानमास्थायदृष्ट्वाचात्मानमात्मना॥कृतकार्यःसुखीशांतस्तूष्णीं प्रायादुदङ्मुखः॥शैशिरंगिरिमुद्दिश्यसधर्मामातरिश्वनः॥एतस्मिन्नेवकालेतुदेवर्षिर्नारदस्तथा॥हिमवंतमियाद्द्रष्टुंसिद्धचारणसेवितं॥तमप्सरोगणाकीर्णंगीतस्वननिनादितं॥किंनराणांसहस्रैश्चभृंगराजैस्तथैवच॥मद्गुभिःखंजरीटैश्च विचित्रैर्जीवजीवकैः॥चित्रवर्णैर्मयूरैश्चकेकाशतविराजितैः॥राजहंससमूहैश्चहृष्टैःपरभृतैस्तथा॥पक्षिराजोगरुत्मांश्चयंनित्यमधितिष्ठति॥चत्वारोलोकपालाश्चदेवाःसर्षिगणास्तथा॥तत्रनित्यंसमायांतिलोकस्यहितकाम्यया॥ विष्णुनायत्रपुत्रार्थेतपस्तप्तंमहात्म

ना।।तथैव च कुमारेण बाल्ये क्षिप्ता दिवौकसः।।शक्तिर्न्यस्ता क्षितितले त्रैलोक्यमवमन्यवै।।तत्रोवाच जगत्स्कंदः पन्वा
क्यमिदं तदा।।योन्योस्ति मत्तोभ्यधिको विप्रायस्याधिकं प्रियाः।।योब्राह्मण्यो द्वितीयोस्ति त्रिषुलोकेषु वीर्यवान्।।
सोभ्युद्धरतिमां शक्तिमथवा कंपयत्विति।।तच्छ्रुत्वा व्यथिता लोकाः कइमामुद्धरेदिति।।अथदेवगणं सर्वं संभ्रांते
न्द्रियमानसं।।अपश्यद्भगवान्विष्णुः क्षिप्तमासुरराक्षसं।।किंत्वत्र सुकृतं कार्यं भवेदिति विचिंतयन्।।अनामृष्यत
तःक्षेपमवैक्षत च पावकी।।संप्रगृह्य विशुद्धात्मा शक्तिं प्रज्वलितां तदा।।कंपयामास सव्येन पाणिना पुरुषोत्तमः।
शक्त्यांतु कंप्यमानायां विष्णुना बलिना तदा।।मेदिनी कंपिता सर्वा सशैलवनकानना।।शक्तेनापि समुद्धर्तुं कंपिता
सा प्रभवत्तदा।।रक्षिता स्कंदराजस्य धर्षणां प्रभविष्णुना।।तां कंपयित्वा भगवान्प्रह्लादमिदमब्रवीत्।।पश्य वीर्यं कुमाद
नस्य नैतदन्यः करिष्यति।।सोमृष्यमाणस्तद्वाक्यं समुद्धरणनिश्चितः।।जग्राह तां तदा शक्तिं न चैनां सव्यकंपत्।।
नादं महांतं मुक्त्वा स मूर्छितो गिरिमूर्द्धनि।।विह्वलः प्रापतद्भूमौ हिरण्यकशिपोः सुतः।।तत्रोत्तरां दिशं गत्वा शैलरा
जस्य पार्श्वतः।।तपोतप्यत दुर्धर्षं तातनित्यं वृषध्वजः।।पावकेन परिक्षिप्तं दीप्यतापस्य वाश्रमे।।आदित्यपर्व
तंनाम दुर्द्धर्षमकृतात्मभिः।।न तत्र शक्यते गंतुं यक्षराक्षससदानवैः।।दशयोजनविस्तारमग्निज्वालासमावृतं।।
भगवान्पावकस्तत्र स्वयं तिष्ठति वीर्यवान्।।सर्वान्विघ्नान्प्रशमयन्महादेवस्य धीमतः।।दिव्यवर्षसहस्रं

हिपादेनैकेन तिष्ठतः॥ देवान्संतापयंस्तत्र महादेवो महाव्रतः॥ ऐंद्रीतु दिशमास्थाय शैलराजस्य धीमतः॥ विविक्ते प
र्वततटे पाराशर्यो महातपाः॥ वेदानध्यापयामास व्यासशिष्यान्महातपाः॥ सुमंतुं च महाभागं वैशंपायनमेव च॥
जैमिनिं च महाप्राज्ञं शैलं चापि तपस्विनं॥ यत्र शिष्यैः परिवृतो व्यास आस्ते महातपाः॥ तत्राश्रमपदं रम्यं ददर्शी द
तुरूत्तमं॥ आतपेयो विशुद्धात्मा नभस्यासीद्दिवाकरः॥ अथ व्यासः परिक्षिप्तं ज्वलंतमिव पावकं॥ ददर्श सु
तमायांतं दिवाकरसमप्रभं॥ असज्जमानं वृक्षेषु शैलेषु विषमेषु च॥ योगयुक्तं महात्मानं यथा बाणं गुणा
च्युतं॥ सोऽभिगम्य पितुः पादावगृह्णादरणीसुतः॥ यथोपजोषं तैश्चापि समागच्छन्महामुनिः॥ ततो निवेदयामा
स पित्रे सर्वमशेषतः॥ शुको जनकराजेन संवादं प्रीतमानसः॥ एवमध्यापयञ्शिष्यान्व्यासः पुत्रं च वीर्यवा
न्॥ उवास हिमवत्पृष्ठे पाराशर्यो महामुनिः॥ ततः कदाचिच्छिष्यास्ते परिवार्यावतस्थिरे॥ वेदाध्ययनसं
पन्ना शांता दांता जितेंद्रियाः॥ वेदेषु निष्ठां संप्राप्य सांगेष्वपि तपस्विनः॥ अथोचुस्ते तदा व्यासं शिष्याः
प्रांजलयो गुरुं॥ ॥ शिष्या ऊचुः॥ ॥ महता तेजसा युक्ता यशसा च स्म वर्द्धिताः॥ एकं त्विदानीमिच्छामो गुरुः
णानुग्रहं कृतं॥ इति तेषां वचः श्रुत्वा ब्रह्मर्षिस्तानुवाच ह॥ उच्यतामिति तद्वत्सा यद्वः कार्यं प्रियं मम॥

एतद्वाक्यं गुरोश्रुत्वा शिष्यास्ते हृष्टमानसाः ॥ उनः प्रांजलयो भूत्वा प्रणम्य शिरसा गुरुं ॥ ऊचुस्ते सहिता राज
न्निदं वचनमुत्तमं ॥ यदि प्रीत उपाध्यायो धन्यास्मो मुनिसत्तम ॥ कांक्षामस्त्व वयं सर्वे वरं दातुं महर्षिणा ॥
षष्ठः शिष्यपतेस्यातिं गच्छेदत्र प्रसीदतः ॥ चत्वारस्ते वयं शिष्या गुरुपुत्रश्च पंचमः ॥ इह वेदप्रतिष्ठिरस्तु ए
षनः कांक्षितो वरः ॥ शिष्याणां वचनं श्रुत्वा व्यासो वेदार्थतत्ववित् ॥ पराशरात्मजो धीमान्परलोकार्थचिंतकः ॥
उवाच शिष्यान्धर्मात्मा धर्म्यं वै श्रेयसं वचः ॥ ब्राह्मणाय सदा देयं ब्रह्मशुश्रूषवे तथा ॥ ब्रह्मलोके निवासं यो
ध्रुवं समभिकांक्षते ॥ भवंतो बहुलाः संतु वेदो विस्तार्यतामयं ॥ नाशिष्ये संप्रदातव्यो नाव्रते नाकृतात्मनि ॥
४ एते शिष्यगुणाः सर्वे विज्ञातव्या यथार्थतः ॥ नापरीक्षितचारित्रे विद्या देया कथंचन ॥ यथा हि कनकं शुद्धं ता
पच्छेदनिकर्षणैः ॥ परीक्षेत तथा शिष्यानीक्षेत्कुलगुणादिभिः ॥ न नियोज्याश्च वः शिष्या अनियोगे महाभये ॥
यथामति यथापाठं तथा विद्या फलिष्यति ॥ सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ॥ श्रावयेच्चतुरो वर्णान्
कृत्वा ब्राह्मणमग्रतः ॥ वेदस्याध्यापनं हीदं तच्च कार्यं महत्स्मृतं ॥ स्तुत्यर्थमिह देवानां वेदाः सृष्टाः स्वयंभुवा ॥ यो
निर्वदेत्संमोहाद्ब्राह्मणं वेदपारगं ॥ सोऽपध्यानाद्ब्राह्मणस्य पराभूयादसंशयं ॥ यश्चाधर्मेण विब्रूया १९४

घश्चा धर्मेणपृच्छति ।।तपोरन्यतनःश्रेति विद्वेषं वापियपृच्छति ।।एतद्वःसर्वमाख्यातं स्वाध्यायस्य विधिंप्रति ।।
उपाकुर्यांच्च शिष्याणामेतच्चहृदिवोभवेत् ।। ।।शांतौमोक्षधर्मे ।। ।।भीष्मउवाच ।। ।।एतच्छ्रुत्वागुरोर्वाक्यं
व्यासशिष्यामहौजसः ।।अन्योन्यंहृष्टमनसःपरिपस्वजिरेतदा ।।उक्तास्मोयद्भगवतातदात्वायतिसंहितं ।।
तन्नोमनसिसंरूढंकरिष्यामस्तथाचयत् ।।अन्योन्यंसंविभाष्यैवंसुप्रीतमनसःपुनः ।।विज्ञापयंतिस्मगुरुं ।।
पुनर्वाक्यविशारदाः ।।शैलादस्मान्महींगंतुंकांक्षितंनोमहामुने ।।वेदाननेकधाकर्तुंयदितेरुचितंप्रभो ।।
शिष्याणांवचनंश्रुत्वापराशरसुतःप्रभुः ।।प्रत्युवाचततोवाक्यंधर्मार्थसहितंहितं ।।क्षितिंवादेवलोकंवाग
म्यतांयतिरोचते ।।अप्रमादश्चवःकार्योब्रह्महिप्रचुरंबलं ।।तेनुज्ञातास्ततसर्वेगुरुणासत्यवादिना ।।जग्मुः
प्रदक्षिणंकृत्वाव्यासंमूर्द्धाभिवाद्यच ।।अवतीर्यमहींतेथचातुर्होत्रमकल्पयन् ।।संयाजयंतोविप्रांश्चरा
जन्यांश्चविशस्तथा ।।पूज्यमानाद्विजैर्नित्यंमोदमानागृहेरताः ।।याजनाध्यापनरताःश्रीमंतोलोकवि
श्रुताः ।।अवतीर्णेषुशिष्येषुव्यासःपुत्रसहायवान् ।।तूष्णींध्यानपरोधीमानेकांतेसमुपाविशत् ।।तंद
दर्शाश्रमपदेनारदःसुमहातपाः ।।अथैनमब्रवीत्कालेमधुराक्षरयागिरा ।।भोभोब्रह्मर्षिवासिष्ठब्रह्म

घोषोनवर्तते ॥ एकोध्यानपरः स्तूष्णीं किमास्से चिंतयन्निव ॥ ब्रह्मघोषैर्विरहितः पर्वतोयं न शोभते ॥ रजसा तमसा चैव सो
मः सोपप्लवो यथा ॥ न भ्राजंते यथापूर्वं निषादानामिवालयः ॥ देवर्षिगणजुष्टोपि वेदध्वनिनिराकृतः ॥ ऋषयश्च हि देवाश्च
गंधर्वाश्च महौजसः ॥ विमुक्ता ब्रह्मघोषेण न भ्राजंते यथा पुरा ॥ नारदस्य वचः श्रुत्वा कृष्णद्वैपायनोब्रवीत् ॥ महर्षे यत्त्व
या प्रोक्तं वेदवादविचक्षणः ॥ एतन्मनोनुकूलं मे भवानर्हति भाषितुं ॥ सर्वज्ञः सर्वदर्शी च सर्वत्र च कुतूहली ॥ त्रिषु लोके
षु यद्वृत्तं सर्वं तव मते स्थितं ॥ तदाज्ञापय विप्रर्षे ब्रूहि किं करवाणि ते ॥ यन्मया समनुष्ठेयं ब्रह्मर्षे तदुदाहर ॥ वियुक्तस्येह
शिष्यैर्मे नातिहृष्टमिदं मनः ॥ ॥ नारद उवाच ॥ ॥ अनाम्नायमला वेदाः ब्राह्मणस्याव्रतं मलं ॥ मलं पृथिव्या वाहीकाः स्त्री
णां कौतूहलं मलं ॥ अधीयतां भवान्वेदान्सार्द्धं पुत्रेण धीमता ॥ विधुन्वन्ब्रह्मघोषेण रक्षोभयकृतं तमः ॥ ॥ भीष्म उवाच ॥
॥ नारदस्य वचः श्रुत्वा व्यासः परमधर्मवित् ॥ तथेत्युवाच संहृष्टो वेदाभ्यासदृढव्रतः ॥ शुकेन सह पुत्रेण वेदाभ्यासमथाक
रोत् ॥ स्वरेणोच्चैः स शैक्षेण लोकानापूरयन्निव ॥ तयोरभ्यसतोरेवं नानाधर्मप्रवादिनोः ॥ वातोतिमात्रं प्रववौ समुद्रानिले
रितः ॥ ततोनध्याय इति तं व्यासः पुत्रमवारयत् ॥ शुको वारितमात्रस्तु कौतूहलसमन्वितः ॥ अपृच्छत्पितरं ब्रह्मन्कुतो वायु
रभूदयं ॥ आख्यातुमर्हति भवान्वायोः सर्वं विचेष्टितं ॥ शुकस्यैतद्वचः श्रुत्वा व्यासः परमविस्मितः ॥ अनध्यायनिमित्तेस्मिन्नि
दं वचनमब्रवीत् ॥ दिव्यं ते चक्षुरुत्पन्नं स्वस्थं ते निर्मलं मनः ॥ तमसा रजसा चापि त्यक्तः सत्वे व्यवस्थितः ॥ आदर्शे स्वामिव छायां प
श्यस्यात्मानमात्मना ॥ न्यस्यात्मनि स्वयं वेदान्बुद्ध्या समनुचिंतय ॥ देवयानचरो विष्णोः पितृयानश्च तामसः ॥ द्वावेतौ प्रेत्य पंथानौ

दिवं च पश्चग प्रतः।।पृथिव्यामंतरिक्षे च यत्र संवंति वायवः।।सप्तैते वायुमार्गा वै तान्निबोधानुपूर्वशः।।तत्र देवगणाः साध्याः
महाभूताः महाबलाः।।तेषामप्यभवत्पुत्रः समानो नाम दुर्जयः।।उदानस्तस्य पुत्रोऽभूद्व्यानस्तस्याभवत्सुतः।।अपानश्च त
तो ज्ञेयः प्राणश्चापि ततो परः।।अनपत्यो भवत्प्राणो दुर्द्धर्षः शत्रुतापनः।।पृथक्कर्माणि तेषां तु प्रवक्ष्यामि यथातथं।।प्राणिनां स
र्वतो वायुश्चेष्टां वर्तयते पृथक्।।प्राणनाच्चैव भूतानां प्रापार सन्निधीयते।।प्रेरयत्यत्र संघातान्धूमजांश्चोष्मजांश्च यः।।
प्रथमः प्रथमे मार्गे प्रवहो नाम यो निलः।।अंबरे स्नेहमभ्येभ्यस्तडिद्भ्यश्चोत्तमद्युतिः।।आवहो नाम संवाति द्वितीयः श्वसनो
नदन्।।उदयं ज्योतिषां शश्वत्सोमादीनां करोति यः।।अंतर्देहेषु चोदानं यं वदंति मनीषिणः।।यश्चतुर्भ्यः समुद्रेभ्यो वायुर्धा
रयते जलं।।उद्धृत्याददते चापो जीमूतेभ्यो वरो निलः।।योद्भिः संयोज्य जीमूतान्पर्जन्याय प्रयच्छति।।उद्वहो नाम बंहिष्ठ
स्तृतीयः स सदागतिः।।समुह्यमाना बहुधा येन नीताः पृथग्घनाः।।वर्षमोक्षकृतारंभास्ते भवंति घनाघनाः।।संहता येन
चाविद्धाः भवंति नदतो नदाः।।रक्षणार्थाय संभूता मेघत्वमुपयांति च।।योसौ वहति भूतानां विमानानि विहायसा।।चतुर्थः
संवहो नाम वायुः स गिरिमर्दनः।।येन वेगवता रुग्णा रूक्षेण रुजता नगा तु।।वायुना सहिता मेघास्ते भवंति बलाह
काः।।दारुणोत्पात संचारो नभसस्तनयित्नवान्।।पंचमः स महावेगो विवहो नाम मारुतः।।यस्मिन्पारिप्लवा दिव्याव
हंत्यापो विहायसा।।पुण्यं चाकाशगंगायास्तोयं विष्टभ्य तिष्ठति।।दूरात्प्रतिहतो यस्मिन्नेकरश्मिर्दिवाकरः।।योनिरं
शुसहस्रस्य येन भाति वसुंधरा।।यस्मादाप्यायते सोमः क्षीणः संपूर्णमंडलः।।षष्ठः परिवहो नाम स वायुर्जयतां व

नः॥ सर्वप्राणभृतां प्राणान्यो नु काले निरस्यति॥ यस्य वर्त्मानुवर्तेते मृत्युवैवस्वतावुभौ॥ सम्यगन्वीक्ष्यतां बुध्याध्यानं ता
याध्यात्मचिंतकः॥ ध्यानाभ्यासाभिरामाणां यो मृतत्वाय कल्पते॥ यं समासाद्य वेगेन दिशोंतं प्रतिपेदिरे॥ दक्षस्य दश
पुत्राणां सहस्राणि प्रजापतेः॥ येन स्पृष्टः पराभूतो यात्येव न निवर्तते॥ परावहो नामत्परो वायुः स दुरतिक्रमः॥ एवमे
ते दितेः पुत्रा मारुताः परमाद्भुताः॥ अनेनंपते संवांति सर्वगाः सर्वधारिणः॥ एतत्तु महदाश्चर्यं यदयं पर्वतोत्तमः॥ कंपि
तः सहसा तेन वायुनाभिप्रवायता॥ विष्णोर्निःश्वासवातोयं यदा वेगसमीरितः॥ सहसोदीर्यते तात जगत्प्रव्यथते त
दा॥ तस्माद्ब्रह्मविदो वेदान्नाधीयंतेतिवायति॥ वायुर्वायुभयोत्क्षिप्तं ब्रह्म तत्पीडितं भवेत्॥ एतावदुक्त्वा वचनं पराशर
सुतः प्रभुः॥ उक्त्वा पुत्रमधीष्वेति व्योमगंगामगात्तदा॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्म उवाच॥ ॥एतस्मिन्नंतरे शू
न्ये नारदः समुपागमत्॥ शुकं स्वाध्यायनिरतं वेदार्थान्प्रष्टुमीप्सया॥ देवर्षिं तु शुको दृष्ट्वा नारदं समुपस्थितं॥
अर्घ्यपूर्वेण विधिना वेदोक्तेनाभ्यपूजयत्॥ नारदोथाब्रवीत्प्रीतो ब्रूहि धर्मभृतांवर॥ केन त्वां श्रेयसा वत्स योज
यामीति हृष्टवत्॥ नारदस्य वचः श्रुत्वा शुकः प्रोवाच भारत॥ अस्मिंल्लोके हितं यत्स्यात्तेन मां योक्तुमर्हसि॥ ॥नारद
उवाच॥ ॥तत्वं जिज्ञासतां पूर्वमृषीणां भावितात्मनां॥ सनत्कुमारो भगवानिदं वचनमब्रवीत्॥ नास्ति विद्यासमं च
क्षुः नास्ति सत्यसमं तपः॥ नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखं॥ निवृत्तिः कर्मणः पापात्सततं पुण्यशीलता॥

८६०

समहृतिः समुदाचारः श्रेय एतदनुत्तमं ।। मानुष्यमसुखं प्राप्य यः सज्जति स मुह्यति ।। नालं स दुःखमोक्षाय संयोगो दुःखलक्षणं ।। सक्तस्य बुद्धिश्चलति मोहजालविवर्द्धिनी ।। मोहजालावृतो दुःखमिह चामुत्र सोऽश्नुते ।। सर्वोपायात्तु कामस्य क्रोधस्य च विनिग्रहः ।। कार्यः श्रेयोर्थिना तौ हि श्रेयोघातार्थमुद्यतौ ।। नित्यं क्रोधात्तपो रक्षेच्छ्रियं रक्षेच्च मत्सरात् ।। विद्यां मानापमानाभ्यां आत्मानं तु प्रमादतः ।। आनृशंस्यं परो धर्मः क्षमा च परमं बलं ।। आत्मज्ञानं परं ज्ञानं न सत्याद्विद्यते परं ।। सत्यस्य वचनं श्रेयः सत्यादपि हितं वदेत् ।। यद्भूतहितमत्यंतमेतत्सत्यं मतं मम ।। सर्वारंभपरित्यागी निराशी निष्परिग्रहः ।। येन सर्वं परित्यक्तं स विद्वान्स च पंडितः ।। इंद्रियैरिंद्रियार्थेभ्यश्चरत्यात्मवशैरिह ।। असज्जमानः शांतात्मा निर्विकारः समाहितः ।। आत्मभूतैरतद्भूतः सह चैव विनैव च ।। स विमुक्तः परं श्रेयो न चिरेणाधिगच्छति ।। अदर्शनमसंस्पर्शस्तथासंभाषणं सदा ।। यस्य भूतैः सह मुने स श्रेयो विंदते परं ।। न हिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत् ।। नेदं जन्म समासाद्य वैरं कुर्वीत केनचित् ।। आकिंचन्यं सुसंतोषो निराशीत्वमचापलं ।। एतदाहुः परं श्रेय आत्मज्ञस्य जितात्मनः ।। परिग्रहं परित्यज्य भव तात जितेंद्रियः ।। अशोकं स्थानमातिष्ठ इह चामुत्र चाभयं ।। निरामिषा न शोचंति त्यजेदामिषमात्मनः ।। परित्यज्यामिषं सौम्य दुःखतापाद्विमोक्ष्यसे ।। तपो नित्येन दांतेन मुनिना संयतात्मना ।। अजितं जेतुकामेन भाव्यं संगेष्वसंगिना ।। गुणसंगेष्वनासक्त एकचर्यरतः सदा ।। ब्राह्मणो न चिरादेव सुखमायात्यनुत्तमं ।। द्वंद्वारामेषु भूतेषु य एको रमते मुनिः ।। विद्धि प्रज्ञानतृप्तं तं ज्ञानतृप्तो न शोचति ।। शुभैर्लभति देवत्वं व्यामिश्रैर्जन्म मानुषं ।। अशुभैश्चाप्यधो जन्म कर्मभिर्लभतेऽवशः ।। तत्र मृत्युजरादुःखैः संततं

समभिद्रुतः॥ संसारे पच्यते जंतुस्तत्कथं नावबुध्यते॥ अहिते हितसंज्ञस्त्वमध्रुवे ध्रुवसंज्ञकः॥ अनर्थे चार्थसंज्ञस्त्वं किमर्थं नावबु
ध्यसे॥ संवेष्ट्यमानं बहुभिः मोहात्तंतुभिरात्मजैः॥ कोषकारइवात्मानं वेष्टयन्नावबुध्यसे॥ अहं परिग्रहेनोह दोषवां हि परि
ग्रहः॥ कृमिर्हि कोषकारइवात्मानं वेष्टयन्नावबुध्यसे॥ पुत्रदारकुटुंबेषु सक्ताः सीदंति जंतवः॥ सराःपंकार्णवे मग्नाः जीर्णा
वनगजा इव॥ महाजालसमाकृष्टान्स्थूले मत्स्यानिवोधृतान्॥ स्नेहजालसमाकृष्टान्पश्यजंतून्सुदुःखितान्॥ कुटुं टुं
बं पुत्रदारांश्च शरीरं संचयाश्च ये॥ पारक्यमध्रुवं सर्वं किं स्वं सुकृतदुष्कृतं॥ यदा सर्वं परित्यज्य गंतव्यमवशेन ते॥ अ
नर्थे किं प्रसक्तस्त्वं स्वमर्थं नानुतिष्ठति॥ अविश्रांतमनालंबमपाथेयमदैशिकं॥ तमः कांतारमध्वानं कथमेको गमिष्य
सि॥ न हि त्वां प्रस्थितं कश्चित्पृष्ठतोनुगमिष्यति॥ सुकृतं दुष्कृतं च त्वां यास्यंतमनुयास्यति॥ विद्या कर्म च शौचं च ज्ञानं च
बहुविस्तरं॥ अर्थार्थमनुसर्पंते सिद्धार्थश्च विमुच्यते॥ निबंधनी रज्जुरेषा यो ग्रामे वसतो रतिः॥ छित्वैतां सुकृतो यांति नैनां
छिंदंति दुष्कृतः॥ रूपकूलां मनोस्रोतां स्पर्शद्वीपां रसावहां॥ गंधपंकां शब्दजलां स्वर्गमार्गदुरावहां॥ क्षमातरि
त्रां सत्यमयीं धर्मस्थैर्यवटारकां॥ त्यागवाताध्वगां शीघ्रां नौतार्यां तां नदीं तरेत्॥ त्यज धर्ममधर्मं च तथा सत्यानृते त्यज॥
उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज॥ त्यज धर्ममसंकल्पादधर्मं चाप्यलिप्सया॥ उभे सत्यानृते त्यक्त्वा बुध्या बुद्धिं प
मनिश्चयात्॥ अस्थिस्थूणं स्नायुमंतं मांसशोणितलेपनं॥ चर्मावनद्धं दुर्गंधिं पूर्णं मूत्रपुरीषयोः॥ जराशोकसमाविष्टं रो

गायतनमाप्नुती॥रजस्तमनित्यं च भूतानावासमिमं यज्ञ॥इदं विश्वं जगत्सर्वमेतच्चापि च यद्भवेत्॥महाभूतात्मकं सर्वमह
द्यासनमाप्नुयात्॥इंद्रियाणि च पंचैव तमः सत्वं रजस्तथा॥इत्येवं सप्तदशको राशिरव्यक्तसंज्ञकः॥सर्वैरिहेंद्रियार्थैश्च
व्यक्ताव्यक्तैर्हि रसिंतः॥चतुर्विंशक इत्येवव्यक्ताव्यक्तमयोगुणः॥एतैः सर्वैः समायुक्तः पुमानित्यभिधीयते॥त्रिवर्गं तु सु
खं दुःखं जीवितं मरणं तथा॥य इदं वेद तत्वेन स वेद प्रभवाव्यये॥पारंपर्येण बोद्धव्यं ज्ञानानां यच्च किंचन॥इंद्रियैर्गृह्यते
यद्यत्तत्तद्व्यक्तमिति स्थितं॥अव्यक्तमिति विज्ञेयं लिंगग्राह्यमतींद्रियं॥इंद्रियैर्नियतैर्देही धाराभिरिव तप्यते॥लोके
विततमात्मानं लोकांश्चात्मनि पश्यति॥परावरदृशः शक्तिर्ज्ञानमूला न नश्यति॥पश्यतः सर्वभूतानि सर्वावस्थासु सर्व
दा॥सर्वभूतस्य संयोगो नाशुभेनोपपद्यते॥ज्ञानेन विविधान्क्लेशानतिप्रवृत्तस्य मोहजान्॥लोके बुद्धिप्रकाशे
न लोकमार्गो न रिष्यते॥अनादिनिधनं जंतुमात्मनि स्थितमव्ययं॥अकर्त्तारममूर्त्तिं च भगवानाह तीर्थवित्॥यो
जंतुः स्वकृतैस्तैस्तैः कर्मभिर्नित्यदुःखितः॥स दुःखप्रतिघातार्थं हंति जंतूननेकधा॥ततः कर्म समादत्ते पुनरन्यन्नवं ब
हु॥तप्यतेथ पुनस्तेन भुक्त्वापथ्यमिवातुरः॥अजस्रमेव मोहांधो दुःखेषु सुखसंज्ञितः॥बध्यते मथ्यते चैव कर्मभि
र्मंथवत्सदा॥ततो निबद्धस्त्वां योनिं कर्मणामुदयादिह॥परिभ्रमति संसारं चक्रवद्बहुवेदनः॥स त्वं निवृत्तबंधस्तु निवृ
त्तश्चापि कर्मतः॥सर्ववित्सर्वजित्सिद्धो भव भावविवर्जितः॥संयमेन नवं बंधं निवर्त्य तपसो बलात्॥संप्राप्ता बहवः सि

द्धिमप्यबाधांसुखोदयां॥ ॥शांतौमोक्षधर्मे॥ ॥नारदउवाच॥ ॥अशोकंशोकनाशार्थंशास्त्रंशांतिकरंशिवं॥निश
म्यतैलभेबुद्धिंतांलब्ध्वासुखमेधते॥शोकस्थानसहस्राणिभयस्थानशतानिच॥दिवसेदिवसेमूढमाविशंतिनपंडि
तः॥तस्मादनिष्टनाशार्थमितिहासंनिबोधमे॥तिष्ठतेचेद्वशेबुद्धिर्लभतेशोकनाशनं॥अनिष्टसंप्रयोगाच्चवि
प्रयोगात्प्रियस्यच॥मनुष्यामानसैर्दुखैर्युज्यंतेस्वल्पबुद्धयः॥द्रव्येषुसमतीतेषुयेगुणास्तान्नचिंतयेत्॥नताना
द्रियमाणस्यस्नेहबंधप्रमुच्यते॥दोषदर्शीभवेत्तत्रयत्ररागःप्रवर्तते॥अनिष्टवर्द्धितंपश्येत्तथाक्षिप्रंविरज्यते॥न
र्थोनधर्मोनयशोयोतीतमनुशोचति॥अप्यभावेनयुज्येततच्चास्यननिवर्तते॥गुणैर्भूतानियुज्यंतेवियुज्यंतेतथै
वच॥सर्वाणिनैतदेकस्यशोकस्थानंहिविद्यते॥मृतंवायदिवानष्टंयोतीतमनुशोचति॥दुःखेनलभतेदुःखंद्वाव
नर्थौप्रपद्यते॥नाश्रुकुर्वंतियेबुध्यादृष्ट्वालोकेषुसंततिं॥सम्यक्प्रपश्यतःसर्वंनाश्रुकर्मोपपद्यते॥दुःखोपघा
तेशारीरेमानसेवाप्युपस्थिते॥यस्मिन्नशक्यतेकर्तुंयत्नस्तन्नानुचिंतयेत्॥भैषज्यमेतद्दुःखस्ययदेतन्नानुचिंत
येत्॥चिंत्यमानंहिनव्येतिभूयश्चापिप्रवर्द्धते॥प्रज्ञयामानसंदुःखंहन्याच्छारीरमौषधैः॥एतद्विज्ञानसामर्थ्यंन
बालैःसमतामियात्॥अनित्यंयौवनंरूपंजीवितंद्रव्यसंचयः॥आरोग्यंप्रियसंवासोगृध्येत्तत्रनपंडितः॥नजानप
दिकंदुःखमेशोचतुमर्हसि॥अशोचन्प्रतिकुर्वीतयदिपश्येदुपक्रमं॥सुखाद्बहुतरंदुःखंजीवितेनात्रसंशयः॥

स्निग्धत्वं चेंद्रियार्थेषु मोहान्मरणमप्रियं ॥ परित्यजति यो दुःखं सुखं वाप्युभयं नरः ॥ अभ्येति ब्रह्म सोत्यंतं न तं शोचंति
पंडिताः ॥ त्यजंते दुःखमर्था हि पालने न च ते सुखाः ॥ दुःखेन चाधिगम्यंते नाशमेषां न चिंतयेत् ॥ अन्यामन्यां धनावस्थां
प्राप्य वैशेषिकीं नरः ॥ अतृप्तो याति विध्वंसं संतोषं यांति पंडिताः ॥ सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः ॥ संयोगा वि
प्रयोगांता मरणांतं हि जीवितं ॥ अंतो नास्ति पिपासायास्तुष्टिस्तु परमं सुखं ॥ तस्मात्संतोषमेवेह धनं पश्यंति पंडि
ताः ॥ निमेषमात्रमपि हि वयो गछन्न तिष्ठति ॥ स्वशरीरेष्वनित्येषु नित्यं किमनुचिंतयेत् ॥ भूतेषु भावं संचिंत्य ये बुध्वा
मनसः परं ॥ न शोचंति गताध्वानः पश्यंतः परमां गतिं ॥ संचिन्वानकमेवैनं कामानामवितृप्तकं ॥ व्याघ्रः पशुमिवासा
द्य मृत्युरादाय गछति ॥ तथाप्युपायं संपश्येद्दुःखस्य परिमोक्षणं ॥ अशोचन्नारभेच्चैव मुक्तश्चाव्यसनी भवेत् ॥
शब्दे स्पर्शे च रूपे च गंधेषु च रसेषु च ॥ नोपभोगात्परं किंचिद्धनिनो वाधनस्य वा ॥ प्राक्संप्रयोगाद्भूतानां नास्ति
दुःखं परायणं ॥ विप्रयोगात्तु सर्वस्य न शोचेत्प्रकृतिस्थितः ॥ धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ॥ चक्षुःश्रो
त्रे च मनसा मनो वाचं च विद्यया ॥ प्रणयं प्रतिसंहृत्य संस्तुतेष्वितरेषु च ॥ विचरेद समुन्नद्धः स सुखी स च पंडितः ॥
२४ अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ॥ आत्मनैव सहायेन यश्चरेत्स सुखी भवेत् ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥
नारदउवाच ॥ ॥ सुखदुःखविपर्यासो यदा समुपपद्यते ॥ नैनं प्रज्ञा सुनीतं वा त्रायते नापि पौरुषं ॥ स्वभावं यत्नमातिष्ठे

द्य लब्धा भावसीदति ॥ जन्ममरणरोगेभ्यः प्रियमालम्भमुद्भवेत् ॥ रुजंति हि शरीराणि रोगाः शारीरमानसाः ॥ सायका इ
व तीक्ष्णाग्राः प्रयुक्ता दृढधन्विभिः ॥ व्यथितस्य विधित्साभिर्नान्यतो जीवितेपिपाः ॥ अवशस्य विनाशाय शरीरम
पकृष्यते ॥ स्रवंति न निवर्तंते स्रोतांसि सरितामिव ॥ आयुरादाय मर्त्यानां रात्र्यहानि पुनः पुनः ॥ व्यत्ययो ह्ययमत्यंतं प
क्षयोः शुक्लकृष्णयोः ॥ जातान्मर्त्यान्जरयति निमेषान्नावतिष्ठते ॥ सुखदुःखानि भूतानामजरो जरयत्यसौ ॥ आ
दित्यो ह्यस्तमभ्येति पुनः पुनरुदेति च ॥ अदृष्टपूर्वानादाय भावानानापरिशंकितान् ॥ इष्टानिष्टान्मनुष्याणामस्तं गच्छं
ति रात्रयः ॥ यो यमिच्छेद्यथाकामं कामानां तदवाप्नुयात् ॥ यदि स्यान्न पराधीनं पुरुषस्य क्रियाफलं ॥ संयताश्च हि द
क्षाश्च मतिमंतश्च मानवाः ॥ दृश्यंते निष्फलाः संतः प्रहीणाः सर्वकर्मभिः ॥ अपरे बालिशाः संतो निर्गुणाः पुरुषाध
माः ॥ आशीर्भिरथसंयुक्ता दृश्यंते सर्वकामिनः ॥ भूतानामपरः कश्चिद्धिंसायां सततोत्थितः ॥ वंचनायां च लोकस्य
स सुखेष्वेव जीर्यते ॥ अचेष्टमानमासीनं श्रीः कंचिदुपतिष्ठते ॥ कश्चित्कर्मानुसृत्यान्यो नाप्राप्यमधिगच्छति ॥ अप
राधं समाचक्ष्व पुरुषस्य स्वभावतः ॥ शुक्रमन्यत्र संभूतं पुनरन्यत्र गच्छति ॥ तस्य योनौ प्रयुक्तस्य गर्भो भवति वा न
वा ॥ आम्रपुष्पोपमा यस्य निवृत्तिरुपलभ्यते ॥ केषांचित्पुत्रकामानामनुसंतानमिच्छतां ॥ सिद्धौ प्रयतमानानां नै
वांडमुपजायते ॥ गर्भाच्चोद्विजमानानां क्रुद्धादाशीविषादिव ॥ आयुष्माञ्जायते पुत्रः कथं प्रेत इवाभवत् ॥ देवानिष्ट्वा

तपस्तप्तोऽकृपयोः पुत्रगटद्विषिः ॥ दशमासान्परिधृता जायंते कुलपांसनः ॥ अपरे यनधान्यानि भोगोश्च पितृसंचितान् ॥
विपुलान्नभिजायंते लक्ष्मीस्तेरेव मंगलैः ॥ अन्योन्यं समभिप्रेते मैथुनस्य समागमे ॥ उपद्रवंतो विछोये निगर्भः प्रप ३
द्यते ॥ शीघ्रं परशरीराणि छिन्नबीजं शरीरिणा ॥ प्राणिनां प्राणसंरोधे मांसश्लेष्मविचेष्टितं ॥ निर्दग्धं परदेहेति
पन देहं चलाचलं ॥ विनश्यंतं विनाशांते नाविनावभिवाहितं ॥ संगत्याज्जठरेन्यस्तं रेतो विंदुमचेतनं ॥ केनयत्नेन जी
वंतं गर्भं त्वमिह पश्यसि ॥ अन्नपानानि शीर्यंते यत्र भक्ष्याश्च भक्षिताः ॥ तस्मिन्नेवोदरे गर्भः किंनान्नमिव जीर्यते ॥
गर्भमूत्रपुरीषाणां स्वभावनियतागतिः ॥ धारणे वा विसर्गे वा न कर्त्ता विद्यते वशः ॥ स्रवंति ह्युदराद्गर्भाज्जायमानास्तथाप
रे ॥ आगमेन तथान्येषां विनाश उपपद्यते ॥ एतस्माद्योनिसंबंधाद्यो बीजं परिमुच्यते ॥ प्रजां च लभते कांचित्पुनर्द्वंद्वे
षु सज्जति ॥ सततस्य सह जातस्य सप्तमी नवमी दशी ॥ प्राप्नुवंति नरः पंच न भवंति गतायुषः ॥ नाभ्युत्थाने मनुष्या
णां योगास्युर्नात्र संशयः ॥ व्याधिभिश्च विमथ्यंते व्याधैः क्षुद्रमृगा इव ॥ व्याधिभिर्मथ्यमानानां त्यजतां विपुलं ध
नं ॥ वेदानां नापकर्षंति यतमानाश्चिकित्सकाः ॥ ते चापि निपुणा वैद्याः कुशलाः संभृतौषधाः ॥ व्याधिभिः परिकृष्यंते
मृगा व्याधैरिवार्दिताः ॥ ते पिबंतः कषायांश्च सर्पींषि विविधानि च दृश्यंते जरया भग्ना नागा नागैरिवोत्तमैः ॥ केवा
नु विचिकित्संते रोगार्त्तान्मृगपक्षिणः ॥ श्वापदानि दरिद्राश्च प्रायो नार्ता भवंति ते ॥ घोरानपि दुराधर्षान्नृपतीनुग्रते

जसः॥आक्रम्य ददते रोगाः पशून्पशुगणा इव॥इति लोकमनःकंदं मोहशोकपरिप्लुतं॥स्रोतसा समहाक्षि
प्तं ह्रियमाणं बलीयसा॥न धनेन न राज्येन नोग्रेण तपसा तथा॥स्वभावमतिवर्तंते यो नियुक्ताः शरीरि
णः॥न म्रियेरन्न जीर्येरन्सर्वे स्युः सर्वकामिनः॥नाप्रियं प्रतिपश्येयुरुत्थानस्य फले सति॥उपर्युपरि लोक
स्य सर्वो गंतुं समीहते॥यतते च यथाशक्ति न च तद्वर्तते तथा॥ऐश्वर्यमदमत्तांश्च मत्तान्मद्यमदेन च॥अ
प्रमत्ताः शठाः क्रूराः विक्रांता पर्युपासते॥क्लेशा परिनिवर्तंति केषांचिदसमीक्षिताः॥स्वं स्वं च पुनरन्येषां
न किंचिदधिगम्यते॥महच्च फलवैषम्यं दृश्यते कर्मसंधिषु॥वहंति शिबिकामन्ये यांत्यन्ये शिबिकागताः॥
सर्वेषामृद्धिकामानामन्ये रथपुरसराः॥मनुष्याश्च शतस्त्रीकाः शतशो विविधास्त्रियः॥द्वंद्वारामेषु भूत
तेषु गछंत्येकैकशो नराः॥इदमन्यत्परं पश्य मात्र मोहं करिष्यसि॥त्यज धर्ममधर्मं च उभे सत्यानृते
त्यज॥उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज॥एतत्ते परमं गुह्यमाख्यातमृषिसत्तम॥येन देवाः परित्य
ज्य मर्त्यलोकं दिवं गताः॥नारदस्य वचश्रुत्वा शुकः परमबुद्धिमान्॥संचिंत्य मनसा धीरो निश्चयं नाध्य
गछत॥पुत्रदारैर्महान्क्लेशो विद्याम्नाये महांश्रमः॥किं नु स्याच्छाश्वतं स्थानमल्पक्लेशं महोद

यं ॥ ततो मुहूर्त्तं स संचिंत्य निश्चितां गतिमात्मनः ॥ पचारवनज्ञो धर्मस्य पजान्यैः श्रेयसां गतिं ॥ कथं त्वहमसंश्लि-
ष्टो गतिमुत्तमं ॥ नावर्त्तेयं यथा ह्येयो यो निस्संकरसागरे ॥ परं स्थानं हि कांक्षामि यत्र नावर्त्तते पुनः ॥ सर्व-
संगात्परित्यज्य निश्चितो मनसा गतिं ॥ तत्र यास्यामि यत्रात्मा शमंमेधिगमिष्यति ॥ अक्षयश्चाव्ययश्चैव
यत्र स्थास्यामि शाश्वतः ॥ न तु योगमृते शक्या प्राप्तुं सा परमा गतिः ॥ अवबंधो हि बद्धस्य कर्मभिर्नोपप-
द्यते ॥ तस्माद्योगं समास्थाय त्यक्ष्यामीह कलेवरं ॥ वायुस्ततः प्रवेक्ष्यामि तेजोराशिं दिवाकरं ॥ न ह्येष क्ष-
यतां याति सोमः सुनगणैर्यथा ॥ कंपितः पतते भूमिं पुनश्चैवाधिरोहति ॥ हीयते हि सदा सोमः पुनश्चैवा-
ऽपि पूर्यते ॥ नेच्छाम्येवं विदित्वैते ह्रासवृद्धी पुनः पुनः ॥ रविस्तु संतापयते लोकान्रश्मिभिरुल्बणैः ॥ स-
र्वतस्तेज आदत्ते नित्यमक्षयमेतुलं ॥ अतो मे रोचते गंतुमादित्यं दीप्ततेजसं ॥ अत्र वत्स्यामि दुर्द्धर्षे
निःशंकेनांतरात्मना ॥ सर्पस्य वदने चाहं निक्षिप्यैवं कलेवरं ॥ ऋषिभिः सह यास्यामि सौरं तेजोतिदुः-
सहं ॥ आपृच्छामि नगान्नागान्गिरिमुर्वीं दिशो दिवं ॥ देवदानवगंधर्वान्पिशाचोरगराक्षसान् ॥ लो-
केषु सर्वभूतानि प्रवेक्ष्यामि न संशयः ॥ पश्यंतु योगवीर्यं मे सर्वे देवाः सहर्षिभिः ॥ अथानुज्ञाप्य तम-

मोक्ष॰ षिं नारदं लोके विश्रुतं ॥ तस्मादनुज्ञां संप्राप्य जगाम पितरं प्रति ॥ सोभिवाद्य महात्मानं कृष्णद्वैपायनं मुनिं ॥
शुकः प्रदक्षिणं कृत्वा कृष्णमापृष्टवान्मुनिं ॥ श्रुत्वा चर्षिस्तद्वचनं शुकस्य प्रीतो महात्मा पुनराह चैनं ॥
२०१ भोभो पुत्र स्थीयतां वै दद्य यावच्चक्षुःप्रीणयामि त्वदर्थे ॥ निरपेक्षः शुको भूत्वा निःस्नेहो मुक्तसंशयः ॥ मो
ता क्षमेवानुसंचिंत्य गमनाय मनो दधे ॥ पितरं संपरित्यज्य जगाम मुनिसत्तमः ॥ कैलासपृष्ठं विपुलं
सिद्धसंघनिषेवितं ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ गिरिशृंगं समारुह्य सुतो व्यासस्य
भारत ॥ समे देशे विविक्ते स निःशलाक उपाविशत् ॥ धारयामास चात्मानं यथाशास्त्रं यथाविधि ॥
पादप्रभृति गात्रेषु क्रमेणाक्रमयोगवित् ॥ ततः स प्राङ्मुखो विद्वानादित्ये नाचिरोदिते ॥ पाणिपादं
समादाय विनीतवदुपाविशत् ॥ न तत्र पक्षिसंघातो न शब्दो नाति दर्शनं ॥ यत्र वैयासकिर्धीमा
न्योक्तुं समुपचक्रमे ॥ स ददर्श तदात्मानं सर्वसंगविनिःसृतं ॥ प्रजहास ततो हासं शुकः संप्रे
क्ष्य तत्परं ॥ स पुनर्योगमास्थाय मोक्षमार्गोपलब्धये ॥ महायोगीश्वरो भूत्वा सोत्यक्रामद्विहायसं ॥
ततः प्रदक्षिणं कृत्वा देवर्षिं नारदं ततः ॥ निवेदयामास च तं स्वयोगं परमर्षये ॥ ॥ शुकः ॥ ॥ इ २०१

ष्टो मार्गश्रिहृत्तिस्मिस्वस्तिस्तेतपोधन॥ त्वत्सादादहं सिध्यामि गतिमिष्टां महाद्युते॥ नारदेनाभ्यनुज्ञातः
शुको द्वैपायनात्मजः॥ अभिवाद्य पुनर्योगमास्थायाकाशमाविशत्॥ कैलासपृष्ठादुत्पत्य सपपाद दि
वं तदा॥ अंतरिक्षचरश्रीमान्वासपुत्रः सुनिश्चितः॥ तमुद्यंतं द्विजश्रेष्ठं वैनतेयसमद्युतिं॥ ददृशुः सर्व
भूतानि मनोमारुतरंहसं॥ व्यवसायेन लोकांस्त्रीन्सर्वान्सोथ विचिंतयन्॥ आस्थितो दीर्घमध्वानं पाव
कार्कसमप्रभः॥ तमेकमनसं यांतमव्यग्रमकुतोभयं॥ ददृशुः सर्वभूतानि जंगमानि चराणि च॥ यथाश
क्ति यथान्यायं पूजांचेचक्रिरे तदा॥ पुष्पवर्षैश्च दिव्यैस्तमवचक्रुर्दिवौकसः॥ तं दृष्ट्वा विस्मिताः सर्वे गंध
र्वाप्सरसां गणाः॥ ऋषयश्चैव संसिद्धाः परं विस्मयमागताः॥ अंतरिक्षगतः कोयं तपसा सिद्धिमागतः॥
अधःकायोर्ध्ववक्त्रश्च नेत्रैः समभिरज्यते॥ ततः परमधर्मात्मा त्रिषु लोकेषु विश्रुतः॥ भास्करं समुदीक्ष
न्स प्राङ्मुखो वाग्यतो गमत्॥ शब्देनाकाशमखिलं पूरयन्निव सर्वशः॥ तमापतंतं सहसा दृष्ट्वा सर्वाप्स
रोगणाः॥ संभ्रांतमनसो राजन्नासन्परमविस्मिताः॥ पंचचूडाप्रभृतयो भृशमुत्फुल्ललोचनाः॥ दैवतंक
तमं महोत इत्तमां गतिमास्थितं। सुनिश्चितमिहायाति विमुक्तमिव निस्पृहं॥ ततः समभिचक्रामम

लयंनामपर्वतं॥ उर्वशीपूर्वश्चित्तिश्च यन्नित्यमुपसेवतः॥ तेस्य ब्रह्मर्षिपुत्रस्य विस्मयं पययुःपरं॥
अहोवुद्धिसमाधानंवेदाभ्यासरतोद्विजः॥ अचिरेणैवकालेन नभश्चरति चंद्रवत्॥ पितृशुश्रूषया बु
द्धिंसंप्राप्तोयमनुत्तमां॥ पितृभक्तोदृढतपाः पितुःसंदयितःसुतः॥ अनन्यमनसा तेन कथं पित्रा विव
र्जितः॥ उर्वस्यावचनंश्रुत्वा शुकःपरमधर्मवित्॥ उदैक्षत दिशःसर्वविचनेगतमानसः॥ ततोंतरिक्षं म
हीचेवसलवनकाननां॥ विलोकयामासतदासरांसि सरितस्तथा॥ ततोद्वैपायनस्सुतं बहुमा। समंत
तः॥ कृतांजलिपुटाःसर्वाः निरीक्षंते स्मदेवताः॥ अब्रवीत्तास्तदावाक्यंशुकःपरमधर्मवित्॥ पिता
यद्यनुगच्छेन्मांक्रोशमानःशुकेतिवै॥ ततःप्रतिवचोदेयंसर्वैरेवसमाहितैः॥ एतन्मेस्नेहतःसर्वैर्वचनंक
र्तुमर्हसि॥ शुकस्यवचनंश्रुत्वा दिशःसर्वाःसकाननाः॥ समुद्राःसरितःशैलाः प्रत्यूचुस्ते समंततः॥
यथाज्ञापयेविप्र बाढमेवंभ विष्यति ऋषेर्व्याहरतोवाक्यं प्रतिवक्ष्यामहे वयं॥ ॥शांतौमोक्षध
र्मे॥ ॥भीष्मउवाच॥ ॥इत्येवमुक्त्वावचनं ब्रह्मर्षिःसुमहातपाः॥ प्रातिष्ठतशुकःसिद्धिंहित्वादो

श्चतुर्विधान्॥ त्पोह्यसविधं हित्वा जहौ पंचविधं रजः॥ ततः सत्वं जहौ धीमांस्तदद्भुतमिवाभवत्॥ तत
स्तस्मिन्पदे नित्ये निर्गुणे लिंगवर्जिते॥ ब्रह्मणो प्रत्यतिष्ठन्स विधूमोग्निरिव ज्वलं॥ उल्कापा
ता दिशां दाहो भूमिकंपस्तथैव च॥ प्रादुर्भूत क्षणे तस्मिंस्तदद्भुतमिवाभवत्॥ द्रुमाः शाखाश्च मु
मुचुः शिखराणि च पर्वताः॥ निर्घातशब्दैर्गिरि हिमवान्दीर्यतीव ह॥ न बभासे सहस्रांशुर्न जज्वा
ल च पावकः॥ ह्रदाश्च सरितश्चैव चुक्षुभुः सागरास्तथा॥ ववर्ष वासवस्तोयं रसव
च्च सुगंधि च॥ ववौ समीरणश्चापि दिव्यगंधावहः शुचिः॥ स शृंगेऽप्रतिमे दिव्ये हिमवन्मेरुसंभवे॥
संश्लिष्टे श्वेतपीते रुक्मरूप्यमये शुभे॥ शतयोजनविस्तारे तिर्यगूर्ध्वं च भारत॥ उदीचीं
दिशमास्थाय रुचिरे संददर्श ह॥ सोऽविशंकेन मनसा तथैवाभ्यपतच्छुकः॥ ततः पर्वतशृंगे द्वे स
हसैव द्विधाकृते॥ अदृश्येतां महाराज तदद्भुतमिवाभवत्॥ ततः पर्वतशृंगाभ्यां सहसैव विनि
सृतः॥ न च प्रतिजघानास्य स गतिं पर्वतोत्तमः॥ ततो महानभूच्छब्दो दिवि सर्वदिवौकसां॥
गंधर्वाणामृषीणां च ये च शैलनिवासिनः॥ दृष्ट्वा शुकमतिक्रांतं पर्वतं च द्विधाकृतं॥ साधुसाध्वि

तितत्रासीन्नादस्सर्वत्र भारत ॥ संपूज्यमानो देवैश्च गंधर्वैरृषिभिस्तथा ॥ यक्षराक्षससंघैश्च विद्याधरगणैस्तथा ॥ दिव्यैः पुष्पैः
समाकीर्णमंतरिक्षं समंततः ॥ आसीत्किल महाराज शुकाभिपतने तथा ॥ ततो मंदाकिनीं रम्यामुपरिष्टादभिव्रजन् ॥ शु
को ददर्श धर्मात्मा पुष्पितद्रुमकाननं ॥ तस्यां क्रीडंत्यभिरता स्नांत्यश्चैवाप्सरसांगणाः ॥ शून्याकारं निराकाराः शुकं दृष्ट्वा वि
वाससः ॥ तं प्रक्रामंतं विज्ञाय पिता स्नेहसमन्वितः ॥ उत्तमां गतिमास्थाय पृष्ठतोनुससार ह ॥ शुकस्तु मारुतादूर्ध्वं गतिं
कृत्वांतरिक्षगां ॥ दर्शयित्वा प्रभावं स्वं ब्रह्मभूतोभवत्तदा ॥ महायोगगतिं त्वन्यां व्यासोस्थाय महातपाः ॥ निमेषांतरमात्रेण शुका
भिपतनं ययौ ॥ स ददर्श द्विधा कृत्वा पर्वताग्रं शुकं गतं ॥ शशंसुरृषयस्तस्य कर्म पुत्रस्य तत्तदा ॥ ततः शुकेति दीर्घेण पित्रा वेदेनाक्रंदि
तस्तदा स्वयं पित्रा स्वरेणोच्चैस्त्रीन्लोकाननुनादवे ॥ शुकः सर्वगतो भूत्वा सर्वात्मा सर्वतोमुखः ॥ प्रत्यभाषत धर्मात्मा
भोः शब्देनानुनादयन् ॥ तत एकाक्षरं नादं भोरित्येवं समीरयन् ॥ प्रत्याहरज्जगत्सर्वमुच्चैः स्थावरजंगमं ॥ ततः प्रभृति चाद्या
पि शब्दाननुच्चारितान्पृथक् ॥ गिरिगह्वरपृष्ठेषु व्याहरंति शुकं प्रति ॥ अंतर्हितः प्रभावं तु दर्शयित्वा शुकस्तदा ॥ गुणान्संत्य
ज्य शब्दादीन्पदमभ्यगमत्परं ॥ महिमानं तु तं दृष्ट्वा पुत्रस्यामिततेजसः ॥ निषसाद गिरिप्रस्थे पुत्रमेवानुचिंतयन् ॥ ततो मं
दाकिनीतीरे क्रीडंतोप्सरसां गणाः ॥ आसाद्य तमृषिं सर्वाः संभ्रांता गतचेतसः ॥ जले निलिल्यिरे काश्चिद्गुल्मान्प्रपेदिरे ॥ वस
नान्यादुदुः केचित्तं दृष्ट्वा मुनिसत्तमं ॥ तां मुक्ततां तु विज्ञाय मुनिः पुत्रस्य वै तदा ॥ सक्ततामात्मनश्चैव प्रीतो भूद्व्रीडितश्च ह ॥
तं देवगंधर्ववृतो महर्षिगणपूजितः ॥ पिनाकहस्तो भगवानभ्यागच्छत शंकरः ॥ तमुवाच महादेवः सांत्वपूर्वमिदं वचः ॥ पु

त्रशोकाभिसंतप्तं कृष्णद्वैपायनं तदा॥ अग्नेर्गर्भमेरपांवायोरंतरिक्षस्यचैवह॥ वीर्येणासदृशःपुत्रःउनामतस्त्वयावृतः॥ स
तथालक्षणोजातस्तपसातवसंभृतः॥ ममचैवप्रसादेनब्रह्मतेजोमयःशुचिः॥ सागतिंतिरयोयावत्स्थास्यंतिदुःप्राप
मजितेंद्रियैः॥ दैवतैरपिविप्रर्षेतत्वंकिमनुशोचसि॥ यावत्स्थास्यंतिगिरयोयावत्स्थास्यंतिसागराः॥ तावत्तवाक्षयाकी
र्तिःसपुत्रस्यभविष्यति॥ छायांस्वपुत्रसदृशींसर्वतोनपगांसदा॥ द्रक्ष्यसेत्वंचलोकेस्मिन्मत्प्रसादान्महामुने॥ सोनुनीतो
भगवतास्वयंरुद्रेणभारत॥ छायांपश्यन्समावृत्तःसमुनिःपरयामुदा॥ इतिजन्मगतिश्चैवशुकस्यभरतर्षभ॥ विस्तरे
णसमाख्यातायन्मांत्वंपरिपृच्छसि॥ एतदाचष्टमेराजन्देवर्षिर्नारदःपुरा॥ व्यासश्चैवमहायोगीसंजल्पेषुपदेपदे॥
इतिहासमिमंपुण्यंमोक्षधर्मोपसंहितं॥ धारयेद्यःशमपरःसगच्छेत्परमांगतिं॥ ॥शांतौमोक्षधर्मे॥ ॥युधिष्ठिर
उवाच॥ ॥गृहस्थोब्रह्मचारीवावानप्रस्थोथभिक्षुकः॥ यइच्छेत्सिद्धिमास्थातुंदेवतांकांयजेतसः॥ कुतोह्यस्यध्रुवःस्वर्गः
कुतोनिश्रेयसंपरं॥ विधिनाकेनजुहुयाद्दैवंपित्र्यंतथैवच॥ मुक्तश्चकांगतिंगच्छेन्मोक्षश्चैवकिमात्मकः॥ स्वर्गतश्चैव
किंकुर्याद्येननच्यवतेदिवः॥ देवतानांचकोदेवःपितृणांचपितातथा॥ तस्मात्परतरंयच्चतन्मेब्रूहिपितामह॥ ॥भीष्म
उवाच॥ ॥गूढंमांप्रश्नवित्प्रश्नंपृच्छसेत्वमिहानघ॥ नह्येषतर्कयाशक्योवक्तुंवर्षशतैरपि॥ ऋतेदेवप्रसादाद्वाराज
न्ज्ञानागमेनवा॥ गहनंह्येतदाख्यानंव्याख्यातव्यंतवारिहन्॥ अत्राप्युदाहरंतीममितिहासंपुरातनं॥ नारदस्यचसं
वादंऋषेर्नारायणस्यच॥ नारायणोहिविश्वात्माचतुर्मूर्तिःसनातनः॥ धर्मात्मजःसंबभूवपितैवंमेभ्यभाषत॥ कृतेयु
गेमहाराजपुरास्वायंभुवेंतरे॥ नरोनारायणश्चैवहरिःकृष्णःस्वयंभुवः॥ तेषांनारायणनरौतपस्तेपतुरव्ययौ॥ बदर्या

ह तं

श्रममासाद्य श्राद्धकृटे कनकामये ॥ अँचक्रे हितध्यानं प्रतयुक्तं मनोरमं ॥ यत्रा चौल्लोकनाथौ तौ कृतौ च मनसि संततौ ॥ तप
सा तेजसा चैव दुर्निरीक्ष्यौ सुरैरपि ॥ यस्य प्रसादं कुर्वते स देवौ द्रष्टुमर्हति ॥ नूनं तयोरनुमते हृदि हृच्छयचोदितः ॥ म
हामेरोर्गिरिशृंगात्प्रच्युतो गंधमादनं ॥ नारदः सुमहद्भूतं सर्वलोकानचीचरत् ॥ देशमगाद्राजेबदर्याश्रममाशुगः
॥ तयोराह्निककवेलायां तस्य कौतूहलं त्वभूत् ॥ इदं तदास्पदं कृत्स्नं यस्मिन्लोकाः प्रतिष्ठिताः ॥ सदेवासुरगंधर्वाः स
किंन्नरमहोरगाः ॥ एका मूर्तिरियं पूर्वं जाता भूतं यश्चतुर्विधा ॥ धर्मस्य कुलसंतानं धर्मोभिर्विवर्द्धिताः ॥ अहो ह्यनुगृ
हीतोद्य धर्म एभिः सुरैरिह ॥ नरनारायणाभ्यां च कृष्णेन हरिणा तथा ॥ अत्र कृष्णो हरिश्चैव कस्मिंश्चित्कारणांत
रे ॥ स्थितौ धर्मोत्तरौ ह्येतौ तथा तपसि धिष्ठितौ ॥ एतौ हि परमं धाम कानयोराह्निकाक्रिया ॥ पितरौ सर्वभूतानां दैव
तं च यशस्विनौ ॥ कां देवतां तु यजतः पितृन्वा कान्महामती ॥ इति संचिंत्य मनसा भक्त्या नारायणस्य तु ॥ सहसा प्रादुर
भत्समीपे देवयोस्तदा ॥ कृते दैवे च पित्र्ये च ततस्ताभ्यां निरीक्षितः ॥ पूजितश्चैव विधिना यथाप्रोक्तेन शास्त्रतः ॥ तं दृ
ष्ट्वा महदाश्चर्यमपूर्वं विधिविस्तरं ॥ उपोपविष्टः सुप्रीतो नारदो भगवानृषिः ॥ नारायणं संनिरीक्ष्य प्रसंन्नेनांतरात्म
ना ॥ नमस्कृत्य महादेवमिदं वचनमब्रवीत् ॥ ॥नारदः॥ ॥वेदेषु सपुराणेषु सांगोपांगेषु गीयसे ॥ त्वमजः शा
श्वतो धाता मतोऽमृतमनुत्तमं ॥ प्रतिष्ठितं भूतभव्यं त्वयि सर्वमिदं जगत् ॥ चत्वारो ह्याश्रमा देव सर्वे गार्हस्थ्यमूलकाः ॥
यजंते त्वामहरहो नानामूर्तिसमाहितं ॥ पिता माता च सर्वस्य जगतः शाश्वतो गुरुः ॥ कं त्वद्य यजसे देवं पितरं कं न वि

महे॥ ॥भगवानुवाच॥ ॥अवाच्यमेतद्वक्तव्यमात्मगुह्यं सनातनं॥तव भक्तिमतो ब्रह्मन्वक्ष्यामि च यथातथं॥यत्तत्सू
क्ष्ममविज्ञेयमव्यक्तमचलं ध्रुवं॥इंद्रियैरिंद्रियार्थैश्च सर्वभूतैश्च वर्जितं॥स ह्यंतरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्य
ते॥त्रिगुणव्यतिरिक्तोसौ पुरुषश्चेति कल्पितः॥तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम॥अव्यक्ताव्यक्तिभावस्था यासा प्र
कृतिरव्यया॥तां योनिमावयोर्विद्धि योसौ सदसदात्मकः॥आवाभ्यां पूज्यतेसौ हि दैवे पित्र्ये च कल्प्यते॥नास्ति तस्मात्परो
न्यो हि पिता देवोथवा द्विजः॥आत्मा हि नः स विज्ञेयस्ततस्तं पूजयावहे॥तेनैषा प्रथिता ब्रह्मन्मर्यादा लोकभाविनी॥
दैवं पित्र्यं च कर्त्तव्यमिति तस्यानुशासनं॥ब्रह्मा स्थाणुर्मनुर्दक्षो भृगुर्धर्मस्तथा यमः॥मरीचिरंगिरात्रिश्च पुलस्त्यः
पुलहः क्रतुः॥वसिष्ठः परमेष्ठी च विवस्वान्सोम एव च॥कर्दमश्चापि यः प्रोक्तः क्रोधो विक्रीत एव च॥एकविंशतिरुत्प
न्नास्ते प्रजापतयः स्मृताः॥तस्य देवस्य मर्यादां पूजयंतः सनातनीं॥दैवं पित्र्यं च सततं तस्य विज्ञाय तत्वतः॥आत्मप्राप्ता
नि च ततः प्राप्नुवंति द्विजोत्तमाः॥स्वर्गस्था अपि ये केचित्तन्नमस्यंति देहिनः॥ते तत्प्रसादाद्गच्छंति तेनादिष्टफलां गतिं॥ये
हीनाः सप्तदशभिः गुणैः कर्मभिरेव च॥कलाः पंचदश त्यक्त्वा ते मुक्ता इति निश्चयः॥मुक्तानां तु गतिर्ब्रह्मन्क्षेत्रज्ञ इति क
ल्पिता॥स हि सर्वगतश्चैव निर्गुणश्चैव कथ्यते॥दृश्यते ज्ञानयोगेन आवां च प्रसृतौ ततः॥एवं ज्ञात्वा तमात्मानं पूजया
वः सनातनं॥तं वेदाश्चाश्रमाश्चैव नानामतसमास्थिताः॥भक्त्या संपूजयंत्याद्यं गतिं चैषां ददाति सः॥ये तु तद्भाविता लो

लोकेदेकांतित्वंसमाहितां॥एतदभ्यधिकंतेषांएतेतंप्रविशंत्युत॥इतिऽह्यसमुद्देशस्तवनारदकीर्तितः॥भक्त्याप्रेम्णाच
विप्रर्षेअस्मद्गुरुत्वयाचतेश्रुतः॥ ॥शांतौमोक्षधर्मे॥ ॥भीष्मउवाच॥ ॥सएवमुक्तोद्विपदांवरिष्ठोनारायणेनोत्तम
पूरुषेण॥जगादवाक्यंद्विपदांवरिष्ठंनारायणंलोकहिताधिवासं॥ ॥नारदउवाच॥ ॥यदर्थमासीत्प्रभवेनजन्म
कृतंत्वयाधर्मगृहेचतुर्धा॥तत्साध्यतांलोकहितार्थमद्यगच्छाम्यहंद्रष्टुप्रकृतिंतवाद्यां॥पूजांगुरूणांसततंकृतोमिप
रस्यगुह्यंनतुभिन्नपूर्वं॥वेदाःस्वधीताममलोकनाथतप्तंतपोनानृतमुक्तपूर्वं॥गुप्तानिचत्वारियथागमेनशत्रौ
चमित्रेचसमोस्मिनित्यं॥तंचादिदेवंसततंप्रपन्नएकांतभावेनवृणोम्यजस्रं॥एभिर्विशेषैःपरिशुद्धसत्वकस्मा
न्नपश्येयमनंतमीशं॥तत्पारमेष्ठ्यंवचनोनिशम्यनारायणंशाश्वतधर्मगोप्ता॥गच्छेतितंनारदमुक्तवान्सः
संपूजयित्वात्मविधिक्रियाभिः॥ततोविसृष्टःपरमेष्ठिपुत्रःसोभ्यर्चयित्वातमृषिंपुराणं॥खमुत्पपातोत्तमयोग
युक्तः॥ततोधिमेरौसहसानिलिल्ये॥तत्रावतस्थेचमुनिर्मुहूर्त्तमेकांतमासाद्यगिरेःसशृंगं॥आलोकयन्नुत्तरप
श्चिमेनददर्शचाप्यद्भुतमुक्तरूपं॥क्षीरोदधेयोत्तरतोहिद्वीपःश्वेतःसनाम्नाप्रथितोविशालः॥मेरोःसहस्रैःस
हियोजनानांद्वात्रिंशतोर्ध्वंकविभिर्निरुक्तः॥अनिंद्रियाश्चानशनाश्चतत्रनिस्पंदहीनाःसुसुगंधिनःस्ते॥श्वेताःपुमां
सोगतसर्वपापाश्चक्षुर्मुषःपापकृतांनराणां॥वज्रास्थिकायाःसमतोन्मानादिव्यान्वयरूपाःशुभसारोपेताः॥छत्रा

कृतिःशीर्षमेघौघनिनादाःसंशुष्कचतुष्कराजीवशतपादाः॥षष्ट्यादंतैर्युक्ताःशुल्कैरष्टाभिर्दंष्ट्राभिर्येजिह्वाभि
र्येविश्ववक्त्रंलेलिह्यंतेसूर्यप्रख्यं॥भक्त्यादेवंविश्वोत्पन्नंयस्मात्सर्वेलोकाःसंप्रसूताः॥वेदाधर्मामुनयःशांतदेवाः
सर्वेतस्यनिसर्गाः॥ ॥युधिष्ठिरउवाच॥ ॥अनिंद्रियानिराहाराःअनिस्पंदाःसुगंधिनः॥कथंतेपुरुषाजाताः
कांतेषांगतिरुत्तमा॥येमुक्ताभवंतीहनराभरतसत्तम॥तेषांलक्षणमेतद्धितच्छ्वेतद्वीपवासिनां॥तस्मान्मे
संशयंछिंधिपरंकौतूहलंहिमे॥त्वंहिसर्वकथारामस्त्वांचैवोपाश्रितावयं॥ ॥भीष्मउवाच॥ ॥विस्तीर्णैषा
कथाराजन्श्रुतामेपितृसंनिधौ॥येषात्वहिवक्तव्याकथासारोहिसामता॥राजोपरिचरोनामबभूवाधि
पतिर्भुवः॥आखंडलसखःख्यातोभक्तोनारायणंहरिं॥धार्मिकोनित्यभक्तश्चपितृन्नित्यमतंद्रितः॥साम्राज्यं
तेनसंप्राप्तंनारायणवरात्पुरा॥सात्वतंविधिमास्थायप्राक्सूर्यमुखनिःसृतं॥पूजयामासदेवेशंतच्छेषेणपि
तामहान्॥पितृशेषेणविप्रांश्चसंविभज्याश्रितांश्चसः॥शेषान्नभुक्सत्यपरःसर्वभूतेष्वहिंसकः॥सर्वभा
वेनभक्तस्यदेवदेवंजनार्दनं॥अनादिमध्यनिधनंलोककर्तारमव्ययं॥तस्यनारायणेभक्तिंवहतोमित्रकर्ष
ण॥एकशय्यासनंदेवोदत्तवान्देवराट्स्वयं॥आत्माराज्यंधनंचैवकलत्रंवाहनंतथा॥यत्तद्भगवतेसर्व
मितितत्प्रेक्षितंसदा॥काम्यनैमित्तिकाराजन्यज्ञियाःपरमक्रियाः॥सर्वाःसात्वतमास्थायविधिंचक्रेसमा

५०९

शा६०

मो॰क्ष॰
२०८

हितः॥ पंचरात्रविदो मुख्यास्तस्य गेहे महात्मनः॥ प्रापणं भगवत्प्रोक्तं भुंजते चाग्रभोजनं॥ तस्य प्रशासतो रा
ज्यं धर्मेणामित्रघातिनः॥ नानृता वाक्समभवन्मनो दुष्टं न चाभवत्॥ न च कायेन कृतवान्स पापं परमण्व
पि॥ ये हि ते ऋषयः ख्याताः सप्त चित्रशिखंडिनः॥ तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमं॥ वेदैश्चतुर्भिः
समितं कृतं मेरौ महागिरौ॥ आस्यैः सप्तभिरुद्गीर्णं लोकधर्ममनुत्तमं॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पु
लहः क्रतुः॥ वसिष्ठश्च महातेजास्ते हि चित्रशिखंडिनः॥ सप्त प्रकृतयो ह्येतास्तथा स्वायंभुवोऽष्टमः॥ एताभि
र्धार्यते लोकस्ताभ्यः शास्त्रं विनिःसृतं॥ एकाग्रमनसो दांताः मुनयः संयमे रताः॥ भूतभव्यभविष्यज्ञाः सत्य
धर्मपरायणाः॥ इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमं॥ लोकान्संचिंत्य मनसा ततः शास्त्रं प्रचक्रिरे॥ तत्र
धर्मार्थकामा हि मोक्षः पश्चाच्च कीर्तितः॥ मर्यादा विविधाश्चैव दिवि भूमौ च संस्थिताः॥ आराध्य तपसा दे
वं हरिं नारायणं प्रभुं॥ दिव्यं वर्षसहस्रं वै सर्वे ते ऋषिभिः सह॥ नारायणानुशास्ता हि तदा देवी सरस्वती॥
विवेश तानृषीन्सर्वाँल्लोकानां हितकाम्यया॥ ततः प्रवर्तिता सम्यक्तपोविद्भिर्द्विजातिभिः॥ शब्दे चार्थे च
हेतौ च एषा प्रथमसर्गजा॥ आदावेव हि तच्छास्त्रमोंकारस्वरपूरितं॥ ऋषिभिर्भावितं तत्र यत्र कारुणिको
ह्यहं॥ ततः प्रसन्नो भगवाननिर्दिष्टशरीरगः॥ ऋषीनुवाच तान्सर्वानदृश्यः पुरुषोत्तमः॥ कृतं शतसहस्रं

२०८

हिल्लोकानामिदमुत्तमं ॥ लोकतंत्रस्य कृत्स्नस्य यस्माद्धर्मः प्रवर्त्तते ॥ प्रवृत्तौ च निवृत्तौ च यस्मादेतद्भविष्यति ॥ यजुरृक्सामभिर्जु-
ष्टमथर्वांगिरसैस्तथा ॥ तथा प्रमाणं हि मया कृतो ब्रह्मा प्रसादजः ॥ रुद्रस्य क्रोधजा विप्राः यूयं प्रकृतयस्तथा ॥ सूर्याचंद्रमसौ वायु-
र्भूमिरापोग्निरेव च ॥ सर्वे च नक्षत्रगणाय च्च भूताभिशब्दितं ॥ अधिकारेषु वर्त्तंते यथास्वं ब्रह्मवादिनः ॥ सर्वे प्रमाणं हि यथा तथैतच्छा-
स्त्रमुत्तमं ॥ भविष्यति प्रमाणं वै एतन्मदनुशासनं ॥ तस्मात्प्रवक्ष्यति धर्मान्मनुः स्वायंभुवः स्वयं ॥ उशना बृहस्पतिश्चैव यदोत्पन्नौ भवि-
ष्यतः ॥ तदा प्रवक्ष्यतः शास्त्रं युष्मन्मतिभिरुद्धृतं ॥ स्वायंभुवेषु धर्मेषु शास्त्रे चौशनसे कृते ॥ बृहस्पतिमते चैव लोकेषु प्रतिचारिते ॥
युष्मत्कृतमिदं शास्त्रं प्रजापालो वसुस्तथा ॥ बृहस्पतिसकाशाद्वै प्राप्स्यते द्विजसत्तमाः ॥ स हि मद्भावितो राजा मद्भक्तश्च भविष्यति ॥
तेन शास्त्रेण लोकेषु क्रियाः सर्वाः करिष्यति ॥ एतद्धि सर्वशास्त्राणां शास्त्रमुत्तमसंज्ञितं ॥ एतदर्थ्यं च धर्म्यं च रहस्यं चैतदुत्तमं ॥ अस्य प्र-
वर्त्तनाच्चैव प्रजावंतो भविष्यथ ॥ स च राजा श्रिया युक्तो भविष्यति महान्वसुः ॥ संस्थिते तु नृपे तस्मिं शास्त्रमेतत्सनातनं ॥ अंतर्धा-
स्यति तत्सर्वमेतद्वः कथितं मया ॥ एतावदुक्त्वा वचनमदृश्यः पुरुषोत्तमः ॥ विसृज्य तानृषीन्सर्वान्कामपि प्रस्थितो दिशं ॥ ततस्ते
लोकपितरः सर्वलोकार्थचिंतकाः ॥ प्रावर्त्तयंत तच्छास्त्रं धर्मयोनिं सनातनं ॥ उत्पन्नेंगिरसे चैव युगे प्रथमकल्पिते ॥ सांगोपनि-
षदं शास्त्रं स्थापयित्वा बृहस्पतौ ॥ जग्मुर्यथेप्सितं देशं तपसे कृतनिश्चयाः ॥ धारणाः सर्वलोकानां सर्वधर्मप्रवर्त्तकाः ॥ ॥ शांतौ
मोक्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ ततोतीते महाकल्पे उत्पन्नेंगिरसः सुते ॥ बभूवुर्निर्वृता देवा जाते देवपुरोहिते ॥ बृहद्ब्रह्म म-
हच्चेति शब्दः पर्यायवाचकाः ॥ एभिः समन्वितो राजन्गुणैर्विद्वान्बृहस्पतिः ॥ तस्य शिष्यो बभूवाग्र्यो राजोपरिचरो वसुः ॥ अ-
धीतवांस्तदा शास्त्रं सम्यक्चित्रशिखंडिजं ॥ स राजा भावितः पूर्वं दैवेन विधिना वसुः ॥ पालयामास पृथिवीं दिवमाखं-

मोक्ष०

२०७

उल्लो यथा ।। तस्य यज्ञो महानासीदश्वमेधो महात्मनः ।। बृहस्पतिरुपाध्यायस्तत्र होता बभूव ह ।। प्रजापतिसुताश्चात्र सदस्याश्चा
भवंस्त्रयः ।। एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ।। धनुष्याक्ष्योऽथ रैभ्यश्च अर्वावसुपरावसू ।। ऋषिर्मेधातिथिश्चैव तांड्यश्चै
व महानृषिः ।। ऋषिः शांतिर्महाभागस्तथा वेदशिराश्च यः ।। ऋषिश्रेष्ठश्च कपिलः शालिहोत्रपिता स्मृतः ।। आद्यः कठ
स्तित्तिरिश्च वैशंपायनपूर्वजः ।। कण्वोऽथ देवहोत्रश्च एते षोडश कीर्तिताः ।। संभृताः सर्वसंभारास्तस्मिन् राजन् महाक्रतौ ।। न
तत्र पशुघातोऽभूत् स राजैवं स्थितोऽभवत् ।। अहिंस्रः शुचिरक्षुद्रो निराशीः कर्मसंस्तुतः ।। आरण्यपदोद्भूता भागास्तत्रोपकल्पिताः ।।
प्रीतस्ततोऽस्य भगवान् देवदेवः पुरातनः ।। साक्षात्तं दर्शयामास सोऽदृश्योऽन्येन केनचित् ।। स्वयं भागमुपाघ्राय पुरोडाशं गृही
तवान् ।। अदृश्येन हृतो भागो देवेन हरिमेधसा ।। बृहस्पतिस्ततः क्रुद्धः स्रुचमुद्यम्य वेगितः ।। आकाशं घ्नन् स्रुचः पातै रोषादश्रूण्य
व वर्त्तयत् ।। उवाचोपरिचरं मयाभागोऽयमुद्यतः ।। ग्राह्यः स्वयं हि देवेन मत्प्रत्यक्षं न संशयः ।। ।। युधिष्ठिर उवाच ।। ।। उद्यताः
यज्ञभागा हि साक्षात्प्राप्ताः सुरैरिह ।। किमर्थमिह न प्राप्तो दर्शनं स हरिर्विभुः ।। ।। भीष्मः ।। ।। ततः स तं समुद्धूतं भूमिपालो
महान्वसुः ।। प्रसादयामास मुनिं सदस्यास्ते च सर्वशः ।। ऊचुश्चैनमसंभ्रान्ताः न रोषं कर्तुमर्हसि ।। नैष धर्मः कृतयुगे यस्त्वं त
रोषमचीकृथाः ।। अरोषणो ह्यसौ देवो यस्य भागोऽयमुद्यतः ।। न शक्यः स त्वया द्रष्टुमस्माभिर्वा बृहस्पते ।। यस्य प्रसादं
कुरुते स वै तं द्रष्टुमर्हति ।। एकतद्वितस्त्रिताश्चोचुस्तत्र चित्रशिखंडिनः ।। वयं हि ब्राह्मणः पुत्रा मानसः परिकीर्तिताः ।। गता २०७
निश्रेयसार्थं हि कदाचिद्दिशामुत्तरां ।। तप्त्वा वर्षसहस्राणि चत्वारि तप उत्तमं ।। एकपादास्थिताः सम्यक् काष्ठभूताः समा

हिताः ॥ मेरोरुत्तरभागे तु क्षीरोदस्यानुकूलतः ॥ स देशो यत्र नस्तप्तं तपः परमदारुणं ॥ कथं पश्येम हि वयं देवं नारायणात्मकं ॥ वरेण्यं वरदं तं वै देवदेवं सनातनं ॥ कथं पश्येम हि वयं देवं नारायणं त्विति ॥ अथ व्रतस्यावभृथे वागुवाचाशरीरिणी ॥ स्निग्धगंभीरया वाचा प्रहर्षणकरी विभो ॥ सुतप्तं वस्तपो विप्राः प्रसन्नेनांतरात्मना ॥ यूयं जिज्ञासवो भक्ताः कथं द्रक्ष्यथ तं विभुं ॥ क्षीरोदधेरुत्तरतः श्वेतद्वीपो महाप्रभः ॥ तत्र नारायणपरा मानवाश्चंद्रवर्चसः ॥ एकांतभावोपगतास्ते भक्ताः पुरुषोत्तमं ॥ ते सहस्रार्चिषं देवं प्रविशंति सनातनं ॥ अनिंद्रिया निराहारा अनिस्पंदाः सुगंधिनः ॥ एकांतिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः ॥ गच्छध्वं तत्र मुनयस्तत्रात्मा मे प्रकाशितः ॥ अथ श्रुत्वा वयं सर्वे वाचं तामशरीरिणीं ॥ यथाख्यातेन मार्गेण तं देशं प्रतिपेदिरे ॥ प्राप्य श्वेतं महाद्वीपं तच्चित्तास्तद्दिदृक्षवः ॥ ततोऽस्मद्दृष्टिविषयस्तदा प्रतिहतोऽभवत् ॥ न च पश्याम पुरुषं तत्तेजोहृतदर्शनाः ॥ ततो नः प्रादुरभवद्विज्ञानं देवयोगजं ॥ न किलातप्ततपसा शक्यते द्रष्टुमंजसा ॥ ततः पुनर्वर्षशतं तप्त्वा तात्कालिकं महत् ॥ व्रतावसाने च शुभान्नरान्ददृशिरे वयं ॥ श्वेतांश्चंद्रप्रतीकाशान्सर्वलक्षणलक्षितान् ॥ नित्यांजलिकृतान्ब्रह्म जपतः प्रागुदङ्मुखान् ॥ मानसो नाम स जपो जप्यते तैर्महात्मभिः ॥ तेनैकाग्र्यमनस्त्वेन प्रीतो भवति वै हरिः ॥ या भवेन्मुनिशार्दूल भा सूर्यस्य युगक्षये ॥ एकैकस्य प्रभा तादृक् सा भवेन्मानवस्य ह ॥ तेजोनिवासः स द्वीपः इति वै मेनिरे वयं ॥ न तत्राभ्यधिकः कश्चित् सर्वे ते समतेजसः ॥ अथ सूर्यसहस्रस्य प्रभां युगपदुत्थितां ॥ सहसा दृष्टवंतः स्म पुनरेव बृहस्पते ॥ सहिता स्वाभ्यधावंत ततस्ते मानवा द्रुतं ॥ कृतांजलिपुटा हृष्टा नम इत्येव वादिनः ॥ ततो हि वदतां तेषामश्रौ

पं विपुलं ध्वनिं ॥ बलिः क्लिन्नो प्रक्रियते तस्य देवस्य तैर्न्नरैः ॥ वयं तु तेजसा तस्य सहसाहृतचेतसः ॥ न किंचिदपि पश्या
मो हतचक्षुर्बलेंद्रियाः ॥ एकस्तु शब्दो विततः श्रुतोस्माभिरुदीरितः ॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ नमस्ते
स्तु हृषीकेश महापुरुष पूर्वज ॥ इति शब्दः श्रुतोस्माभिः शिक्षाक्षरसमन्वितः ॥ एतस्मिन्नंतरे वायुः सर्वगंधवहः शुचिः
॥ दिव्यान्युवाह पुष्पाणि कर्मण्याश्चौषधीस्तथा ॥ तेनिष्टः पंचकालज्ञैर्हरिः कांतिभिर्नरैः ॥ भक्त्या परमया युक्तैर्मनोवा
कर्मभिस्तदा ॥ त्वनंतवागातो देवो यथा तैर्वागुदीरिता ॥ वयं त्वेनं न पश्यामो मोहितस्तस्य मायया ॥ मारुते संनि
वृत्ते च बलौ च प्रतिपादिते ॥ चिंताव्याकुलितात्मानो जातास्मो गिरसांवर ॥ मानवानां सहस्रेषु तेषु वै बुद्धयोनिषु ॥
भ्यस्मान्न कश्चिन्मनसा चक्षुषा वाप्यपूजयत् ॥ तेपि स्वस्थां मुनिगणाः रूक्षभावमनुव्रताः ॥ नास्मादृषियै भावं ब्रह्म
भावमनुष्ठिताः ॥ ततोस्मासु प्रतिस्तांतान् तपसा चातिकर्षिताः ॥ उवाच स्वस्थं किमपि श्रुतं तत्राचाराचीनकं ॥ ॥ देव्य
उवाच ॥ ॥ हृष्टाः स्वः पुरुषाश्वेताः सर्वेंद्रियविवर्जिताः ॥ हृष्टो भवति देवेशः एभिः दृष्टैर्द्विजोत्तमैः ॥ गच्छध्वं मुनयः
सर्वे पथागतमितो चितं ॥ न स शक्यस्त्वभक्तेन द्रष्टुं देवः कथंचन ॥ कालेन महता एकांतित्वं समागतैः ॥ शक्यो
द्रष्टुं स भगवान् प्रभामंडलदुर्दृशः ॥ महत्कार्यं च कर्तव्यं युष्माभिर्द्विजसत्तमाः ॥ इतः कृतयुगेतीते विपर्यस्तं गतेपि
वा ॥ वैवस्वतेंतरे विप्राः प्राप्ते त्रेतायुगे पुनः ॥ सुराणां कार्यसिध्यर्थं सहाया वै भविष्यथ ॥ ततस्तदद्भुतं वाक्यं निशम्यै
वामृतोपमं ॥ तस्य प्रसादात्प्राप्ताः स्मो देशमीप्सितमंजसा ॥ एवं सुतपसा चैव हव्यकव्यैस्तथैव च ॥ देवोस्माभिर्न दृ

ष्टसः कथंत्वंद्रष्टुमर्हसि नारायणो महद्भूतं विश्वक्सेनं हव्यकव्यभुक् ॥ अनादिनिधनोव्यक्तो देवदानवपूजितः ॥ ए
वमेकतवाक्येन द्वितत्रितमतेन च ॥ अनुनीतः सदस्यैश्च बृहस्पतिरुदारधीः ॥ समानयत्ततो यज्ञं दैवतं समपूजयत्
॥ समाप्तयज्ञो राजापि प्रजापालितवान्वसुः ॥ ब्रह्मशापाद्दिवो भ्रष्टः प्रविवेश महीं ततः ॥ स राजा राजशार्दूलः सत्य
धर्मपरायणः ॥ अंतर्भूमिगतश्चैव सततं धर्मवत्सलः ॥ नारायणपरो भूत्वा नारायणपदं जपन् ॥ तस्यैव च प्रसादेन
पुनरेवोत्थितस्तु सः ॥ महीतलाद्गतः स्थानं ब्रह्मणः समनंतरं ॥ परां गतिमनुप्राप्तः इति नैष्ठिकमंजसा ॥ ॥ शांतौ मो
क्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यदा भागवतोत्यर्थमासीद्राजा महान्वसुः ॥ किमर्थं स परिभ्रष्टो विवेश विवरं भुवः ॥
॥ ॥ भीष्म उवाच ॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ ऋषीणां चैव संवादं त्रिदशानां च भारत ॥ अजेन यष्टव्य
मिति प्राहुर्देवा द्विजोत्तमान् ॥ स च छागोप्यजो ज्ञेयो नान्यः पशुरिति स्थितिः ॥ ॥ ऋषयः ॥ ॥ बीजैर्यज्ञेषु यष्टव्य
मिति वै वैदिकी श्रुतिः ॥ अत्रसंज्ञानि बीजानि छागं न हंतुमर्हथ ॥ नैष धर्मः सतां देवा यत्र वध्येत वै पशुः ॥ इदं कृतयु
गं श्रेष्ठं कथं वध्येत वै पशुः ॥ ॥ भीष्मः ॥ ॥ तेषां संवदतामेवमृषीणां विबुधैः सह ॥ मार्गागतो नृपश्रेष्ठस्तं देशं प्राप्तवा
न्वसुः ॥ अंतरिक्षचरः श्रीमान्समग्रबलवाहनः ॥ तं दृष्ट्वा सहसायांतं वसुं ते त्वंतरिक्षगं ॥ ऊचुर्द्विजातयो देवा नैष छे
त्स्यति संशयं ॥ यज्वा दानपतिः श्रेष्ठः सर्वभूतहितः प्रियः ॥ कथंस्विदन्यथा ब्रूयादेष वाक्यं महान्वसुः ॥ एवं ते संविदं कृत्वा
विबुधा ऋषयस्तथा ॥ अपृच्छन्सहिताभ्येत्य वसुं राजानमंतिकात् ॥ भो राजन्केन यष्टव्यमजेनाहोस्विदौषधैः ॥ एतं

नः संशयं छिंधि प्रमाणं नो भवान्मतः ॥ स तान्कृतांजलिर्भूत्वा परिपप्रछ वै वसुः ॥ कस्य वै को मतः कामो ब्रूत सत्यं द्विजोत्तमाः
॥ ॥ऋषयः॥ ॥ धान्यैर्यष्टव्यमित्येव पक्षोऽस्माकं नराधिप ॥ देवानां तु पशुः पक्षो मतो राजन्वदस्व नः ॥ ॥ भीष्म उवाच ॥ ॥
देवानां तु मतं ज्ञात्वा वसुना पक्षसंश्रयात् ॥ छागेनाजेन यष्टव्यमेवमुक्तं वचस्तदा ॥ कुपितास्ते ततः सर्वे मुनयः सूर्यवर्चसः ॥
ऊचुर्वसुं विमानस्थं देवपक्षार्थवादिनं ॥ सुरपक्षो गृहीतस्ते यस्मात्तस्माद्दिवः पत ॥ अद्य प्रभृति ते राजन्नाकाशे विहिता
गतिः ॥ अस्मच्छापाभिघातेन महीं भित्वा प्रवेक्ष्यसि ॥ ततस्तस्मिन्मुहूर्तेथ राजोपरिचरस्तदा ॥ अधो वै संबभूवाशु भू
न मेर्विवरगो नृप ॥ स्मृतिस्त्वेवं न विजहौ तदा नारायणाज्ञया ॥ देवास्तु सहिताः सर्वे वसोः शापविमोक्षणं ॥ चिंतयामासुरव्य
ग्राः सुकृतं हि नृपस्य तत् ॥ अनेनास्मत्कृते राज्ञा शापः प्राप्तो महात्मना ॥ अस्य प्रतिप्रियं कार्यं सहितैर्नो दिवौकसः ॥ इति
बुध्या व्यवस्याशु गत्वा निश्चयमीश्वराः ॥ ऊचुः संहृष्टमनसो राजोपरिचरं तदा ॥ ब्रह्मण्यदेवभक्तस्त्वं सुरासुरगुरुर्हरिः ॥
कामं स ते वितुष्टात्मा कुर्याच्छापविमोक्षणं ॥ मानना तु द्विजातीनां व्या वै महात्मनां ॥ अवश्यं तपसा तेषां फलितव्यं नृपोत्त कर्त
म ॥ यतस्त्वं सहसा भ्रष्ट आकाशान्मेदिनीतलं ॥ एकं त्वनुग्रहं तुभ्यं दत्वा वै नृपसत्तम ॥ यावत्त्वं शापदोषेण कालमासि
ष्यसेनघ ॥ भूमेर्विवरगो भूत्वा तावत्त्वं कालमाप्स्यसि ॥ यज्ञेषु सुहुतां विप्रैः वसोर्द्धारां समाहितैः ॥ प्राप्स्यसेस्मदनुध्या
नान्मां च त्वां ग्लानिरस्पृशत् ॥ न क्षुत्पिपासे राजेंद्र भूमेश्छिद्रे भविष्यतः ॥ वसोर्द्धाराभिपीतत्वात्तेजसाप्यायितेन च ॥ स दे त
वोस्मद्वरात्प्रीतो ब्रह्मलोकं हि नेष्यति ॥ एवं दत्वा वरं राज्ञे सर्वे ते च दिवौकसः ॥ गताः स्वभवनं देवा ऋषयश्च तपोधनाः ॥

चक्रेव सुस्तत स्रजां विष्वक्सेनाय भारत ॥ जप्यं जगौ च सततं नारायणमुखोद्गतं ॥ तत्रापि पंचभिर्यज्ञै पंचकालानरिंदम
॥ अयजद्धरिं सुरपतिं भूमे विवरगोपि सन् ॥ ततोस्य तुष्टो भगवान्भक्त्या नारायणो हरिः ॥ अनन्यभक्तस्य सततस्तन्म
नस्य जितात्मनः ॥ वरदो भगवान्विष्णुः समीपस्थं द्विजोत्तमं ॥ गरुत्मंतं महावेगं बभाषेभीप्सितं तदा ॥ द्विजोत्तम महा
भाग यस्यतांव वचनान्मम ॥ संम्राड्राजा वसुर्नाम धर्मात्मा शंसितव्रतः ॥ ब्राह्मणानां प्रकोपेन प्रविष्टो वसुधातलं ॥ मानि
तास्तेतु विप्रेंद्रास्त्वंतु गच्छ द्विजोत्तम ॥ भूमेर्विवरसंगुप्तं गरुडेह ममाज्ञया ॥ अधश्चरं नृपश्रेष्ठं खेचरं कुरु माचिरं ॥ गरुत्मा
नथ विक्षिप्य पक्षौ मारुतवेगवान् ॥ विवेश विवरं भूमेर्यत्रास्ते पार्थिवो वसुः ॥ तत एनं समुत्क्षिप्य सहसा विनतासुतः ॥ उ
त्पपात नभस्तूर्णं तत्र चैनममुंचत ॥ अस्मिन्मुहूर्ते संजज्ञे राजोपरिचरः पुनः ॥ सशरीरो गतश्चैव ब्रह्मलोकं नृपोत्तमः ॥
एवं तेनापि कौंतेय वाग्दोषाद्देवताज्ञया ॥ प्राप्ता गतिरधस्तात्तु द्विजशापान्महात्मना ॥ केवलं पुरुषस्तेन सेवितो हरिरी
श्वरः ॥ ततः शीघ्रं जहौ शापं ब्रह्मलोकमवाप च ॥ ॥ भीष्म उवाच ॥ ॥ एतत्ते सर्वमाख्यातं संभूता मानवा यथा ॥ नारदो
पि यथा श्वेतद्वीपं स गतवानृषिः ॥ तत्ते सर्वं प्रवक्ष्यामि शृणुष्वैकमना नृप ॥ ॥ शांतो मोक्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ प्रा
प्य श्वेतं महाद्वीपं नारदो भगवानृषिः ॥ ददर्श तानेव नराञ्श्वेतांश्चंद्रसमप्रभान् ॥ पूजयामास शिरसा मनसा तैश्च पूजि
तः ॥ दिदृक्षुर्जप्यपरमः सर्वकृच्छ्रगतः स्थितः ॥ भूत्वैकाग्रमना विप्र ऊर्ध्वबाहुः समाहितः ॥ स्तोत्रं जगौ स विश्वाय निर्गुणाय
गुणात्मने ॥ ॥ नारदः ॥ ॥ नमस्ते देवेश । निष्क्रिय । निर्गुण । लोकसाक्षिन् । क्षेत्रज्ञ । पुरुषोत्तम । अनंत पुरुष । म

हापुरुष। पुरुषोत्तम। त्रिगुण्य। प्रधान। अमृत। अमृताख्य। अनंताख्य। व्योम। सनातन। सदसत्। व्यक्ताव्यक्त। ऋतधामन्। आ
दिदेव। वसुप्रद। प्रजापते। सुप्रजापते। वनस्पते। महाप्रजापते। ऊर्जस्पते। वाचस्पते। जगस्पते। मनस्पते। दिवस्पते। मरुत्पते।
सलिलपते। पृथिवीपते। दिक्पते। पूर्वनिवास। गुह्य। ब्रह्मपुरोहित। ब्रह्मकायिक। महाराजिक। चातुर्महाराजिक। आ
भासुर। सप्तमहाभाग। याम्य। महायाम्य। संज्ञासंज्ञ। तुषित। महातुषित। प्रमर्दन। परिनिर्मित। अपरिनिर्मित। व
शवर्तिन्। अपरिनिंदित। अपरिमित। वशवर्तिन्। अवशवर्तिन्। यज्ञ। महायज्ञ। यज्ञसंभव। यज्ञयोने। यज्ञगर्भ। य
ज्ञहृदय। यज्ञस्तुत। यज्ञभागहर। पंचयज्ञधर। पंचकालकर्तृपते। पंचरात्रिक। वैकुंठ। अपराजित। मानसिक। नाम
नाभिक। परस्वाम्मिन्। सुस्नात। हंस। परहंस महाहंस। परमयाज्ञिक। सांख्ययोग। सांख्यमूर्ते। अमृतेशय। हिर
ण्येशय। देवेशाय। कुशेशय। ब्रह्मेशय। पद्मेशय। विश्वेश्वर। विष्वक्सेन। त्वं जगदन्वयः। त्वं जगत्प्रकृतिः। तवाग्नि
रास्यं। वडवामुखोऽग्निः। त्वमाहुतिः। सारथिः। त्वं वषट्कारः। त्वमोंकारः। त्वं तपः। त्वं मनः। त्वं चंद्रमाः। त्वं चक्षुराज्यं। त्वं सूर्यः।
त्वं दिशां गजः। त्वं दिग्भानो। विदिग्भानो। हयशिरः। प्रथमत्रिसौपर्णवर्णधर। पंचाग्ने। त्रिणाचिकेत। षडंगनिधान।
प्राग्ज्योतिष। ज्येष्ठसामग। सासिक। व्रतधर। अथर्वशिराः। पंचमहाकल्प। फेनपाचार्य। वालखिल्य। वैखानस। अ
भग्नयोग। अभग्नपरिसंख्यात। युगादे। युगमध्य। युगनिधन। आखंडल। प्राचीनगर्भ। कौशिक। पुरुष्टुत। पुरुहूत।
विश्वकृत। विश्वरूप। अनंतगते। अनंतभोग। अनंत। अनादे। अमध्य। अव्यक्तमध्य। अव्यक्तनिधन। व्रतावास। समु

ग

ड्राधिवास।यशोवास।तपोवास।दमावास।लक्ष्म्यावास।विद्यावास।कीर्त्यावास।श्रीवास।सर्ववास।वासुदेव।सर्वछंदक।
हरिहय।हरिमेधा।महायज्ञभागहर।सुखप्रद।धनप्रद।हरिमेध।यमनियम।महानियम।कृछ्र।अतिकृछ्र।नि
यमधर।निवृत्तधर्म।प्रवचनगत।प्रवृत्तवेदक्रिय।अज।सर्वगते।सर्वदर्शिन्।अग्राह्य।अचल।महाविभूते।माहात्म्य
शरीर।पवित्र।महापवित्र।हिरण्मय।बृहत्।अप्रतर्क्य।अविज्ञेय।ब्रह्माग्र्य।प्रजासर्गकर।प्रजानिधनकर।महामा
याधर।चित्रशिखंडिन्।वरप्रद।पुरोडाशभागहर।गताध्वर।छिन्नतृष्ण।छिन्नसंशय।सर्वतोवृत।निवृत्तरूप।ब्राह्म
णरूप।ब्राह्मणप्रिय।विश्वमूर्त्ते।महामूर्त्ते।बांधव।भक्तवत्सल।ब्रह्मण्यदेव।भक्तोहं त्वां दिदृक्षुरेकांतदर्शनाय नमो
नमोः॥ ॥शांतौ मोक्षधर्मे॥ ॥भीष्मः॥ ॥एवं स्तुतः स भगवान्गुह्यैस्तथ्यैश्च नामभिः॥तं मुनिं दर्शयामास नारदं
विश्वरूपधृक्॥किंचिच्चंद्रविशुद्धात्मा किंचिच्चंद्राद्विशेषवान्॥कृशानुवर्णः किंचिच्च किंचिद्धिष्ण्याकृतिः प्रभुः॥शुक
पत्रनिभः किंचित् किंचित्स्फटिकसन्निभः॥नीलांजनचयप्रख्यो जातरूपप्रभः क्वचित्॥प्रवालांकुरवर्णश्च श्वेतवर्णस्तथा
क्वचित्॥क्वचित्सुवर्णवर्णाभो वैडूर्यसदृशः क्वचित्॥नीलवैडूर्यसदृश इंद्रनीलनिभः क्वचित्॥मयूरग्रीववर्णाभो मु
क्ताहारनिभः क्वचित्॥एतान्बहुविधान्वर्णान्रूपे बिभ्रत्सनातनः॥सहस्रनयनः श्रीमान् शतशीर्षः सहस्रपात्॥स
हस्रोदरबाहुश्च अव्यक्त इति च क्वचित्॥ॐकारमुद्गिरन्वक्त्रात्सावित्रीं च तदन्वयां॥शेषेभ्यश्चैव वक्त्रेभ्यश्चतुर्वेदोद्गि

नच

रश्चबहूरू॥आरण्यकोऽजगो देवो हविर्नायणो वशी॥वेदीं कमंडलुं शुभ्रान्मणीनुपानहौ कुशान॥अजिनं दंडकाष्ठं च ज्वलि
तं च हुताशनं॥धारयामास देवेशो हस्तैर्यज्ञपतिस्तदा॥तं प्रसंन्नं प्रसन्नात्मा नारदो द्विजसत्तमः॥वाग्यतः प्रयतो भूत्वा ववं
दे परमेश्वरं॥तमुवाच नतं मूर्ध्ना देवानामादिरव्ययः॥ ॥भगवानुवाच॥ ॥एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः॥
इदं देशमनुप्राप्ता मम दर्शनलालसाः॥न च मां ते ददृशिरे न च द्रक्ष्यति कश्चन॥ऋते ह्येकांतिकश्रेष्ठात्त्वं चैवैकांतिको
त्तमः॥ममैतास्तनवश्रेष्ठा जाता धर्मद्विजेगृहे॥तास्त्वं भज स्वसततं साधयस्व यथागतं॥वृणीष्व च वरं विप्र मत्तस्त्वं
यदिहेच्छसि॥प्रसंन्नोहं तवाद्येह विश्वमूर्त्तिरिहाव्ययः॥ ॥नारद उवाच॥ ॥अद्य मे तपसो देव यमस्य नियमस्य
च॥सद्यः फलमवाप्तं वै दृष्टो यद्भगवान्मया॥वर एष ममात्यंतं दृष्टस्त्वं यत्सनातनः॥भगवन्विश्वदृक्सिंहः सर्वमू
र्त्तिर्महाप्रभुः॥ ॥भीष्मः॥ ॥एवं संदर्शयित्वा तु नारदं परमेष्ठिनं॥उवाच वचनं भूयो गच्छ नारद मा चिरं॥इमे
ह्यनिंद्रियाहारा मद्भक्ताश्चंद्रवर्चसः॥एकाग्राश्चिंतयेयुर्मां नैषां विघ्नो भवेदिति॥सिद्धा ह्येते महाभागाः पुरा ह्येकां
तिनो भवन्॥तमोरजोभिर्निर्मुक्ता मां प्रवेक्ष्यंत्यसंशयं॥न दृश्यश्चक्षुषा योसौ न स्पृश्यः स्पर्शनेन च॥न घ्रेयश्चैव गं
धेन रसेन च विवर्जितः॥सत्त्वं रजस्तमश्चैव न गुणास्तं भजंति वै॥यश्च सर्वगतः साक्षी लोकस्यात्मेति कथ्यते॥भूतग्रा
मशरीरेषु नश्यत्सु न विनश्यति॥अजो नित्यः शाश्वतश्च निर्गुणो निष्कलस्तथा॥द्विर्द्वादशेभ्यस्तत्त्वेभ्यः ख्यातो यः प

चविंशकः॥ पुरुषोनिष्क्रियश्चैवज्ञानदृश्यश्चकथ्यते॥ यंप्रविश्यभवंतीहमुक्तावैद्विजसत्तमाः॥ सवासुदेवोविज्ञेयःपर
मात्मासनातनः॥ यस्यदेवस्यमाहात्म्यंमहिमानंचनारद॥ शुभाशुभैकर्मभिर्योनलिप्यतिकदाचन॥ सत्वंरजस्तम
च श्चेतिगुणानेतान्प्रचक्षते॥ एतेसर्वेशरीरेषुतिष्ठंतिविचरंतिच॥ एतान्गुणांस्तुक्षेत्रज्ञोभुंक्तेनैभिःसयुज्यते॥ निर्गुणोगु
णभुक्चैवगुणस्रष्टागुणाधिकः॥ जगत्प्रतिष्ठादेवर्षेपृथिव्यप्सुप्रलीयते॥ ज्योतिष्यापःप्रलीयंतेज्योतिर्वायौप्र
लीयते॥ खेवायुःप्रलयंयातिमनस्याकाशमेवच॥ मनोहिपरमंभूतंतदव्यक्तेप्रलीयते॥ अव्यक्तंपुरुषेब्रह्मन्नि
ष्क्रियेसंप्रलीयते॥ नास्तितस्मात्परतरःपुरुषाद्वैसनातनात्॥ नित्यंहिनास्तिजगतिभूतंस्थावरजंगमं॥ ऋतेतमे
कंपुरुषंवासुदेवंसनातनं॥ सर्वभूतात्मभूतोहिवासुदेवोमहाबलः॥ पृथिवीवायुराकाशमापोज्योतिश्चपंचमं॥
तेसमेतामहात्मानःशरीरमितिसंज्ञितं॥ तदाविशतियोब्रह्मन्नदृश्योलघुविक्रमः॥ उत्पन्नएवभवतिशरीरंचेष्ट
यन्प्रभुः॥ नविनाधातसंघातंशरीरंभवतिक्वचित्॥ नचजीवंविनाब्रह्मन्वायवश्चेष्टयंत्युत॥ सजीवःपरिसंख्या
तःशेषःसंकर्षणःप्रभुः॥ तस्मात्सनत्कुमारत्वंयोलभेतस्वेनकर्मणा॥ यस्मिंश्चसर्वभूतानिप्रलयंयांतिसंक्षये॥ स
मनःसर्वभूतानांप्रद्युम्नःपरिपठ्यते॥ तस्मात्प्रसूतोयःकर्ताकारणंकार्यमेवच॥ तस्मात्सर्वंसंभवतिजगत्स्थावर
जंगमं॥ सोनिरुद्धःसईशानोव्यक्तःसर्वकर्मसु॥ योवासुदेवोभगवान्क्षेत्रज्ञोनिर्गुणात्मकः॥ ज्ञेयःसएवरा

ज्ञो जीवः संकर्षणः प्रभुः ॥ संकर्षणाच्च प्रद्युम्नो मनोक्तः स उच्यते ॥ प्रद्युम्नाद्योनिरुद्धस्तु सोहंकारः स ईश्वरः ॥ म
त्तः सर्वं संभवति जगत्स्थावरजंगमं ॥ अक्षरं च क्षरं चैव सच्चासच्चैव नारद ॥ मां प्रविश्य भवंतीह मुक्ता भक्ताश्च ये मम ॥
अहं हि पुरुषो ज्ञेयो निष्क्रियः पंचविंशकः ॥ निर्गुणो निष्कलश्चैव निर्द्वंद्वो निष्परिग्रहः ॥ एतत्त्वया न विज्ञेयं रूपवानि
ति दृश्यते ॥ इच्छन्मुहूर्त्तान्नश्येयं ईशोहं जगतो गुरुः ॥ माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद ॥ सर्वभूतगु
णैर्युक्तं नैवं त्वं ज्ञातुमर्हसि ॥ मयैतत्कथितं सम्यक्तव मूर्त्तिचतुष्टयं ॥ अहं हि जीवसंघातो मयि जीवः समाहितः ॥ नै
वं ते बुद्धिचत्राभूद्दृष्टो जीवो मयेति वै ॥ अहं सर्वत्रगो ब्रह्मन् भूतग्रामांतरात्मकः ॥ भूतग्रामशरीरेषु नश्यत्सु न नश्या
म्यहं ॥ सिद्धा हि ते महाभागा नरा ह्येकांतिनोभवन् ॥ तमोरजोभ्यां निर्मुक्ताः प्रवेक्ष्यंति च मां मुने ॥ हिरण्यग
र्भो लोकादिश्चतुर्वक्त्रो निरुक्तगः ॥ ब्रह्मा सनातनो देवो मम बह्वर्थचिंतकः ॥ ललाटाच्चैव मे रुद्रो देवः क्रोधाद्वि
निःसृतः ॥ पश्यैकादश मे रुद्रान्दक्षिणंपार्श्वमास्थितान् ॥ द्वादशैव तथादित्यान्वामपार्श्वे समास्थितान् ॥ अ
ग्रतश्चैव मे पश्य वसूनष्टौ सुरोत्तमान् ॥ नासत्यं चैव दस्रं च भिषजौ पश्य पृष्ठतः ॥ सर्वान्प्रजापतीन्पश्य
पश्य सप्तऋषीन्यथा ॥ वेदान्यज्ञांश्च शतशः पश्यामृतमथौषधीः ॥ तपांसि नियमांश्चैव यमानपि पृथग्वि
धान् ॥ तथाष्टगुणमैश्वर्यमेकस्थं पश्य मूर्त्तिमत् ॥ श्रियं लक्ष्मीं च कीर्त्तिं च पृथिवीं च ककुद्मती ॥ वेदानां

मातरं पश्य मत्स्थां देवीं सरस्वतीं ॥ ध्रुवं च ज्योतिषां श्रेष्ठं पश्य नारद खेचरं ॥ अंभोधान्समुद्रांश्च सरांसि सरित
स्तथा ॥ मूर्तिमंतः पितृगणाश्चतुरः पश्य सत्तम ॥ त्रींश्चैव मां गुणान्पश्य मत्स्थान्मूर्तिविवर्जितान् ॥ देवका
र्यादपि मुने पितृकार्यं विशिष्यते ॥ देवानां च पितृणां च पिता ह्येको हमादितः ॥ अहं हयशिरा भूत्वा समुद्रे पश्चि
मोत्तरे ॥ पिबामि सुहुतं हव्यं कव्यं च श्रद्धयान्वितं ॥ मया सृष्टः पुरा ब्रह्मा मां यज्ञमयजत्स्वयं ॥ ततस्तस्मि व
रान्प्रीतो दत्तवानस्म्यनुत्तमान् ॥ मत्पुत्रत्वं च कल्पादौ लोकाध्यक्षत्वमेव च ॥ अहंकारकृतं चैव नाम पर्या
यवाचकं ॥ त्वया कृतां च मर्यादां नातिक्रंस्यति कश्चन ॥ त्वं चैव वरदो ब्रह्मन्वरेप्सूनां भविष्यसि ॥ सुरासुरग
णानां च ऋषीच तपोधन ॥ पितृणां च महाभाग सततं शंसितव्रत ॥ विविधानां च भूतानां त्वमुपास्यो भविष्यसि
॥ प्रादुर्भावगतश्चाहं सुरकार्येषु नित्यदा ॥ अनुशास्यस्त्वया ब्रह्मन्नियोज्यश्च सुतो यथा ॥ एतांश्चान्यांश्च
रुचिरान्ब्रह्मणेमिततेजसे ॥ अहं दत्वा वरान्प्रीतो निवृत्तिपरमो भवं ॥ निर्वाणं सर्वधर्माणां निवृत्तिः पर
मा स्मृता ॥ तस्मान्निवृत्तिमापन्नश्चरेत्सर्वांगनिर्वृत्तः ॥ विद्यासहायवंतं च आदित्यस्थं समाहितं ॥ कपिलं प्राहु
राचार्याः सांख्यानिश्चितनिश्चयाः ॥ हिरण्यगर्भो भगवानेषछंदसि सुष्टुतः ॥ सोहं योगरतिर्ब्रह्मन्योगशास्त्रेषु

निश्चितः ॥ एषाहं यक्तिमागत्य तिष्ठामि दिवि शाश्वतः ॥ ततो युगसहस्रांते संहरिष्ये जगत्पुनः ॥ कृत्वा मत्स्थानि भूतानि स्थावराणि चराणि च ॥ एकाकी विद्यया सार्द्धं विहरिष्ये जगत्पुनः ॥ ततो भूयो जगत्सर्वं करिष्यामीह विद्यया ॥ अस्मन्मूर्तिश्चतुर्थी या सासृजच्छेषमव्ययं ॥ स हि संकर्षणः प्रोक्तः प्रद्युम्नं सोप्यजीजनत् ॥ प्रद्युम्नादनिरुद्धोहं सर्गो मम पुनः पुनः ॥ अनिरुद्धात्तथा ब्रह्मा तन्नाभिकमलोद्भवः ॥ ब्रह्मणः सर्वभूतानि चराणि स्थावराणि च ॥ एतां सृष्टिं विजानीहि कल्पादिषु पुनः पुनः ॥ यथा सूर्यस्य गगनादुदयास्तमने इह ॥ नष्टे पुनर्बलात्काल आनयत्यमितद्युतिः ॥ तथा बलादहं पृथ्वीं सर्वभूतहिताय वै ॥ सत्वैराक्रांतसर्वांगां नष्टां सागरमेखलां ॥ आनयिष्यामि स्वं स्थानं वाराहं रूपमास्थितः ॥ हिरण्याक्षं वधिष्यामि दैतेयं बलगर्वितं ॥ नारसिंहं वपुः कृत्वा हिरण्यकशिपुं पुनः ॥ सुरकार्ये हनिष्यामि यज्ञघ्नं दितिनंदनं ॥ विरोचनस्य बलवा बलिः पुत्रो महासुरः ॥ भवध्यः सर्वलोकानां सदेवासुररक्षसां ॥ भविष्यति स शक्रं च स्वराज्याच्च्यावयिष्यति ॥ त्रैलोक्ये पहृते तेन विमुखे च शचीपतौ ॥ आदित्यां द्वादशादित्याः संभविष्यामि कश्यपात् ॥ ततो राज्यं प्रदास्यामि शक्रायामिततेजसे ॥ देवताः स्थापयिष्यामि स्वेषु स्थानेषु नारद ॥ बलिं चैव करिष्यामि पातालतलवासिनं ॥ दान

वं बलिनां श्रेष्ठं मवध्यं सर्वदैवतैः ॥ त्रेतायुगे भविष्यामि रामो भृगुकुलोद्वहः ॥ क्षत्रं चोत्सादयिष्यामि समृद्धबल
वाहनं ॥ संध्यांशे समनुप्राप्ते त्रेतायां द्वापरस्य च ॥ अहं दाशरथी रामो भविष्यामि जगत्पतिः ॥ त्रितोपघाताद्वै
रूप्यमेकतोथ द्वितस्तथा ॥ प्राप्स्यतो वानरत्वं हि प्रजापतिसुतावृषी ॥ तयोर्ये त्वन्वये जाता भविष्यंति वनौक
सः ॥ महाबला महावीर्याः शक्रतुल्यपराक्रमाः ॥ ते सहाया भविष्यंति सुरकार्ये मम द्विज ॥ ततो रक्षःपतिं घोरं
कुलस्य कुलपांसनं ॥ हनिष्ये रावणं रौद्रं सगणं लोककंटकं ॥ द्वापरस्य कलेश्चैव संधौ पर्यवसानिके ॥
प्रादुर्भावः कंसहेतोर्मथुरायां भविष्यति ॥ तत्राहं दानवान्हत्वा सुबहून्देवकंटकान् ॥ कुशस्थलीं करिष्यामि
निवेशं द्वारकां पुरीं ॥ वसानस्तत्र वै पुर्यामदितेर्विप्रियंकरं ॥ हनिष्ये नरकं भौमं मुरं पीठं च दानवं ॥ प्राग्ज्यो
तिषपुरं रम्यं नानाधनसमन्वितं ॥ कुशस्थलीं नयिष्यामि हत्वा वै दानवोत्तमं ॥ महेश्वरमहासेनौ बाणप
प्रियहितैषिणौ ॥ पराजेष्याम्यथोद्युक्तौ देवौ लोकनमस्कृतौ ॥ ततः सुतं बलेर्जित्वा बाणं बाहुसहस्रिणं ॥ विना
शयिष्यामि ततः सर्वान्सौभनिवासिनः ॥ यः कालयवनः ख्यातो गर्गतेजोभिसंवृतः ॥ भविष्यति वधः
स्तस्य मत्त एव द्विजोत्तम ॥ जरासंधश्च बलवान्सर्वराजविरोधिनः ॥ भविष्यत्यसुरस्फीतो भूमिपालो गि
रिव्रजे ॥ मम बुद्धिपरिस्पंदाद्वधस्तस्य भविष्यति ॥ शिशुपालं वधिष्यामि यज्ञे धर्मसुतस्य वै ॥

समागतेषु बलिषु पृथिव्यां सर्वराजसु ।।वासविः सुसहायो वै मम ह्येको भविष्यति।।युधिष्ठिरं स्थापयिष्ये स्व
राज्ये भ्रातृभिः सह।।एवं लोका वदिष्यंति नरनारायणावृषी।।उद्युक्तौ दहतः क्षत्रं लोककार्यार्थमीश्वरौ।।
कृत्वा भारावतरणं वसुधाया यथेप्सितं।।सर्वसात्वतमुख्यानां द्वारकायाश्च सत्तम।।करिष्ये प्रलयं घो
रमात्मज्ञानातिसेक्षितं।।कर्माण्यपरिमेयानि चतुर्मूर्तिधरो ह्यहं।।कृत्वा लोकाङ्गमिष्यामि स्वानहं ब्र
ह्मसत्कृतान्।।हंसः कूर्मश्च मत्स्यश्च प्रादुर्भावा द्विजोत्तम।।वाराहो नारसिंहश्च वामनो राम एव च।।
रामो दाशरथिश्चैव सात्वतः कल्किरेव च।।यदा वेदश्रुतिर्नष्टा मया प्रत्याहृता पुनः।।सवेदाः सश्रुतीका
श्च कृता पूर्वे कृते युगे।।अतिक्रांताः पुराणेषु श्रुतास्ते यदि वा क्वचित्।।अतिक्रांताश्च बहवः प्रादुर्भावा ममोत्तमा।।लोककार्या
णि कृत्वा च पुनः स्वां प्रकृतिं गताः।।न ह्येतद्ब्रह्मणा प्राप्तमीदृशं मम दर्शनं।।यत्त्वया प्राप्तमद्येह एकांतगतबुद्धिना।।एतत्ते सर्वमा
ख्यातं ब्रह्मन्भक्तिमतो मया।।पुराणं च भविष्यं च सरहस्यं च सत्तम।। ।।भीष्म उवाच।। ।।स एवं भगवान्देवो विश्वमूर्तिधरो
ऽव्ययः एतावदुक्त्वा वचनं तत्रैवांतर्दधे पुनः।।नारदोपि महातेजाः प्राप्यानुग्रहमीप्सितं।।नरनारायणौ द्रष्टुं बदर्याश्रममाद्रवत्।।
इदं महोपनिषदं चतुर्वेदसमन्वितं।।सांख्ययोगकृतं तेन पंचरात्रानुशब्दितं।।नारायणमुखोद्गीतं नारदोश्रावयत्पुनः।।ब्रह्म
णः सदने तात यथा दृष्टं यथा श्रुतं।। ।।युधिष्ठिर उवाच।। ।।एतदाश्चर्यभूतं हि महात्म्यं तस्य धीमतः।।किं वै ब्रह्मा न जानीते

यतं शुश्राव नारदात् ॥ पितामहोपि भगवान् तस्माद्देवादनंतरः ॥ कथं स न विजानीयात् प्रभावममितौजसः ॥ ॥ भीष्म उवाच
१। ॥ महाकल्पसहस्राणि महाकल्पशतानि च ॥ समतीतानि राजेंद्र सर्गाश्च प्रलयाश्च ह ॥ सर्गस्यादौ स्मृतो ब्रह्मा प्रजास
र्गकृन्नः प्रभुः ॥ जानाति देवप्रवरं भूयश्चातोधिकं नृप ॥ परमात्मानमीशानमात्मनः प्रभवं तथा ॥ ये त्वन्ये ब्रह्मसदने सिद्धसं
घाः समागताः ॥ तेभ्यस्तच्छ्रावयामास पुराणं वेदसंमितं ॥ तेषां सकाशात्सूर्यस्तु श्रुत्वा वै भावितात्मनां ॥ आत्मानुगामिनां राज
न्श्रावयामास वै ततः ॥ षट्षष्टिर्हि सहस्राणि ऋषीणां भावितात्मनां ॥ सूर्यस्य तपतो लोकान् निर्मिता ये पुरःसराः ॥ तेषामकथय
त्सूर्यः सर्वेषां भावितात्मनां ॥ सूर्यानुगामिभिस्तात ऋषिभिस्तैर्महात्मभिः ॥ मेरौ समागता देवाः श्राविताश्चेदमुत्तमं ॥ देवानां तु
सकाशाद्वै ततः श्रुत्वासितो द्विजः ॥ श्रावयामास राजेंद्र पितॄणां मुनिसत्तमा ॥ मम चापि पिता तात कथयामास शांतनुः ॥ ततो मयापि
श्रुत्वा च कीर्तितं तव भारत ॥ सुरैर्वा मुनिभिर्वापि पुराणं यैरिदं श्रुतं ॥ सर्वे ते परमात्मानं पूजयंते समंततः ॥ इदमाख्यानमार्षेयं
पारंपर्यागतं नृप ॥ नावासुदेवभक्ताय त्वया देयं कथंचन ॥ मत्तोन्यानि च ते राजन्नुपाख्यानशतानि वै ॥ यानि श्रुतानि सर्वाणि
तेषां सारोयमुद्धृतः ॥ सुरासुरैर्यथा राजन्निर्मथ्यामृतमुद्धृतं ॥ एवमेतत्पुरा विप्रैः कथामृतमिहोद्धृतं ॥ यश्चेदं पठते नित्यं यश्चेदं शृ
णुयान्नरः ॥ एकांतभावोपगतः एकांते सुसमाहितः ॥ प्राप्य श्वेतं महाद्वीपं भूत्वा चंद्रप्रभो नरः ॥ स सहस्रार्चिषं देवं प्रविशेन्ना
त्र संशयः ॥ मुच्येदार्तस्तथा रोगाच्छ्रुत्वेमामादितः कथां ॥ जिज्ञासुर्लभते कामान्भक्तो भक्तगतिं व्रजेत् ॥ त्वयापि सततं राजन्नभ्य
र्च्यः पुरुषोत्तमः ॥ स हि माता पिता चैव कृत्स्नस्य जगतो गुरुः ॥ ब्रह्मण्यदेवो भगवान्प्रीयतां ते सनातनः ॥ युधिष्ठिर महाबाहो महाबु

जनार्दन॥ ॥वैशंपायनउवाच॥ ॥श्रुत्वैतदाख्यानवरंधर्मराज्जनमेजय॥भ्रातरश्चाते सर्वेनारायपापराभवन्॥ जितंभगवतातेनपुरुषेणेतिभारत॥नित्यंजप्यपरोभूत्वासरस्वतीमुदीरयेत॥योह्यस्माकंगुरुश्रेष्ठःकृष्णद्वैपायनोमुनिः॥जगौपरमकंजाप्यन्नारायणमुदीरयन्॥गत्वांतरिक्षात्सततंक्षीरोदममृताशयं॥पूजयित्वाचदेवेशंपुनरायात्स्वमाश्रमे॥ ॥भीष्मउवाच॥एतत्तेसर्वमाख्यातंवैशंपायनकीर्तितं॥जनमेजयेनतच्छ्रुत्वाकृतंसम्यग्यथाविधि॥यूयंतप्ततपसःसर्वेचचरितव्रताः॥सर्वेवेदविदोमुख्यानैमिषारण्यवासिनः॥शौनकस्यमहासत्रंप्राप्ताःसर्वेद्विजोत्तमाः॥यजध्वंसुहुतैर्यज्ञैःशाश्वतंपरमेश्वरं॥परंपरागतंह्येतत्पित्रामेकथितंपुरा॥ ॥शांतौमोक्षधर्मे॥ ॥शौनकउवाच॥ ॥कथंसभगवान्देवोयज्ञेष्वग्रहरःप्रभुः॥यज्ञधारीचसततंवेदवेदांगवित्तथा॥ निवृत्तिंचास्थितोधर्मक्षमीभागवतःप्रभुः॥निवृत्तिधर्मान्विदधेसएवभगवान्प्रभुः॥कथंप्रवृत्तिधर्मेषुभागार्हादेवताःकृताः॥कथंनिवृत्तिधर्माश्चकृताव्यावृत्तबुद्धयः॥एतन्नःसंशयंसूतछिंधिगुह्यंसनातनं॥त्वयानारायणकथाश्रुतावैधर्मसंहिता॥ ॥सौतिरुवाच॥ ॥जनमेजयेनयत्पृष्टःशिष्योव्यासस्यधीमत॥तत्तेहंकथयिष्यामिपौराणंशौनकोत्तम॥श्रुत्वामाहात्म्यमेतस्यदेहिनांपरमात्मनः॥जनमेजयोमहाप्राज्ञोवैशंपायनमब्रवीत्॥ ॥जनमेजयः॥ ॥इमेसब्रह्मकालोकाःससुरासुरमानवाः॥क्रियास्वभ्युदयोक्तासुसक्तादृश्यंतिसर्वशः॥मोक्षश्चोक्तस्त्वयाब्रह्मन्निर्वाणंपरमंसुखं॥येतुमुक्ताभवंतीहपुण्यपापविवर्जिताः॥तेसहस्रार्चिषंदेवंप्रविशंतीहशुश्रुम॥ ॥अहोहिदुरनुष्ठेयोमोक्षधर्मःसनातनः॥यंहित्वादेवताःसर्वाहव्यकव्यभुजोभवन्॥ ॥किंतुब्रह्माचरुद्रश्चशक्रा

कश्चबलभित्सप्तुः॥स्तयष्टित्वाराधिपोवायुरग्निर्वरुणएवच॥आकाशराजगामीचैवयेचशेषादिवौकसः॥अलयंनविजानंतिआत्मनःपश्यतिनिर्मितं॥ततस्तेनास्थितामार्गंध्रुवमक्षयमव्ययं॥स्मृतिंकालपरिमाणंप्रवृत्तिंयेसमास्थिताः॥दोषःकालपरीमाणेमहानेषक्रियावतां॥एतन्मेसंशयंविप्रहृदिशल्यमिवार्पितं॥छिंधीतिहासकथनात्सपर्यंकौतूहलंहिमे॥कथंभागहराशोक्तादेवताक्रतुषुद्विज॥किमर्थंचाध्वरेब्रह्मन्निज्यंतेत्रिदिवौकसः॥येचभागंप्रगृह्णंतियज्ञेपुद्विजसत्तम॥तेयजंतोमहायज्ञैकस्यभागंवदंतिवै॥ ॥वैशं॥ ॥अहोगूढतमःप्रश्नस्त्वयापृष्टोजनेश्वर॥नातप्ततपसाह्येषभावेदविदुषातथा॥नापुराणविदाचैवशक्योव्याहर्तुमंजसा॥हंततेकथयिष्यामियन्मेपृष्टःपुरागुरुः॥कृष्णद्वैपायनोव्यासोवेदव्यासोमहानृषिः॥सुमंतुर्जैमिनिश्चैवपैलश्चसुदृढव्रतः॥अहंचतुर्थःशिष्योवैपंचमश्चशुकस्मृतःएतान्समागतान्सर्वान्पंचशिष्यान्दमान्वितान्॥शौचाचारसमायुक्तान्जितक्रोधान्जितेंद्रियान्॥वेदानध्यापयामासवेदान्भारतपंचमान्॥मेरौगिरिवरेरम्येसिद्धचारणसेविते॥तेषामभ्यस्यतांवेदान्कदाचित्संशयोभवत्॥एषवैयस्त्वयापृष्टस्तेनतेषांप्रकीर्तितः॥ततःश्रुतोमयाचापितवाख्येयोद्यभारत॥शिष्याणांवचनंश्रुत्वासर्वाज्ञानतमोनुदः॥पराशरसुतःश्रीमान्व्यासोवाक्यमथाब्रवीत्॥मयाहिसुमहत्तप्तंतपःपरमदारुणं॥भूतंभव्यंभविष्यंचजानीयामितिसत्तमाः॥तस्यमेतप्ततपसोनिगृहीतेंद्रियस्यच॥नारायणप्रसादेनक्षीरोदस्यानुकूलतः॥त्रैकालिकमिदंज्ञानंप्रादुर्भूतंयथेप्सितं॥तच्छृणुध्वंयथान्यायंवक्ष्येसंशयमुत्तमं॥यथावृत्तंहिकल्पादौदृष्टंमेज्ञानचक्षुषा॥परमात्मेतियंप्राहुःसांख्ययोगविदोजनाः॥महापुरुषसंज्ञांस

लभते स्वेन कर्मणा। तस्मात्प्रसूतमव्यक्तं प्रधानं तं विदुर्बुधाः॥ अव्यक्ताद्व्यक्तमुत्पन्नं लोकसृष्ट्यर्थमीश्वरात्॥ अनिरुद्धो
हि लोकेषु महात्मेति कथ्यते॥ योऽसौ व्यक्तित्वमापन्नो निर्ममे च पितामहं॥ सोऽहंकार इति प्रोक्तः सर्वतेजोमयो हि सः॥ पृ
थिवी वायुराकाशमापो ज्योतिश्च पंचमं॥ अहंकारप्रसूतानि महाभूतानि पंचधा॥ महाभूतानि सृष्ट्वैव तान्गुणान्निर्म
मे पुनः॥ भूतेभ्यश्चैव निष्पन्नान्मूर्तिमंतं च तान्शृणु॥ मरीचिरंगिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः॥ वसिष्ठश्च महात्मा
वै मनुः स्वायंभुवस्तथा॥ ज्ञेयाः प्रकृतयोऽष्टौ ताः यासु लोकाः प्रतिष्ठिताः॥ वेदवेदांगसंयुक्तान्यज्ञयज्ञांगसंयुतान्॥
निर्ममे लोकसिद्ध्यर्थं ब्रह्मा लोकपितामहः॥ अष्टाभ्यः प्रकृतिभ्यश्च जातं विश्वमिदं जगत्॥ रुद्रो रोषात्मको जातो द
शान्यान्सोऽसृजत्स्वयं॥ एकादशैते रुद्रास्तु विकाराः पुरुषास्स्मृताः॥ ते रुद्राः प्रकृतिश्चैव सर्वे चैव सुरर्षयः॥ उत्पन्ना लो
कसिद्ध्यर्थं ब्रह्माणं समुपस्थिताः॥ वयं सृष्टा हि भगवंस्त्वया वै प्रभविष्णुना॥ येन यस्मिन्नधीकारे वर्तितव्यं पि
तामह॥ योऽसौ त्वयाभिनिर्दिष्टोऽस्याधिकारोऽर्थचिंतकः॥ परिपाल्यः कथं तेन सोऽहंकारेण कर्तृणा॥ प्रदिशस्व बलं त
स्य योऽधिकारार्थचिंतकः॥ एवमुक्तो महादेवो देवांस्तानिदमब्रवीत्॥ ॥ब्रह्मोवाच॥ ॥साध्वहं ज्ञापितो देवाः युष्मा
भिर्भद्रमस्तु वः॥ ममाप्येषा समुत्पन्ना चिंता या भवतां मम॥ लोकतंत्रस्य कृत्स्नस्य कथं कार्यः परिग्रहः॥ कथं ब
लक्षयो न स्याद्युष्माकं ह्यात्मनश्च मे॥ इतः सर्वेऽपि गच्छामः शरणं लोकसाक्षिणं॥ महापुरुषमव्यक्तं स नो वक्ष्य

तियदितं ॥ ततस्ते ब्रह्मणा सार्द्धं ऋषयो विबुधास्तथा ॥ क्षीरोदस्योत्तरं कूलं जग्मुर्लोकहितार्थिनः ॥ ते तपः समुपा
तिष्ठन् ब्रह्मोक्तं वेदकल्पितं ॥ स महानियमो नाम तपश्चर्या सुदारुणाः ॥ ऊर्द्धदृष्टिर्बाहवश्च एकाग्रं च मनो भवत् ॥
एकपादास्थिताः सर्वे काष्ठभूताः समाहिताः ॥ दिव्यवर्षसहस्रांते तपस्तप्त्वा सुदारुणं ॥ शुश्रुवुर्मधुरां वाणीं वे
दवेदांगभूषितां ॥ ॥ भगवानुवाच ॥ ॥ भो भो सब्रह्मका देवाः ऋषयश्च तपोधनाः ॥ स्वागतेनार्च्य वः सर्वान् श्राव
ये वाक्यमुत्तमं ॥ विज्ञातं वो मया कार्यं तच्च लोकहितं महत् ॥ प्रवृत्तियुक्तं कर्तव्यं युष्मत्प्राणोपबृंहणं ॥ सुतप्तं च त
पो देवाः समाराधनकाम्यया ॥ भोक्ष्यथास्य महासत्वाः तपसः फलमुत्तमं ॥ एष ब्रह्मा लोकगुरुः महाल्लोकपि
तामहः ॥ यूयं च विबुधश्रेष्ठाः मां यजध्वं समाहिताः ॥ सर्वे भागान्कल्पयध्वं यज्ञेषु मम नित्यशः ॥ तथा श्रेयो विधास्या
मि यथाधीकारमीश्वराः ॥ ॥ वैशंपायन ॥ ॥ श्रुत्वैतद्देवदेवस्य वाक्यं हृष्टतनूरुहाः ॥ ततस्ते विबुधाः सर्वे ब्रह्मा
ते च महर्षयः ॥ वेददृष्टेन विधिना वैष्णवं क्रतुमाहरन् ॥ सत्रे तदा ब्रह्मा स्वयं भागमकल्पयत् ॥ देवा देवर्षयश्चै
व सर्वे भागानकल्पयन् ॥ ते कार्त्तयुगधर्माणो भागाः परमसत्कृताः ॥ प्राहुरादित्यवर्णं तं पुरुषं तमसः परं ॥ बृहंतं
सर्वगं देवमीशानं वरदं प्रभुं ॥ ततोथ वरदो देवस्तान्सर्वानमरान्स्थितान् ॥ अशरीरो बभाषेदं वाक्यं खस्थो महे
श्वरः ॥ येन यः कल्पितो भागः स तथा मामुपागतः ॥ प्रीतोहं प्रदिशाम्यद्य फलमावृत्तिलक्षणं ॥ एतद्वो लक्षणं देवा

मत्प्रसादसमुद्भवं॥ स्वयं यज्ञैर्यजमानाः सम्यक्सदक्षिणैः॥ युगे युगे भविष्यध्वं प्रवृत्तिफलभागिनः॥ यज्ञैर्ये चापि यक्ष्यंति सर्वलोकेषु वै सुराः॥ कल्पयिष्यंति वो भागांस्ते नरा वेदकल्पितान्॥ यो मे यथा कल्पितवान्भागमस्मिन्महाक्रतौ॥ स तथा यज्ञभागार्हो वेदसूत्रे मया कृतः॥ यूयं लोकान्धारयध्वं यज्ञभागफलोचिताः॥ सर्वार्थचिंतका लोके यथाधीकारनिर्मिताः॥ याः क्रियाः प्रचरिष्यंति प्रवृत्तिफलसत्कृताः॥ ताभिराप्यायितबला लोकान्वै धारयिष्यथ॥ यूयं हि भाविता यज्ञैः सर्वयज्ञेषु मानवैः॥ मां ततो भावयिष्यध्वमेषा वो भावना मम॥ इत्यर्थं निर्मिता वेदा यज्ञाश्चौषधिभिः सह॥ एभिः सम्यक्प्रयुक्तैर्हि प्रीयंते देवताः क्षितौ॥ निर्माणमेतद्युष्माकं प्रवृत्तिगुणकल्पितं॥ मया कृतं सुरश्रेष्ठे यावत्कल्पक्षयादिह॥ चिंतयध्वं लोकहितं यथाधीकारमीश्वराः॥ मरीचिरंगिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः॥ वसिष्ठ इति सप्तैते मानसा निर्मिता हि ते॥ एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः॥ प्रवृत्तिधर्मिणश्चैव प्राजापत्ये च कल्पिताः॥ अयं क्रियावतां पंथा व्यक्तीभूतः सनातनः॥ अनिरुद्ध इति प्रोक्तो लोकसर्गकरः प्रभुः॥ सनः सनत्सुजातश्च सनकः ससनंदनः॥ सनत्कुमारः कपिलः सप्तमश्च सनातनः॥ सप्तैते मानसाः प्रोक्ता ऋषयो ब्रह्मणः सुताः॥ स्वयमागतविज्ञाना निवृत्तिं धर्ममास्थिताः॥ एते योगविदो मुख्याः सांख्यज्ञानविशारदाः॥ आचार्या धर्मशास्त्रेषु मोक्षधर्मप्रवर्तकाः॥ यतोऽहं प्रसृतः पूर्वमव्यक्तात्त्रिगुणो महान्॥ तस्मात्परतरो योऽसौ

क्षेत्रज्ञ इति कल्पितः ॥ सोहं क्रिमावतां पंथाः पुनरावर्त्ति दुर्लभाः ॥ यो यथा निर्मितो जंतुः यस्मिं यस्मिंश्च कर्मणि ॥ प्रवृत्तौ वा
निवृत्तौ वा तस्य फलं सोश्नुते महत् ॥ एष लोकगुरुर्ब्रह्मा जगदादिकरः प्रभुः ॥ एष माता पिता चैव युष्माकं च पितामहः ॥ म
यानुशिष्टो भविता सर्वभूतवरप्रदः ॥ अस्य चैवात्मजो रुद्रो ललाटाद्यः समुत्थितः ॥ ब्रह्मानुशिष्टो भविता सर्वभू
तपनः प्रभुः ॥ गछध्वं स्वानधीकारान्धिंतयध्वं यथाविधि ॥ प्रवर्त्तंती क्रियाः सर्वाः सर्वलोकेषु माचिरं ॥ प्रादेस्यंतां च
कर्माणि प्राणिनां गतयस्तथा ॥ परिनिष्ठितकालानि आयंषि ह सुरोत्तमाः ॥ इदं कृतयुगं नाम कालः श्रेष्ठः प्रव
र्त्तितः ॥ अहिंस्या यज्ञपशवो युगेस्मिन्न तदन्यथा ॥ चतुष्पात्सकलो धर्मो भविष्यत्यत्र वै सुराः ॥ ततस्त्रेतायुगं ना
म त्रयी यत्र भविष्यति ॥ प्रोक्षिता यत्र पशवो वधं प्राप्स्यंति वै मखे ॥ यत्र पादश्चतुर्थो वै धर्मस्य न भविष्यति ॥ ततो
वै द्वापरं नाम मिश्रः कालो भविष्यति ॥ द्विपादहीनो धर्मश्च युगे तस्मिन् भविष्यति ॥ ततस्तिष्येथ संप्राप्ते युगे कलिपु
रस्कृते ॥ एकपादस्थितो धर्मो यत्र तत्र भविष्यति ॥ देवा देवर्षयश्चोचुस्तमेवं वादिनं गुरुं ॥ एकं पादस्थिते धर्मे यत्र क्वचन गा
मिनि ॥ कथं कर्त्तव्यमस्माभिर्भगवंस्तद्वदस्व नः ॥ ॥ भगवानुवाच ॥ ॥ यत्र वेदाश्च यज्ञाश्च तपः सत्यं दमस्तथा ॥ अहिं
सा धर्मसंयुक्ताः प्रचरेयुः सुरोत्तमाः ॥ स वो देशः सेवितव्यो मा वो धर्मः पदास्पृशेत् ॥ ॥ व्यास उवाच ॥ ॥ तेनुशिष्टा भ
गवता देवाः सर्षिगणास्तथा ॥ नमस्कृत्वा भगवते जग्मुर्देशान्यथेप्सितान् ॥ गतेषु त्रिदिवौकस्सु ब्रह्मैकः पर्यवस्थितः ॥

दिदृक्षुर्भगवंतं तं मनिरुद्धतनौ स्थितं ।। तं देवो दर्शयामास कृत्वा हयशिरो महत् ।। सांगानावर्त्तयंवेदान्कमंडलुत्रिदंड
धृक् ।। ।।व्यास उवाच ।। ।।ततोश्वसिरसं दृष्ट्वा तं देवममितौजसं ।। लोककर्ता प्रभुर्ब्रह्मा लोकानां हितकाम्यया ।। मू
र्ध्ना प्रणम्य वरदं तस्थौ प्रांजलिरग्रतः ।। स परिष्वज्य देवेन वचनं श्रावितस्तदा ।। ।।भगवानुवाच ।। ।।लोककार्यगतीः
सर्वाः त्वं चिंतय यथाविधि ।। धाता त्वं सर्वभूतानां त्वं प्रभुर्जगतो गुरुः ।। त्वय्यावेशितभारोहं धृतिं प्राप्स्याम्यपांजसा ।। य
दा च सुरकार्यं ते अविषह्यं भविष्यति ।। प्रादुर्भावं गमिष्यामि तदात्मा ज्ञानदेशिकं ।। एवमुक्त्वा हयशिरास्तत्रैवां
तरधीयत ।। तेनानुशिष्टो ब्रह्मापि स्वं लोकमचिराद्गतः ।। एवमेष महाभागपद्मनाभः सनातनः ।। यज्ञेष्वग्रह
रः प्रोक्तो यज्ञधारी च नित्यदा ।। निवृत्तिं चास्थितो धर्मं गतिमक्षयधर्मिणां ।। प्रवृत्तिधर्मान्विदधे कृत्वा लो
कस्य चित्रतां ।। स आदिः स मध्यः स चांतः प्रजानां स धाता स धेयः स कर्ता स कार्यं ।। युगांते प्रसुप्य सुसंक्षिप्य लो
कायुगादौ प्रबुद्धो जगत्ससर्ज ।। तस्मै नमध्वं देवाय निर्गुणाय महात्मने ।। अजाय विश्वरूपाय धाम्ने सर्वदि
वौकसां ।। महाभूताधिपतये रुद्राणां पतये तथा ।। आदित्यपतये चैव वसूनां पतये तथा ।। समुद्रवासिने नित्यं
हरये मुंजकेशिने ।। शांताय सर्वभूतानां मोक्षधर्मानुभाषिणे ।। तपसां तेजसां चैव पतये यशसामपि ।। वच
सां पतये नित्यं सरितां पतये तथा ।। कपर्दिने वराहाय एकशृंगाय धीमते ।। विवस्वते श्वसिरसे चतुर्मूर्तिधृ

तेसदा॥ आध्याय ज्ञानदृश्याय अक्षराय क्षराय च॥ एष देवः संचरति सर्वत्रगतिरव्ययः॥ एष चैतत्सरं ब्रह्म ज्ञेयो
विज्ञानचक्षुषा॥ एवमेतत्पुरा दृष्टं मया वै ज्ञानचक्षुषा॥ कथितं तच्च वै सर्वं मया पृष्टेन तत्वतः॥ क्रियतां मद्
वचः शिष्याः सेव्यतां हरिरीश्वरः॥ गीयतां वेदशब्दैश्च पूज्यतां च यथाविधि॥ ॥वैशंपायनः॥ ॥इत्युक्तास्तु वयं ते
न वेदव्यासेन धीमता॥ सर्वे शिष्याः सुतश्चास्य शुकः परमधर्मवित्॥ स चास्माकमुपाध्यायः सहास्माभिर्विशां
पते॥ चतुर्वेदोद्गताभिश्च ऋग्भिस्तमभिष्टुवे॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि॥ एवं मे कथयद्राज
न्पुरा द्वैपायनो गुरुः॥ यश्चेदं शृणुयान्नित्यं यश्चैनं परिकीर्तयेत्॥ नमो भगवते कृत्वा समाहितमना नरः॥
भवत्यरोगो मतिमान्बलरूपसमन्वितः॥ आतुरो मुच्यते रोगाद्बद्धो मुच्येत बंधनात्॥ कामान्कामी लभेत्कामं
दीर्घं चायुरवाप्नुयात्॥ ब्राह्मणः सर्ववेदी स्यात्क्षत्रियो विजयी भवेत्॥ वैश्या विपुललाभस्यात् शूद्रः सुखमवा
प्नुयात्॥ अपुत्रो लभते पुत्रं कन्या चैवेप्सितं पतिं॥ लग्नगर्भा विमुच्येत गर्भिणी जनयेत्सुतं॥ वंध्या प्रसवमाप्नो
ति पुत्रपौत्रसमृद्धिमत्॥ क्षेमेण गच्छेदध्वानमिदं यः पठते पथि॥ यो यं कामं कामयते स तमाप्नोति च ध्रुवं॥ इ
दं महर्षेर्वचनं विनिश्चितं महात्मनः पुरुषवरस्य कीर्तितं॥ समागमं चर्षिदिवौकसामिमं निशम्य भक्ताः सुसुखं
लभंते॥ ॥शांतौ मोक्षधर्मे॥ ॥जनमेजय उवाच॥ ॥अस्तौषीद्यैरिमैर्व्यासः सशिष्यो मधुसूदनं॥

नामभिर्विविधैरेषां निरुक्तं भगवन्मम ॥ वक्तुमर्हसि शुश्रूषोः प्रजापतिपते हरेः ॥ श्रुत्वा भवेयं यत्पूतः शरच्चंद्र इवामलः
॥ ॥वैशं॥ ॥शृणु राजन्यथावृत्तं फाल्गुनस्य हरेः प्रभुः ॥ प्रसन्नात्मात्मनो नाम्नां निरुक्तं गुणकर्मजं ॥ नामभिः कीर्ति
तैस्तस्य केशवस्य महात्मनः ॥ पृष्टवान्केशवं राजन् फाल्गुनः परवीरहा ॥ ॥अर्जुन उवाच ॥ ॥भगवन्भूतभव्ये
शसर्वभूतसृगव्यय ॥ लोकधाम जगन्नाथ लोकानामभयप्रद ॥ यानि नामानि ते देव कीर्त्तितानि महर्षिभिः ॥ वेदे
षु सपुराणेषु यानि गुह्यानि कर्मभिः ॥ तेषां निरुक्तं त्वत्तोहं श्रोतुमिच्छामि केशव ॥ न ह्यन्यो वर्णयेन्नाम्नां निरुक्तं त्वा
मृते प्रभो ॥ ॥भगवानुवाच ॥ ॥ऋग्वेदे सयजुर्वेदे तथैवाथर्वसामसु ॥ पुराणे सोपनिषदे तथैव ज्योतिषेर्जुन ॥ सांख्ये
च योगशास्त्रे च आयुर्वेदे तथैव च ॥ बहूनि मम नामानि कीर्त्तितानि महर्षिभिः ॥ गौणानि तत्र नामानि कर्मजानि
च कानिचित् ॥ निरुक्तं कर्मजानां त्वं शृणुष्व प्रयतोनघ ॥ कथ्यमानं मया तात त्वं हि मेर्द्धं स्मृतः पुरा ॥ नमोतियशय
से तस्मै देहिनां परमात्मने ॥ नारायणाय विश्वाय निर्गुणाय गुणात्मने ॥ यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभ
वः ॥ योसौ योनिर्हि सर्वस्य स्थावरस्य चरस्य च ॥ अष्टादशगुणं यत्तत्सत्वं सत्ववतां वर ॥ प्रकृतिः सा परा मह्यं रोद
सी योगधारिणी ॥ ऋता सत्यामराजय्या लोकानामात्मसंज्ञिता ॥ तस्मात्सर्वाः प्रवर्त्तंते सर्गप्रलयविक्रियाः ॥ ततो यज्ञ
श्च यष्टा च पुराणः पुरुषो विराट् ॥ अनिरुद्ध इति प्रोक्तो लोकानां प्रभुरव्ययः ॥ ब्राह्मे रात्रिक्षये प्राप्ते तस्य ह्यमिततेजसः ॥

प्रसादात्प्रादुरभवत्पद्मं पद्मनिभेक्षणा॥ ततो ब्रह्मा समभवत्स तस्यैव प्रसादजः॥ अह्नः क्षये ललाटाच्च सुतो देवस्य वै त
था॥ क्रोधाविष्टस्य संजज्ञे रुद्रः संहारकारकः॥ एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजावुभौ॥ तदादेशितपंथानौ सृष्टि
संहारकारकौ॥ निमित्तमात्रं तावत्र सर्वप्राणिवरप्रदौ॥ कपर्दी जटिलो मुंडः श्मशानगृहसेवकः॥ उग्रव्रतचरो
रुद्रो योगी परमदारुणः॥ दक्षक्रतुहरश्चैव भगनेत्रहरस्तथा॥ नारायणात्मको ज्ञेयः पांडवेय युगे युगे॥ तस्मि
न्हि पूज्यमाने वै देवदेवे महेश्वरे॥ संपूजितो भवेत्पार्थ देवो नारायणः प्रभुः॥ अहमात्मा हि लोकानां विश्वानां पां
न डुनंदन॥ तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहं॥ यद्यहं नार्चयेयं वै ईशानं वरदं शिवं॥ आत्मानं नार्चयेत्कश्चिदि
ति मे भावितात्मनः॥ मया प्रमाणं हि कृतं लोकः समनुवर्त्तते॥ प्रमाणानि हि पूज्यानि ततस्तं पूजयाम्यहं॥ यस्तं वेत्ति
स समां वेत्ति योनु तं हि मामनु॥ रुद्रो नारायणश्चैव सत्वमेकं द्विधा कृतं॥ लोके चरति कौंतेय व्यक्तिस्थं सर्वकर्म
सु॥ नहि मे केनचिद्देयो वरः पांडवनंदन॥ इति संचिंत्य मनसा पुराणं रुद्रमीश्वरं॥ पुत्रार्थमाराधितवानहमा
त्मानमात्मना॥ नहि विष्णुः प्रणमति कस्मैचिद्विबुधाय च॥ ऋते आत्मानमेवेति ततो रुद्रं भजाम्यहं॥ सब्रह्मकाः
सरुद्राश्च सेंद्रा देवा मह र्षिभिः॥ अर्चयंति सुरश्रेष्ठं देवं नारायणं हरिं॥ भविष्यतां वर्त्ततां च भूतानां चैव भारत॥
सर्वेषामग्रणीर्विष्णुः सेव्यः पूज्यश्च नित्यशः॥ नमस्व हव्यदं विष्णुं तथा शरणदं नम॥ वरदं नमस्व कौंतेय हव्यकव्य

भुजंनम॥ चतुर्विधा मम जना भक्ता एवं हि मे श्रुतं॥ तेषामेकांतिनः श्रेष्ठा ये चैवानन्यदेवताः॥ अहमेव गतिस्तेषां निराशीः
कर्मकारिणां॥ ये च शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः॥ सर्वे च्यवनधर्मास्ते प्रतिबुद्धस्तु श्रेष्ठभाक्॥ ब्रह्माणं शिति
कंठं च याश्चान्या देवताः स्मृताः॥ प्रबुद्धवर्याः सेवंतो मामेवैष्यंति यत्परं॥ भक्तं प्रति विशेषस्ते एष पार्थानुकीर्तितः॥ त्वं चै
वाहं च कौंतेय नरनारायणौ स्मृतौ॥ भारावतरणार्थं तु प्रविष्टौ मानुषीं तनुं॥ जानाम्यध्यात्मयोगांश्च योहं यस्मा
च्च भारत॥ निवृत्तिलक्षणो धर्मस्तथाभ्युदयिकोपि च॥ नराणामयनं ख्यातमहमेकः सनातनः॥ आपो नारा इति
प्रोक्ता आपो वै नरसूनवः॥ अयनं मम तत्पूर्वमतो नारायणो ह्यहं॥ छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः॥ स
र्वभूताधिवासश्च वासुदेवस्ततो ह्यहं॥ गतिश्च सर्वभूतानां प्रजनश्चापि भारत॥ व्याप्ता मे रोदसी पार्थ कांतिश्चा
भ्यधिका मम॥ अधिभूतानि चांते हं तदिच्छंश्चास्मि भारत॥ क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः॥ दमा
त्सिद्धिं परीप्संतो मां जनाः कामयंति हि॥ दिवं चोर्वीं च मध्यं च तस्माद्दामोदरो ह्यहं॥ पृश्निरित्युच्यते चान्नं वेदा आ
पोमृतं तथा॥ ममैतानि सदा गर्भे पृश्निगर्भस्ततो ह्यहं॥ ऋषयः प्राहुरेवं मां त्रितकूपनिपातितं॥ पृश्निग
र्भ त्रितं पाहीत्येकतद्वितपातितं॥ ततः स ब्रह्मणः पुत्र आद्यो ह्यृषिवरस्त्रितः॥ उत्ततारोदपानाद्वै पृश्निगर्भानु
कीर्तनात्॥ सूर्यस्य जपतो लोकानग्निसोमस्य चाप्युत॥ अंशवो यत्प्रकाशंते मम ते केशसंज्ञिताः॥ सर्वज्ञाः

केशवंतस्मान्मामाहुर्द्विजसत्तमाः॥स्वपत्न्यामाहितोगर्भउतथ्येनमहात्मना॥उतथ्येंतर्हितेचेवकदाचिद्दे
वमायया॥बृहस्पतिरथाविंदत्सपत्नींतस्यमहात्मनः॥ततोवैमृषिश्रेष्ठंमैथुनोपगतंतथा॥उवाचगर्भःकौंते
यपंचभूतसमन्वितः॥पूर्वागतोहंवरदनार्हस्यंबांप्रबाधितुं॥एतद्बृहस्पतिःश्रुत्वाचुक्रोधचशशापच॥
मैथुनायागतोयस्मात्वयाहंविनिवारितः॥तस्मादंधोयास्यसित्वंमच्छापान्नात्रसंशयः॥सशापादृषि
मुख्यस्यदीर्घंतमउपेयिवान्॥सहिदीर्घतमानाममनाम्नाह्यासीदृषिःपुरा॥वेदानवाप्यचतुरःसांगोपांगान्स
नातनान्॥प्रयोजयामासतदानामगुह्यमिदंमम॥आनुपूर्वेणविधिनाकेशवेतिपुनःपुनः॥सचक्षुष्मान्समभ
वद्गौतमश्चाभवत्पुनः॥एवंहिवरदंनामकेशवोतिममार्जुन॥देवानामथसर्वेषांऋषीणांचमहात्मनां॥अ
ग्निःसोमेनसंयुक्तएकयोनित्वमागतः॥अग्नीषोममयंतस्माज्जगत्कृत्स्नंचराचरं॥अपिहिपुराणेभवतिए
कयोन्यात्मकावग्नीसोमौदेवाश्चाग्निमुखाइति॥एकयोनित्वाच्चपरस्परंमहंतोलोकान्धारयतइति॥ ॥शांते
मोक्षधर्मे॥ ॥अर्जुनउवाच॥ ॥अग्नीषोमौकथंपूर्वमेकयोनीप्रवर्त्तितौ॥एषमेसंशयोजातस्तंछिंधि
मधुसूदन॥ ॥श्रीभगवानुवाच॥ ॥हंततेवर्त्तयिष्यामिपुरावृत्तंपांडुनंदन॥आत्मतेजोद्भवंपार्थश्रृणुष्वैकमना
मम॥संप्रक्षालनकालेतिक्रांतेचतुर्युगसहस्रांते॥अव्यक्तेसर्वभूतप्रलयेसभूतस्थावरजंगमे॥ज्यो

तिर्ईरणि वायुरहिते ऽंधे तमसि जलैकार्णवे लोको श्वाप इत्येवं ब्रह्मभूतसंज्ञिते द्वितीये प्रतिष्ठिते न वैराज्यं न दिव
से न सति नासति न व्यक्ते न चाव्यक्ते व्यवस्थिते ॥ एवमस्यामवस्थायां नारायणगुणाश्रयादजरामराद निंद्रिया
दग्राह्यादसंभवात्सत्यादहिंस्राल्ललामा द्विविधप्रवृत्तिविशेषादवैरादक्षय्यादमरादजरादमूर्त्तितः सर्वव्यापि
नः सर्वकर्तुः शाश्वतसमस्तस्सः पुरुषः प्रादुर्भूतो हरिरव्ययः ॥ निदर्शनमपि चात्र भवति ॥ नासीदहो न रात्रिरासी
न्न सदासीत्तम एव पुरस्ताद्भवद्विश्वरूपं ॥ सा विश्वरूपस्य रजनी हि । एवमस्यार्थोनुभाष्यस्तस्येंदानीं तम
सः संभवस्य पुरुषस्य ब्रह्मयोनेर्ब्रह्मपाः प्रादुर्भावे स पुरुषः प्रजाः सिसृक्षमाणो नेत्राभ्यामग्नीषोमौ ससर्ज ॥
ततो भूतसर्गेषु सृष्टेषु प्रजाक्रमवशाद्ब्रह्म क्षत्रमुपातिष्ठत् ॥ यः सोमस्तद्ब्रह्म यद्ब्रह्म ते ब्राह्मणाः योग्नि
स्तत्क्षत्रं क्षत्राद्ब्रह्म बलवत्तरं ॥ कस्मादिति लोकप्रत्यक्षगुणमेतद्यथा ॥ ब्राह्मणेभ्यः परं भूतं नोत्पन्नं पूर्वं दीप
मानेप्यग्नौ जुहोति यो ब्राह्मणमुखे जुहोतीति कृत्वा ब्रवीमि भूतसर्गः कृतो ब्रह्मणा भूतानि च प्रतिष्ठाप्य त्रै
लोक्यं धार्यत इति मंत्रवादोपि हि भवति ॥ त्वमग्ने यज्ञानां होता विश्वेषां हितो देवानां मानुषाणां च जगत इ
ति ॥ निदर्शनं चात्र भवति विश्वेषामग्ने यज्ञानां त्वं होतेति त्वं हितो देवैर्मनुष्यैर्जगत इति ॥ अग्निर्हि यज्ञानां होता
कर्त्ता स चाग्निर्ब्रह्म न ह्यृते मंत्राणां हवनमस्ति न विना पुरुषतपः संभवति । हविर्मंत्राणां संप्रजा विध

१

तदेवमानुषच्चषीणामनेनहं होतेति नियुक्तः॥ येच मानुषहोत्राधिकास्ते च ब्राह्मणस्य हि यज्ञेनं विधीयते नक्षत्र
वैश्ययोर्हिंसायोस्तस्माद्ब्राह्मणाग्निकृता यज्ञानुहुहंति यज्ञास्ते देवांस्तर्पयंति देवाः पृथिवीं भावयंति शत
पथेपि ब्राह्मणमुखेन भवति॥ अग्नौ समिद्धे सज्जुहोतीति विधौ द्वारब्राह्मणमुखेनाहुतिं जुहोति। एवमप्यग्निकृ
ता ब्राह्मणाविद्वांसो अग्निं भावयंति। अग्निर्विष्णुः सर्वकृतान्यनुप्रविश्य प्राणान्धारयति॥ अपि चावसनकुमा
रगीतौ श्लोकौ भवंति॥ ब्रह्म विश्वं सृजन् सर्वं सर्वादिर्निरवस्कृतं॥ ब्रह्मघोषैर्दिवं गच्छत्यमरा ब्रह्मयोनयः॥
ब्राह्मणानां मतिर्वाक्यं कर्मश्रद्धा तपांसि च॥ धारयंति महीं द्यां च शैक्योवारामृतं तथा॥ नास्ति सत्यात्परो धर्मो ना
स्ति मातृसमो गुरुः॥ ब्राह्मणेभ्यः परं नास्ति प्रेत्य चेह च भूतये॥ नैषामुक्षा वहति नोत्तवाहा न गोमथ्यति संप्रदा तरो
ने॥ अपध्वस्ता दस्युभूता असवं तियेषां राष्ट्रे ब्राह्मणा वृत्तिहीना॥ वेदपुराणेतिहासप्रामाण्यान्नारायणमुखो
द्गताः सर्वात्मानः सर्वकर्त्तारः सर्वभावाश्च ब्राह्मणाः॥ वाक्संयमकाले हि तस्य वरं रस्य देवदेवस्य ब्राह्मणाः ४८
प्रथमं प्रादुर्भूताः ब्राह्मणेभ्यश्च शेषा वर्णाः प्रादुर्भूताः॥ इत्थं च सुरासुरविशिष्टा ब्राह्मणा यत्र मया ब्रह्मभू
तेन पुरा स्वयमेवोत्पादिताः सुरासुरमहर्षयः॥ भूतविशेषाः स्थापिता निगृहीताश्च अहल्याधर्षणनिमित्तं
गौतमाद्धरिश्मश्रुतामिंद्रः प्राप्तः कौशिकनिमित्तं चेंद्रो मुष्कवियोगं मेषवृषणत्वं चावाप॥ अश्विनोर्ग्रहम

तिषघोद्यतवज्रस्य पुरंदरस्य च्यवनेन स्तंभितौ वाहू तौ क्रतुवधप्राप्तमन्युना च दक्षेण फ्लयस्तपसा चात्मा
नंसंयोज्य नेत्राकृतिरन्या ललाटे रुद्रस्योत्पादिता त्रिपुरवधार्थं दीक्षामुपगतस्य रुद्रस्य उग्रानासा जटाः
उत्कृत्य प्रत्युक्ताः ॥ ततः प्रादुर्भूता भुजगास्तैरस्य भुजगैः पीड्यमानः कंठो नीलतामुपगतः ॥ पूर्वे च मन्वंत
रे स्वायंभुवे नारायणहस्तग्रहणान्नीलकंठत्वमेव च ॥ अमृतोत्पादनप्रतश्चरपातामुपगतस्यांगिरसो
बृहस्पतेरुपस्पृशतो न प्रसादं गतवत्यः किलापः ॥ अथ बृहस्पतिरपां चुक्रोध ॥ यस्मान्ममोपस्पृशतः
कलुषीभूता न च प्रसादमुपगतास्तस्माद्द्यप्रभृति झषमकरकच्छपजंतुभिः कलुषीभवति ॥ तदाप्र
भृत्यापो यादोभिः संकीर्णाः संवृत्ताः ॥ विश्वरूपो हि त्वाष्ट्रः पुरोहितो देवानामासीत् ॥ स्वस्त्रियोऽसु
राणां स प्रत्यक्षं देवेभ्यो भागमदात् ॥ परोक्षमसुरेभ्यः ॥ अथ हिरण्यकशिपुं पुरस्कृत्य विश्वरूपमात
रं स्वसारमसुरा वचनमयाचंत ॥ हे स्वसः अयं ते पुत्रस्त्वाष्ट्रो विश्वरूपस्त्रिशिरा देवानां पुरोहितः प्रत्यक्षं
देवेभ्यो भागमदात् परोक्षमस्माकं ततो देवा वर्द्धंते वयं क्षीयामस्तदेनं त्वं वारयितुमर्हसि ॥ तथा यथा
स्मान्भजेदिति ॥ अथ विश्वरूपं नंदनवनमुपगतं माता उवाच ॥ पुत्र किं परपक्षवर्द्धनस्त्वं मातुलपक्षं २२२

नाशयसि॥ नार्हस्येवं कर्तुमिति॥ स विश्वरूपो मातुर्वाक्यमनतिक्रमणीयमिति मत्वा संपूज्य हिरण्यकशिपुमगात्॥ हेरण्यगर्भ
श्च वशिष्ठाद्धिरण्यकशिपुः शापं प्राप्तवान्॥ यस्मात्त्वयान्यो हृतो होता यस्मादसमाप्तयज्ञेस्त्वमपूर्वास्त्वज्ञाताद्वधं प्राप्स्यसी
ति तच्छापदानाद्धिरण्यकशिपुः प्राप्तवान्वधं॥ अथ विश्वरूपो मातृपक्षवर्द्धनोत्यर्थं तपस्यवर्त्तत तस्य व्रतभंगार्थमिंद्रो बह्वीः प्री
मयोप्सरसो नियुयोज॥ ता दृष्ट्वा मनः क्षुभितं तस्याभवत्तासु चासक्तः सुतुनं चिरादेव सत्कौतुकस्तु स लेभे नं ज्ञात्वा अप्सरस ऊचुः
॥ गच्छामहे वयं यथागतमिति॥ ॥ तास्त्वाष्ट्र उवाच॥ ॥ क्व गमिष्यथ स्थीयतां तावन्मया सह श्रेयो भविष्यतीति तास्तमब्रुवन्वयं
२ देवस्त्रियस्तनस्तः॥ इंद्रं देवं वृंदं प्रभासमभविष्णुरूपी मह इति॥ अथ ता विश्वरूपोब्रवीत्॥ अद्यैव सेंद्रा देवा न भविष्यंतीति॥ ततो सं
जातजपते मंत्रैरवर्द्धत त्रिशिराः॥ एकेनास्येन सर्वलोके प्रयथावद्द्विजैः क्रियावद्भिर्यज्ञे प्रहुतं सोमं पपौ॥ एकेनान्नं॥ एकेन से
द्रान्देवानथेंद्रस्तं विवर्द्धमानं सोमपानाप्यायितसर्वगात्रं दृष्ट्वा चिंतामापेदे सह देवैः॥ ते देवास्सेंद्रा ब्रह्माणमभिजग्मुः॥ तमूचुः॥
स विश्वरूपः सर्वयज्ञेषु प्रहुतः सोमः पीयते वयमभागाः संवृत्ताः अस्य च पक्षो वर्द्धते वयं क्षीयामः॥ तदहं स्मि विधातुं श्रेयो नंत
रमिति॥ ॥ तान्ब्रह्मोवाच॥ ॥ ऋषिर्भार्गवस्तपस्तप्यते दधीचः स याच्यतां वरं स यथा कलेवरं त्यजेत्तस्यास्थिभिः वज्रं क्रिय
तामिति॥ ततो देवास्तत्र गत्वा यत्र दधीचो भगवानृषिस्तपस्तेपे सेंद्रा देवास्तथाभिगम्योचुः भगवंस्तपः सुकुशलमभिन्नं चेति
॥ तान्दधीचोवाच॥ ॥ स्वागतं भवद्भ्य उच्यतां किं क्रियतामिति॥ यद्वक्ष्यथ तत्करिष्यामीति॥ ते तमब्रुवञ्शरीरत्यागं लोकहितार्थं
भगवान्कर्तुमर्हसि॥ अथ दधीचस्तथैवाविमनाः सुखदुःखसमो महायोगी आत्मानं समाधाय शरीरपरित्यागं चकार॥

तस्य परमात्मन्यपगते तेनास्थीनि धातासंगृह्य वज्रमकरोत्॥ तेन वज्रेणाभेद्येनाप्रधृष्येणाब्रह्मास्थिसंभृतेन विष्णुप्रविष्टेन इं
द्रो विश्वरूपं जघान॥ शिरसां चास्य छेदनमकरोत्॥ तस्मादनंतरं विश्वरूपगात्रमथनसंभवं त्वाष्ट्रोत्पादितमेवारिं वृत्रमिंद्रो जघान॥
तस्यां द्वैधीभूतायां ब्रह्मवध्यायां भयादिंद्रो देवराज्यं पर्यत्यजत्॥ अप्सुसंभवां च शीतलां मानससरोगतां नलिनीं प्रतिपेदे॥ तत्र
चैश्वर्ययोगादणुमात्रो भूत्वा बिसग्रंथिं प्रविवेश॥ अथ ब्रह्मवध्याभयप्रनष्टे त्रैलोक्यनाथे शचीपतौ जगदनीश्वरं बभूव॥ देवान्र
जस्तमश्चाविवेश॥ मंत्रा न प्रावर्त्तंत महर्षिणां रक्षांसि प्रादुरभवन् ब्रह्मोत्सादनं जगाम॥ अनिंद्राश्चाबलाल्लोकाः सुप्रधृष्याः ब
भूवुः॥ अथ देवा ऋषयश्चायुषपुत्रं नहुषं नाम देवराज्येऽभिषिषिचुः॥ नहुषः पंचभिः शतैः ज्योतिषां ललाटे ज्वलद्भिः सर्वभूततेजो
हरैस्त्रिविष्टपं पालयां बभूव॥ अथ लोकाः प्रकृतिमापेदे स्वस्थाश्च बभूवुः॥ अथोवाच नहुषः सर्वं मां शक्रोपभुक्तं
उपस्थितमृते शचीमिति॥ स एवमुक्त्वा शचीसमीपमगमत्॥ उवाचैनां सुभगे हमिंद्रो देवानां भजस्व मामिति॥ तं शची प्रत्यु
वाच॥ प्रकृत्या त्वं धर्मवत्सलः सोमवंशोद्भवश्च नार्हसि परपत्नीधर्षणं कर्तुमिति॥ तामथोवाच नहुषः ऐंद्रं पदमध्यास्यते मया॥
अहमिंद्रस्य राज्यरत्नहरो नात्राधर्मः कश्चित्॥ त्वमिंद्रोपभुक्तेति सा तमुवाचास्ति मम किंचिद्व्रतमपर्यवसितं॥ तस्यावभृथे त्वा
मुपगमिष्यामि॥ कैश्चिदेवाहोभिरिति॥ स शच्यैवमभिहितो जगाम॥ अथ शची दुःखशोकार्त्ता भर्तृदर्शनलालसा॥ नहुषभ
यगृहीता बृहस्पतिमुपागच्छत्॥ स च तामत्युद्विग्नां दृष्ट्वैव ध्यानं प्रविश्य भर्तृकार्यतत्परां ज्ञात्वा बृहस्पतिरुवाच॥ अनेनैव व
व्रतेन तपसा चोपान्विता देवीं वरदामुपश्रुतिमाह्वय॥ तदा सा ते इंद्रं दर्शयिष्यतीति॥ साथ महानियमस्थिता देवीं वरदामुप

श्रुतिमाह्वय॥ तदासौ ते इंद्रं दर्शयिष्यतीति॥ साथ महानियमस्थिता देवी वरदामुपश्रुतिं मंत्रैराह्वयति॥ सोपश्रुतिः शची
समीपमगादुवाच चैनामियमस्मीति त्वयाहूतोपस्थिता किं ते प्रियं करवाणीति॥ तां मूर्ध्ना प्रणम्योवाच शची भगवत्यर्हसि मे
भर्त्तारं दर्शयितुं त्वं सत्या ऋता चेति सेनां मानसं सरोनयत्॥ तत्रेंद्रं बिसग्रंथिगतामथ पत्नीं कृशां ग्लानां चेंद्रो दृष्ट्वा चिंतयां
बभूव॥ अहो मम दुःखमिदमुपगतं नष्टं हि मामियमन्विष्यत्यन्यभ्यगा समदुःखार्त्तेति॥ ॥ तामिंद्र उवाच॥ ॥ कथं वर्त्त
यसीति॥ सा तमुवाच नहुषो मामाह्वयति पत्नीं कर्त्तुं कालश्चास्य मया कृत इति॥ ॥ तामिंद्र उवाच॥ ॥ गच्छ नहुषस्त्वया वाच्यः
अपूर्वेण मामृषियुक्तेन यानेन त्वमधिरूढ उद्वहस्वेति॥ इंद्रस्य महांति वाहनानि संति मनसः प्रियाण्यधिरूढानि म
या त्वमन्येनोपयातुमर्हसीति॥ सैवमुक्ता हृष्टा जगाम॥ इंद्रोपि बिसग्रंथिमेवाविवेश भूयः॥ अथेंद्राणीमभ्यागतां दृष्ट्वा
तामुवाच नहुषः पूर्णः स कालः इति॥ तं शच्यब्रवीच्छक्रेणाययोक्तं॥ स महर्षियुक्तं वाहनमधिरूढः शचीसमीपमुपागच्छत्॥
अथ मैत्रावरुणिः कुंभयोनिरगस्त्य ऋषिवरो महर्षीन् धिक्क्रियमाणांस्तान्नहुषेणापश्यत्॥ पद्भ्यां च तमस्पृशत्॥ ततः स
नहुषमब्रवीत्॥ अकार्यप्रवृत्त पापपतस्व महासर्पो भव॥ यावद्भूमिर्गिरयश्च तिष्ठेयुस्तावदिति॥ स महर्षिवाक्यसम
कालमेव तस्माद्यानादवापतत्॥ अथानिंद्रं पुनस्त्रैलोक्यमभवत्॥ ततो देवा ऋषयश्च भगवंतं विष्णुं शरणमिंद्रार्थेभि
जग्मुः॥ ऊचुश्चैनं भगवन्निंद्रं ब्रह्महत्याभिभूतं त्रातुमर्हसीति॥ ततः स वरदस्तानब्रवीत्॥ अश्वमेधं यजतां वैष्णवं शक्रोभि
यजतां ततः स्वं स्थानं प्राप्स्यतीति॥ ततो देवा ऋषयश्चेंद्रं नापश्यन्यदा तदा शचीमूचुः॥ गच्छ सुभगे इंद्रमानयस्वेति॥ सा पुनः

स्तघ्नः समभ्यगाछदिंद्रश्च तस्मात्सपत्नः अभ्युत्थाय बृहस्पतिमभिजगाम बृहस्पतिश्चाश्वमेधं महाक्रतुं शक्रायाहरत्॥ तत्र कृत्स्न
सारंगं मेध्यं मश्वं मुत्सृज्य वाहनं तमेव कृत्वा इदं मनुप्राप्तिं बृहस्पतिः स्वं स्थानं प्रापयामास॥ ततः स देवराट् देवैरृषिभिस्स्तूय
मानस्त्रिविष्टपस्थोनिकल्मषो बभूव॥ ब्रह्मवध्याचतुर्धास्थानेषु वनिताग्निवनस्पतिगोषु व्यसृजत्॥ एवमिंद्रो ब्रह्मतेजःप्रभावो
पदृहितः शत्रुवधं कृत्वा स्वं स्थानं प्रापितः॥ आकाशगंगागतश्च पुष्पाभरद्वाजो महर्षिरुपास्पृशत्॥ त्रीन्क्रमान्क्रमता विष्णु
नाभ्यासादितः स भरद्वाजेन सलिलेन पाणिनोरभिताडितः सलक्षणोरस्कः संवृत्तः॥ भृगुणा महर्षिणा शप्तोग्निः सर्वभ
क्ष्यत्वमुपानीतः अतिर्वै देवानामन्नमपचत्॥ एतद्भुक्त्वासुरान् हनिष्यंतीति॥ तत्र बुधो व्रतचर्यासमाप्तावागच्छद् देहीतिं चाब्रवी
चत्॥ भिक्षां देहीति तत्र देवैः पूर्वमेतत्प्राश्यान्नान्यैनेत्यदितिर्भिक्षां नादात्॥ अथ भिक्षाप्रत्याख्यानकुपितेन बुधेन ब्रह्मभू
तेन अदितिः शप्ता॥ अदितेरुदरे भविष्यति विवस्वतो द्वितीयजन्मन्यंडसंज्ञितस्य मातुरस्यास्मादितः समार्त्तंडो विवस्वानभ
वच्छ्राद्धदेवः॥ दक्षस्य यावै दुहितरः षष्टिरासन्॥ ताभ्यः कश्यपाय त्रयोदश प्रादात्॥ दश धर्माय दश मनवे सप्तविंशतिमिं
दवे॥ तासु तुल्यासु नक्षत्राख्यां गतासु सोमो हिरण्यामभ्यधिकं प्रीमानभूत् ततस्ताः शिष्टाः पत्न्य ईर्ष्यावत्यः पितुः समीपं
गत्वा इयमर्थं शशंसुः॥ भगवन्नस्मासु तुल्यप्रभावासु सोमो रोहिणीमभ्यधिकं भजतीति॥ सोऽब्रवीद्यक्ष्मैनमाविक्ष्यतीति॥
दक्षशापात्सोमं राजानं यक्ष्मा विवेश॥ स यक्ष्मणाविष्टो दक्षमगमद् दक्षश्चैनमब्रवीत्॥ न समं वर्तयसीति तत्रर्षयो

सोममभुवनृक्षीयक्ष्मणा पश्चिमस्यां दिशि समुद्रे हिरण्यसरस्तीर्थं तत्र गत्वा स्नानमभिषेचयस्वेति ॥ अथागत्य सोमस्तत्र हिरण्यसरस्तीर्थं गत्वा चात्मनः सेचनमकरोत् ॥ स्नात्वा चात्मानं पाप्मनो मोक्षयामास तत्र चावभासित तत्तीर्थे यदा सोमस्तदाप्रभृति च तीर्थं तत्प्रभासमिति नाम्नाख्यातं बभूव ॥ तत्रापापादद्यापि सोमः अमावास्यां तत्रस्थः पौर्णमासीमात्रे धिष्ठितः मेघलेखाप्रतिच्छन्नेव पुर्दश्यते ॥ मेघसदृशं वर्णवर्णमागमत्तदस्य शशलक्ष्म विमलमभवत् ॥ स्थूलशिरा महर्षिर्मेरोः प्रागुत्तरे दिग्विभागे तपस्तेपे ॥ ततस्तस्य तपस्तप्यमानस्य सर्वगंधवहः रुचिर्वायुर्विवायमानः शरीरमस्पृशात् ॥ तपसा तापितशरीरः सुशीतो वायुनोपवीज्यमानो हृदये परितोषमगमत् ॥ तत्र किल तस्यानिलव्यजनकृतपरितोषस्य सद्योवनस्पतयः पुष्पशोभां निदर्शितवन्त इति ॥ स एतान् शशाप ॥ न सर्वकालं पुष्पवन्तो भविष्यथेति ॥ नारायणो लोकहितार्थं वडवामुखो नाम सपुत्रो महर्षिर्बभूव ॥ तस्य मेरौ तपस्ताप्यतः समुद्र आहूतो न्यगात तस्तेनामर्षितो नात्मगात्रोष्मरणे समुद्रस्तिमितजलः कृतः स्वेदः प्रस्पंदनेन सहस्रशश्चास्य लवणभावो जनितः उक्तश्च पयेयोस्मविष्यस्येतच्च ते तोयं वडवामुखसंज्ञितेन पीयमानं मधुरं भविष्यतीति देतदद्यापि वडवामुखसंज्ञिते नानुवर्जिना तोयं समुद्रासीयते ॥ हिमवतो गिरेर्दुहितरमुमां कन्यां रुद्रश्चकमे ॥ भृगुरपि च महर्षिर्हिमवंतमागत्याब्रवीत् ॥ कन्यामिमां मे देहीति ॥ तमब्रवीद्धिमवाननभिलक्षितो वरो रुद्र इति ॥ तमब्रवीद्भृगुर्यस्मात्त्वयाहं कन्यावरणे

मो०ध०
२२५

कृतवाभावाः प्रत्याख्यात तस्मान्नरलोनां भवान्भाजनं भविष्यतीति ॥ अथ प्रसस्त्येतदवस्थितमृषि तमृषिवचनं तदेवं विप
माहात्म्यं ब्राह्मपानां ह्यत्रमपि च शाश्वती मय्ययां च पृथिवी पत्नीमत्निगाम्यभुबुजे ॥ तदेतद्ब्रह्माग्नीषोमीयं तेन जगद्धा
र्यते ॥ उच्यते ॥ सूर्याचंद्रमसौ चक्षुः केशाश्चैवांशवः स्मृताः ॥ बोधयंस्तापयंश्चैव जगदुत्तिष्ठते पृथक् ॥ बोधनात्तापना
च्चैव जगतो हर्षणं भवेत् ॥ अग्नीषोमकृतैरेभिः कर्मभिः पांडुनंदन ॥ हृषीकेशोहमीशानो वरदो लोकभावनः ॥
इडोपहूतयोगेन हरे भागं क्रतुष्वहं ॥ वर्णश्च मे हरिः श्रेष्ठस्तस्माद्धरिरहं स्मृतः ॥ धामसारो हि भूतानामृतं चैव वि
चारितं ॥ ऋतधामा ततो विप्रैः सद्यश्चाहं प्रकीर्तितः ॥ नष्टां च धरणीं पूर्वमविंदं वै गुहां गतां ॥ गोविंद इति तेनाहं दे
वैर्वाग्भिरभिष्टुतः ॥ शिपिविष्टेति चाख्यायां हीनरोमा च यो भवेत् ॥ तेनाविष्टं तु यत्किंचिच्छिपिविष्टेति च स्मृतः ॥ या
स्को मामृषिरव्यग्रो नैकयज्ञेषु गीतवान् ॥ शिपिविष्ट इति ह्यस्माद्गुह्यनामधरो ह्यहं ॥ स्तुत्वा मां शिपिविष्ट इति
यास्कऋषिरुदारधीः ॥ मत्प्रसादादधोनष्टं निरुक्तमभिजग्मिवान् ॥ नहि जातो न जायेयं न जनिष्ये कदाचन ॥ क्षे
त्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः ॥ नोक्तपूर्वं मया क्षुद्रमश्लीलं वा कदाचन ॥ ऋता ब्रह्मसुता सा मे सत्या दे
वी सरस्वती ॥ सच्चासच्चैव कौंतेय मयावेशितमात्मनि ॥ पौष्करे ब्रह्मसदने सत्यं मामृषयो विदुः ॥ सत्वान्न च्यु
तपूर्वोहं सत्वं वै विद्धि मत्कृतं ॥ जन्मनीहाभवत्सत्वं पौर्विकं मे धनंजय ॥ निराशीःकर्मसंयुक्तः सात्वतश्चाप्यकल्म

२२५

ष्यः।। सात्वतज्ञानदृष्टोहं सत्वत्तामिति सात्वतः।। कृषामि मेदिनीं पार्थ भूत्वा कार्ष्णायसो महान्।। कृष्णो वर्णश्च मे यस्मात्तस्मा
त्कृष्णोहमर्जुन।। मया संश्लेता भूमिरद्भिर्व्योम च वायुना।। वायुश्च तेजसा सार्द्धं वैकुंठत्वं ततो मम।। निर्वाणं परमं
ब्रह्म धर्मोसौ पर उच्यते।। तस्मान्नच्युतपूर्वाहं मच्युतस्तेन कर्मणा।। पृथिवी नभसी चोभे विश्रुते विश्वतोमुखे।। तयोः संधा
रणार्थं हि मामधोक्षजमंजसा।। निरुक्तं वेदविदुषो वेदशब्दार्थचिंतकाः।। ते मां गायंति प्राग्वंशे अधोक्षज इति स्थितिः
।। शब्द एकपदैरेष व्याहृतः परमर्षिभिः।। नान्यो ह्यधोक्षजो लोके ऋते नारायणं प्रभुं।। घृतं ममार्चिषो लोके जंतूनां प्राण
धारणं।। घृतार्चिरहमव्यग्रैर्वेदज्ञैः परिकीर्तितः।। त्रयो हि धातवः ख्याताः कर्मजा इति ये स्मृताः।। पित्तं श्लेष्मा च वायुश्च
एष संघात उच्यते।। एतैश्च धार्यते जंतुरेतैः क्षीणैश्च क्षीयते।। आयुर्वेदविदस्तस्मात्त्रिधातुं मां प्रचक्षते।। वृषो हि भ
गवान्धर्मः ख्यातो लोकेषु भारत।। निघंटकपदाख्याने विद्धि मां वृषमुत्तमं।। कपिर्वाराहश्रेष्ठश्च धर्मश्च वृष उच्यते
।। तस्माद्वृषाकपिं प्राह कश्यपो मां प्रजापतिः।। न चादिं न मध्यं च तथा चैव नांतं कदाचिद्विदंते सुराश्चासुराश्च।। अना
द्यह्यमध्यस्तथा चाप्यनंतः प्रगीतोहमीशो विभुर्लोकसाक्षी।। शुचीनि श्रवणीयानि शृणोमीह धनंजय।। न च पापानि
गृह्णामि ततोहं वै शुचिश्रवाः।। एकशृंगः पुरा भूत्वा वाराहो नंदिवर्धनः।। इमां चोद्धृतवानस्मि मेकशृंगस्ततोह्यहं।।
तथैवासं त्रिककुदो वाराहं रूपमास्थितः।। त्रिककुत्तेन विख्यातः शरीरस्य समापनात्।। विरिंचिरिति यः प्रोक्तः कापिलज्ञान

मो०ध०

२२६

चिंतकैः ॥ स प्रजापतिरेवाहं चेतनात्सर्वलोककृत् ॥ विद्यासहायवंतं मामादित्यस्थं सनातनं ॥ कपिलं प्राहुराचार्याः साख्यानि
श्चितनिश्चयाः ॥ हिनगर्भो द्युतिमानूय एषछंदसि स्तुतः ॥ योगौ संपूज्यते नित्यं स एवाहं भुवि स्मृतः ॥ एकविंशतिसा
हस्रं च ऋग्वेदं मां प्रचक्षते ॥ सहस्रशाखं यत्साम ये वै वेदविदो जनाः ॥ गायंत्यारण्यके विप्राः मद्भक्तास्ते हि दुर्लभाः
॥ षट्पंचाशतमष्टौ च सप्तत्रिंशतमित्युत ॥ यस्मिं छाखा यजुर्वेदे सोहमाध्वर्यवे स्मृतः ॥ पंचकाल्पमथर्वाणं कृत्या
भिः परिबृंहितं ॥ कल्पयंति हि मां विप्राः अथर्वाणविदस्तथा ॥ शाखाभेदाश्च ये केचिद्याश्च शाखासु गीतयः ॥ स्वरव
र्णसमुच्चाराः सर्वेस्तान्विद्धि मत्कृतान् ॥ यत्तद्धयशिरः पार्थ समुदेति वरप्रदं ॥ सोहमेवोत्तरे भागे क्रमाक्षरविभाग
वित् ॥ वामादेशितमार्गेण मत्प्रसादान्महात्मना ॥ पांचालेन क्रमः प्राप्तस्तस्माद्भूतात्सनातनात् ॥ बाभ्रव्यगोत्रः
स बभौ प्रथमं क्रमपारगः ॥ कंडरीकोथ राजा च ब्रह्मदत्तः प्रतापवान् ॥ जातीमरणजं दुःखं स्मृत्वा स्मृत्वा पुनः
पुनः ॥ सप्तजातिषु मुख्यत्वाद्योगानां संपदं गतः ॥ पुराहमात्मजः पार्थ प्रथितः कारणांतरे ॥ धर्मस्य कुरुशार्दूल ततो
हं धर्मजः स्मृतः ॥ नरनारायणौ पूर्वं तपस्तेपतुरव्ययं ॥ धर्मयानं समारूढौ पर्वते गंधमादने ॥ तत्कालसमये चैव
दक्षयज्ञो बभूव ह ॥ न चैवाकल्पयद्भागं दक्षो रुद्रस्य भारत ॥ ततो दधीचिवचनाद्दक्षयज्ञमपाहरत् ॥ ससर्ज शू
लं कोपेन प्रज्वलंतं मुहुर्मुहुः ॥ तच्छूलं भस्मसात्कृत्वा दक्षयज्ञं सविस्तरं ॥ आवयोः सहसाग[illegible]द्बदर्याश्रममंतिके

२२६

त॥ वेगेन महता पार्थ पतन्नारायणोरसि॥ ततः स्वतेजसा विष्णोः केशाः नारायणस्य ह॥ बभूवुर्मुंजवर्णास्तु ततो हं मुं
जकेशवान्॥ तच्च शूलं विनिर्द्धूतं हुंकारेण महात्मना॥ जगाम शंकरकरं नारायणसमाहतं॥ अथ रुद्र उपाधावत्तावृ
षीतपसान्वितौ तत एनं समुद्धूतं कंठे जग्राह पाणिना॥ नारायणः स विश्वात्मा तेनास्य शितिकंठता॥ अथ रुद्रविघातार्थ
मिषीकां नर उद्धरन्॥ मंत्रैश्च संयुयोजाशु सोभवत्परशुर्महान्॥ क्षिप्तश्च सहसा तेन खंडनं प्राप्तवांस्तदा॥ ततो हं खंड
परशुः स्मृतः परशुखंडनात्॥ ॥अर्जुन उवाच॥ ॥अस्मिन्युद्धे तु वार्ष्णेय त्रैलोक्यमथने तदा॥ कोजयं प्राप्तवांस्तत्र
शंसैतन्मे जनार्दन॥ ॥श्रीभगवानुवाच॥ ॥तयोः संलग्नयोर्युद्धे रुद्रनारायणात्मनोः॥ उद्विग्नाः सहसा कृत्स्नाः स
र्वे लोकास्तदाभवन्॥ नागृह्णात्पावकः शुभ्रं मखेषु सुहुतं हविः॥ वेदा न प्रतिभांति स्म ऋषीणां भावितात्मनां॥ देवा
न्रजस्तमश्चैव समाविविशतुस्तदा॥ वसुधा संचकंपे च नभश्च विपफाल ह॥ निष्प्रभाणि च तेजांसि ब्रह्मा चैवा
सनच्युतः॥ अगाच्छोषं समुद्रश्च हिमवांश्च व्यशीर्यत॥ तस्मिन्नेवं समुत्पन्ने निमित्ते पांडुनंदन॥ ब्रह्मावृतो देवग
णैरृषिभिश्च महात्मभिः॥ आजगामाशु तं देशं यत्र युद्धमवर्तत॥ सोंजलिः प्रग्रहो भूत्वा चतुर्वक्त्रो निरुक्तगः॥
उवाच वचनं रुद्रं लोकानामस्तु वै शिवं॥ न्यस्यायुधानि विश्वेश जगतो हितकाम्यया॥ यदक्षरमथाव्यक्तमीशं लो
कस्य प्रभावनं॥ कूटस्थं कर्तृनिर्द्वंद्वमकर्त्तेति च यं विदुः॥ व्यक्तिभावगतस्यास्य एका मूर्तिरियं शुभा॥ नरो नारायण

श्चैव जातौ धर्मकुलोद्वहौ ॥ तपसा महता युक्तौ देवश्रेष्ठौ महाव्रतौ ॥ अहं प्रसादजस्तस्य कस्मिंश्चित्कारणांतरे ॥ त्वं चैव
क्रोधजस्तात तत्पूर्वसर्गे सनातनः ॥ मया च सार्द्धं वरदं विबुधैश्च महर्षिभिः ॥ प्रसादयाशु लोकानां शांति भवितु माचिरं ॥
ब्रह्मणास्त्वेवमुक्तस्तु रुद्रः क्रोधाग्निमुत्सृजन् ॥ प्रसादयामास ततो देवं नारायणं प्रभुं ॥ शरणं च जगामाद्युं शरण्यं व
रदं प्रभुं ॥ ततो थ वरदो देवो जितक्रोधो जितेंद्रियः ॥ प्रीतिमान भवत्तत्र रुद्रेण सह संगतः ॥ ऋषिभिर्ब्रह्मणा चैव विबुधैश्च
सुपूजितः ॥ उवाच देवमीशानमीशः स जगतो हरिः ॥ यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु स मामनु ॥ नावयोरंतरं किंचिन्मा
ते भूद्बुद्धिरन्यथा ॥ अद्य प्रभृतिः श्रीवत्सः शूलांको मे भवत्वयं ॥ मम पाण्यंकितश्चापि श्रीकंठस्त्वं भविष्यसि ॥ ॥
भगवानुवाच ॥ ॥ एवं लक्षणमुत्पाद्य परस्परकृतं तदा ॥ सख्यं चैवातुलं कृत्वा रुद्रेण सहितावृषी ॥ तपस्तेपतुर
व्यग्रौ विसृज्य त्रिदिवौकसः ॥ एष ते कथितः पार्थ नारायणजयो मृधे ॥ नामानि चैव गुह्यानि निरुक्तानि च भारत ॥
ऋषिभिः कथितानीह यानि संकीर्तितानि ते ॥ एवं बहुविधै रूपैश्चरामीह वसुंधरां ॥ ब्रह्मलोकं च कौंतेय गोलोकं च स
नातनं ॥ मया त्वं रक्षितो युद्धे महांतं प्राप्तवान्जयं ॥ यस्तु ते सोग्रतो याति युद्धे संप्रत्युपस्थिते ॥ तं विद्धि रुद्रं कौंतेय देव
देवं कपर्दिनं ॥ कालः स एव कथितः क्रोधजेति मया तव ॥ निहतांस्तेन वै पूर्वं हतवानसि यान्रिपून् ॥ अप्रमेयप्रभावं तं
देवदेवमुमापतिं ॥ नमस्व देवं प्रयतो विश्वेशं हरमक्षयं ॥ यस्य ते कथितः पूर्वं क्रोधजेति पुनः पुनः ॥ तस्मिन्प्रभावमेवा

ग्रे यच्छ्रुतं ते धनंजय॥ ॥शांतौ मोक्षधर्मे॥ ॥शौनक उवाच॥ ॥सौते सुमहदाख्यानं भवता परिकीर्त्तितं॥ यच्छ्रुत्वा मुनयः
सर्वे विस्मयं परमं गताः॥ सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनं॥ न तथा फलदं सौते नारायणकथा यथा॥ पावितांगा
स्म गा संवृत्ताः श्रुत्वेमामादितः कथां॥ नारायणाश्रयां पुण्यां सर्वपापप्रमोचनीं॥ दुर्दर्शो भगवान् देवः सर्वलोकनम
स्कृतः॥ सब्रह्मकैः सुरैः कृत्स्नैरन्यैश्चैव महर्षिभिः॥ दृष्टवान्नारदो यत्तु देवं नारायणं हरिं॥ नूनमेतद्ध्यनुगतं तस्य देव
स्य सूतजा॥ यद्दृष्टवाञ्जगन्नाथमनिरुद्धतनौ स्थितं॥ यत्प्राद्रवत्पुनर्भूयो नारदो देवसत्तमौ॥ नरनारायणौ द्रष्टुं कार
णं तद्ब्रवीहि मे॥ ॥सूत उवाच॥ ॥तस्मिन्यज्ञे वर्त्तमाने राज्ञः पारीक्षितस्य वै॥ कर्मांतरेषु विधिवद्वर्त्तमानेषु शौनक॥
कृष्णद्वैपायनं व्यासमृषिं वेदनिधिं प्रभुं॥ परिपप्रच्छ राजेंद्रः पितामहपितामहं॥ ॥जनमेजय उवाच॥ ॥श्वेतद्वी
पान्निवृत्तेन नारदेन सुरर्षिणा॥ ध्यायता भगवद्वाक्यं चेष्टितं किमतः परं॥ बदर्याश्रममागम्य समागम्य च तावृषी॥
कियंतं कालमवसत्कां कथां पृष्टवांश्च सः॥ इदं शतसहस्राद्धि भारताख्यानविस्तरात्॥ आमंथ्य मतिमंथेन ज्ञानो
दधिमनुत्तमं॥ नवनीतं यथा दध्नो मलयाच्चंदनं यथा॥ आरण्यकं च वेदेभ्यो ओषधिभ्यो मृतं यथा॥ समुद्धृतमि
दं ब्रह्मन् कथामृतमिदं तथा॥ तपोविधे त्वयोक्तं हि नारायणकथाश्रयं॥ स ईशो भगवान्देवः सर्वभूतात्मभावनः॥
अहो नारायणं तेजो दुर्दर्शं द्विजसत्तम॥ यत्राविशंति कल्पांते सर्वे ब्रह्मादयः सुराः॥ ऋषयश्च सगंधर्वाः यच्च

किंचिद्वाचरं॥ नततोस्तिपरंमन्ये पावनं दिविचेहच॥ सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनं॥ नतथा फलदं चापि
नारायणकथा यथा॥ सर्वथा पाविता स्मेह श्रुत्वैनामादितःकथां॥ हरेर्विश्वेश्वरस्येह सर्वपापप्रणाशनीं॥ नचि
त्रं कृतवांस्तत्र यदार्यो मे धनंजय॥ वासुदेवसहायोयः प्राप्तवाञ्जयमुत्तमं॥ नचास्यकिंचिदप्राप्यं मन्ये लोकेष्व
पित्रिषु॥ त्रैलोक्यनाथो विष्णुर्यस्यासीत्सह्यकृत्सखे॥ धन्याश्च सर्व एवासन्ब्रह्मंस्ते मम पूर्वजा॥ हिताय
श्रेयसे चैव एषामासीज्जनार्दनः॥ तपसाथासुदृश्यो हि भगवांल्लोकपूजितः॥ यद्दृष्टवंतस्ते साक्षाछ्रीवत्सां
कविभूषणं॥ तेभ्यो धन्यतरश्चैव नारदः परमेष्ठिजः॥ नचाल्पतेजसमृषिं वेद्मि नारदमव्ययं॥ श्वेतद्वीपं स
मासाद्य येन दृष्टः स्वयं हरिः॥ देवप्रसादानुगतं व्यक्तं तत्तस्य दर्शनं॥ यद्दृष्टवांस्तदा देवमनिरुद्धतनौ स्थितं॥
बदरीमाश्रमं यत्तु नारदः प्राद्रवत्पुनः॥ नरनारायणौ द्रष्टुं किं नु तत्कारणं मुने॥ श्वेतद्वीपान्निवृत्तेश्च नार
दः परमेष्ठिजः॥ बारीमाश्रमं संप्राप्य समागम्य च तावृषी॥ कियंतं कालमवसन्कथाःकाः पृष्टवांश्च ह॥
श्वेतद्वीपादुपावृत्ते तस्मिन्वा सुमहात्मनि॥ किमब्रूतां महात्मानौ नरनारायणावृषी॥ तदेतन्मे यथातत्वं सर्वमा
ख्यातुमर्हसि॥ ॥वैशं॥ ॥ नमो भगवते तस्मै व्यासायामिततेजसे॥ यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमां॥
प्राप्य श्वेतं महाद्वीपं दृष्टवान्हरिरव्ययं॥ निवृत्तो नारदो राजंस्तरसा मेरुमागमत्॥ हृदयेनोद्वहन्भारं यदुक्तं पर

मात्मना।।पश्चादस्याभवद्राजन्‌आत्मनःसाध्वसंमहत्।।यद्दृत्वाहरमध्यानंक्षेमीपुनरिहागतः।।मेरोःप्रचक्रा
मततःपर्वतंगंधमादनं।।निपपातचखात्तूर्णंविशालांबदरीमनु।।ततसददृशेदेवौपुराणोहृषिसत्तमौ।।तप
श्चरंतौसुमहदात्मनिष्ठौमहाव्रतौ।।तेजसाभ्यधिकौसूर्यात्सर्वलोकविरोचनात्।।श्रीवत्सलक्षणौ।पूज्यौ
जटामंडलधारिणौ।।जालपादभुजौतौतुपादयोश्चक्रलक्षणौ।।व्यूढोरस्कौदीर्घभुजौतथामुष्कचतुष्कि
णौ।।षष्टिदंतावष्टदंष्ट्रौमेघौघसदृशस्वनौ।।स्वास्यौपृथुललाटौचसुहनूसुभ्रुनासिकौ।।आंपत्रेपासदृत
शेशिरसीदेवयोस्तयोः।।एवंलक्षणसंपन्नौमहापुरुषसंज्ञितौ।।तौदृष्ट्वानारदोहृष्टस्ताभ्यांचप्रतिपूजितः
।।स्वागतेनाभिभाष्याथपृष्ट्वाचानामयंतथा।।बभूवांतर्गतमितिर्निरीक्ष्यपुरुषोत्तमौ।।सदोगतास्तत्रयेवैस
र्वभूतनमस्कृताः।।श्वेतद्वीपेमयादृष्टास्तादृशाहृषिसत्तमौ।।इतिसंचिंत्यमनसाकृत्वाचाभिप्रदक्षिणं।।
उपोपविविशेतत्रपीठेकुशमयेशुभे।।ततस्तौतपसांवासौयशसांतेजसामपि।।ऋषीशमदमोपेतौकृत्वा
पूर्वाह्निकंविधिं।।पश्चान्नारदमव्यग्रौपाद्यार्घ्याभ्यामथार्चतः।।पीठयोश्चोपविष्टौतौकृतातिथ्याह्निकौ
नृप।।तेषुतत्रोपविष्टेषुसदेशोभिव्यराजत।।आज्याहुतिमहाज्वालैःयज्ञवाटोयथाग्निभिः।।अथनारा
यणस्तत्रनारदंवाक्यमब्रवीत्।।सुखोपविष्टंविश्रांतंकृतातिथ्यंसुखस्थितं।। ।।नरनारायपाख्यचतुः।। ।।

अपीदानींसभगवान्परमात्मासनातनः॥ श्वेतद्वीपेत्वयादृष्टआवयोःप्रकृतिःपरा॥ ॥नारदउवाच॥ ॥दृष्टोमे
पुरुषश्रीमान्विश्वरूपधरोव्ययः॥ सर्वेलोकाहितत्रस्थास्तथादेवाःसहर्षिभिः॥ अद्यापिचैनंपश्यामियुवांपश्य
न्सनातनौ॥ यैर्लक्षणैरुपेतःसःहरिरव्यक्तरूपधृक्॥ तैर्लक्षणैरुपेतौहिव्यक्तरूपधरौयुवां॥ दृष्टौयुवांमयात
त्रतस्यदेवस्यपार्श्वतः॥ इहैवचागतोस्म्यद्यविसृष्टःपरमात्मना॥ कोहिनामभवेत्तस्यतेजसायशसाश्रिया॥
सदृशस्त्रिषुलोकेषुऋतेधर्मात्मजौयुवां॥ तेनमेकथितःकृत्स्नोधर्मज्ञेक्षेत्रज्ञसंज्ञितः॥ प्रादुर्भावाश्चकथिताभवि
ष्याइहयेयथा॥ तत्रयेपुरुषाःश्वेताःपंचेंद्रियविवर्जिताः॥ प्रतिबुद्धाश्चतेसर्वेभक्ताश्चपुरुषोत्तमं॥ तेर्चयंतिस
दादेवंतैसार्द्धंरमतेचसः॥ प्रियभक्तोहिभगवान्परमात्माद्विजप्रियः॥ रमतेसोर्च्यमानोहिसदाभागवत
प्रियः॥ विश्वभुक्सर्वगोदेवोमाधवोभक्तवत्सलः॥ सकर्त्ताकारणंचैवकार्यंचातिबलद्युतिः॥ हेतुश्चाज्ञावि
धानंचतत्त्वंचैवमहायशाः॥ तपसायोज्यसोत्मानंश्वेतद्वीपात्परंहियत्॥ तेजइत्यभिविख्यातंस्वयंभा
सावभासितं॥ शांतिःसात्रिषुलोकेषुविहिताभावितात्मना॥ एतयाशुभयाबुध्यानैष्ठिकंव्रतमास्थितः॥ नत
त्रसूर्यस्तपतिनसोमोभिविराजते॥ नवायुर्वातिदेवेशेतपश्चरतिदुश्चरं॥ वेदीमष्टनलोत्सेधांभूमा

वास्थाय विश्वकृत्तु ॥ एकपादस्थितो देवः ऊर्ध्वबाहुरुदङ्मुखः ॥ सांगानावर्त्तयन्वेदांस्तपस्तेपे सुदुश्चरं ॥ यद्ब्रह्मा ऋ
षयश्चैव स्वयंपशुपतिश्च यत् ॥ शेषाश्च विबुधश्रेष्ठाः दैत्यदानवराक्षसाः ॥ नागाः सुपर्णा गंधर्वाः सिद्धा राजर्षय
श्च ये ॥ हव्यं कव्यं च सततं विधियुक्तं प्रयुंजते ॥ कृत्स्नं तु तस्य देवस्य चरणावुपतिष्ठते ॥ याः क्रियाः संप्रयुक्ताश्च ए
कांतगतबुद्धिभिः ॥ ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयं ॥ न तस्यान्यः प्रियतरः प्रतिबुद्धैर्महात्मभिः ॥ विद्यते त्रि
षु लोकेषु ततोस्म्यैकांतिकं गतः ॥ इह चैवागतस्तेन विसृष्टः परमात्मना ॥ एवं मे भगवान्देवः स्वयमाख्यातवान्हरिः
॥ आसिष्ये तत्परो भूत्वा युवाभ्यां सह नित्यशः ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ नरनारायणपाव्हू चतुः ॥ ॥ ँन्योस्म्यनुगृ ध
हीतोसि यत्ते दृष्टः स्वयंप्रभुः ॥ न हि तं दृष्टवान्कश्चित्पद्मयोनिरपि स्वयं ॥ अव्यक्तयोनिर्भगवान्दुर्दर्शः पुरु
षोत्तमः ॥ नारदेतद्धि नौ सत्यं वचनं समुदाहृतं ॥ नास्य भक्तात्प्रियतरो लोके कश्चन विद्यते ॥ ततः स्वयं दर्शितवा
न्स्वमात्मानं द्विजोत्तम ॥ तपो हि तप्यतस्तस्य यत्स्थानं परमात्मनः ॥ न तत्संप्राप्नुते कश्चिदृते ह्यावां द्विजोत्तम ॥
या हि सूर्यसहस्रस्य समस्तस्य भवेद्द्युतिः ॥ स्थानस्य सा भवेत्तस्य स्वयं तेन विराजता ॥ तस्मादुत्तिष्ठते विप्र दे
भुव. वाद्विश्वपतेः ॥ क्षमा क्षमवतां श्रेष्ठ यया भूमिस्तु युज्यते ॥ तस्माच्चोत्तिष्ठते देवात्सर्वभूतहिता रसः ॥ आपो हि ये
न युज्यंते द्रवत्वं प्राप्नुवंति च ॥ तस्माद्देवसमुद्भूतं तेजो रूपं गुणात्मकं ॥ येन संयुज्यते सूर्यस्ततो लोके विराजते ॥

तस्माद्देवात्समुद्भूतः स्पर्शस्तु पुरुषोत्तमात्॥ येन स्म युज्यते वायुस्ततो लोके विनाजते॥ तस्माद्देवात्समद्भूतः स्पर्शस्तु
पुरुषात्तस्मात्॥ येन स्म युज्यते वायुस्ततो लोकान्वियत्यसो॥ तस्माच्चोत्तिष्ठते शब्दः सर्वलोके स्वचात्मभो॥ आकाशे के युज्यते ये
न ततस्तिष्ठत्य संचरतं॥ तस्माच्चोत्तिष्ठसे देवा सर्वभूतगतं मनः॥ चंद्रमा येन संयुक्तः आकाशगुपाधानणः॥ सद्भूतोत्ता
दकं नाम तस्यानंदवसंज्ञितं। विद्यासहायो यत्रास्ते भगवान्हव्यकव्यभुक्॥ ये हि निष्कलुषा लोके पुण्यपापविवर्जिताः। मु
तेषां वै क्षेममध्वानं गछतां द्विजसत्तम॥ सर्वलोकमतो हंता आदित्यो द्वारमुच्यते॥ आदित्यदग्धसर्वांगा अदृश्याः केन
चित्क्वचित्॥ परमाणुभूता भूत्वा तु तं देवं प्रविशंत्युत॥ तस्मादपि निर्मुक्ताः अनिरुद्धतनौ स्थिताः॥ मनोभूतास्ततो भू
त्वा प्रद्युम्नं प्रविशंत्युत॥ प्रद्युम्नाच्चापि निर्मुक्ता जीवं संकर्षणं ततः॥ विशंति विप्रप्रवरा सांख्या भागवतैः सह॥ ततस्त्रैगु
ण्यहीनास्ते परमात्मानमंजसा॥ प्रविशंति द्विजश्रेष्ठा क्षेत्रज्ञं निर्गुणात्मकं॥ सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्वतः॥
समाहितः मनस्काश्च नियताः संयतेंद्रियाः॥ एकांतभावोपगताः वासुदेवं विशंति ते॥ आवामपि च धर्मस्य गृहे जातौ द्वि
जोत्तम॥ रम्यां विशालमाश्रित्य तप उग्रं समास्थितौ॥ ये तु तस्यैव देवस्य प्रादुर्भावाः सुरप्रियाः॥ भविष्यंति त्रिलो
कस्यातेषां स्वस्त्यस्यथो द्विज॥ विधिना स्वेन युक्ताभ्यां यथापूर्वं द्विजोत्तम॥ आस्थिताभ्यां सर्वकृछ्रं व्रतं सम्यगनुत्तमं॥
आवाभ्यामपि दृष्टस्त्वं श्वेतद्वीपे तपोधन॥ समागतो भगवता संजल्पः कृतवांस्तथा॥ सर्वं हि नोऽसंविदितं त्रैलोक्येस स

नाचरे॥ यदुद्दिश्यतिह त्वंग्ना वर्त्तवाशुभाशुभं॥ सर्वं स ते कथितवान्न देवदेवो महामुने॥ ॥वैशंपायनः॥ ॥एतच्छ्रुत्वा तयोर्वाक्यं तपस्युग्रे च वर्तते॥ नारदः प्रांजलिर्भूत्वा नारायणपरायणः॥ जजाप विधिवन्मंत्रान्नारायणगतान्बहून्॥ दिव्यं वर्षसहस्रं हि नरनारायणाश्रमे॥ अवसत्स महातेजा नारदो भगवानृषिः॥ तमेवाभ्यर्चयन्देवं नरनारायणौ च तौ॥ ॥ ॥शांतो मोक्षधर्मे॥ ॥वैशंपायनः॥ ॥कस्यचित्त्वथ कालस्य नारदः परमेष्ठिजः॥ दैवं कृत्वा यथान्यायं पित्र्यं चक्रे ततः परं॥ ततस्तं वचनं प्राह ज्येष्ठो धर्मात्मजः प्रभुः॥ क इज्यते द्विजश्रेष्ठ दैवे पित्र्ये च कल्पिते॥ त्वया मतिमतां श्रेष्ठ तन्मे शंस यथागमं॥ किमेतत्क्रियते कर्म फलं वास्य किमिष्यते॥ ॥नारद उवाच॥ ॥त्वयैतत्कथितं पूर्वं दैवं कर्त्तव्यमित्यपि॥ दैवतं च परो यज्ञः परमात्मा सनातनः॥ ततस्तद्भावितो नित्यं यजे वैकुंठमव्ययं॥ तस्माच्च प्रसृतः पूर्वं ब्रह्मा लोकपितामहः॥ मम वै पितरं प्रीतः परमेष्ठ्यप्यजीजनत्॥ अहंकल्पजस्तस्य पुत्रः प्रथमकल्पितः॥ यज्ञामि वै पितॄन्साधो नारायणविधौ कृते॥ एवं स एवं भगवान्पिता माता पितामहः॥ इज्यते पितृयज्ञेषु तया नित्यं जगत्पतिः॥ श्रुतिश्चाप्यपरा देवी पुत्रान्हि पितरो यजन्॥ वेदश्रुतिः प्रनष्टा च पुनरध्यापितास्सुतैः॥ ततस्ते मंत्रदाः पुत्राः पितृत्वमुपपेदिरे॥ नूनं पुरैतद्विदितं युवयोर्भावितात्मनोः॥ पुत्राश्च पितरश्चैव परस्परमपूजयन्॥ त्रीन्पिंडान्न्यस्य वै पृथ्व्यां पूर्वं दत्वा कुशानिति॥ कथं तु पिंडसंज्ञां ते पितरो लेभिरे पुरा॥ ॥नरनारायणावूचतुः॥ ॥इमां हि धरणीं पूर्वं नष्टां सागरमेखलां॥ गोविंद उज्जहाराशु वाराहं रूपमास्थितः॥ स्थापयित्वा तु धरणीं स्वे स्थाने पुरुषोत्तमः॥ जलकर्दमलिप्तांगो लोककार्यार्थमुद्य

तः॥प्राप्ते चाह्निककाले तु मध्यदेशगते रवौ॥दंष्ट्रा विलग्नांस्त्रीन्पिंडान्विधूय सहसा प्रभुः॥स्थापयामास वै पृथ्व्यां कुशा
नास्तीर्य नारद॥स तेष्वात्मानमुद्दिश्य पित्र्यं चक्रे यथाविधि॥संकल्पयित्वा त्रीन्पिंडान्स्वेनैव विधिना प्रभुः॥आत्मगात्रो
ष्मसंभूतैः स्नेहगर्भैस्तिलैरपि॥प्रोक्ष्यापवर्गं देवेशः प्राङ्मुखः कृतवान्स्वयं॥मर्यादास्थापनार्थं च ततो वचनमुक्तवा
न्॥ ॥वृषकपिरुवाच॥ ॥अहं हि पितरः स्रष्टुमुद्यतो लोककृत्स्वयं॥तस्य चिंतयतः सद्यः पितृकार्यविधीन्परान्॥
दंष्ट्राभ्यां प्रविनिर्धूता ममैते दक्षिणां दिशां॥आश्रिता धरणीं पिंडास्तस्मात्पितर एव ते॥त्रयो मूर्त्तिविहीना वै पिंडमू
र्त्तिधरास्त्विमे॥भवंतु पितरो लोके मया सृष्टाः सनातनाः॥पिता पितामहश्चैव तथैव प्रपितामहः॥अहमेवात्र विज्ञे
यस्त्रिषु पिंडेषु संस्थितः॥नास्ति मत्तोधिकः कश्चित्को वान्योर्च्यो मया स्वयं॥को वा मम पिता लोके अहमेव पिताम
हः॥पितापितामहश्चैव अहमेवात्र कारणं॥इत्येतदुक्त्वा वचनं देवदेवो वृषाकपिः॥वाराहपर्वते विप्र दत्वा पिंडा
न्सविस्तरान्॥आत्मानं पूजयित्वैव तत्रैवादर्शनं गतः॥एषा तस्य स्थितिर्विप्र पितरः पिंडसंज्ञिताः॥लभंते सततं पूजां
वृषाकपिवचो यथा॥ये यजंति पितॄन्देवान्गुरूंश्चैवातिथींस्तथा॥गाश्चैव द्विजमुख्यांश्च पृथिवीं मातरं तथा॥
कर्मणा मनसा वाचा विष्णुमेव यजंति ते॥अंतर्गतः स भगवान्सर्वसत्वशरीरगः॥समः सर्वेषु भूतेषु ईश्वरः सुखदुः
खयोः॥महान्महात्मा सर्वात्मा नारायण इति श्रुतिः॥ ॥शांतौ मोक्षधर्मे॥ ॥वैशंपायनः॥ ॥श्रुत्वैतन्नारदो वाक्यं न
रनारायणेरितं॥अत्यंतभक्तिमान्देवे एकांतित्वमुपेयिवान्॥प्रोष्य वर्षसहस्रं तु नरनारायणाश्रमे॥श्रुत्वा भगवदा

ख्यानं दृष्ट्वा च हरिरव्ययं ॥ हिमवंतं जगामाशु यत्रास्य स्वक आश्रमः ॥ तावविख्याततपसौ नरनारायपावृषी ॥ तस्मिन्नेवा
श्रमे रम्ये तेपतुस्तप उत्तमं ॥ तमप्यमितविक्रांतः पांडवानां कुलोद्वहः ॥ पावितात्मा घसंवृत्तः श्रुत्वेमामादितः कथां ॥ नैव त
स्यापरो लोको नायं पार्थिवसत्तम ॥ कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययं ॥ मज्जंति पितरस्तस्य नरके शाश्वतीः समाः
॥ यो द्विष्याद्विबुधश्रेष्ठं देवं नारायणं हरिं ॥ कथं नाम भवेद्द्वेष्य आत्मा लोकस्य कस्यचित् ॥ आत्मा हि पुरुषव्याघ्र ज्ञे
यो विष्णुरिति स्थितिः ॥ य एष गुरुरस्माकं ऋषिर्गंधवतीसुतः ॥ तेनैतत्कथितं तात माहात्म्यं परमव्ययं ॥ तस्माच्छ्रुतं मया
चेदं कथितं च तवानघ ॥ नारदेन तु संप्राप्तः सरहस्यः ससंग्रहः ॥ एष धर्मो जगन्नाथः साक्षान्नारायणान्नृपः ॥ एवमेष
महान्धर्मः स ते पूर्वं नृपोत्तम ॥ कथितो हरिगीतासु समासविधिकल्पितः ॥ कृष्णद्वैपायनं व्यासं विद्धि नारायणं भुवि
॥ को ह्यन्यः पुरुषव्याघ्र महाभारतसत्तम ॥ धर्मान्नानाविधांश्चैव को ब्रूयात्तमृते प्रभुं ॥ वर्ततां ते महायज्ञो यथासंकल्पि
तस्त्वया ॥ संकल्पिताश्वमेधस्त्वं श्रुतधर्मश्च तत्वतः ॥ ॥ सौतिरुवाच ॥ ॥ एतत्तु महदाख्यानं श्रुत्वा पार्थिवसत्तम ॥ ततो
यज्ञसमाप्त्यर्थं क्रियाः सर्वाः समारभत् ॥ नारायणीयमाख्यानमेतत्ते कथितं मया ॥ पृष्टेन शौनकाद्येन नैमिषारण्य
वासिषु ॥ नारदेन पुरा राजन्गुरवे तु निवेदितं ॥ ऋषीणां पांडवानां च शृण्वतोः कृष्णभीष्मयोः ॥ स हि परमर्षिर्भुवनपतिः
पृथुधरणिधरः श्रुतिविनयनिधिः शमनियमनिधिर्यमनियमपरो द्विजवरसहितः स्तव च भवतु गतिर्हरिरमरहि
तः ॥ असुरवधकरस्तपसां निधिः सुमहतां यशसां च भाजनं मधुकैटभहा ॥ कृतधर्मविदां गतिदोभयदोमखभागह

रोस्तृशरश्शरणंसते ।। विदुषोविदुषश्चातुरात्मधनःपूर्तेष्टियोश्चफलभागहरः ।। विद्धातुनित्यमजितोनिवल्गोगतिमात्म
गांसुकृतिनामृषीणां ।। तंलोकसाक्षिणमजंपुरुषंपुराणंरविवर्णमीश्वरंगतिं ।। बहुशःप्रणमध्वमेकमनसोयतःसलिलो
द्भवोपितमहर्षिप्रपातः ।। सहिलोकयोनिरमृतस्यपदंसूक्ष्मंपरायणपामचलंहिपदं ।। तत्सांख्ययोगिभिरुदारहृतंबुध्याय
तात्मभिरिदंसनातनं ।। ।।शांतौमोक्षधर्मे ।। ।।शौनकउवाच ।। ।।श्रुतंभगवतस्तस्यमाहात्म्यंपरमात्मनः ।। जन्मधर्मगृ
हेचैवनरनारायणात्मकं ।। महावराहसृष्टाचपिंडोत्पत्तिःपुरातनी ।। प्रवृत्तौचनिवृत्तौचयोयथापरिकल्पितः ।। तथासनःश्रुतो
ब्रह्मन्कथ्यमानस्त्वयानघ ।। यच्चतत्कथितंपूर्वंत्वयाहयशिरोमहत् ।। हव्यकव्यभुजोविष्णोरुदक्पूर्वेमहोदधौ ।। तच्चदृष्टं
भगवताब्रह्मणापरमेष्ठिना ।। किंतदुत्पादितंपूर्वंहरिणालोकधारिणा ।। रूपंप्रभावंमहतामपूर्वंधीमतांवर ।। दृष्ट्वाहिविबुध
श्रेष्ठमपूर्वममितौजसं ।। तदश्वशिरसंपुण्यंब्रह्माकिमकरोन्मुने ।। एतन्नःसंशयंब्रह्मन्पुराणंज्ञानसंभवं ।। कथयस्वो
त्तममते महापुरुषनिर्मितं ।। पाविताःस्मत्वयाब्रह्मन्पुण्यांकथयताकथां ।। ।।सूतउवाच ।। कथयिष्यामितेपूर्वंपुराणंवेदसं
मितं ।। जगौयद्भगवान्व्यासोराज्ञःपारिक्षितस्यवै ।। श्रुत्वाचशिरसोमूर्तिंदेवस्यहरिमेधसः ।। उत्पन्नसंशयोराजाएतदेवमचो
दयत् ।। ।।जनमेजयः ।। ।। यत्तद्दर्शितवान्ब्रह्मादेवंहयशिरोधरं ।। किमर्थंतत्समभवत्तन्ममाचक्ष्वसत्तम ।। ।।वैशंपायनः ।।
यत्किंचिदिहलोकेवैदेहसत्वंविशांपते ।। सर्वंपंचभिराविष्टंभूतैरीश्वरबुद्धिभिः ।। ईश्वरोहिजगत्स्रष्टाप्रभुर्नारायणोवि
राट् ।। भूतांतरात्मावरदःसगुणोनिर्गुणोपिच ।। भूतप्रलयमव्यक्तंशृणुष्वनृपसत्तम ।। धरण्यामथलीनायामप्सुचैकार्णवेपु

मा॥ज्योतिस्तु ते जले चापि लीने ज्योतिषि चानिले॥वायौ चाकाशसंलीने आकाशे च मनोनुगे व्यक्ते मनसि संलीने व्यक्ते चाव्य
क्ततां गते॥अव्यक्ते पुरुषं याते पुंसि सर्वगते पि च॥तम एवाभवत्सर्वं न प्रज्ञायत किंचन॥तमसो ब्रह्म संभूतं तमोमूलामृता
त्मकं॥तद्विश्वभावसंज्ञातं पौरुषी तनुमाश्रितं॥सोनिरुद्ध इति प्रोक्तस्तत्प्रधानं प्रचक्षते॥तदव्यक्तमिति ज्ञेयं त्रिगुणं नृपस
त्तम॥विद्यासहायवान्देवो विष्वक्सेनो हरिः प्रभुः॥अप्स्वेव शयनं चक्रे निद्रायोगमुपागतः॥जगतश्चिंतयन्सृष्टिं चित्रां बहु
गुणोद्भवां॥तस्य चिंतयतः सृष्टिं महानात्मगुणः स्मृतः॥अहंकारस्ततो जातो ब्रह्मा स तु चतुर्मुखः॥हिरण्यगर्भो भगवान्सर्व
लोकपितामहः॥पद्मेनिरुद्धात्संभूतस्तदा पद्मनिभेक्षणः॥सहस्रपत्रे द्युतिमानुपविष्टः सनातनः॥ददृशेद्भुतसंकाशो
लोकानापोमयान्प्रभुः॥सत्वस्य परमेष्ठी स ततो भूतगणान्सृजन्॥पूर्वमेव च पद्मस्य पत्रे सूर्यांशुसप्रभे॥ नाराय ण
कृतौ बिंदू अपामास्तां गुणोत्तरौ॥तावपश्यत्स भगवाननादिनिधनोच्युतः॥एकस्तत्राभवद्बिंदुर्मध्वाभो रुचिरप्रभः॥स ता
मसो मधुर्जातस्तदा नारायणाज्ञया॥कठिनस्त्वपरो बिंदु कैटभो राजसस्तु सः॥तावभ्यधावतां श्रेष्ठौ तमोरजगुणान्वितौ
॥बलवंतौ गदाहस्तौ पद्मनालानुसारिणौ॥ददृशातेरविंदस्थं ब्रह्माणममितप्रभं॥सृजंतं प्रथमं वेदांश्चतुरश्चारुविग्रहा
न्॥ततो विग्रहवंतौ तौ वेदान्दृष्ट्वासुरोत्तमौ॥सहसा जगृहतुर्वेदान्ब्रह्मणः पश्यतस्तदा॥अथ तौ दानवश्रेष्ठौ वेदानुग्रह्य
सनातनान्॥रसां विविशतुस्तूर्णमुदक्पूर्वे महोदधौ॥ततो हृतेषु वेदेषु ब्रह्मा कश्मलमाविशत्॥ततो वचनमीशानं
प्राह वेदैर्विनाकृतः॥ ॥ब्रह्मोवाच॥ ॥वेदा मे परमं चक्षुर्वेदा मे परमं बलं॥वेदा मे परमं धाम वेदा मे ब्रह्म चोत्तमं॥

मम वेदा हृताः सर्वे दानवाभ्यां बलादितः ॥ अंधकारा हि मे लोका जाता वेदैर्विनाकृताः ॥ वेदाश्च ते हि किं कुर्युर्लोकानां सृष्टिमुत्तमां ॥ अहो बत महद्दुःखं वेदनाशनमैडं मम ॥ प्राप्तं दुनोति हृदयं तीव्रं शोकपरायणं ॥ को हि शोकार्णवे मग्नं मामितोद्य समुद्धरेत् ॥ वेदांस्तांश्चानयेन्नष्टान्कस्य वाहं प्रियो भवे ॥ इत्येवं भाषमाणस्य ब्रह्मणो नृपसत्तम ॥ हरेस्तोत्रार्थमुद्भूता बुद्धिर्बुद्धिमतां वर ॥ ततो जगौ वचं जप्यं प्रांजलिः प्रग्रहः प्रभुः ॥ ॥ब्रह्मोवाच॥ ॥ॐ नमस्ते ब्रह्मनुहृदय नमस्ते मम पूर्वज ॥ लोकाद्य भुवनश्रेष्ठ सांख्ययोगनिधे प्रभो ॥ व्यक्ताव्यक्तकराचिंत्य क्षेमं पंथानमास्थित ॥ विश्वभुक्सर्वभूतानामंतरात्मन्नयोनिज ॥ अहं प्रसादजस्तुभ्यं लोकधाम स्वयंभुवः ॥ चाक्षुषं वै द्वितीयं मे जन्म चासीत्पुरातनं ॥ त्वत्प्रसादात्तु मे जन्म तृतीयं वाचिकं महत् ॥ त्वत्तः श्रवणजं चापि चतुर्थं जन्म मे विभो ॥ नासत्यं चापि मे जन्म त्वत्तः पंचममुच्यते ॥ अंडजं चापि मे जन्म त्वत्तः षष्ठं विनिर्मितं ॥ इदं च सप्तमं जन्म पद्मजन्मेति वै प्रभो ॥ सर्गे सर्गे ह्यहं पुत्रस्तव त्रिगुणवर्जितं ॥ प्रथमः पुंडरीकाक्ष प्रधानगुणकल्पितः ॥ त्वमीश्वरस्वभावश्च कर्मबंधस्त्वयंभुवः ॥ त्वया विनिर्मितोहं वै वेदचक्षुर्वयोतिगः ॥ ते मे वेदा हृताश्चक्षुरंधो जातोस्मि जागृहि ॥ ददस्व चक्षुंषि मम प्रियोहं ते प्रियोसि मे ॥ एवं स्तुतः स भगवान्पुरुषः सर्वतोमुखः ॥ जहौ निद्रामथ तदा वेदकार्यार्थमुद्यतः ॥ ऐश्वर्येण प्रयोगेण द्वितीयां तनुमास्थितः ॥ सुनासिकेन कायेन भूत्वा चंद्रप्रभस्तदा ॥ कृत्वा हयशिरः शुभ्रं वेदानामालयं प्रभुः ॥ तस्य मूर्द्धा समभवद्द्यौः सनक्षत्रता

नका ॥ केशाश्चास्याभवन्दीर्घा रवेरंशुसमप्रभाः ॥ कर्णावाकाशयातालेल्ललाटं भूतधारिणि ॥ गंगासरस्वती श्रोण्यौ भ्रुवावास्तां
महोदधी ॥ चक्षुषी सोमसूर्यौ ते नासा संध्या पुनः स्मृता ॥ अकारस्त्वथ संस्कारो विद्युज्जिह्वा च निर्मिता ॥ दंताश्च पितरो राज
न्सोमपा इति विश्रुताः ॥ गोलोको ब्रह्मलोकश्च ओष्ठावास्तां महात्मनः ॥ ग्रीवा चास्याभवद्राजन्कालरात्रिर्गुणोत्तरा ॥ एत
द्धयशिरः कृत्वा नानामूर्तिभिरावृतं ॥ अंतर्दधौ स विश्वेशो विवेश च रसां प्रभुः ॥ रसां पुनः प्रविष्टश्च योगं परममास्थितः ॥ शै
क्षं स्वरं समास्थाय ॐमिति प्रासृजत्स्वरं ॥ स स्वरः सानुनादी च सर्वगः स्निग्ध एव च ॥ बभूवांतर्महीभूतः सर्वभूतगुणा
हितः ॥ ततस्तावसुरौ कृत्वा वेदान्समयबंधनात् ॥ रसातले विनिक्षिप्य यतः शब्दस्ततो द्रुतौ ॥ एतस्मिन्नंतरे राजन्देवो
हयशिरोधरः ॥ जग्राह वेदानखिलान्रसातलगतान्हरिः ॥ प्रादाच्च ब्रह्मणे भूयस्ततः स्वां प्रकृतिं गतः ॥ स्थापयित्वा हय
शिर उदक्पूर्वे महोदधौ ॥ वेदानामालयं चापि बभूवाश्वशिरास्ततः ॥ अथ किंचिदपश्यंतौ दानवौ मधुकैटभौ ॥ पुनरा
जग्मतुस्तत्र वेगितौ यश्यतां च तौ ॥ यत्र वेदा विनिक्षिप्तास्तत्स्थानं शून्यमेव च ॥ तत उत्तममास्थाय वेगं बलवतां वरौ ॥ पुनरु
त्तस्थतुः शीघ्रं रसानामालयात्तदा ॥ ददृशाते च पुरुषं तमेवादिकरं प्रभुं ॥ श्वेतं चंद्रं विशुद्धाभमनिरुद्धतनौ स्थितं ॥ भू
योप्यमितविक्रांतं निद्रायोगमुपागतं ॥ आत्मप्रमाणरचिते अपामुपरिकल्पिते ॥ शयने नागभोगाढ्ये ज्वालामालो
समावृते ॥ निष्कल्मषेण सत्वेन संपन्नं रुचिरप्रभं ॥ तं दृष्ट्वा दानवेंद्रौ तौ महाहासममुंचतां ॥ ऊचतुश्च समाविष्टौ

रजसा तमसा चतौ ॥ अँसं पुरुषश्वेतिः शेते निद्रामुपागतः ॥ अनेन नूनं वेदानां कृतमाहरणं रसात् ॥ कस्यैष को नु खल्वेष किं
च स्वपिति भोगवान् ॥ इत्युच्चारितवाक्यौ तौ बोधयामासतुर्हरिं ॥ युद्धार्थिनौ हि विज्ञाय विबुद्धः पुरुषोत्तमः ॥ ततः परिवृतो द्रष्ट्वा
निरीक्ष्य चासुरेन्द्रौ तौ ततो युद्धे मनो दधे ॥ अथ युद्धं समभवत्तयोर्नारायणस्य वै ॥ रजस्तमोविष्टतनू तावुभौ मधु
कैटभौ ॥ ब्रह्मणोपचितिं कुर्वन् जघान मधुसूदनः ॥ ततस्तयोर्वधेनाशु वेदापहरणेन च ॥ शोकापनयनं चक्रे ब्र
ह्मणः पुरुषोत्तमः ॥ ततः परिवृतो ब्रह्मा हरिणा वेदसत्कृतः ॥ निर्ममे स तदा लोकान्कृत्स्नान्स्थावरजंगमान् ॥ द
त्वा पितामहायाग्र्यां मतिं लोकविसर्गिकीं ॥ तत्रैवान्तर्दधे देवो यत एवागतो हरिः ॥ तौ दानवौ हरिर्हत्वा कृत्वा हयशि
रस्तनुं ॥ पुनः प्रवृत्तिधर्मार्थं तामेव विदधे तनुं ॥ एवमेव महाभागो बभूवाश्वशिरा हरिः ॥ पौराणमेतत्प्रख्यातं रूपं वर
दमैश्वरं ॥ यो ह्येतद्ब्राह्मणो नित्यं शृणुयाद्धारयीत वा ॥ न तस्याध्ययनं नाशमुपगच्छेत्कदाचन ॥ आराध्य तपसोग्रेण
देवं हयशिरोधरं ॥ पांचालेन क्रमः प्राप्तो देवेन पथि देशिते ॥ एतद्धयशिरो राजन्नाख्यानं तव कीर्तितं ॥ पुराणं वेदस
मितं यन्मां त्वं परिपृच्छसि ॥ यां यामिच्छेत्तनुं देवः कर्तुं कार्यविधौ क्वचित् ॥ तां तां कुर्याद्विकुर्वाणः स्वयमात्मानमात्मना ॥
एष वेदनिधिः श्रीमानेष वै तपसो निधिः ॥ एष योगश्च सांख्यं च ब्रह्म चाग्र्यं हविर्भुजः ॥ नारायणपरा वेदा यज्ञा नाराय
णात्मकाः ॥ तपो नारायणपरं नारायणपरा गतिः ॥ नारायणपरं सत्यमृतं नारायणात्मकं ॥ ॥ गे धोमम पौत्रे एतमस्स्वतः २३५

अपां चापि गुणा राजन् रसा नारायणात्मकाः ।। ज्योतिषां च परं रूपं स्मृतं नारायणात्मकं ।। नारायणात्मकश्चापि स्पर्शो वायुगुणः स्मृतः ।। नारायणात्मकश्चैव शब्द आकाशसंभवः ।। मनश्चापि ततो भूतमव्यक्तगुणलक्षणं ।। नारायणपरः कालो ज्योतिषामयनं च यत् ।। नारायणपरा कीर्तिः श्रीश्च लक्ष्मीश्च देवताः ।। नारायणपरं सांख्यं योगो नारायणात्मकः ।। कारणं पुरुषो ह्येषां प्रधानं चापि कारणं ।। स्वभावश्चैव कर्माणि दैवं येषां च कारणं ।। अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं ।। विविधा च तथा चेष्टा दैवं चैवात्र पंचमं ।। पंचकारणसंख्यातो निष्ठा सर्वत्र वै हरिः ।। तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः ।। तत्त्वमेको महायोगी हरिर्नारायणः प्रभुः ।। ब्रह्मादीनां सलोकानामृषीणां च महात्मनां ।। सांख्यानां योगिनां चापि यतीनामात्मवेदिनां ।। मनीषितं विजानाति केशवो न तु तस्य ते ।। ये के चित्सर्वलोकेषु दैवं पित्र्यं च कुर्वते ।। दानानि च प्रयच्छंति तप्यंते च तपो महत् ।। सर्वेषामाश्रयो विष्णुरैश्वरं विधिमास्थितः ।। सर्वभूतकृतावासो वासुदेवेति चोच्यते ।। अयं हि नित्यः परमो महर्षिर्महाविभूतिर्गुणवर्जिताख्यः ।। गुणैश्च संयोगमुपैति शीघ्रं कालो यथार्त्तावृतुसंप्रयुक्तः ।। नैवास्य विंदंति गतिं महात्मनो न चागतिं कश्चिदिहानुपश्यति ।। ज्ञानात्मकाः संप्रति हि ये महर्षयः पश्यंति नित्यं पुरुषं गुणाधिकं ।। ।। इति मोक्षधर्मे ।। ।।

जनमेजय उवाच ॥ ॥ अहो ह्येकांतिनः सर्वान् प्रीणाति भगवान् हरिः ॥ विधिप्रयुक्तां पूजां च गृह्णा भगवान् स्वयं ॥ ये तु द
ग्धेंधनाल्लोके पुण्यपापविवर्जिताः ॥ तेषां त्वयाभिनिर्दिष्टा पारंपर्यागता गतिः ॥ चतुर्थ्यां चैव ते गत्यां गच्छंति पुरुषोत्तमं ॥ ए
कांतिनस्तु पुरुषा गच्छंति परमं पदं ॥ नूनमेकांतधर्मोयं श्रेष्ठो नारायणप्रियः ॥ अगत्वा गतयस्तिस्रो निर्यच्छंत्यव्य
यं हरिं ॥ सहोपनिषदान्वेदान्ये विप्राः सम्यगास्थिताः ॥ पठंति विधिमास्थाय ये चापि यतिधर्मिणः ॥ तेभ्यो विशिष्टां जा
नामि गतिमेकांतिनां नृणां ॥ केनैष धर्मः कथितो देवेन ऋषिणापि वा ॥ एकांतिनां च का चर्या कदा चोत्पादिता विभो ॥ ए
तन्मे संशयं छिंधि परं कौतूहलं हि मे ॥ ॥ वैशं० ॥ ॥ समुपोढेष्वनीकेषु कुरुपांडवयोर्मृधे ॥ अर्जुने विमनस्के च गी
ता भगवता स्वयं ॥ आगतिश्च गतिश्चैव पूर्वं ते कथिता मया ॥ गहनो ह्येष धर्मो वै दुर्विज्ञेयो कृतात्मभिः ॥ संमितः सा
मवेदेन पुरैवादियुगे कृतः ॥ धार्यते स्वयमीशेन राजन्नारायणेन च ॥ एदर्थं महाराज पृष्टः पार्थेन नारद ॥ ऋषि
मध्ये महाभागः शृण्वतो कृष्णभीष्मयोः ॥ गुरुणा च ममाप्येष कथितो नृपसत्तम ॥ यथा तत्कथितं तत्र नारदेन त
था शृणु ॥ यदासीन्मानसं जन्म नारायणमुखोद्गतं ॥ ब्रह्मणः पृथिवीपाल तदा नारायणः स्वयं ॥ तेन धर्मेण
कृतवान्दैवं पित्र्यं च भारत ॥ फेनपा ऋषयश्चैव तं धर्मं प्रतिपेदिरे ॥ वैखानसाः फेनपेभ्यो धर्ममेतं प्रपेदिरे ॥
वैखानसेभ्यः सोमस्तु ततः सोंर्दधे पुनः ॥ यदासीच्चाक्षुषं जन्म द्वितीये ब्रह्मणो नृप ॥ तदा पितामहे नैव सोमा

कूर्मः परिष्टुतः॥ नारायणात्मको राजन्रुद्राय प्रददौ च तं॥ ततो योगस्थितो रुद्रः पुरा कृतयुगे नृप॥ वालखिल्यानृ
षीन्सर्वान्धर्ममेतदपाठयत्॥ अंतर्दधे ततो भूयस्तस्य देवस्य मायया॥ तृतीयं ब्रह्मणो जन्म यदासीद्वाचिकं मह
त्॥ तत्रैष धर्मः संभूतः स्वयं नारायणान्नृप॥ सुपर्णो नाम तमृषिः प्राप्तवान्पुरुषोत्तमात्॥ तपसा वै सुतप्तेन दमेन नि
यमेन च॥ त्रिः परिक्रांतवानेतत्सुपर्णो धर्ममुत्तमं॥ यस्मात्तस्माद्व्रतं ह्येतत्त्रिसौपर्णमिहोच्यते॥ ऋग्वेदपाठपठि
तं व्रतमेतद्धि दुश्चरं॥ सुपर्णाच्चाप्यधिगतो धर्म एष सनातनः॥ वायुना द्विपदां श्रेष्ठ प्रथितो जगदायुषा॥ वायोःस
काशात्प्राप्तश्च ऋषिभिर्विघसाशिभिः॥ ततो महोदधिश्चैव प्राप्तवान्धर्ममुत्तमं॥ अंतर्दधे ततो भूयो नारायणस
माहितः॥ यदा भूयः श्रवणजा सृष्टिरासीन्महात्मनः॥ ब्रह्मणः पुरुषव्याघ्र तत्र कीर्तयतः शृणु॥ जगत्स्रष्टुमना देवो
हरिर्नारायणः स्वयं॥ चिंतयामास पुरुषं जगत्सर्गकरं प्रभुः॥ अथ चिंतयतस्तस्य कर्णाभ्यां पुरुषः सृतः॥ प्रजासर्ग
करो ब्रह्मा तमुवाच जगत्पतिः॥ सृज प्रजाः पुत्र सर्वा मुखतः पादतस्तथा॥ श्रेयस्तव विधास्यामि बलं तेजश्च सुव्र
त॥ धर्मं च मत्तो गृह्णीष्व सात्वतं नाम नामतः॥ तेन सृष्टं कृतयुगं स्थापयस्व यथाविधि॥ ततो ब्रह्मा नमश्चक्रे देवा
य हरिमेधसे॥ धर्मं चाग्र्यं स जग्राह सरहस्यं ससंग्रहं॥ आरण्यकेन सहितं नारायणमुखोद्गतं॥ उपदिश्य
ततो धर्मं ब्रह्मणेऽमिततेजसे॥ तं कार्त्तयुगधर्माणं निराशीःकर्मसंज्ञितं॥ जगाम तमसः पारं यत्राव्यक्तं व्यवस्थि
तं॥ ततोऽथ वरदो देवो ब्रह्मा लोकपितामहः॥ असृजत्स ततो लोकान्कृत्स्नान्स्थावरजंगमान्॥ ततः प्रावर्तत तदा

आदौ कृतयुगं शुभं॥ ततो हि सात्वतो धर्मो व्याप्य लोकानवस्थितः॥ तेनैवाद्येन धर्मेण ब्रह्मा लोकविसर्गकृत॥ पूज
यामास देवेशं हरिं नारायणं प्रभुं॥ धर्मप्रतिष्ठाहेतोश्च मनुं स्वारोचिषं ततः॥ अध्यापयामास तदा लोकानां हितका
म्यया॥ ततः स्वारोचिषः पुत्रं स्वयं शंखपदं नृप॥ अध्यापयत्पुराव्यग्रः सर्वलोकपतिर्विभुः॥ ततः शंखपदश्चापि
पुत्रमात्मजमौरसं॥ दिशापालं सुवर्णाभमध्यापयत भारत॥ सोंतर्दधे ततो भूयः प्राप्ते त्रेतायुगे पुनः॥ नासिक्ये ज
न्मनि पुरा ब्रह्मणः पार्थिवोत्तम॥ धर्ममेतं स्वयं देवो हरिर्नारायणः प्रभुः॥ तज्जगादाविंदाक्षो ब्रह्मणः पश्यतस्त
दा॥ सनत्कुमारो भगवांस्ततः प्राधीतवान्नृप॥ सनत्कुमारादपि च वीरणो वै प्रजापति॥ कृतादौ कुरुशार्दूल धर्ममेतदधी
तवान्॥ वीरणश्चाप्यधीत्यैनं रैभ्याय मुनये ददौ॥ रैभ्यः पुत्राय शुद्धाय सुव्रताय सुमेधसे॥ कुक्षिनामाय प्रददौ दिशां
पालाय धर्मिणे॥ ततोप्यंतर्दधे भूयो नारायणमुखोद्भवः॥ अंडजे जन्मनि पुनर्ब्रह्मणे हरियोनये॥ एष धर्मः स
मुद्भूतो नारायणमुखात्पुनः॥ गृहीतो ब्रह्मणा राजन् प्रयुक्तश्च यथाविधि॥ अध्यापिताश्च मुनयो नाम्ना बर्हिष
दो नृप॥ बर्हिषद्भ्यश्च संप्राप्तः सामवेदांतगं द्विजं॥ ज्येष्ठं नाम्नाभिविख्यातं ज्येष्ठसामव्रतो हरिः॥ ज्येष्ठाच्चाप्यनु
संक्रांतो राजानमविकंपनं॥ अंतर्दधे ततो राजन्नेष धर्मः प्रभोर्हरेः॥ यदिदं सप्तमं जन्म पद्मजं ब्रह्मणो नृप॥
तत्रैष धर्मः कथितः स्वयं नारायणेन हि॥ पितामहाय शुद्धाय युगादौ लोककारिणे॥ पितामहश्च दक्षाय धर्ममे
तं पुरा ददौ॥ ततो ज्येष्ठे दौहित्रे प्रादाद्दक्षो नृपोत्तम॥ आदित्ये सवितुर्ज्येष्ठे विवस्वान् जगृहे ततः॥ त्रेतायुगादौ

च ततो विवस्वान्मनवे ददौ ।। मनुश्च लोकभूत्यर्थं सुतायेक्ष्वाकवे ददौ ।। इक्ष्वाकुणा च कथितो व्याप्य लोकानवस्थितः ।। गमिष्यति क्षयांते च पुनर्नारायणं नृपं ।। यतीनां चापि यो धर्मः स ते पूर्वं नृपोत्तम ।। कल्पितो हरिगीतासु समासविधिकल्पितः ।। नारदेन तु संप्राप्तः सरहस्यः ससंग्रहः ।। एष धर्मो जगन्नाथात्साक्षान्नारायणान्नृप ।। एवमेष महान्धर्म आद्यो राजन् सनातनः ।। दुर्विज्ञेयो दुष्करश्च सात्वतैर्धार्यते सदा ।। धर्मज्ञानेन चैतेन सुप्रयुक्तेन कर्मणा ।। अहिंसाधर्मयुक्तेन प्रीयते हरिरीश्वरः ।। एकव्यूहविभागो वा क्वचिद्द्विव्यूहसंज्ञितः ।। त्रिव्यूहश्चापि संख्यातश्चतुर्व्यूहश्च दृश्यते ।। हरिरेव हि क्षेत्रज्ञो निर्ममो निष्कलस्तथा ।। जीवश्च सर्वभूतेषु पंचभूतगुणातिगः ।। मनश्च प्रथितं राजन् पंचेंद्रियसमीरणं ।। एष लोकविधिर्धीमानेष लोकविसर्गकृत् ।। अकर्त्ता चैव कर्त्ता च कार्यं कारणमेव च ।। यथेच्छति तथा राजन् क्रीडते पुरुषोऽव्ययः ।। एष एकांतधर्मस्ते कीर्त्तितो नृपसत्तम ।। मया गुरुप्रसादेन दुर्विज्ञेयो कृतात्मभिः ।। एकांतिनो हि पुरुषा दुर्लभा बहवो नृप ।। यद्येकांतिभिराकीर्णं जगत्स्यात्कुरुनंदन ।। अहिंसकैरात्मविद्भिः सर्वभूतहिते रतैः ।। भवेत्कृतयुगप्राप्तिराशीःकर्मविवर्जिता ।। एवं स भगवान्व्यासो गुरुर्मम विशां पते ।। कथयामास धर्मज्ञो धर्मराज्ञे द्विजोत्तमः ।। ऋषीणां संनिधौ राजन् शृण्वतोः कृष्णभीष्मयोः ।। तस्याप्यकथयत्पूर्वं नारदः सुमहातपाः ।। देवं परमकं ब्रह्म श्वेतं चंद्राभमच्युतं ।। यत्र चैकांतिनो यांति नारायणपरायणाः ।। ।। जनमेजयः ।। ।। एवं बहुविधं धर्मं प्रतिबुद्धैर्निषेवितं ।। न कुर्वंति क

थं विप्रा भन्ये नानाव्रते स्थिताः॥ ॥वैशं०॥ ॥तिस्रः प्रकृतयो राजन् देहबंधेषु निर्मिताः॥ सात्विकी राजसी चैव तामसी चैव भारत॥ देहबंधेषु पुरुषश्रेष्ठ कुरुकुलोद्वह॥ सात्विकः पुरुषव्याघ्र भवेन्मोक्षाय निश्चितः॥ अत्रापि स विजानाति पुरुषं ब्रह्मवित्तमं॥ नारायणपरो मोक्षस्ततो वै सात्विकः स्मृतः॥ मनीषित च प्राप्नोति चिंतयन्पुरुषोत्तमं॥ एकांतभक्तः सततं नारायणपरायणः॥ मनीषिणो हि ये केचिद्यतयो मोक्षधर्मिणः॥ तेषां विच्छिन्नतृष्णानां योगक्षेमवहो हरिः॥ जायमानं हि पुरुषं यं पश्येन्मधुसूदनः॥ सात्विकस्तु स विज्ञेयो भवेन्मोक्षे च निश्चितः॥ सांख्ययोगेन तुल्यो हि धर्म एकांतसेविनः॥ नारायणात्मके मोक्षे ततो यांति परां गतिं॥ नारायणेन दृष्टश्च प्रतिबुद्धो भवेत्पुमान्॥ एवमात्मेच्छया राजन्प्रतिबुद्धो न जायते॥ राजसी तामसी चैव व्यामिश्रे प्रकृती स्मृते॥ तदात्मकं हि पुरुषं जायमानं विशांपते॥ प्रवृत्तिलक्षणैर्युक्तं नावेक्षति हरिः स्वयं॥ पश्यत्येनं जायमानं ब्रह्मा लोकपितामहः॥ रजसा तमसा चैव मानसं समभिप्लुतं॥ कामं देवाश्च ऋषयः सत्वस्था नृपसत्तम॥ हीनासत्वेन सूक्ष्मेण ततो वैकारिकाः स्मृताः॥ ॥जनमेजयः॥ ॥कथं वैकारिको गच्छेत्पुरुषः पुरुषोत्तमं॥ वद सर्वं यथादृष्टं प्रवृत्तिं च यथाक्रमं॥ ॥वैशं०॥ ॥सुसूक्ष्मसत्वसंयुक्तं संयुक्तं त्रिभिरक्षरैः॥ पुरुषः पुरुषं गच्छेन्निष्क्रियः पंचविंशकः॥ एवमेकं सांख्ययोगं वेदारण्यकमेव च॥ परस्परांगान्येतानि पंचरात्रं च कथ्यते॥ एष एकांतिनो धर्मो नारायणपरात्मकः॥ यथा समुद्रात्प्रसृता जलौघास्तमेव राजन्पुनराविशंति॥ इमे तथा ज्ञानमहा

जज्ञौ घा नारायणं वै पुनर्विशंति ।। एष ते कथितो धर्मः सात्वतः कुरुनंदन ।। कुरुष्वैनं यथान्यायं यदि शक्तोसि भारत ।। एवं
हि स महाभागो नारदो गुरवे मम ।। श्वेतानां यतिनां चाह एकांतगतिमव्ययं ।। व्यासश्चाकथयत्प्रीत्या धर्मपुत्राय धीम
ते ।। स एवायं मया तुभ्यमाख्यातः प्रसृतो गुरोः ।। इत्थं हि दुश्चरो धर्म एष पार्थिवसत्तम ।। यथैव त्वं तथैवान्ये न भवंतीह विमो
हिताः ।। कृष्ण एव हि लोकानां भावनो मोहनस्तथा ।। संहारकारकश्चैव कारणं च विशांपते ।। ।। शांतौ मोक्षधर्मे ।। ।। जनमे
जयः ।। ।। सांख्ययोगं पांचरात्रं वेदारण्यकमेव च ।। ज्ञानान्येतानि ब्रह्मर्षे लोकेषु प्रचरंतिह ।। किमेतान्येकनिष्ठानि पृथ
ङ्निष्ठानि वा मुने ।। प्रब्रूहि वै मया पृष्टः प्रवृत्तिं च यथाक्रमं ।। ।। वैशं ।। ।। जज्ञे बहुज्ञं परमत्युदारं यं द्वीपमध्ये सुतमात्म
योगात् ।। पराशरात्सत्यवती महर्षिं तस्मै नमोऽज्ञानतमोनुदाय ।। पितामहाद्यं प्रवदंति षष्ठं महर्षिमार्षेयविभूतियुक्तं ।।
नारायणस्यांशजमेकपुत्रं द्वैपायनं वेदमहानिधानं ।। तमादिकालेषु महाविभूतिर्नारायणो ब्रह्ममहानिधानं ।।
ससर्ज पुत्रार्थमुदारतेजा व्यासं महात्मानमजं पुराणं ।। ।। जनमेजयः ।। ।। त्वयैव कथितः पूर्वं संभवो द्विजसत्तम ।। व
सिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशरः ।। पराशरस्य दायादः कृष्णद्वैपायनो मुनिः ।। भूयो नारायणसुतं त्वमेवैनं प्रभाष
से ।। किमतः पूर्वजं जन्म व्यासस्यामिततेजसः ।। कथयस्वोत्तममते जन्म नारायणोद्भवं ।। ।। वैशं ।। ।। वेदार्थान्वेत्तुका
मस्य धर्मिष्ठस्य तपोनिधेः ।। गुरोर्मे ज्ञाननिष्ठस्य हिमवत्पाद आसदः ।। कृत्वा भारतमाख्यानं तपःश्रांतस्य धीमतः ।। शु
श्रूषां तस्य राजेंद्र कृतवंतो वयं तदा ।। सुमंतुर्जैमिनिश्चैव पैलश्च सुदृढव्रतः ।। अहं चतुर्थः शिष्यो वै शुको व्यासात्मे

जः स्तथा ।। ऋषिभिः परिवृतो व्यासः शिष्यैः पंचभिरुत्तमैः ।। शुशुभे हिमवत्पादे भूतैर्भूतपतिस्तथा ।। वेदानां वर्त्तयन्सांगान्भारता
र्थांश्च सर्वशः ।। तमेकमनसं दांतं युक्ता वयमुपास्महे ।। कथांतरेथ कस्मिंश्चित्पृष्टोस्माभिर्द्विजोत्तमः ।। वेदार्थान्भारतार्थां
श्च जन्म नारायणात्तथा ।। स पूर्वमुक्त्वा वेदार्थान्भारतार्थांश्च तत्त्ववित् ।। नारायणादिदं जन्म व्याहर्त्तुमुपचक्रमे ।। ।।व्यास
उवाच ।। शृणुध्वमाख्यानवरमिदमार्षेयमुत्तमं ।। आदिकालोद्भवं विप्राः तपसाधिगतं मया ।। प्राप्ते प्रजाविसर्गे वै स
प्तमे पद्मसंभवे ।। नारायणो महायोगी शुभाशुभविवर्जितः ।। ससृजे नाभितः पूर्वं ब्रह्माणममितप्रभं ।। ततः स प्रादुरभ
वत्तथैनं वाक्यमब्रवीत् ।। मम त्वं नाभितो जातः प्रजासर्गकरः प्रभुः ।। सृज प्रजास्त्वं विविधा ब्रह्मन्सजडपंडिताः ।। स एव
मुक्तो विमुखश्चिंताव्याकुलमानसः ।। प्रणम्य वरदं देवमुवाच हरिमीश्वरं ।। का शक्तिर्मम देवेश प्रजास्स्रष्टुं नमोस्तु ते ।।
अप्रज्ञावानहं देव विधत्स्व यदनंतरं ।। स एवमुक्तो भगवान्भूत्वाथांतर्हितस्ततः ।। चिंतयामास देवेशो बुद्धिं बुद्धिम
तां वरः ।। स्वरूपिणी ततो बुद्धिरुपतस्थे हरिं प्रभुं ।। योगेन चैनां निर्योगः स्वयं नियुयुजे तदा ।। स तामैश्वर्ययोगस्थां बुद्धिं
गतिमतीं सतीं ।। उवाच वचनं देवो बुद्धिं वै प्रभुरव्ययः ।। ब्रह्माणं प्रविशस्वेति लोकसृष्ट्यर्थसिद्धये ।। ततस्तमीश्वरा
दिष्टा बुद्धिः क्षिप्रं विवेश सा ।। अथैनं बुद्धिसंयुक्तं पुनः स ददृशे हरिः ।। भूयश्चैवं वचश्चाह सृजेमा विविधाः प्रजाः ।। बाढ
मित्येव कृत्वासौ यथाज्ञां शिरसा हरेः ।। एवमुक्त्वा स भगवांस्तत्रैवांतरधीयत ।। प्राप चैनं मुहूर्त्तेन स्वस्थानं देवसंज्ञितं ।।

तोदैवं प्रकृतिं प्राप्य एकीभावगतोभवत् ॥ अथास्य बुद्धिरभवन्मुमनन्या तदा किल ॥ सृष्टाः प्रजा इमाः सर्वाः ब्रह्मणा परमेष्ठि
ना ॥ दैत्यदानवगंधर्वरक्षोगणसमाकुला ॥ जाता हीयं वसुमती भाराक्रांता तपस्विनी ॥ बहवो बलिनः पृथ्व्यां दैत्यदान
वराक्षसाः ॥ भविष्यंति तपोयुक्ता तथान्या बाध्यंति चोत्तमान्र ॥ अवश्यमेव ते सर्वैः वरदानेन दर्पिते ॥ बाधितव्याः सुर
गणा ऋषयश्च तपोधनाः ॥ तन्न्याय्यमिदं कर्त्तुं भारावतरणं मया ॥ अथ नानासमुद्भूतैः वसुधायां यथाक्रमं ॥
निग्रहेण च पापानां साधूनां प्रग्रहेण च ॥ इयं तपस्विनी सत्या धारयिष्यति मेदिनी ॥ मयो ह्येषा हि ध्रियते पातालस्थे
नभोगिना ॥ मया धृता धारयति जगद्विश्वं चराचरं ॥ तस्मात्पृथ्व्याः परित्राणं करिष्ये संप्रवर्त्ततः ॥ एवं संचिंतयित्वा
तु भगवान्मधुसूदनः ॥ रूपाण्यनेकान्यसृजत्प्रादुर्भावे भवाय सः ॥ वाराहं नारसिंहं च वामनं मानुषं तथा ॥
एभिर्मया निहंतव्या दुर्विनीताः सुरारयः ॥ अथस्त्वयो जगत्स्रष्टा प्रभोः शब्देनानुनादयन् ॥ सरस्वतीमुच्चचार तत्र
सानस्त्व भवत् ॥ अपांतरतमा नाम सुतो वाक्संभवः प्रभुः ॥ भूतभव्यभविष्यज्ञः सत्यवादी दृढव्रतः ॥ तमुवाच नतं मू
र्ध्नि देवानामादिरव्ययः ॥ वेदाख्याने श्रुतिः कार्या त्वया मतिमतां वर ॥ तस्मात्कुरु यथाज्ञप्तं ममैतद्वचनं मुने ॥
तेन भिंन्नास्तथा देवा मनोः स्वायंभुवेंतरे ॥ ततस्तुतोष भगवान्हरिस्तेनास्य कर्मणा ॥ तपसा च सुतप्तेन यमेन
नियमेन च ॥ मन्वंतरेषु पुत्र त्वमेवमेवं प्रवर्त्तकः ॥ भविष्यस्य वतो ब्रह्मन्नप्रधृष्यश्च नित्यशः ॥ पुनस्तिष्ये

वत्सं प्राप्ते कुरवो नाम भारताः ॥ भविष्यंति महात्मानो राजानः प्रथिता भुवि ॥ तेषां त्वत्तः प्रसूतानां कुले भेदो भविष्यति ॥ पर
स्परविनाशार्थं त्वामृते द्विजसत्तम ॥ तत्राप्यनेकधा वेदान्भेत्स्यसे तपसान्वितः ॥ कृष्णे युगे च संप्राप्ते कृष्णवर्णो भवि
ष्यसि ॥ धर्माणां विविधानां च कर्त्ता ज्ञानकरस्तथा ॥ भविष्यसि तपोयुक्तो न च रागाद्विमोक्ष्यसे ॥ वीतरागश्च पुत्रस्ते
परमात्मा भविष्यति ॥ महेश्वरप्रसादेन नैतद्वचनमन्यथा ॥ यं मानसं वै प्रवदंति विप्राः पितामहस्योत्तमबुद्धियु
क्तं ॥ वसिष्ठमग्र्यं च तपोनिधानं यस्यापि सूर्यं व्यतिरिच्यते भाः ॥ तस्यान्वये चापि ततो महर्षिः पराशरो नाम म
हाप्रभावः ॥ पिता स ते वेदनिधिर्वरिष्ठो महातपा वै तपसो निवासः ॥ कानीनगर्भः पितृकन्यकायां तस्मादृषेस्त्वं
भविता च पुत्रः ॥ भूतभव्यभविष्याणां छिन्नसर्वार्थसंशयः ॥ ये ह्यतिक्रांतकाः पूर्वं सहस्रयुगपर्ययाः ॥ तांश्च स
र्वान्मयोद्दिष्टान्द्रक्ष्यसे तपसान्वितः ॥ पुनर्द्रक्ष्यसि चानेकसहस्रयुगपर्ययान् ॥ अनादिनिधनं लोके चक्रहस्तं
च मां मुने ॥ अनुध्यानान्मम मुने नैतद्वचनमन्यथा ॥ भविष्यति महासत्त्व ख्यातिश्चाप्यतुला तव ॥ शनैश्च
रः सूर्यपुत्रो भविष्यति मनुर्महान् ॥ तस्मिन्मन्वंतरे चैव मन्वादिगणपूर्वकः ॥ त्वमेव भविता वत्स मत्प्रसादान्न
संशयः ॥ यत्किंचिद्विद्यते लोके सर्वं तन्मद्विचेष्टितं ॥ अन्यो ह्यन्यं चिंतयति स्वच्छंदं विदधाम्यहं ॥ एवं सारस्वतमृ
षिमपांतरतमं तथा ॥ उक्त्वा वचनमीशानः साधयस्वेत्यथाब्रवीत् ॥ सोऽहं तस्य प्रसादेन देवस्य हरिमेधसः ॥

अपांतरतमानाम ततो ज्ञातोऽज्ञया हरेः ॥ पुनश्च जातो विख्यातो वसिष्ठकुलनंदनः ॥ तदेतत्कथितं जन्म मया पूर्वक
मात्मनः ॥ नारायणप्रसादेन तथा नारायणांशजः ॥ मया हि सुमहत्तप्तं तपः परमदारुणं ॥ पुरा मतिमतां श्रेष्ठ प
रमेण समाधिना ॥ एतद्वः कथितं सर्वं यन्मां पृच्छथ पुत्रकाः ॥ पूर्वजन्म भविष्यं च भक्तानां स्नेहतो मया ॥ ॥ वै
शंपायनः ॥ ॥ एष ते कथितः पूर्वं संभवोऽस्मद्गुरोर्नृप ॥ व्यासस्याक्लिष्टमनसो यथा पृष्टः पुनः शृणु ॥ सांख्य
योगं पंचरात्रं वेदाः पाशुपतं तथा ॥ ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ॥ सांख्यस्य वक्ता कपिलः परम
र्षिः स उच्यते ॥ हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः ॥ अपांतरतमाश्चैव वेदाचार्यः स उच्यते ॥ प्राचीन
गर्भं तमृषिं प्रवदंतीह केचन ॥ उमापतिर्भूतपतिः श्रीकंठो ब्रह्मणः सुतः ॥ उक्तवानिदमव्यग्रो ज्ञानं पाशुप
तं शिवः ॥ पंचरात्रस्य कृत्स्नस्य वेत्ता तु भगवान्स्वयं ॥ सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ॥ यथागमं यथा
ज्ञानं निष्ठा नारायणः प्रभुः ॥ न चैनमेवं जानंति तमोभूता विशांपते ॥ तमेव शास्त्रकर्त्तारः प्रवदंति मनीषिणः ॥
निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम ॥ निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः ॥ ससंशयान्हेतु
बलान्नाध्यावसति माधवः ॥ पंचरात्रविदो ये तु यथाक्रमपरा नृप ॥ एकांतभावोपगतास्ते हरिं प्रविशंति
वै ॥ सांख्यं च योगं च सनातने द्वे वेदाश्च सर्वे निखिलेन राजन् ॥ सर्वैः समस्तैरृषिभिर्निरुक्तो नारायणो

मोक्ष०
२६०

विश्वमिदं पुराणं॥ ऋभात्तु मंत्कर्म समीतं यत्प्रवर्त्तितं सर्वलोकेषु किंचित्॥ तस्याहृषेस्तद्भवतीति विद्याद्दिव्यंतरिक्षे भुवि वा
प्सु चेति॥ ॥शांतौ मोक्षधर्मे॥ ॥जनमेजयः॥ ॥बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु॥ कोह्यत्र पुरुषश्रेष्ठः को वा यो-
निरिहोच्यते॥ ॥वैशं॥ ॥बहवः पुरुषा लोके सांख्ययोगविचारणे॥ नैतदिच्छंति पुरुषमेकं कुरुकुलोद्वह॥ बहूनां
पुरुषाणां च यथैका योनिरुच्यते॥ तथा तं पुरुषं विश्वं व्याख्यास्यामि गुणाधिकं॥ नमस्कृत्वा तु गुरवे व्यासायावि-
दितात्मने॥ तपोयुक्ताय दांताय वंद्याय परमर्षये॥ इदं पुरुषसूक्तं हि सर्ववेदेषु पार्थिव॥ ऋतं सत्यं च विख्यातमृषि-
सिंहेन चिंतितं॥ उत्सर्गेणापवादेन ऋषिभिः कपिलादिभिः॥ अध्यात्मचिंतामाश्रित्य शास्त्राण्युक्तानि भारत॥ स-
मासतस्तु यद्व्यासः पुरुषैकत्वमुक्तवान्॥ तत्तेहं संप्रवक्ष्यामि प्रसादादमितौजसः॥ अत्राप्युदाहरंतीममितिहासं
पुरातनं ब्रह्मणा सह संवादं त्र्यंबकस्य विशांपते॥ क्षीरोदस्य समुद्रस्य मध्ये हाटकसप्रभः॥ वैजयंत इति ख्यातः
पर्वतप्रवरो नृप॥ तत्राध्यात्मगतिं देवः एकाकी प्रविचिंतयत्॥ वैराजसदनं नित्यं वैजयंतं निषेवते॥ अथ तत्रासतस्तस्य
चतुर्वक्त्रस्य धीमतः॥ ललाटप्रभवः पुत्रः शिव आगाद्यदृच्छया॥ आकाशेन महायोगी पुरा त्रिनयनः प्रभुः॥ ततः
खान्निपपाताशु धरणीधरमूर्द्धनि॥ अग्रतश्चाभवत्प्रीतो ववंदे चापि पादयोः॥ तं पादयोर्निपतितं दृष्ट्वा सव्ये-
न पाणिना॥ उत्थापयामास तदा प्रभुरेकः प्रजापतिः॥ उवाच चैनं भगवांश्चिरस्यागतमात्मजं॥ ॥पितामह॥ २६०

स्वागतं ते महाबाहो दिष्ट्या प्राप्तोसि मेंतिकं ॥ कच्चित्ते कुशलं पुत्र स्वाध्यायतपसोः सदा ॥ नित्यमुग्रतपास्त्वं हि ततः पृच्छा
मि ते पुनः ॥ ॥ रुद्र उवाच ॥ ॥ त्वत्प्रसादेन भगवन्स्वाध्यायतपसोर्मम ॥ कुशलं चाव्ययं चैव सर्वस्य जगतस्तथा ॥ वि
रदृष्टो हि भगवान्वैराजसदने मया ॥ ततोहं पर्वतं प्राप्तस्त्विमं त्वत्पादसेवितं ॥ कौतूहलं चापि हि मे एकांतगमनेन
ते ॥ नैतत्कारणमल्पं हि भविष्यति पितामह ॥ किं नु तत्सदनं श्रेष्ठं क्षुत्पिपासाविवर्जितं ॥ सुरासुरैरध्युषितं ऋषि
भिश्चामितप्रभैः ॥ गंधर्वैरप्सरोभिश्च सततं संनिषेवितं ॥ उत्सृज्येमं गिरिवरमेकाकी प्राप्तवानसि ॥ ॥ ब्रह्मोवा
च ॥ ॥ वैजयंतो गिरिवरः सततं सेव्यते मया ॥ अत्रैकाग्रेण मनसा पुरुषश्चिंत्यते विराट् ॥ ॥ रुद्र उवाच ॥ ॥ बह
वः पुरुषा ब्रह्मंस्त्वया सृष्टाः स्वयंभुवा ॥ सृज्यंते चापरे ब्रह्मन्स चैकः पुरुषो विराट् ॥ कोह्यसौ चिंत्यते ब्रह्मंस्त्वयैकः पु
रुषोत्तमः ॥ एतन्मे संशयं ब्रूहि महत्कौतूहलं हि मे ॥ ॥ ब्रह्मोवाच ॥ ॥ बहवः पुरुषाः पुत्र ये त्वया समुदाहृताः ॥ ए
वमेतदतिक्रांतं द्रष्टव्यं नैवमित्यपि ॥ आधारं तु प्रवक्ष्यामि एकस्य पुरुषस्य ते ॥ बहूनां पुरुषाणां स यथैका यो
निरुच्यते ॥ तथा तं पुरुषं विश्वं परमं सुमहत्तमं ॥ निर्गुणं निर्गुणा भूत्वा प्रविशंति सनातनं ॥ ॥ शांतौ मोक्षधर्मे ॥
॥ ब्रह्मोवाच ॥ ॥ शृणु पुत्र यथा ह्येष पुरुषः शाश्वतोव्ययः ॥ अक्षयश्चाप्रमेयश्च सर्वगश्च निरुच्यते ॥ न स शक्य
स्त्वया द्रष्टुं मयान्यैर्वापि सत्तम ॥ सगुणो निर्गुणो विश्वो ज्ञानदृश्यो ह्यसौ स्मृतः ॥ अशरीरः शरीरेषु सर्वेषु निवस
त्यसौ ॥ वसन्नपि शरीरेषु न स लिप्यति कर्मभिः ॥ ममांतरात्मा तव च ये चान्ये देहसंज्ञिताः ॥ सर्वेषां साक्षि

श्रुतो सौरग्राह्यः केनचित्केचित् ।। विश्वमूर्द्धा विश्वभुजो विश्वपादाक्षनासिकः ।। एकश्चरति क्षेत्रेषु स्वैरचारी यथासुखं । क्षेत्राणि च शरीराणि बीजं चापि शुभाशुभं ।। तानि वेत्ति स योगात्मा ततक्षेत्रज्ञं उच्यते ।। नागतिर्न गतिस्तस्य ज्ञेया भूतेषु केनचित् ।। सांख्येन विधिना चैव योगेन च यथाक्रमं ।। चिंतयामि गतिं चास्य न गतिं वेद्मि चोत्तरां ।। यथाज्ञानं तु वक्ष्यामि पुरुषं तु सनातनं ।। तस्यैकत्वं महत्वं च स चैकः पुरुषः स्मृतः ।। महापुरुषशब्दं स विभर्त्यैकः सनातनः ।। तस्यैकत्वं महत्वं च एको हुताशो बहुधा समिध्यते एकः सूर्यस्तपसो योनिरेका ।। एको वायुर्बहुधा वाति लोके महोदधिश्चांभसां योनिरेकः ।। पुरुषश्चैको निर्गुणो विश्वपस्तं निर्गुणं पुरुषं चाविशंति ।। हित्वा गुणमयं सर्वं कर्म हित्वा शुभाशुभं ।। उभे सत्यानृते त्यक्त्वा एवं भवति निर्गुणः ।। अचिंत्यं चापि तं ज्ञात्वा भावसूक्ष्मं चतुष्टयं ।। विचरेद्यो समुन्नद्धः स गच्छेत्पुरुषं शुभं ।। एवं हि परमात्मानं केचिदिच्छंति पंडिताः ।। एकात्मानं तथात्मानमपरे ध्यानचिंतकाः ।। तत्र यः परमात्मा हि स नित्यं निर्गुणः स्मृतः ।। स हि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि सः ।। न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा ।। कर्मात्मा त्वपरे यो सौ मोक्षबंधैः स उच्यते ।। स सप्तदशकेनापि राशिना युज्यते च सः ।। एवं बहुविधः प्रोक्तः पुरुषस्ते यथाक्रमं ।। यत्तत्कृत्स्नं लोकतंत्रस्य धामवेद्यं परं बोधनीयं स बोद्धा ।। मंत्ता मंतव्यं प्राशिता प्राशनीयं द्रष्टा द्रष्टव्यं रसिता रसनीयं ।। घ्राता घ्रेयं स्पर्शिता स्पर्शिनीयं द्रष्टा द्रष्टव्यं ।। श्राविता श्रावणीयं ।। ज्ञाता ज्ञेयं सगुणं निर्गुणं च यद्वै प्रोक्तं तात सम्यक्प्रधानं ।। नित्यं चैतच्छाश्वतं चाव्ययं च यद्वै सूते धातुराद्यं विधानं ।। तद्वै विप्राः प्रवदंतेऽनिरुद्धं यद्वै लो

के वैदिकं कर्मसाधु ॥ आशीर्युक्तं तद्धितस्यैव प्राप्य देवाः सर्वे मुनयः साधुदांता ॥ तं प्राग्यज्ञे यज्ञभागं यजंते ॥ अहं ब्रह्माव्यय
ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः ॥ मत्तो जगत्स्थावरजंगमं च सर्वे वेदाः सरहस्याश्च पुत्र ॥ चतुर्विभक्तः पुरुषः स
क्रीडति यथेच्छति ॥ एवं स भगवान्स्वेन ज्ञानेन प्रतिबोधितः ॥ एतत्ते कथितं पुत्र यथावदनुपृच्छतः ॥ सांख्यज्ञाने तथा योगे
यथावदनुवर्णितं ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ धर्माः पितामहेनोक्ता मोक्षधर्माश्रिताः शुभाः ॥ धर्म
माश्रमिणां श्रेष्ठं वक्तुमर्हसि मे भवान् ॥ ॥ भीष्म उवाच ॥ ॥ सर्वत्र विहितो धर्मः स्वर्ग्यः सत्यफलं महत् ॥ बहुद्वारस्य ध
र्मस्य नेहास्तिफला क्रिया ॥ यस्मिन्यस्मिंश्च विषये यो यो याति विनिश्चयं ॥ स तमेवाभिजानाति नान्यं भरतसत्तम ॥
इमां च त्वं नरव्याघ्र श्रोतुमर्हसि मे कथां ॥ पुरा शक्रस्य कथितां नारदेन महर्षिणा ॥ महर्षिर्नारदो राजन्सिद्धस्त्रैलोक्य
संमतः ॥ पर्यतिक्रमशो लोकान्वायुरव्याहतो यथा ॥ स कदाचिन्महेष्वास देवराजालयं गतः ॥ सत्कृतश्च महेंद्रेण प्रत्या
सन्नगतो महत् ॥ तं कृतक्षणमासीनं पर्यपृच्छच्छचीपतिः ॥ महर्षे किंचिदाश्चर्यमस्ति दृष्टं त्वयानघ ॥ यदा त्व
मपि विप्रर्षे त्रैलोक्यं सचराचरं ॥ जातकौतूहलो नित्यं सिद्धश्चरसि साक्षिवत् ॥ न ह्यस्त्यविदितं लोके देवर्षे तव किं
चन ॥ श्रुतं वाप्यनुभूतं वा दृष्टं वा कथयस्व मे ॥ तस्मै राजन्सुरेंद्राय नारदो वदतां वरः ॥ आसीनायोपपन्नाय प्रोक्त
वान्विपुलां कथां ॥ यथा येन च कल्पेन स तस्मै द्विजसत्तमः ॥ कथां कथितवान्पृष्टस्तथा त्वमपि मे शृणु ॥ ॥ शांतौ मो
क्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ आसीत्किल नरश्रेष्ठ महापद्मे पुरोत्तमे ॥ गंगाया दक्षिणे तीरे कश्चिद्विप्रः समाहि

तः॥सौम्यसोमान्वयेवेदेगंताध्वाछिंन्नसंशयः॥धर्मनित्योजितक्रोधोनित्यतृप्तोजितेंद्रियः॥तपस्वाध्यायनिरतःसत्यः
सज्जनसंमतः॥न्यायप्राप्तेनवित्तेनस्वेनशीलेनचार्चितः॥ज्ञातिसंबंधविपुलेसत्यापाश्रयसंमिते॥कुलेमहतिविख्या
तेविशिष्टांवृत्तिमास्थितः॥सपुत्रान्बहुलान्दृष्ट्वाविपुलेकर्मणिस्थितः॥कुलधर्माश्रितोराजन्धर्मचर्यास्थितोभव
त्॥ततःसधर्मंवेदोक्तंयथाशास्त्रोक्तमेवच॥शिष्टाचीर्णंचधर्मंचत्रिविधंचिंत्यचेतसा॥किन्नुमेस्याच्छुभंकृत्वाकिं
कृतंकिंपरायणं॥इत्येवंखिद्यतेनित्यंनचयातिविनिश्चयं॥तस्यैवंखिद्यमानस्यधर्मंपरममास्थितः॥कदाचिद
स तिथिःप्राप्तोब्राह्मणःसुसमाहितः॥तस्मैसत्क्रियांचक्रेक्रियायुक्तेनहेतुना॥विश्रांतंसुखमासीनंमिदंवचनम
ब्रवीत्॥ ॥शांतौमोक्षधर्मे॥ ॥ब्राह्मणउवाच॥ ॥समुत्तंभाभिधानैस्तैःवाङ्मधुर्येणतेनघ॥मित्रवत्समभिप
न्नस्त्वंकिंचिद्वक्ष्यामितच्छृणु॥गृहस्थधर्मंविप्रेंद्रकृत्वापुत्रेगतंत्वहं॥धर्मंपरमकंकुर्यांकोहिमार्गोभवेद्विज॥
अहमात्मानमास्थायएकएवात्मनिस्थितः॥कर्तुंकांक्षामिनेच्छामिबद्धःसानपोद्गुणैः॥यावदेतदतीतंमेवयःपु
त्रफलाश्रितं॥तावदिच्छामिपाथेयमादातुंपारलौकिकं॥अस्मिन्हिलोकसंतानेपरंपारमभीप्सतः॥उत्पन्नामेमति
रियंकुतोधर्ममयःप्लवः॥संयुज्यमानानिनिशाम्यलोकेनिर्यात्यमानानिचसात्विकानि॥दृष्ट्वातुधर्मध्वजकेतु
मालांप्रकीर्यमाणामुपरिप्रजानां॥नमेमनोरज्यतिभोगकालेदृष्ट्वायतीन्प्रार्थयतःपरत्र॥तेनातिथेबुद्धिबलाश्र
येणधर्मेणधर्मेविनियुंक्ष्वमांवै॥सोतिथिर्वचनंतस्यश्रुत्वाधर्माभिभाषिणः॥प्रोवाचवचनंश्लक्ष्णंप्राज्ञोमधु

रयागिरा॥ ॥अतिथिरुवाच॥ ॥अहमप्यत्र मुह्यामि समापेष मनोरथः॥ न चैकं निश्चयं यामि बहुद्वारे त्रिविष्टपे॥
केचिन्मोक्षं प्रशंसंति केचिद्यज्ञफलं द्विजाः॥ वानप्रस्थाश्रयाः केचिद्गार्हस्थ्यं केचिदास्थिताः॥ राजधर्माश्रयं केचि
त्केचिद्वाक्यसमाश्रयं॥ मातरं पितरं केचिछुश्रूषंतो दिवं गताः॥ अहिंसया परे स्वर्गं सत्येन च तथा परे॥ आहवेभिमु
खाः केचिन्निहताः स्त्रिदिवं गताः॥ केचिदुंछव्रतैः सिद्धाः स्वर्गमार्गसमाश्रिताः॥ केचिदध्ययने युक्ता वेदव्रतपराः शुभाः॥
बुद्धिमंतो गताः स्वर्गं तुष्टात्मानो जितेंद्रियाः॥ आर्जवेनापरे युक्ता निहतामार्जवैर्जनैः॥ ऋजवो नाकपृष्ठे वै शुद्धात्मानः
प्रतिष्ठिताः॥ एवं बहुविधैर्लोके धर्मद्वारैरनावृतैः॥ ममापि मतिराविग्ना मेघलेखेव वायुना॥ ॥शांतौ मोक्षधर्मे॥ ॥
अतिथिरुवाच॥ ॥उपदेशं तु ते विप्र करिष्येहं यथागमं॥ गुरुणा मे यथाख्यातमर्थतस्तं तु मे श्रुणु॥ यत्र पूर्वाभिसर्गे
वै धर्मचक्रं प्रवर्तितं॥ नैमिषे गोमतीरे तत्र नागाह्वयं पुरं॥ समग्रैस्त्रिदशैस्तत्र इष्टमासीद्द्विजर्षभ॥ यत्रेंद्रातिक्रमं च
क्रे मांधाता राजसत्तमः॥ कृताधिवासो धर्मात्मा तत्र चक्षुश्रवा महान्॥ पद्मनाभो महानागः पद्म इत्येव विश्रुतः॥ स वाचा
कर्मणा चैव मनसा च द्विजर्षभ॥ प्रसादयति भूतानि त्रिविधे कर्मणि स्थितः॥ साम्ना भेदेन दानेन दंडेनेति चतुर्विधं॥ वि
षमस्थं समस्तं च चक्षुर्ध्यानेन रक्षति॥ तमभिक्रम्य पृष्टुमर्हसि कांक्षितं॥ स ते परमकं धर्मं न मिथ्या दर्शयिष्यति॥ स हि स
र्वातिथिर्नागो बुद्धिशास्त्रविशारदः॥ गुणैरनुपमैर्युक्तः समस्तैराभिकामुकैः॥ प्रकृत्या नित्यसलिलो नित्यमध्ययने रतः॥
तपोदमाभ्यां संयुक्तो वृत्तेनानवरेण च॥ यज्वा दानपतिः क्षांतो वृत्ते च परमे स्थितः॥ सत्यवागनसूयश्च शीलवान्नियतें

ड्रियः ।। शेषान्नभोक्ता वचनानुकूलो हितार्जवोत्कृष्टकृताकृतज्ञः ।। अवैरकृद्भूतहिते नियुक्तो गंगाह्रदांभोभिजनोपपन्नः ।। ।।
शांतौ मोक्षधर्मे ।। ।। ब्राह्मण उवाच ।। ।। अतिभारोद्यतस्येव भारावतरणं महत् ।। पराश्वासकरं वाक्यमिदं मे भवतः श्रु
तं ।। अध्वक्लांतस्य शयनं स्थानक्लांतस्य चासनं ।। तृषितस्य च पानीयं क्षुधार्तस्य च भोजनं ।। ईप्सितस्यैव संप्राप्तिरन्नस्य सम
ये तिथेः ।। एषितस्यात्मनः काले वृद्धस्येव सुतो यथा ।। मनसा चिंतितस्येव प्रीतिः स्निग्धस्य दर्शनं ।। प्रह्लादयति मां वाक्यं भ
वता यदुदीरितं ।। दत्तचक्षुरिवाकाशे पश्यामि विमृशामि च ।। प्रज्ञानवचनाद्योयमुपदेशो हि मे कृतः ।। बाढमेवं करिष्या
मि यथा मे भाषते भवान् ।। इमां हि रजनीं साधो निवसस्व मया सह ।। प्रभाते याति भवान् पर्युषितः सुखोषितः ।। असौ हि
भगवान्सूर्यो मंदरश्मिरवाङ्मुखः ।। ।। भीष्मः ।। ।। ततस्तेन कृतातिथ्यः सोतिथिः शत्रुसूदन ।। उवास किल तां रात्रिं सह ते
न द्विजेन वै ।। तत्तच्च धर्मसंयुक्तं तयोः कथयतोः सतोः ।। व्यतीता सा निशा कृत्स्ना सुखेन दिवसोपमा ।। ततः प्रभातसमये सो
तिथिस्तेन पूजितः ।। ब्राह्मणेन यथाशक्त्या स्वकार्यमभिकांक्षता ।। ततः स विप्रः कृतकर्मनिश्चयः कृताभ्यनुज्ञः स्वज
नेन धर्मकृत् ।। यथोपदिष्टं भुजगेंद्रसंश्रयं जगाम काले सुकृतैकनिश्चयः ।। ।। शांतौ मोक्षधर्मे ।। ।। भीष्म उवाच ।। ।। स
वनानि विचित्राणि तीर्थानि च सरांसि च ।। अभिगच्छन्क्रमेणाकंचिन्मुनिमुपस्थितः ।। तं स तेन यथोद्दिष्टं नागं विप्रेण ब्राह्म
णः ।। पर्यपृच्छद्यथान्यायं श्रुत्वैव च जगाम सः ।। सोभिगम्य यथान्यायं नागायतनमर्थवित् ।। प्रोक्तवानहमस्मीति भोः श
ब्दालंकृतं वचः ।। ततस्य वचनं श्रुत्वा रूपिणी धर्मवत्सला ।। दर्शयामास तं विप्रं नागपत्नी पतिव्रता ।। सा तस्मै विधि

वस्तूनां चक्रे धर्मपरायणा ॥ स्वागतेनागतं दृष्ट्वा किं करोमीति चाब्रवीत् ॥ ॥ब्रांह्मणउवाच ॥ ॥विश्रांतोभ्यर्चितस्त्वास्मि भ
वत्या श्लक्ष्णया गिरा ॥ द्रष्टुमिच्छामि भवति देवं नागमनुत्तमं ॥ एतद्धि परमं कार्यमेतन्मे परमेप्सितं ॥ अनेन चार्थिना
मास्य संप्राप्तः पंन्नगाश्रमं ॥ ॥नागभार्योवाच ॥ ॥आर्यः सूर्यरथं वोढुं गतोसौ मासचारिकः ॥ स साष्टभिर्दिनैर्दर्शयिष्यत्य
संशयं ॥ एतद्विदितमार्यस्य विवासकरणं मम ॥ तत्तु भवितु किंचान्यत्क्रियतां तद्वदस्व मे ॥ ॥ब्रांह्मणउवाच ॥ ॥अनेन नि
श्चयेनाहं साध्वी संप्राप्तवानिह ॥ प्रतीक्षन्नागमं देवि वत्स्याम्यस्मिन्महावने ॥ संप्राप्तस्यैव चाव्यग्रमावेद्योहमिहागतः ॥
स्माभिगमनं प्राप्तो वाच्यश्च वचनं त्वया ॥ अहमप्यत्र वत्स्यामि गोमत्याः पुलिने शुभे ॥ कालं परिमिताहारो यथोक्तं परि
पालयन् ॥ ततः स विप्रस्तां नागीं समाधाय पुनः पुनः ॥ तदेव पुलिनं नद्याः प्रययौ ब्रांह्मणर्षभ ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥
भीष्मउवाच ॥ ॥अथ ते नरश्रेष्ठ ब्रांह्मणेन तपस्विना ॥ निराहारेण वसता दुःखितास्ते भुजंगाः ॥ सर्वे संभूय सहिता ह्य
स्य नागस्य बांधवाः ॥ भ्रातरस्तनया भार्या ययुस्तं ब्रांह्मणं प्रति ॥ ते पश्यन्पुलिने तं वै विविक्ते नियतव्रतं ॥ समासीनं निराहा
रं द्विजं जाप्यपरायणं ॥ ते सर्वे समतिक्रम्य विप्रमभ्यर्च्य चासकृत् ॥ ऊचुर्वाक्यमसंदिग्धं मातिथेयस्य बांधवाः ॥ षष्ठो हि
दिवसस्तेद्य प्राप्तस्येह तपोधन ॥ न चाभिलषसे किंचिदाहारं धर्मवत्सल ॥ अस्मानभिगतश्चासि वयं त्वामुपसंस्थिताः ॥ का
र्यं चातिथ्यमस्माभिर्वयं सर्वे कुटुंबिनः ॥ मूलं फलं वा पर्णं वा पयो वा द्विजसत्तम ॥ आहारहेतोरन्नं वा भोक्तुमर्हसि ब्रांह्मण ॥
त्यक्ताहारेण महता वने निवसता त्वया ॥ बालवृद्धमिदं सर्वं पीड्यते धर्मसंकटात् ॥ न हि नो ब्रह्महा कश्चिज्जातापत्योनृतो
पि वा ॥ पूर्वाशी वा कुले ह्यस्मिन्देवतातिथिबंधुषु ॥ ॥ब्रांह्मणउवाच ॥ उपदेशेन युष्माकमाहारोयं कृतो मया ॥ द्विरूनं

मो॰ध॰

२४४

दशरात्रं वै नागस्यागमनं प्रति॥ यद्यष्टरात्रेतिक्रांते नागामिष्यति पन्नगः॥ तदाहानं करिष्यामि तं निमित्तमिदं व्रतं॥ कर्तव्यं न
च संतापो गम्यतां च यथागतं॥ तं निमित्तमिदं सर्वं नैतद्वै तुमिहार्हथ॥ ते तेन समनुज्ञाता ब्राह्मणेन भुजंगमाः॥ स्वमेव भव
नं जग्मुः कृतार्था निनर्षभ॥ ॥ शांतौ मोक्षधर्मे॥ ॥ भीष्म उवाच॥ ॥ अथ काले बहुतिथे पूर्णे प्राप्तो भुजंगमः॥ दत्ताभ्यनुज्ञः
स्ववेश्म कृतकर्मा विवस्वतः॥ तं भार्याप्युपचक्राम पादशौचादिभिर्गुणैः॥ उपपन्नां च तां साध्वीं पन्नगः पर्यपृच्छत॥ अथ त्व
मसि कल्याणि देवतातिथिपूजने॥ पूर्वमुक्तेन विधिना युक्तियुक्तेन तत्समं॥ न खल्वस्यकृतार्थेन स्त्रीबुद्ध्या मार्दवीकृता॥ म
द्वियोन शुश्रोणि विमुक्ता धर्मसेतुना॥ ॥ नागभार्योवाच॥ ॥ शिष्याणां गुरुशुश्रूषा विप्राणां वेदधारणं॥ भृत्यानां स्वामि
वचनं राज्ञो लोकानुपालनं॥ सर्वभूतपरित्राणं क्षत्रधर्म इहोच्यते॥ वैश्यानां यज्ञसंवृत्तिरातिथेयसमन्विता॥ विप्र
क्षत्रियवैश्यानां शुश्रूषादीर्घकर्म कृतु॥ गृहस्थधर्मो नागेंद्र सर्वभूतहितैषिता॥ नियताहारता नित्यं व्रतचर्या यथा
क्रमं॥ धर्मो हि धर्मसंबंधादिंद्रियाणां विशेषतः॥ अहं कस्य कुतो वापि कः को मे ह भवेदिति॥ प्रयोजनमति नित्यमेव
मोक्षाश्रमे भवेत्॥ पतिव्रतात्वं परमो परमो धर्म उच्यते॥ तवोपदेशान्नागेंद्र तच्च तत्त्वेन वेद्मि वै॥ साहं धर्मं विजानंती ध
र्मनित्ये त्वयि स्थिते॥ सत्पथं कथमुत्सृज्य यास्यामि विपथं पथः॥ देवतानां महाभाग धर्मचर्या न हीयते॥ अतिथीनां च सं
त्कारे नित्ययुक्तास्म्यतंद्रिता॥ सप्ताष्टदिवसास्त्वद्य विप्रस्येहागतस्य वै॥ तच्च कार्यं न मे ख्याति दर्शनं तव कांक्षति॥ गोम
त्यास्त्वेष पुलिने त्वद्दर्शनसमुत्सुकः॥ आसीनो वर्त्तयन् ब्रह्म ब्राह्मणः संशितव्रतः॥ अहं त्वनेन नागेंद्र सत्यपूर्वं समाहि

२४

२४४

ता॥ अस्याप्योमज्ञाकांशंसः सप्राप्तोभुजङ्गोत्तमः॥ एतच्छ्रुत्वामहाप्राज्ञा तत्रागंतुत्वमर्हसि। दातुमर्हसिवातस्य दर्शनंदर्श
नश्रवः॥ ॥शांतौमोक्षधर्मे॥ ॥नागउवाच॥ ॥अथ ब्रांह्मणरूपेण कं तंस्तमनुपश्यति। मानुषंकेवलं विप्रं देवाथसुवं
चिस्मिते को हि मां मानुषः शक्तो द्रष्टुकामो यशस्विनी॥ संदर्शनरुचिर्वाक्यमाज्ञापूर्वं वदिष्यति॥ सुरासुरगणानां च
देवर्षीणां च भाविनी॥ ननु नागा महावीर्या सौरसेयास्तरस्विनः॥ वंदनीयाश्च वरदा वयमप्यनुयायिनः॥ मनुष्याणां विशे
षेणानादेक्ष्य इति मे मतिः॥ ॥नागभार्योवाच॥ ॥आर्जवेनैन विजानामि नासौ देवोनिलाशन॥ एकं तस्मिन्विजाना
मि भक्तिमानतिरोषण॥ स हि कार्यांतराकांक्षी जले प्रस्तोककोयथा॥ वर्षवर्षप्रियः पक्षी दर्शनं तव कांक्षति॥ हित्वा
त्वद्दर्शने किंचिद्विघ्नं न प्रतिपालयेत्॥ तुल्योप्यभिजनेनातो न कश्चित्पर्युपासते॥ तद्रोषं सहजं त्यक्त्वा त्वमेवं द्रष्टु
मर्हसि॥ आंशाछेदेन तस्याद्य नात्मानं द्रष्टुमर्हसि॥ आशायाद्यभिपन्नानामकृत्वाश्रुप्रमार्जनं॥ राजा वा राजपुत्रो वा
भ्रूणहत्यैवयुज्यते॥ मौनेज्ञानफलावाप्तिर्दानेन च यशो महत्॥ वाग्मित्वं सत्यवाक्येन परत्र च महीयते॥ भूमिप्रदाने
न गतिं लभत्याश्रमसंमितं॥ न्यायस्यार्थस्य संप्राप्तिं कृत्वा फलमुपाश्नुते॥ अभिप्रेतामसंक्लिष्टां कृत्वा चात्महितां प्रि
यां॥ न याति निरयं कश्चिदिति धर्मविदो विदुः॥ ॥नागउवाच॥ ॥अभिमानेन मानो मे जातिदोषेण वै महान्॥ रोषसंक
ल्पजः साध्वि दग्धो वाचाग्निना त्वया॥ न च रोषादहं साध्वि पश्येयमधिकं तमः॥ तस्य वक्तव्यतां याति विशेषेण भुजंग
मः॥ रोषस्य हि वशं गत्वा दशग्रीवः प्रतापवान्॥ तथा शक्रप्रतिस्पर्द्धी हतो रामेण संयुगे॥ अंतःपुरगतं वत्से श्रुत्वा श्रु

लोरामेण निहतं ॥ धर्षणारोषसंविग्ना कार्त्तवीर्यसुताहताः ॥ जामदग्न्येन रामेण सहस्रनयनोपमः ॥ संयुगे निहतो रोषात्कार्त्तवीर्यो महाबलः ॥ तदेषत प्रसंगाशत्रुः श्रेयसा विनिपातिकः ॥ निगृहीतो मया रोषः श्रुत्वैवं वचनं तव ॥ आत्मानं च विशेषेण प्रशंसाम्यनपायिनि ॥ यस्या मे त्वं विशालाक्षि भार्या गुणसमन्विता ॥ एष तत्रैव गच्छामि यत्र तिष्ठत्यसौ द्विजः ॥ सर्वथा चोक्तवान्वाक्यं स कृतार्थः प्रयास्यति ॥ ॥ शांतौ मोक्षधर्मे ॥ ॥ भीष्म उवाच ॥ ॥ स पन्नगपतिस्तत्र प्रययौ ब्राह्मणं प्रति तमेव मनसा ध्यायन्कार्यवत्तां विचारयन् ॥ तमतिक्रम्य नागेंद्रो मतिमान्सवनैस्वच ॥ प्रोवाच मधुरं वाक्यं प्रकृत्या धर्मवत्सलः ॥ भो भो क्षाम्याम्यभिलाषे त्वां न रोषं कर्त्तुमर्हसि ॥ इह त्वमभिसंप्राप्तः कस्यार्थे किं प्रयोजनं ॥ आतिमुख्याद्भिक्रम्य स्नेहात्पृच्छामि ते द्विज ॥ विविक्ते गोमतीतीरे किं वा त्वं पर्युपासते ॥ ॥ ब्राह्मण उवाच ॥ ॥ धर्मारण्यं हि मां विद्धि नागं द्रष्टुमिहागतं ॥ पद्मनाभं द्विजश्रेष्ठं तत्र मे कार्यमाहितं ॥ तस्य चाहमसांनिध्यं श्रुतवानस्मि तं गतं ॥ स्वजनं तं प्रतीक्षामि पर्जन्यमिव कर्षपाः ॥ तस्य चाक्लेशकरणं स्वस्तिकारसमाहितं ॥ आवर्त्तयामि तद्ब्रह्म योगयुक्तो निरामयः ॥ ॥ नाग उवाच ॥ ॥ अहो कल्याणवृत्तस्त्वं साधुसज्जनवत्सलः ॥ अवाच्यस्त्वं महाभाग परं स्नेहेन पश्यसि ॥ अहं स नागो विप्रर्षे यथा मां विंदते भवान् ॥ आज्ञापय यथा स्वैरं किं करोमि प्रियं तव ॥ भवंतं स्वजनादस्मि संप्राप्तं श्रुतवानहं ॥ अतस्त्वां स्वयमेवाहं द्रष्टुमभ्यागतो द्विज ॥ संप्राप्तश्च भवानद्य कृतार्थः प्रतियास्यति ॥ विस्रब्धो मां द्विजश्रेष्ठ विनियोक्तुमर्हसि ॥ वयं हि भवता सर्वे गुणक्रीता विशेषतः ॥ यस्त्वमात्महितं त्यक्त्वा मामेवेहानुरुध्यसे ॥ ॥ ब्राह्मणः ॥ ॥

आगतोहं महाभाग तव दर्शनलालसः ॥ किंचिदर्थमनर्थज्ञः प्रष्टुकामो भुजंगम ॥ अहमात्मानमात्मस्थो मार्गमाणोत्म
नो गतिं ॥ वासार्थिनं महाप्राज्ञं चलचित्तमुपास्विह ॥ प्रकाशितः त्वं च गुणैर्यशोगर्भगभस्तिभिः ॥ शशांककरसंस्पर्शै
र्हृद्यैरात्मप्रकाशितैः ॥ तस्य मे प्रश्नमुत्पन्नं छिंधि त्वमनिलाशन ॥ पश्चात्कार्यं वदिष्यामि श्रोतुमर्हसि तद्भवान् ॥
॥ शांतौ मोक्षधर्मे ॥ ॥ ब्राह्मण उवाच ॥ ॥ विवस्वतो गच्छति पर्ययेण वोढुं भवांस्तं रथचक्रमेकं ॥ आश्चर्यभूतं यदित
त्र किंतदृष्टं त्वया शंसितुमर्हसि त्वं ॥ ॥ नाग उवाच ॥ ॥ आश्चर्याणामनेकानां प्रतिष्ठा भगवान् रविः ॥ यतो भूताः प्रवर्तंते
सर्वे त्रैलोक्यसंमताः ॥ यस्य रश्मिसहस्रेषु शाखास्विव विहंगमाः ॥ वसंत्याश्रित्य मुनयः संसिद्धा दैवतैः सह ॥ यतो
वायुर्विनिःसृत्य सूर्यरश्म्याश्रितो महान् ॥ विजृंभत्यंबरे तत्र किमाश्चर्यमतः परं ॥ विभज्य तं तु विप्रर्षे प्रजानां हितका
म्यया ॥ तोयं सृजति वर्षासु किमा० ॥ यस्य मंडलमध्यस्थो महात्मा परमत्विषा ॥ दीप्तः समीक्षते लोकान् किमा० ॥ शु
क्लो नामाशितःपादो यश्च वारिधरो वरे ॥ तोयं सृजति वर्षासु किमा० ॥ योष्टमासांस्तु किरणेनोज्झितं पयः ॥ प्रत्याद
त्ते पुनः काले किमा० ॥ यस्य तेजोविशेषेषु स्वयमात्मा प्रतिष्ठितः ॥ यतो बीजं मही चेयं धार्यते सचराचरं ॥ यत्र देवो
महाबाहुः शाश्वतः पुरुषोत्तमः ॥ अनादिनिधनो विप्र किमा० ॥ आश्चर्याणामिवाश्चर्यमिदमेकं तु मे शृणु ॥ विमले य
न्मया दृष्टमंबरे सूर्यसंश्रयात् ॥ पुरा मध्याह्नसमये लोकांस्तपति भास्करे ॥ प्रत्यादित्यप्रतीकाशः सर्वतः समदृश्य
त ॥ स लोकांस्तेजसा सर्वान्स्वभासा निर्विभासयन् ॥ आदित्याभिमुखोभ्येति गगनं पाटयन्निव ॥ हुताहुतिरिव ज्यो

भित्वा प्यतेजो मरीचिभिः॥अनिर्देश्येन रूपेण द्वितीयइव भास्करः॥तस्याभिगमनप्राप्तौ हस्तौ दत्तौ विवस्वता॥तेनापि
दक्षिणो हस्तो दत्तः प्रत्यर्चनार्थिना॥ततो भित्वैव गगनं प्रविष्टो रश्मिमंडलं॥एकीभूतंच तत्तेजः क्षणेनादित्यतां गतं॥
तत्र नः संशयो जातस्तयोस्तेजः समागमे॥अनयोः को भवेत्सूर्यो यो रथस्थो योयमागतः॥ते वयं जातसंदेहाः पर्यपृच्छ
महे वयं॥क एष दिवमाक्रम्य गतस्सूर्यइवापरः॥ ॥इतिशांतौ मोक्षधर्मे॥ ॥सूर्य उवाच॥ ॥नैषदेवो निलसखो
नासुरो न च पन्नगः॥उंछवृत्ते सिद्धो मुनिरेषदिवंगतः॥एषमूलफलाहारः शीर्णपर्णाशनस्तथा अब्भक्षो वायुभ
क्षश्च आसीद्विप्रः समाहितः॥भवृश्चानेन विप्रेण संहिताभिरभिष्टुतः॥ऋचश्चानेन विप्रेण संहिताभिरभिष्टुता॥स्व
र्गद्वारे कृतो योगो येनासौ त्रिदिवं गतः॥असंगतिरनाकांक्षी नित्यमुंछशिलाशनः॥सर्वभूतहिते युक्तः एषविप्रो
भुजंगमाः॥नहि देवान गंधर्वा नासुरान च पन्नगाः॥प्रभवंतीह भूतानां प्राप्तानामुत्तमां गतिं॥एतदेवंविधं दृष्टमा
श्चर्यं तत्र मे द्विजाः॥संसिद्धा मानुषः कामं योसौ सिद्धगतिं गतः॥सूर्येण सहितो ब्रह्मन्पृथिवीं परिवर्तते॥ ॥शांतौ
मोक्षधर्मे॥ ॥ब्राह्मण उवाच॥ ॥आश्चर्यं नात्र संदेहः सुप्रीतोस्मि भुजंगम॥अन्वर्थोपगतैर्वाक्यैः पंथानंचा
स्मि दर्शितः॥स्वस्ति ते स्तु गमिष्यामि साधो भुजगसत्तम॥स्मरणीयोस्मि भवता संप्रेषणनियोजनैः॥ ॥नाग उवाच॥
॥अनुक्त्वा हृद्गतं कार्यं क्वेदानीं प्रस्थितो भवान्॥उच्यतां द्विज यत्कार्यं यदर्थं त्वमिहागतः॥उक्तानुक्ते कृते कार्ये मामा
मंत्र्य द्विजर्षभ॥मयाप्रत्यभ्यनुज्ञातस्ततो यास्यसि सुव्रत॥न हि मां केवलं दृष्ट्वा त्यक्त्वा प्रणयवानिह॥गंतु

मर्हसि विप्रर्षे वृक्षमूलगतो यथा ।। त्वयि वाहं द्विजश्रेष्ठ भवान्स्थिन संशयः ।। लोकोयं भवतः सर्वकामिं तामयितेन
घ ।। ।।ब्राह्मणउवाच ।। ।।एवमेतन्महाप्राज्ञ विदितात्म भुजंगम ।। नातिरिक्तास्त्वया देवाः सर्वथैव यथायथं ।।स
एवत्वं स एवायं योहं स्ततुभवानपि ।। अहं भवांश्चभूतानि सर्वे यत्र गताः सदाः आसीत्तु मे भोगपते संशयः पुण्य
संचये ।। सोहमुंछव्रतं साधो चरिष्याम्यर्थसाधने ।। एषमे निश्चयः साधो कृतंकारणमुत्तमं ।। आमंत्रयामि भ
द्रं ते कृतार्थोस्मि भुजंगम ।। ।।शांतौ मोक्षधर्मे ।। ।।भीष्मउवाच ।।।। सचामंत्र्योरगश्रेष्ठं ब्राह्मणः कृतनि
श्चयः ।। दीक्षाकांक्षी तदा राजन् च्यवनं भार्गवं श्रितः ।। सतेन कृतसंस्कारो धर्ममेवाश्रितस्तदा ।। तथैव च क
थामेतां राजन्कथितवांस्तदा ।। भार्गवेणापि राजेंद्र जनकस्य निवेशने ।। तथैव कथिता पुण्या नारदाय महा
त्मने ।। नारदेनापि राजेंद्र देवेंद्रस्य निवेशने ।। कथिता भरतश्रेष्ठ पृष्टेनाक्लिष्टकर्मणा ।। देवराजेन पि कृ
पुरा कथितैषा कथा शुभा ।। समस्तेभ्यः प्रशस्तेभ्यो विप्रेभ्यो वसुधाधिप ।। यदा च मम रामेण युद्धमासी
त्सुदारुणं ।। वसुभिश्च तदा राजन्कथेयं कथिता मम ।। पृच्छमानाय तत्वेन मया चैवोत्तमा तव ।। कथेयं क
थिता पुण्या धर्मो षर्मभृतां वर ।। यदयं परमो धर्मो यन्मां पृच्छसि भारत ।। आसीद्वीरो ह्यनाकांक्षी धर्मा
र्थकरणेनृप ।। सचकिल कृतनिश्चयो द्विजो भुजगपतिप्रतिदेशितात्मकृत्यः ।। यमनियमसहावनां

ततंपनिगणितो छशिल्काशनैःप्रविष्टः॥ शांतौ मोक्षधर्मेषु उछवृत्तिंसमाप्ता॥ पर्वसमाप्तं॥१॥ ॥१
इदंपुस्तकं शंकराजिपंडितस्य॥१॥ ॥१॥

```
[OrderDescription]
,CREATED=11.12.19 14:42
,TRANSFERRED=2019/12/11 at 15:53:26
,PAGES=455
,TYPE=STD
,NAME=S0002327
,Book Name=M-2043-AAPDHYATAM MOKSHDARM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
```

```
FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
```

```
FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
```

```
FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
```

```
FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
```

```
FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
```

```
FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
```

```
FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
```

```
FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
```

```
FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
```

```
FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
```

```
FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
```

```
FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
```

```
FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
```

```
FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
```

```
FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
```

```
FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
```

```
FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
```

```
FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
```

```
FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF
```

```
FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
```

```
FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
```

```
FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,
```